Digitized by Arya Samaj Foundation Chennai and eGangotri

SURIOYODAYA 1968

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Digitized by Arya Samaj Foundation Chennai and eGangotri

112601

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सूर्योदयः

भारतधर्ममहामण्डलस्य

मासिकं मुखपत्रम्

वर्षम् ४४

अङ्कः १

सम्पादकः

गो० न० वैजापुरकरः

जनवरी

१९६८

वार्षिक-मूल्यम्

५) रूप्यकाणि

प्रत्यङ्क-मूल्यम्

अर्धरूप्यकम्

स्वतन्त्रतेयं नास्ति खेलनम् ?

स्वतन्त्रतेयं नास्ति खेलनम्, स्वतन्त्रतेयं लोह-चर्वणम् !

१.

अस्याः कृते 'प्रतापो' वीरः, त्यक्त्वा सौधं वनं प्रयातः,
शूरः 'शिवराजो' ऽपि जीवने युद्धान्नैव विराम प्राप्तः,
'झाँसीश्वरी' कृतवती वीरा, लक्ष्मीरपि जीवन-बलिदानम् !

२.

नैको, द्वौ, त्रयः, सैनिका अत्रागणिताः पतन्त्याहुतौ,
महान् भवति रक्षाया भारस्तस्मादस्याः देशसन्ततौ,
दक्षस्तिष्ठ विहायाऽऽलस्यं, महाकठिनमस्याः, सुरक्षणम् !

३.

अस्याः कृते लौह-पुरुषाणामेवाऽपेक्षा, न तु विलासिनाम्,
अथ चापेक्षा कर्मयोगिनां, राष्ट्रसेविनां, न प्रलोभिनाम्,
ते दूरं व्रजन्तु शीघ्रं, ये कर्तुमशक्ता मृत्योर्वरणम् !

—डा० शिवशरण शर्मा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अनुक्रमः

प्रपातकम्	पत्रपुटम्	परिवेषकः
वितरतु करुणामयीं दृशं तरणिः	१	श्री स्व० म० म० रामशास्त्री तैलङ्गः
श्री महर्षि-ज्ञानानन्द-चरितम्	२	श्री विन्ध्येश्वरीप्रसाद शास्त्री
चतुश्चत्वारिंशत्तमे वर्षे अस्माकमावश्यकता	३	सम्पादकीयः अग्रलेखः
पन्त-शती-समारोहः	५	सम्पादकीया टिप्पणी
दशमो दीक्षान्त-समारोहो दीक्षान्त-भाषणं च	६	श्री 'अङ्गारः'
यशश्शरीराः श्री नित्यानन्द पन्तपादाः	८	श्री गोपालदत्त शास्त्री पाण्डेयः
श्री लालबहादुरशास्त्रिणां स्मृतिः	९	श्री रामकृष्ण शर्मा
पुरुषसूक्त-श्रीसूक्तयोः परमं तात्पर्यम्	१०	श्री पूज्य करपात्रस्वामिनः
(३९) क्षत्रपति-महाकाव्यम्	१२	श्री उमाशङ्कर शर्मा त्रिपाठी
(२) शिशिर-विलासः सव्याख्यः	१४	श्री लक्ष्मीनारायण द्विवेदः डॉ० हरिदत्त पालीवालश्च
(१) मानस-भारती : आरण्यकाण्डयम्	१६	श्री जनार्दन गङ्गाधर रटाटे
जनसंख्या - वृद्धेः निदानं वास्तवोपायश्च	१८	श्री बालचन्द्र दीक्षितः
कवि - कालिदासः	२०	श्री कपिलदेव त्रिपाठी
देवी-भागवतमेव महापुराणम्	२१	श्री सरयूप्रसाद शास्त्री 'द्विजेन्द्र'
महर्षता महामाये ... ... !	२३	श्री रामस्वरूपशास्त्री 'अमरः'

ग्राहकेभ्यो निवेदनम्

'सूर्योदय' स्य अनेन अङ्केन ४४ तमं वर्षं प्रारभ्यते । अद्यावधि यैः ग्राहकैः नववर्षीयं शुल्कं न प्रेषितं स्यात्, ते अङ्कप्राप्तेः समनन्तरमेव ५) रूप्यकात्मकं तत् शीघ्रं प्रेषयन्तु इति ।

—व्यवस्थापकस्य

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

112601

सूर्योदयः

श्री भारतधर्ममहामण्डलस्य मासिकं मुखपत्रम्

रागद्वेषनिशाटनं विधुरयन् मोहं तमो नाशयन्,
तामिस्रं जडवादकैरवकुलं भानत्विषा ग्लापयन्।
विद्वत्कोकमशोकयन् नयसुधीरोलम्बमुन्मीलयन्,
सञ्जातः सुमनोमनो मधुरयन् सर्वत्र सूर्योदयः॥

[१ अङ्कः

SURJOYODAYA

112601

G. K. V.
Lib
HARDWAR

ऽढ्यः।
दशतु ॥ १ ॥
द्राक्।
स्रवतु ॥ २ ॥
तस्य।
यात् ॥ ३ ॥
णिः।
निःश्रेयसस्य सरणिर्वितरतु कल्याणमयीं दृशं तरणिः ॥ ४ ॥
मुनिजन-मानसवासः सारस-सङ्घस्य हासमातन्वन्।
विहरतु दहराकाशे चिरतरमस्माक-मुत्तमो हंसः ॥ ५ ॥

—स्वर्गीयाः महामहोपाध्याय-श्री रामशास्त्रितैलङ्गपादाः—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

11260

सूर्योदयः

श्री भारतधर्ममहामण्डलस्य मासिकं मुखपत्रम्

रागद्वेषनिशाटनं विधुरयन् मोहं तमो नाशयन्,
तामिस्रं जडवादकैरवकुलं ज्ञानत्विषा ग्लापयन्।
विद्वत्कोकमशोकयन् नयसुधीरोलम्बमुन्मीलयन्,
सञ्जातः सुमनोमनो मधुरयन् सर्वत्र सूर्योदयः॥

४४ वर्षे] वाराणसी, पौषः, २०२४ : जनवरी १९६८ ई०

वितरतु करुणामयीं दृशं तरणिः

सरसीरुहोपविष्टः कुण्डल - केयूर - मुकुट-कटकाऽऽढ्यः।
स्वर्ण-सवर्ण-शरीरः सशङ्ख-चक्रो रविः शिवं दिशतु॥ १॥
उस्रैः सहस्रसङ्ख्यै-रजस्र-मुत्सारयं-स्तमिस्रं द्राक्।
अस्रप-हिंस्र-चरित्रो घस्रमणिर्नः सुखामृतं स्रवतु॥ २॥
त्राता नमज्जनानां दाता महतः फलस्य ललितस्य।
धाता महसां सविता सुखितामर्मितां धुतामयः पायात्॥ ३॥
संसार-घोरसागर-तरणिः कल्याण-तेजसा - मरणिः।
निःश्रेयसस्य सरणिर्वितरतु कल्याणमयीं दृशं तरणिः॥ ४॥
मुनिजन-मानसवासः सारस-सङ्घस्य हासमातन्वन्।
विहरतु दहराकाशे चिरतरमस्माक-मुत्तमो हंसः॥ ५॥

—स्वर्गीयाः महामहोपाध्याय-श्री रामशास्त्रितैलङ्गपादाः—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्री महर्षि-ज्ञानानन्द-चरितं महाकाव्यम्

—श्री विन्ध्येश्वरीप्रसाद शास्त्री—

धर्मस्य चैतस्य सनातनस्य कलावुपेक्षां गमितस्य नित्यम् ।
पुनः समुद्धार-विवेक-विद्या-विस्तार-गीर्वाणगवी प्रचाराः ॥ ११ ॥

१२. धर्मात्मभू - भारत - भूमिभाग-
संस्थापितानां परिषत्सभानाम् ।
स्वधर्म - सेवैक - परायणानां
सांग्रन्थनार्थं च नियन्त्रणार्थम् ॥

१३. महासभाया निज-धर्म-जाति-
सेवा-विधात्र्या विविधैः प्रकारैः ।
संस्थापनं चेति बहूनि तस्या
उद्देश्यजातानि सुनिश्चितानि ॥

१४. त्रिकालदर्शी स यतिर्महर्षि-
र्हिन्दी भवेद् भारत-राष्ट्रभाषा ।
इत्यन्तरङ्गे सुविचिन्त्य तस्यां
प्रकाशिताः पुस्तक-पुस्तिकाश्च ॥

१५: कौमोददात्री निगमागमानां
प्रचारिका तन्मुखपत्रिका च ।
अन्वर्थनाम्नी गिरिचन्द्रिकाऽस्यां
प्रकाश्यतोद्देश सुसिद्धयेऽस्याः ॥

१६. वसूनि हित्वा न विधेयसिद्धिः
सर्वाः क्रियाः काञ्चनमाश्रयन्ते ।
अतो यतिः सङ्ग्रहणे वसूनां
सांव्यापृतोऽभूत् किल निःस्पृहोऽपि ।

१७. अर्था महानर्थ - निदानभूता
यतिः पतेत् काञ्चन-सङ्ग्रहेण ।
असन्ति कार्याण्यपि भावशुद्ध्या
सद्धर्मरूपाणि भजन्ति किन्तु ॥

१८. तपो न कल्कोऽध्ययनं न कल्कः
स्वाभाविको वेदविधिर्न कल्कः ।
प्रसह्य वित्ताहरणं न कल्क-
स्तान्येव भावोपहतानि कल्कः ॥

१९. असाधुलोकादिह योऽर्थजात-
मादाय संयच्छति साधवे च ।
प्लवं विधाया-ऽऽत्मवपुः प्रकृष्टं
संतारयत्येष भवाम्बुधिं द्वौ ॥

प्रशस्तमाप्तं स्मृति-शास्त्रसिद्धं सिद्धान्तमेनं हृदि संविभाव्य ।
त्यक्तैषणो धर्मधुरां स वोढुं वसूनि हेयानि न निश्चिकाय ॥ २० ॥

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चतुश्चत्वारिंशतमे वर्षे अस्माकमावश्यकता

परायाः श्रद्धायाः व्रततिततेः प्रत्यग्रः पेशलतरः प्रथमः सुमनोञ्जलिरयं जगल्लीला-नायकस्य भगवतः पादयोः विकीर्यते यत्कृपापाङ्गविस्फूर्जितः 'सूर्योदयो' रुद्रं चतुर्गुणीकृतानां वयसां विरावैस्तत्र भवतां हार्दिकं स्वागतं व्याहर्तुं समुपस्थितः। सार्वजनीनः चिरादावर्तितश्चायं प्रत्ययो यत् सद्योजातः सद्यो विजृम्भमाणो वा प्रसवस्तथा सहृदयहृदयानि सौगन्ध्येन सरसेन वा रूपेण नावर्जयति, यथा घनासारस्नापितो मन्द-मधुरमारुतेन अक्लीन्नीकृतो बहुतर-रविक्रियया विपाचितश्च च्योतद्रसः अक्षणोर्घ्राणस्य च सममेव परितर्पणं कुर्वत् प्रसवान्त इति। विगतेषु हायनेषु यथासुलभैरुपायनैः सुदुर्लभं जनता-जनार्दन-सेवाधर्मं समाचरन् सूर्योदयोऽयमद्य तद्व्रतं पुनर्नवीकर्तुं प्रस्थितस्तत्र भवतां चिरमथनमथितं नवनीतमुपायनीकुर्वतां वन्द्यपादानां लेखकानां रसमाधुरी-समास्वादनरसिकानां पाठकानां स्नेहच्छायया अन्तरायातपं परिहरतां कृपालुनां ग्राहकानुग्राहकाणां हार्दिकं सक्रियं सहयोगं समभिवाञ्छति। आशास्ते च वितरणैकव्यसिनः सहृदयाः सर्वे तत्तत्सहयोगवितरणे मनागपि कार्पण्यं न भजिष्यन्तीति।

भाषाज्ञान-प्रसारक्षेत्रे पत्र-पत्रिकाणां कियन्मूल्यमिति तु नाद्य विवेचनमपेक्षते। सुपरिचिताः सर्वे भारतीया विषयेनानेन। परं यद्यस्माभिः भारतीय-संविधानानुगृहीतभाषासु अन्यतमा संस्कृतभाषाऽपि निर्धारिता, तदा तत्प्रचारणं तस्याः सर्वथा तदनुरूपतापादनं च अनिवार्यतां भजते। देववाणी इयं भारतीय-संस्कृतेर्मानबिन्दुरूपा, भारतस्य अनन्यगतार्थो निधिः, निखिल - वैश्विक - भाषाणां जननीति अन्य एवायं विषयः। उपर्युक्तदृष्ट्याऽपि संस्कृतभाषायाः प्रचार-प्रसारणं शासनस्य प्रजाजनस्य चानुपेक्ष्यं कर्तव्यं भवति। पत्र-पत्रिका एता नियोजनेऽस्मिन् सर्वतोऽधिकाः सहायिकाः, नास्त्यत्र संशीतिलेशः। अतस्तासां सर्वप्रकारेण उज्जीवनं सुस्थीकरणञ्च शासनस्य प्रजाजनस्य च परमं कर्तव्यम्। किन्तु विचार्यमाणे उभयोरपि विषयेऽत्र अनपेक्षिता उपेक्षा दरीदृश्यते।

साक्षरेषु भारतीयेषु भूयसा प्रवृत्तिरियं जागर्ति यत्कामं विषयान्तरेषु व्यर्थं जलवत् धनं प्रवहेत्, साहित्य-पठनव्यसनं विशेषतः पत्र-पत्रिकावाचनस्य उत्कण्ठा च यथा अमूल्यं शाम्येत, तथैव प्रयतनीयम्। केनाप्येकेन क्रीतं पत्रं पुस्तकं वा समादाय शतशस्तं पठन्तस्ते स्वात्मनः परमं साहित्य - व्यसनं तर्पयन्ति। विभिन्नभाषीय - नवनव - वाङ्मयस्य व्यापकरूपेण प्रसारे संग्रहणे च प्रवृत्तिरियमतितराम् अन्तरायायिता। संस्कृत - वाङ्मयविषये पुनरियं सर्वथा अभिशापप्रायैव।

सत्यमेतत् यत्संस्कृताध्यायिनो विद्वांसश्छात्राश्च प्रायो निस्स्वाः कथमपि जीवनयात्रामतिवाहयन्ति। कामं तेषां विषयोऽन्यो भवतु, परं भारतीय-केन्द्रीय-राज्यीय-शासनैः अनुदानादिना नववेतनक्रमेण च समनुगृहीता विद्वांसः, पाठशालाः, शासकीयवृत्तिभाजः, अनुसन्धानादिकार्येषु व्यापृताश्छात्राश्च यद्येकं संस्कृतं पत्रं समूल्यं ग्रहिष्यन्ति तदा नूनं संस्कृतपत्राणां संस्कृतभाषीयस्य नवनववाङ्मयस्य च वृद्धिर्भवेत्। अनुदानप्रदातृभिस्तत्त-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

च्छासनैरेते आदातारः सव बाधिताः क्रियेरन् तदैव ते अत्यावश्यकेऽस्मिन् विषये प्रवृत्ता भविष्यन्ति। अनिच्छद्भिरपि प्रासङ्गिकमिदं महता खेदेन सूच्यते यन्नैकेभ्यः शासकीयानुदानभाग्भ्यो विद्यालयेभ्यः, पुस्तकालयेभ्यः क्षमेभ्यो विद्वद्भ्यश्च द्वित्रि-चतुर्भिः वर्षैः नियमतोऽमूल्यं 'सूर्योदयः' प्रेष्यते। परं बहुभिः नैतद्विचारितं यदस्य प्रकाशने कोऽपि व्ययो जायत एव, तत्र च अस्माकमपि सहयोगदानं नैतिककर्तव्यान्तर्गतं भवतीति। मूल्य-प्रेषणस्य कथा तु दूरे एवास्ताम्, पत्रं संप्रेष्य नियमतः पत्रासादनविषये शाब्दिका - धन्यवादानामपि प्रेषणे तैः कार्पण्यं प्रदर्श्यते, किमतः परं संस्कृत-पत्र-पत्रिकाणां दौर्भाग्यम्!

वस्तुतः संस्कृतप्रणयिनः प्रत्येकस्य जनस्य कर्तव्यमेतद् यत्स्वशक्त्यनुसारं स्वभावतः स्वल्पतमं वार्षिकं शुल्कं संप्रेष्य संस्कृतपत्राणां ग्राहकसंख्या अधिकाधिकं वर्धनीया। व्यावसायिकैः संस्कृत-प्रणयिभिः स्वीयव्यवसाय-विज्ञापनप्रकाशनमुखेनास्मै आर्थिकः सहयोगो देयः। कर्णमनुकुर्वद्भिः लक्ष्मी-पुत्रैः स्वीयदानसरित एका धारा अत्रापि प्रवाह्या। इत्थं जनता-निर्भरं सत् किमपि पत्रं प्रचलेत् तदा तत्सर्वथा लोकतान्त्रिकपद्धति-प्राणपदेन लोकाधारेण परिनिष्ठितं भवेत्। किमिदमाशंसितुं शक्नुयामो यत् लोकतन्त्रप्रणयिनो भारतीयाः संस्कृतसमुन्नयन-कामिनः स्तोकमप्यत्र अभिक्रमं प्रदर्शयिष्यन्तीति?

साक्षात् शासकीयानुदानविषयेऽप्यस्माभिः किं वक्तव्यम्? केन्द्रीयशासनेन विगतेषु वर्षेषु प्रायः सार्धसहस्रत्रय-रूप्यकमितमनुदानं दीयते स्म। परं गतवर्षद्वयतः तेनाऽस्मै एकः पणकोऽपि न दत्तः। फलतो महर्घता-पिशाची-महाट्टहास-विकरालेऽस्मिन् काले स्वीयसाधन-सम्पत्तेः अपर्याप्ततामालक्ष्य विवशतः पत्रेणानेन विगताऽगस्तमासतः स्वीयं कलेवरम् अष्टभिः पृष्ठैः सूक्ष्मीकृतम्। विगता-ऽक्तूबरमासाङ्केऽस्माभिः एतद्विषये सम्पादकीय-टिप्पण्यां स्वाभिमतमपि प्रकटितम्। तथापि अद्यावधि शासनस्य कोऽपि सक्रियः क्रमोऽत्र न दृश्यते, नापि ज्ञायते।

चतुश्चत्वारिंशद्वर्षेभ्यो जनता-जनार्दनस्य सेवां विदधताऽनेन पत्रेण कियत्तपः कृत्वा विविधाश्च असुविधाः सोढ्वा संस्कृत-पत्र-पत्रिकाक्षेत्रे निखिले भारते यादृशं गौरवमयं पदमासादितं तत्संस्कृत-प्रणयिनां न तिरोहितम्। एतादृशस्य पत्रस्य संस्कृत-समुन्नयनाभियानमयेऽस्मिन् काले शासनद्वारा प्रजाद्वारा वा ईदृशं समुपेक्षणं कामपि अनपेक्षितां वचनीयतां ख्यापयति।

अस्माभिरस्य पत्रस्य समुन्नयनाय विशेषतो देववाणी-सेवाद्वारा भारतीयानां सांस्कृतिकनिधेः सुरक्षाये व्यावहारिकी सुव्यवस्थिता योजनैका निर्ध्याता वर्तते। विषयेऽत्र समासतो वक्तव्यं चेद् एतदेव यत् पत्रमिदमन्यूनम् ८० मितपृष्ठैः प्रतिमासं प्रकाश्य नियतदिने अखिले भारते पाठकानां हस्तेषु समासादितं स्यात्। निरूपणीयानां विषयाणां दृष्ट्या पत्रस्य भागद्वयं प्रकल्प्य प्रथमे भागे प्राचीनपरम्परा-नुरूपं गम्भीरं स्थायि च वाङ्मयं दीयेत। पश्चिमे च भागे आधुनिक-युगानुरूपं साहित्यं सङ्गृह्येत। यथा—मासाभ्यन्तरे घटितानां प्रमुखाणां राष्ट्रिया-ऽन्ताराष्ट्रिय-घटनानां समालोचनात्मकं मार्मिकं विवेचनम् (रिव्यू), भारतीय संविधानानुगृहीत-भाषाणामन्यतमायाः श्रेष्ठतमकथाया अनुवादः संस्कृतगल्प-सूक्त्यादिकस्य सरलसाहित्यस्य मौलिक-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

युगानुरूपपरिवेषे प्रकाशनम्, संस्कृतक्षेत्रीय-निखिल-भारतीयगतिविधेः समाकलनम्, संस्कृत नववाङ्मयस्य परिचयः, बालसाहित्यम्, महिला-साहित्यम्, कविता-पाठः, अपभ्रंश-पाली-प्रभृति-प्राचीनभाषा-शिक्षाः, क्रीडनकम्, कला इत्येवमादयः। इत्थं सचित्रं सर्वविधप्राचीनाऽऽधुनिक - विषयोपबृंहितं पत्रमुपायनीकर्तुमस्माभिर्बहोः कालात् निर्ध्यातमस्ति । परम् 'उत्पद्यन्ते विलीयन्ते·····इत्याभाण, कानुसारं सर्वमप्येतद् अस्माकं चेतसि एव तिष्ठति । नाद्यावधि मूर्ततां गतम् ।

वस्तुतः भारतीयं शासनं राज्यशासनानि वा यदि भारतस्यास्य अमूल्यनिधेः देववाण्यास्तत्त्वतो विकासं वाञ्छन्ति, तदा तेषां प्रथमं कर्तव्यमेतत् यत्प्रतिराज्यं पूर्वोक्तविविधविषयैः समन्वितमेकं मासिकं पाक्षिकं वा पत्रं प्रकाशनीयम् । पत्रस्यास्य प्रकाशनस्य सर्वोऽपि आर्थिको भारः केन्द्रीय-शासनेन राज्यशासनैश्च वोढव्यः । संस्कृतभाषा वास्तविकं संवैधानिक-भाषारूपं तदैव बिभृयात्, यदा साम्प्रतिक-व्यवहार-विषयकाः शब्दाः साहित्यञ्च तयाऽऽत्मसात्कृतं भवेत् । आधुनिक-व्यवहारानुरूप-शब्द-वाङ्मयाःभावे भाषाया अस्याः संवैधानिक-भाषान्यतमतानिर्धारणं विडम्बनम्, छद्मविलसितञ्च भवेत् । यदि शासनमेतदर्थं स्वल्पमप्युत्साहं प्रदर्शयेत्तदा 'सूर्योदयः' तत्प्रातिनिध्येन अस्मादृशाः संस्कृतप्रणयिनश्च सर्वथा सहयोगाय सन्नद्धाः । अस्य प्रात्यक्षिकः प्रत्ययस्तु अनेनैव भवेद् यदि केन्द्रशासनं राज्यशासनञ्च पूर्वोद्धृतयोजनानुसारं पत्रमेकम् आदर्श-संस्कृतपत्ररूपेण उपायनीकर्तुं पत्रायास्मै आगामिवर्षे समपेक्षितं विपुलमार्थिकं साहाय्यं स्वीकुर्यात् । आशास्महे, अनेन महता वागाडम्बरेण सर्वोऽपि विषयस्तेभ्योऽवगतो भवेत् । इदमपि दृढया निष्ठया विश्वस्यते यदत्र केन्द्रीय-संस्कृतसमिति-सदस्याः संस्कृतशिक्षाविशेषाधिकारी, शिक्षामन्त्र्यालयः, राज्यशिक्षाविभागाः, प्रादेशिक-शिक्षानिदेशकादयश्च सावहिता भूत्वा अरण्यरोदनादेतं निवेदनं संगोप्य शीघ्रं किमपि मूर्तं पदमाक्रमिष्यन्तीति ।

पन्त-शती-समारोहः

विगत-दिसम्बरमासस्य अन्तिमे सप्ताहे वाराणस्यां अनन्तश्रीमतां ब्रह्मीभूतानां सुगृहीतनामधेयानां प्रातःस्मरणीयानां श्री नित्यानन्द पन्त पर्वतीयपादानां शती-समारोहः समायोजितोऽभवत्, यस्य विवरणमस्मिन्नेवाङ्केऽन्यत्र प्रकाशितमस्ति । नूनमस्योपक्रमस्य कृते शती-समारोहस्य आयोजका धन्यवादार्हाः । देशेऽस्मिन् राजनैतिक-नेतॄणां शताब्दिमहोत्सवो महता उत्साहेन समायोज्यते । परं नैका राजनीतिरेव समाजस्य जीवितम् । विद्या विद्वांसश्चाऽपि समाजस्य प्रमुखतमा घटकाः । तेषामपि शती - समारोहः पुण्यस्मरणायोजनानि नूनं समायोजनीयानि । महामहोपाध्यायादि-विरुदावलीभूषितानाम् अभिनव-वाग्देवतावताराणां सर्वश्री बालशास्त्रि-गङ्गाधरशास्त्रि-दामोदरशास्त्रि-शिवकुमार मिश्र - शिरोमणिमहाशय - प्रभृतीनामपि एवमेव शती-सार्धशत्यादि-समारोहायोजनं तेषां शिष्य-प्रशिष्याणामावश्यकं कर्तव्यम्, यच्च नित्यानन्दशती-समायोजकैः कृत्वा समुपदिष्टम् । अनेन नव्या चेतना पाण्डित्यासादनस्य स्पर्धा च वर्धते । एभिरेव शब्दैः वयं पूज्यपादानां पन्तमहाभागानां चरणयोः सादरं श्रद्धाञ्जलिं समर्पयामः । ★

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दशमो दीक्षान्त-समारोहो दीक्षान्त-भाषणं च

—श्री अङ्गारः—

दिसम्बर - मासस्य ३१ दिनाङ्के वाराणसेय-संस्कृत-विश्वविद्यालयस्य दशमो दीक्षान्तसमारोहः समपद्यत। दीक्षान्तसमारोहस्य आध्यक्ष्यं प्रादेशिक-राज्यपालैः श्री रेड्डी महोदयैः कृतम्। दीक्षान्त-भाषणाय पुण्यपत्तनतः सुगृहीतनामधेयाः प्राच्य-प्रतीच्य - विद्याविभूषिताः महाभारत - प्रधान-सम्पादकाः श्री वैद्य परशुराम लक्ष्मणशर्माणः समाहूता आसन्। उत्सवास्य प्रसङ्गे ११दिनेभ्योऽर्वागेव नैकानि क्रीडा-शास्त्रार्थ-व्याख्यानादि-प्रतियोगितात्मकानि आयोजनानि सम्पन्नानि। तेषु दर्शनपरिषदोऽधिवेशनमुल्लेख्यतमम्। परिषदि अस्यां व्याकरण-दर्शन - तन्त्रागम - सन्तवाङ्मयादि - विविधविषयाणां गोष्ठ्यः विशिष्टविदुषां माध्यस्थ्ये सम्पन्नाः। भारतस्य विभिन्नप्रदेशभ्यः समागतैर्नैकैः विद्वद्भिः प्रवचनानि कृतानि। नैकेषां विदुषां विभिन्न-विषयेषु गवेषणात्मका निबन्धा अपि समागता आसन्। इत्थं दर्शनपरिषदियं महता आटोपेन सम्पन्नेति वक्तुं शक्यते।

दीक्षान्त - समारोहे दीक्षान्त - भाषणं कुर्वद्भिः श्री वैद्यमहाभागैः 'स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम्' इत्यमुं तैत्तिरीयं वैदिकानुशासनं समाश्रित्य स्नातकाः समुपदिष्टाः। अपारोऽयं ज्ञानराशिः। शास्त्राणि पुनरनन्तानि। तद्दृष्ट्या शतवर्षीयं जीवनमपि स्वल्पतमम्। सत्येवं दश द्वादश वा वर्षैः समधीत्य शास्त्रविशेषस्य शाखाविशेषे आचार्य-पदवीमासादितवतां स्नातकानां शास्त्रविशेष-विज्ञता-पूर्ति - विषये किमु वक्तव्यम्? अत एव प्राच्यानामाचार्याणां समुचित एवायमुपदेशो यत् यावज्जीवं स्वाध्याय-प्रवचनाभ्यां न प्रमदितव्यमिति। वैद्यमहाभागैरयमेव विषयो नैकैः प्रमाणैः युक्तिभिश्चात्र साधितः। व्याकरणविषये तैरुक्तं यद् व्याकरणानि किल अष्टौ प्रख्यातानि। तेष्वेकस्यैव पाणिनीयस्य, तत्रापि ग्रन्थविशेषणामेव अद्यावधि भवद्भिः अध्ययनं कृतम्। अतः कृतकृत्यैर्भूत्वा अग्रे अध्ययनक्रमनिरोधो नूनमनपेक्षितः स्यात्। स्थाली - पुलाक-न्यायेन इयमेव स्थितिः सर्वशास्त्राणामस्ति। वैद्यमहाभागैः अपभ्रंश-पाली-प्रभृतिभाषाणामपि अध्ययनस्य आवश्यत्वं संसाध्य विश्वविद्यालये यथाशक्ति यत्किञ्चिदत्र प्रयत्यते, तत्र स्वीयं समाधानं प्रकटितम्। ग्रन्थसम्पादन-प्राचीनमातृकोद्धरण - प्रकाशन - प्रक्षिप्तांशनिर्धारणादिविषयेष्वपि वैद्यमहाभागैः ये विचाराः सूचनाश्च समुपन्यस्ताः, ताः किल सर्वथा आधिकारिकाः, तैः 'कृत्वा समुपदिष्टाः' इति नूनम् अनुसरणीयाः स्नातकैः सावहितैः।

श्री वैद्यमहोदयैः प्रवचनेऽस्मिन् विवादास्पदमपि किमपि चर्चितम्। 'पाणिनीय-व्याकरणाद् अन्यान्यपि व्याकरणानि सन्ति। तेषां दृष्ट्या पाणिनीय-व्याकरणेन असाधुत्वेन घोषिताः शब्दा अपि साधु जायन्ताम्' इति हि तेषां मतम्। परं विचारणीयमेतत् यद् व्याकरणस्य मुख्यमुद्दिष्टं प्राचीनप्रचलितं वाग्व्यवहारं दृष्ट्वा भाषानियन्त्रणमेव। स्पष्टमेतत् पाणिनीय-व्याकरणसदृशमन्यं किमपि व्याकरणं नाव्यभिचरितनियमम् सत्येवं तेषां कियत् प्रामाण्यं भाषानियन्त्रणे इत्यपि नूनं विचारणीयम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अन्यच्च, वैद्यमहोदय-मतानुसारम् असाधुशब्दैः अर्थबोधसम्भवेन तदनुग्रहस्य युक्तत्वमित्यपि न नाविमतम्। 'न म्लेच्छितवै नापभाषितवै' इत्यादि-श्रौतनिर्देशानुसारं धर्मसाधनमेव साधुशब्द-प्रयोगस्य फलम्। न च तदसाधुशब्दैः कथमपि साध्यमिति धर्माधिष्ठिते देववाणी-वाङ्मये असाधु-शब्दाः कथमपि ग्राह्यतां न भजन्ते। माननीयैः वैद्यैः **एवं साध्वौ प्रयोक्तव्ये**·····इत्यादि-वाक्यपदीयवचनं समुल्लिख्य असाधुशब्दानामपि साधुशब्दानु-मानमुखेन व्युत्पत्त्याधायकत्वमुक्तम्। तदपि पूर्व-पक्षरूपं नैयायिकादिमतम्। सिद्धान्ततो वाक्य-पदीकारो धर्माजनकत्वेन असाधुशब्दप्रयोगं सर्वथा परिहरत्येवेति विवेकोऽप्यत्र अनुसन्धेयः।

अष्टाध्यायी-पद्धतेः समर्थनं कुर्वद्भिः वैद्यमहा-भागैः सिद्धान्तकौमुदीकारा बाढम् उपालब्धाः। वस्तुतः स उपालम्भः प्रक्रियाकौमुदीकाराय तैः प्रदेयो यमादर्शीकृत्य धातुपाठ-गणपाठादि-संवर्धन-मुखेन भट्टोजी दीक्षितेन सिद्धान्तकौमुद्यां तदेव विवृतम्। अन्यच्च, शब्दसाधुत्वार्थं निर्मितसूत्राणां यथा कौमुदीप्रक्रियया सारल्येन सार्थक्यं जायते, न तथा सुदूराध्यायेषु पठितैः नैकैः पाणिनीय-सूत्रैः शब्दसाधने सारल्यम्। अन्ततोऽष्टाध्यायी-पद्धति-पक्षपातिनामपि पृथक् शब्दसाधकानां नवग्रन्थानां रचना आवश्यकी समभवदित्यप्यत्र विचारणीयम्।

मनोरमा - शेखर - मञ्जूषादि - व्याकरणग्रन्थाः जागदीशी - गादाधरीप्रभृति-न्यायग्रन्थाश्च शास्त्रार्थ-प्रधाना अनर्थका इत्यपि मतं अविचार-विलसितं प्रतिभाति। एते किल वर्तमान-गवेषण (रिसर्च)-कल्पाः सन्ति। विचारक्रमस्तत्र तत्र एतदवधि समु-पागत इति को नाम नाभिनन्देत ? कस्यापि शास्त्र-विशेषस्य समग्रविशेषाध्ययनदृष्ट्या तत्सर्वथा समुपादेयमेव।

यदि वैद्य महाभागाः सामान्यतो भारतीय-संस्कृतवाङ्मयज्ञानासादनदृष्ट्या विचारयन्ति तदा-तेषामेतन्मतं सर्वथा श्रद्धेयम्। व्यक्तिशोऽस्माकमपि इदं मतं यत् व्याकरण- न्याय - साहित्यादिविष-याणां समन्वितः प्राथमिको माध्यमिकश्च कश्चन पाठ्यक्रमो निर्धारणीयो यं सामान्यतः संस्कृतवाङ्-मयपरिचयेच्छवः पठन्तु। ये किल तत्र विषय-विशेषे प्रौढं पाण्डित्यमासादयितुं वाञ्छन्ति तेषां कृते एते एव शास्त्रार्थप्रधाना ग्रन्था वरदा भवेयुः। अन्ततः पाश्चात्यशास्त्रेष्वपि विषयविशेषे तल-स्पर्शि - प्रौढपाण्डित्यभृतो वर्तन्त एव, ये किल अन्येषु विषयेषु प्रायोऽनभिज्ञकल्पा इव। नैतावता तेषां श्रमो मुधा मन्यते। यदा विषयविशेषे कश्चिद् गूढतरः प्रश्नः समुपस्थितो भवेत् तदा एतैर्विषय-विशेषविशेषज्ञैः कृतं सकृदपि समाधानं तेषां समग्रं श्रमं सार्थकं कुर्यात्, तेषां पोषकाणाञ्च सर्वथा अधमर्णा भवेयुः सर्वे राष्ट्रियाः। विचारस्वातन्त्र्य-दृष्ट्या सर्वथा सद्भावभावितैरस्माभिरत्र यत्किम-प्युपन्यस्तम्, तत्र विज्ञाः कमप्यन्यथा-भावमकुर्वन्तो नूनमवधास्यन्तीति आशास्महे।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यशश्शरीरः श्री गिरिधरपन्तपादाः

----श्री गोपालदत्त शास्त्री पाण्डेयः----

[संस्कृतविभागाध्यक्षः—नैनीतालस्थ-राजकीय-स्नातकोत्तर-महाविद्यालयस्य]

विद्वत्प्रसूरियं वाराणसी । अस्यां नगर्यां सर्वतन्त्रस्वतन्त्र-मतिवैभवशालिनः संख्यातीता अपि संख्यावन्तः संख्यावन्तः समभूवन् । तथापि विश्वस्मिन् गौरवमयैः त्याग-दया-परोपकारादिभिः मानवोचितैः चारित्र्याधारकैर्गुणैरन्वितानां विपदपश्चिमानां संख्या अङ्गुलिगणना-परिमितैव । त्यागवैदुष्ययोरेकाश्रयलाभो नाम दुर्लभ एव दृश्यते जगति । परन्तु ब्रह्मीभूते नित्यानन्दपन्तमहोदये यादृशं त्यागमयं चरित्रबलं दृग्गोचरीक्रियते तादृशमेव चेतश्चमत्कारि वैदुष्यमपि चक्षुर्विषयीक्रियते । उभयोरस्मिन् विद्वद्रत्ने सामानाधिकरण्यं साक्षात्कृत्य न कस्य मानसं विस्मयोल्लासबहुलां वृत्तिमातनुते ? इत्थं च अस्य महाभागस्य अगाधलोकोत्तरपाण्डित्यरूपं विकासं प्राप्तवति हृत्पुण्डरीके महाँस्त्यागः सुगन्धिरिवासीत् । एतद्वैशिष्ट्यमस्मिन्नेव महानुभावे नयनगोचरीभूतं यदनेककोटिदीनाराधिपतीनामनवरतं सेवाऽऽह्वाऽभ्यर्थनोन्मुखानामपि मनसि स्वसम्पत्तिसञ्जाताभिमानानां नितरां समुत्सारणम् । विद्वत्समाजसम्मानितोऽसौ ज्ञानामृतपानसन्तुष्टान्तःकरणः आपतितायामपि महत्यां सांसारिक्यां फलोन्मुख-जन्मान्तरीयकर्मसम्पादितायां भोगादेव क्षयिण्यां विपत्सन्ततयां मनागपि विचलितो न भवति स्म ।

प्रातःस्मरणीयस्य-पण्डितप्रवर- नित्यानन्दपन्तमहोदयस्य जन्म १९२४ वैक्रमेऽब्दे पौषकृष्णत्रयोदश्यां काश्यामेव समभवत् । चरित्रनायकस्य श्रीमतः पर्वतीयपादस्य प्रपितामहः षड्दर्शननिष्णातोऽपि वेदान्त-धर्मशास्त्रयोर्विशेषज्ञः अल्मोड़ा-मण्डलान्तर्गत-तिलाड़ीग्रामात् काशीवासमिच्छन् वाराणसीमाजगाम् । अत्रागत्य जनसम्मर्दवति नगरे तपोहानिं मन्यमानो विविक्तायां वरणानदीसमीपवर्तिन्यां कस्याश्चित् पर्णशालायां सपरिवारं निवसति स्म । तत्रापि अयाचितवृत्तिमनुसरन् प्रत्यहं विप्राह्मणभोजनपुरस्सरं सपरिवारस्य स्वस्य निर्वाहमकरोत् । अन्ते योगबलेन गङ्गागोमत्योः सङ्गमस्थले मार्कण्डेयेश्वरे समाधिस्थोऽभवत् । अमुष्य प्रपौत्रः कथं नाम विलक्षणविचक्षणो न स्यात् ? पूज्यचरणस्य पण्डित-नित्यानन्दपन्तमहोदयस्य पितामहस्य त्रिलोचनशर्मणः, पितुश्च नामदेवपन्त-महाभागस्य जन्मस्थानमियमेव शिवनगरी बभूव ।

आजन्मनो दुर्बलत्वात् मातामहस्यास्य महानुभावस्य विशेषानुरोधेन 'विद्याकामस्तु पञ्चमे' इत्युक्तेः स्वारस्यमनुसन्दधानो जनको नामदेवः पञ्चवर्षीये वयसि यज्ञोपवीतसंस्कारमकरोत् । काव्यकोष-वेदाध्ययनानन्तरं कुशाग्रबुद्धिमेनं बालकं पिता वाग्देवतावताराय कविताकान्तारकण्ठीरवाय महामहोपाध्याय-पण्डित-गङ्गाधरशास्त्रिणे समर्प्य निश्चिन्तोऽभूत् । गुरुचरणौ सेवमानो नित्यानन्दपन्तमहोदयो यावदष्टादशवर्षं सातत्येन शास्त्राणि सम्यगधीत्य शब्दशास्त्रे किमपि वैशिष्ट्यं भजमानो षड्दर्शनधर्मशास्त्रादिष्वपि तथैव सामरस्यं विदधानो भृशं समतोषयदसौ गुरुं गङ्गाधरम् । कुशाग्रबुद्धेरेतस्य अधोगतिमूलभूतानेकविधप्रपञ्च-

[शेषांशः १७ पृष्ठे [

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्री लालबहादुर शास्त्रिणः स्मृतिः

जननीचरणाम्बुजेषु नत्वा निजपत्नीं सुहृदश्च सान्त्वयित्वा ।
शमधीः शममादधातुकामः प्रययावुत्तरदिग् - विमानमेत्य ॥ १ ॥
विहगोऽपि विहाय नीडमेवं प्रतिचारं डयते स्वतोकशान्त्यै ।
अपि नाम कथा विचिन्तनीया यदि नायाति कुतोऽपि सायमेषः ॥ २ ॥
चपलाहति - मन्यपादपाली विषहेतापि न जीर्णशुष्कसाली ।
जरठा जननी तदेकजीवा कथमाहन्त गलान्तवागुदेति ॥ ३ ॥
अतिदुर्घट - पाकदेशवादं शमपारं यदसावुपानिनाय ।
सुमनस्त्वमसुष्य सूचयत्तत् परदेशेष्वपि कीर्तिमातनोति ॥ ४ ॥
रणवारण - वातविप्लवानामपि मन्त्राचरणं निवारणं स्यात् ।
इति सन्मतिमेष मन्त्रिवर्यो वितथार्थां प्रथयाञ्चकार मन्त्रैः ॥ ५ ॥
रजनीचरमार्धभागमागात् शयनीयं स च वीतकृत्यभारः ।
नियतेर्नियमं विवेद को वा स हि नो वेद निशान्तमेव शान्तः ॥ ६ ॥
किमु भारतमातरेवमासीद् धृदि ते सुनुवरस्य शास्त्रिणः स्यात् ।
स्वपुरीप्रतियान - घोषयात्रा स्वपरान्तं प्रति यानघोषयात्रा ॥ ७ ॥
रणवारणमेव भारतीयैर्हृदि नो धर्म इहेति 'पाक' - नेतुः ।
विनयेन नयेन येन तेने तनयो भारतरत्नमेष किन्नु ॥ ८ ॥
ननु तानवमेव दैवनिघ्नं मनुजानां महिमा स्वयत्नसिद्धा ।
निजमानससद्गुणौघभासां प्रतिभासाः खलु मन्दहासभासः ॥ ९ ॥
इति 'लालबहादुर - स्त्वमात्यो निजजीवोन्नति-सन्निदर्शनेन ।
प्रकटीकृतवान् महान् स्वराज्य-प्रणये प्राणपणार्पणेन पुण्यः ॥ १० ॥
शतवत्सरमाहुरायुषोऽन्तं मुनयस्तत्तु तदा यथार्थमासीत् ।
अधुना न तथानुभूयतेऽस्मिन् विधिना किन्वपराद्धमीषदेतत् ॥ ११ ॥
दृढ-हेममयो गुणोऽपि भारैस्त्रुटनादेव निवेदितात्मशक्तिः ।
अतिसूक्ष्मतया शरीरवाहः किमिव प्राणगुणो ह्यमेयशक्तिः ॥ १२ ॥
प्रथमः सचिवो हि नेहरुश्चेदनु को वा भवतीति चिन्तितं च ।
स हि लालबहादुराख्यशास्त्री पदमारुह्य तदीयमेवमैषीत् ॥ १३ ॥
ऋतवः सकलाः समानरूपाः किमु लोके मनुजाः समानुभावाः ।
अनुरूपागुणानुभूतिरेव द्रढयत्युत्तम - मध्यमादिभावम् ॥ १४ ॥

—श्री रामकृष्ण शर्मा—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पूर्वतोऽनुवृत्तः

पुरुषसूक्त-देवीसूक्तयोः परमं तात्पर्यम्

—श्री पूज्य करपात्रस्वामिनः—

तस्मादश्वा अजायन्त ये के चोभयादतः।
गावो ह जज्ञिरे तस्मात् तस्माज्जाता अजावयः॥
(ऋ० १०.९०.१०)

अर्थः—तस्मादश्वा अजायन्त इति। वेदाविर्भाववर्णनात् तत्प्रतिपाद्यस्य यज्ञस्यापि सृष्टिरुक्ता भवति। तदर्थं यज्ञोपयोगि-पदार्थसृष्टिरप्युच्यते। तस्माद् ब्रह्मणः। अत्र तस्मादित्यस्य जनिधातोश्च पुनःपुनरुपादानं स्थानावान्तर - भेदप्रदर्शनार्थम्। तदुक्तं विष्णुपुराणे प्रथमांशे पञ्चमाध्याये—'गायत्रञ्च ऋचश्चैव त्रिवृत्स्तोमं रथन्तरम्। अग्निष्टोमञ्च यज्ञानां निर्ममे प्रथमान्मुखात्। यजूंषि त्रैष्टुभं छन्दः स्तोमं पञ्चदशं तथा। बृहत्साम तथोक्थ्यञ्च दक्षिणादसृजन्मुखात्॥ सामानि जगती च्छन्दः स्तोमं सप्तदशं तथा। वैरूपमतिरात्रञ्च पश्चिमादसृजन्मुखात्॥ एकविंशमथर्वाणमाप्तोर्यामाणमेव च। अनुष्टुभञ्च वैराजमुत्तरादसृजन्मुखात्' इति (५३–५६)। 'अवयो वक्षसश्चक्रे मुखतोऽजान् स सृष्टवान्। सृष्टवानुदराद् गाश्च पार्श्वाभ्याञ्च प्रजापतिः॥ पद्भ्यां चाश्वान् समातङ्गान् रासभान् गवयान् मृगान्। उष्ट्रानश्वतरांश्चैव न्यङ्कूनन्यांश्च जातयः' इति (४८–४९)। तस्मात् पूर्वोक्तात् यज्ञाद् अश्वाः अजायन्त उत्पन्नाः। तथा ये के च अश्वव्यतिरिक्ता गर्दभा अश्वतराश्च, उभयादतः ऊर्ध्वाधोभागयोः दन्तयुक्ताः सन्ति तेऽप्यजायन्त। तथा तस्मात् यज्ञात् गावश्च जज्ञिरे। किञ्च तस्मात् अजावयश्च जाता इति॥ १०॥

यत् पुरुषं व्यदधुः कतिधा व्यकल्पयन्।
मुखं किमस्य कौ बाहू का ऊरू पादा उच्येते॥
(ऋ० सं० १०.९०.११)

अर्थः—यत्पुरुषमिति। यज्ञानुष्ठायिनां ब्राह्मणादीनामुत्पत्तिरुच्यते। यत् यदा पुरुषं ब्रह्माख्यं व्यदधुः। पशुमित्यध्याहार्यम्। पशुत्वेन अकल्पयन्। तत् तदा। कतिधा कतिप्रकारविशिष्टम्। व्यकल्पयन्, बहुवचनं छान्दसम्। अथवा यत् यदा पुरुषं मनुष्यं व्यदधुः अकल्पयन् असृजतेत्यर्थः। तत् तदा। कस्मात् कस्मात् स्थानात् कीदृश-कीदृशप्रकारविशिष्टमकल्पयन्। यद्वा—पुरुषं मनुष्यं यत् यदा व्यदधुः, तत् तदा कतिधा व्यकल्पयन्। मनुष्याद्युपादानभूतं चतुर्मुखशरीरं कतिविभागविशिष्टमकल्पयन्। अस्य मुखं किंरूपमासीत्, कार्यकारणभावमूलकं सामानाधिकरण्यमत्र। मुखादुत्पन्नं किमित्यर्थः। एवं किं बाहू, किमूरू, किं पादौ उच्येते?

प्रश्नोत्तररूपेण ब्राह्मणादिसृष्टिं वक्तुं ब्रह्मवादिनां प्रश्ना उच्यन्ते। प्रजापतेः प्राणरूपा देवाः, यत् यदा, पुरुषं विराड्रूपं व्यदधुः सङ्कल्पेन उत्पादितवन्तः, तदानीं कतिधा कतिभिः प्रकारैः व्यकल्पयन् विविधं कल्पितवन्तः। अस्य पुरुषस्य मुखं किम् आसीत्। कौ बाहू अभूताम्। कौ ऊरू, कौ च पादा उच्येते?

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रथमं सामान्यरूपः प्रश्नः, पश्चात् मुखं किम् इत्यादिना विशेषविषयाः प्रश्ना इति ॥ ११ ॥

ब्राह्मणोऽस्य मुखमासीद् बाहू राजन्यः कृतः ।
ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजायत ॥

(ऋ० सं० १०.९०.१२)

अर्थः—ब्राह्मणोऽस्येति । अथैषां प्रश्नानामुत्तराण्याह । ब्राह्मणः अस्य चतुर्मुखस्य मुखम् आननम् आसीत् । मुखादुत्पन्नो ब्राह्मण इत्यर्थः । ब्राह्मणस्य वक्ष्यमाणसर्वविषयेषु उत्तमात् मुखादुत्पन्नत्वोक्त्या तस्य अन्यवर्णापेक्षया स्वत एव उत्तमत्वं सूचितम् । मुखव्यापारभूतवेदाध्ययनादिप्रधानत्वं मुखवीर्यत्वञ्च व्यञ्जितम् । बाहुः राजन्यः क्षत्रियः कृतः । क्षत्रियो बाहोरजायतेत्यर्थः । बाहुजत्वाद् ब्राह्मणापेक्षया न्यूनत्वं बाहुव्यापारभूत-युद्धादिप्रधानत्वं बाहुवीर्यत्वञ्च प्रतीयते । वैश्य इति यद् तदस्य ऊरू । अस्योरुभ्यां वैश्योऽजायतेत्यर्थः । ऊरुजत्वाद् वैश्यस्य क्षत्रियापेक्षया न्यूनत्वमवगतम् । पद्भ्यां पादाभ्यां शूद्रः अजायत । शूद्रस्य पज्जातत्वात् सर्ववर्णापेक्षयाऽपि निकृष्टत्वं लब्धम् । पादकार्यभूत-गमनागमनादिव्यापारश्च सूचितो भवति ।

इदानीं पूर्वोक्तानां प्रश्नानामुत्तराणि दर्शयति—अस्य प्रजापतेः ब्रह्मणः ब्राह्मणत्वजातिविशिष्टः पुरुषः मुखम् आसीत्, मुखादुत्पन्न इत्यर्थः । योऽयं राजन्यः क्षत्रियत्वजातिमान् पुरुषः सः बाहूकृतः । बाहुत्वेन निष्पादितः, बाहुभ्यामुत्पादितः । तत् तदानीमस्य प्रजापतेः यत् यौ ऊरू तद्रूपो वैश्यः ऊरुभ्यामुत्पन्न इत्यर्थः । तथा अस्य पद्भ्यां शूद्रः शूद्रत्वजातिमान् पुरुषः अजायत । इयञ्च मुखादिभ्यो ब्राह्मणादीनामुत्पत्तिः यजुःसंहितायां सप्तमकाण्डे 'स मुखतस्त्रिवृतं निरमिमीत' (तै० सं० ७.१.१.४) इत्यादौ विस्पष्टमाम्नाता । अतः प्रश्नोत्तरे उभे अपि तत्परतयैव योजनीये इति ॥ १२ ॥

चन्द्रमा मनसो जातश्चक्षोः सूर्यो अजायत ।
मुखादिन्द्रश्चाग्निश्च प्राणाद्वायुरजायत ॥

(ऋ० सं० १०.९०.१३)

अर्थः—चन्द्रमा मनस इति । एवं यज्ञकर्तॄणामुत्पत्तिम् उक्त्वा यष्टव्यदेवतोत्पत्तिमाह—अस्य चतुर्मुखस्य मनसः चन्द्रमाः शीतांशुः जातः उत्पन्नः । चक्षोः चक्षषः सूर्यः सर्वार्थप्रकाशकरो भानुः अजायत । इन्द्रश्च परमैश्वर्यवान् देवतासार्वभौमः शचीपतिः, अग्निश्च देवानां मुखस्थानीयः अनलः, अजायतामिति विपरिणतस्यानुषङ्गः । प्राणात् सर्वप्राणनहेतोः चतुर्मुखरूपधरस्य भगवतः प्राणात् वायुः सर्वप्राणनहेतुभूतः अजायत । यथा दध्याज्यादिद्रव्याणि गवादयः पशवः ऋगादिवेदा ब्राह्मणादयो मनुष्याश्च तस्मादुत्पनाः, एवं चन्द्रादयो देवा अपि तस्मादेवोत्पन्नाः । प्रजापतेः मनसः सकाशात् चन्द्रमा जातः । चक्षोः सूर्यो चक्षुषः सूर्योऽपि अजायत । अस्य मुखादिन्द्रश्च अग्निश्च देवौ उत्पन्नौ । अस्य प्राणाद् वायुरजायत ॥ १३ ॥ (क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्षत्रपति-महाकाव्यम्

—श्री उमाशंकरशर्मा त्रिपाठी—

[आंग्लभाषा-प्राध्यापकः—काशी-विद्यापीठम्, वाराणसी]

मिथः प्रतीपव्यवहारताप-
प्लुष्टाखिलात्मावनिपातशापम् ।
रुणद्धि यो धर्मजयाभिलेख-
स्तम्भच्छलेनोदित - शौर्यबाहुः ॥३६॥

कृषीवलश्चाकरमद्भुतानां
ध्रुवं मणीनामिव सद्गुणानाम् ।
कथं विजानातु तमार्यपान्थं
गूढप्रभावं सरलानुभावः ॥३७॥

परं नृपो लक्षणवेदिनां स-
स्तथा निगूढात्मपरिच्छदोऽपि ।
चेतोऽनुषङ्गोदितगन्धधाम्ना
प्रसूनगुच्छ - प्रतिम - श्चकर्ष ॥३८॥

एवं तमङ्गीकृतदेशसेवं
सेव्यप्रभावं पथि सेवमानाः ।
ज्ञात्वाऽपि चित्ते सुधियो ररक्षुः,
मन्त्रं यथाकल्पितभावगुप्तिम् ॥३९॥

मनोऽनुतापानिव वासरान्ते
विनोदयन्तौ विविधानुबन्धैः ।
शैत्यावदाते पुलिने द्युसिन्धोः
सम्बोधिता वर्त्मबुधेन भूयः ॥४०॥

वाराणसीं प्रति—

यत्पांसुरागे प्रथितो विरागो
रजोहरा यद्रजसां विभूतिः ।
कैलासबन्धोस्तपसां प्रतिष्ठा
वाराणसीयं श्रुतिकामधेनुः ॥४१॥

वक्षःस्थलं भारतवर्षभूमेः
पीठस्थली ब्रह्मगिरां पुराणी ।
मदान्धमालिन्यविलोलपङ्के
चिन्तामणिः कोऽपि मनुष्यलोके ॥४२॥

पदं निधायाऽपि शशाङ्कमौलेः
शिरस्यपर्णा सहजं हसन्ती ।
देवापगा यत्पदरेणुरागैः
स्वजन्मसाफल्यमिवाऽऽवृणोति ॥४३॥

शरीरिणोऽपीष्टपथप्रतीपाः
जीवातुमुन्मुच्य रजस्सु यस्याः ।
भ्राजिष्णु पारे रजसां स्वधाम
विमुक्तबन्धाः सहजं लभन्ते ॥४४॥

अभ्रंलिहैरूर्ध्व - शिरोभिराचि-
क्रताऽऽर्यभाग्यैरिव मन्दिरैर्या ।
दुरोदराचारभरेऽपि काले
स्वात्मस्थिता तापमपाकरोति ॥४५॥

त्रिवर्गवोढा कलितोऽपि धर्मो
मुक्ताग्रहो लोकमताग्रहेषु ।
भावस्थितोऽन्तःकरणप्रसादो
निरस्तधूरुच्छ्वसतीव यत्र ॥४६॥

अद्वैतसावित्रमहो विनोदे
सामानि यत्राभकमुग्धवक्त्रे ।
देवापगा नर्मसखी च पार्श्वे
मुक्तिर्भुजिष्येव नताङ्घ्रिपद्मे ॥४७॥

—१. 'जग्राह पुष्पस्तबकानुकारः' इति पाठान्तरम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

निश्शेषशास्त्रश्रमलब्धकीर्ते-
रत्राऽतिथेर्ज्ञानवतोऽपि तेजः ।
बालार्ककल्पं बहुमन्यवेक्ष्य
मन्दायते दीपवरस्य नूनम् ॥४८॥
भगीरथस्याऽमृतकीर्तिगाथा
तेजोद्भवोऽमर्त्यनदी विधातुः ।
प्रसादमूर्तिर्हिमरश्मिमौले-
रद्यैकक्षेव सवितृसूनोः ॥४९॥
स्वर्सिन्धुलोलोच्चलदुर्मिसिक्तः
प्रकीर्णरेणूत्सवमण्डितो वा ।
यत्रावमुक्तोऽपि न वेत्ति वायू
रजोऽथवा गाङ्गपयो गरीयः ॥५०॥
चलत्तरङ्गाञ्चल - नीयमानै -
र्नक्षत्रकल्पैरिव दीपलोकैः ।
आकाशगङ्गामिव यां पुरन्ध्र्यः
स्वच्छाम्बराः सान्ध्यविधौ श्रयन्ति ॥५१॥
धुरा महिम्नां परयाऽऽर्यदेशो
महीयते यद्वसुधाऽभिमानः ।
तद्धेतुभूता त्रय एव नूनं
भागीरथी - शैलगुरुः श्रुतिश्च ॥५२॥
गङ्गातरङ्गाऽञ्चित - वायुधन्यां
लतापिनद्ध - द्रुमराजिदुर्गाम् ।
तटीयपद्यां पाथिकान् प्रयातो
विन्ध्यं विलोक्याऽध्वविदेवमाह ॥५३॥
प्रत्यन्तशैलैः परितः स्फुरद्भिः,
भीमान्धकारच्छदि - काननैश्च ।
क्वचित् पतन्निर्झर - वारिनादैः
सुदुर्गमा हिंस्रकुलैश्चरद्भिः ॥५४॥
मनोज्ञ - पुष्पाञ्जलिभि - र्लताभिः,
निषेव्यमाना सफलै - र्द्रुमैश्च ।
प्रसादरागा - दुपतिष्ठमाना
वनान्तलक्ष्मीः फलपुष्पहस्ता ॥५५॥
निम्नोन्नतासु भृशमुत्सुकेव
मुहुः स्खलन्ती विषमस्थलीषु ।
वीक्ष्याऽऽर्यपान्थानियमातिथेयी
विन्ध्याटवी स्वागतमातनोति ॥५६॥
सोमेन धात्रा प्रथितोऽपि लोके
पूर्वं विवाहाद् दुहितुर्नगेन्द्रः ।
सदाऽम्बिकाऽऽवास-विविक्तपीठ-
मात्मोत्तरं विन्ध्यमुरीकरोति ॥५७॥
दिवानिशं सम्भृतसत्त्वसख्यो
यत्राऽम्बिकादर्श इवाऽऽश्रमेषु ।
तपस्विहस्ताऽऽहत - केसरालिः
सिंहोऽन्तरायान् विधुरीकरोति ॥५८॥
अदृष्टसूर्येषु गुहोदरेषु
युक्तात्मनामात्मतमोऽहितानाम् ।
स्वयंप्रकाशैर्मणिभिः फणीन्द्राः
नीराजनामारचयन्ति यत्र ॥५९॥
हिमालये सर्वमहीध्रमौला -
वाबद्धसंरम्भ - मतेरिवाऽस्य ।
स्वर्वाहिनी तद्भुदयप्रतिष्ठा -
पाद्यैः स्वयं सान्त्वविधिं तनोति ॥६०॥
सौन्दर्यसूते - र्जगदम्बिकायाः
पुरो ह्रिया स्तब्धधिया प्रसह्य ।
सुराङ्गनानां न विलासलीला
हिनस्ति धैर्यं व्रतिनां गणस्य ॥६१॥
ग्रीवप्रथायामवनौ प्रसूतः
स्वातन्त्र्यदृप्तः पुरुषार्थसारः ।
प्रत्येति कुत्रापि जनो न लोके
शौर्यस्थितिं विन्ध्यभुवं विहाय ॥६२॥

[क्रमशः]

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शिशिर-विलासः | सव्याख्यः

मूललेखकः—
श्री लक्ष्मीनारायण द्विवेदः

—व्याख्याकारः
डॉ० हरिदत्त पालीवालः

निजशीतलता - गुणपोष-करैः
सहजाऽपि निमित्तजतां द्रवता।
सलिलैर्गमितेति कथं जडता
न कृतातपतो द्रुतिभाञ्जि यतः ॥ ५ ॥

निजेति। निजशीतलता-गुणपोषकरैः निजो यः शीतलतागुणस्तस्य पोषकराणि, पोषः पुष्टिस्तां कुर्वन्ति तच्छीलानि तैस्तथाभूतैः, सलिलैः सहजाऽपि सांसिद्धिक्यपि, द्रवता निजो द्रवत्वगुणः कर्म, निमित्तजतां निमित्तेन हेतुना जाता निमित्तजा नैमित्तिकी तद्भावं निमित्तजतां नैमित्तिकत्वं, गमिता नीता। इति इत्थंकारं, कथं किं, जडता मूढता शीतला च न कृता? अपि तु कृतैव। यत्स्वाभाविकस्यापि शीतस्पर्शगुणस्य पोषणातिशयात् स्वाभाविकोऽपर आत्मीयो विशेषगुणो द्रवत्वधर्मे नैमित्तिकतां नीत इति महान् दोष उत्पादितः, इत्येषा सलिलानां जडता जलजातीयता मूर्खता चेत्युभयधर्मो दुर्वारो दोषात्मकः प्रत्यक्षतां नीतः। यतः यत्कारणात्। सलिलानि इति पदमध्याहार्यम्। आतपतो हेतोः, आतपात् आतपेन वेति विग्रहे 'पञ्चम्यास्तसिल्' इति तसिल्। 'आद्यादिभ्य उपसंख्यानम्' इति तृतीयान्तात् तसिर्वा। आतपेन निमित्तेनेत्यर्थः। द्रुतिभाञ्जि द्रुतिं द्रवत्वं भजन्तीति द्रुतिभाञ्जि द्रवत्ववन्ति भवन्तीत्यर्थः। जलानां स्वाभाविकं यद् द्रवत्वं तदतिपुष्टेन शीतगुणेन बाधितम्। अत एव जलानि तुषार-शिलाभावं गतानि। पुनश्चातपेन हेतुना जलेषु द्रवत्वोत्पत्तिः। तस्मात् तद्द्रवत्वं स्वाभाविकतां विहाय नैमित्तिकरूपतां प्राप्तमित्येष जलानामात्मकृत एव दोषः। अति सर्वत्र वर्जयेत्, जले हि शीतस्पर्शो गुणः सांसिद्धिकं द्रवत्वं च गुणः। तदुक्तम्—'वर्णः शुक्लो रसस्पर्शौ जले मधुरशीतलौ। स्नेहस्तत्र द्रवत्वं तु सांसिद्धिकमुदाहृतम्' इति, 'सांसिद्धिकं द्रवत्वं स्यान्नैमित्तिकमथापरम्। सांसिद्धिकं तु सलिले द्वितीयं क्षितितेजसोः॥' नैमित्तिकं वह्नियोगात् तपनीयं घृतादिषु' इति च॥ ५॥

गिरिराज - ललाट - ललामपदं
श्रयताऽपि मणिच्छविकीर्तिमुषा।
तुहिनाकृतिना सलिलेन पुनः
क्षरताऽऽपि पदं वत भूमितले ॥ ६ ॥

गिरिराजेति। तुहिनाकृतिना तुहिनमाकृतिर्यस्य तत्तथाभूतेन हिमरूपेण, गिरिराजललाट-ललामपदं गिरिराजो हिमालयस्तस्य ललाटं मस्तकं मूर्धशिखरमिति यावत्। तदेव ललामपदं श्रेष्ठस्थानं 'ललामोऽस्त्री ललामापि प्रभावे पुरुषे ध्वजे। श्रेष्ठ-भूषाशुण्ड-शृङ्ग-पुच्छ-चिह्नाश्व-लिङ्गिषु' इति। श्रयता भजतापि। अत एव मणिच्छविकीर्तिमुषा मणीनां छविः कान्तिस्तस्याः कीर्तिं मुष्णातीति मणिच्छविकीर्तिमुट् तेन। अपीति पदमत्रापि सम्बद्ध्यते। महतां मौलिगतः काचोऽपि मणिकीर्तिं प्राप्नोतीतिवत्,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तथास्थितेन सताऽपि, सलिलेन, क्षरता स्रवता सता, भूमितले भूमावधः, पदं स्थानं आपि प्राप्तम्, आप्ल धातोः कर्मणि लुङि त-प्रत्यये रूपम्। वतेति खेदातिशय-व्यञ्जकम्। जडपामरस्य उच्चपद-प्राप्तावपि स्वभावदोषाद् अधस्पदमेव प्राप्तं भवतीति भावः ॥ ६ ॥

शिशिरत्वगुणेन पयो गमितं
गुरुभूभृदधीश्वर - मूर्ध्नि पदम्।
चपलत्वगुणेन निजेन विलं
स्वगुणोपचयापचया जगती ॥ ७ ॥

शिशिरत्वेति। शिशिरत्वगुणेन कर्तृभूतेन, पयो जलं, गुरु-भूभृदधीश्वरमूर्ध्नि गुरवो गौरवशालिनश्च ते भूभृतः पर्वतास्तेषामधीश्वरो हिमवान् गुरुतमोऽद्विराजस्तस्य मूर्ध्नि शिरसि शिखरे, पदं स्थानं प्रधानकर्मभूतं, गमितं प्रापितम्। पुनश्च निजेन स्वकीयेनैव चपलत्वगुणेन पयः तदेव प्रयोज्यकर्मभूतं विलं पातालं, गमितम्। जगती जनः 'जगती भुवने क्ष्मायां छन्दोभेदे जनेऽपि च' इति मेदिनी। स्वगुणोपचयापचया स्वे निजा ये गुणा लक्षणानि तैरेवोपचयापचयौ उन्नत्यवनती यस्याः सा तथाभूता। वर्तत इति शेषः। विशेषेण सामान्य-समर्थनरूपोऽर्थान्तरन्यासः, अन्त्ययमकश्च अलङ्कारः ॥ ७ ॥

पथिकः पथि गन्तुमना अधुना
शयनं तु विहाय न धर्तुमनाः।
अवनौ चरणं न विहङ्गगणो-
ऽपि विहातुमनाऽतरुतो निलयम् ॥ ८ ॥

पथिक इति। अधुना शिशरे पथि गन्तुमना गन्तुं मनो यस्य स तथा सन्नपि शयनं तु विहाय अवनौ चरणम्, अपीति शेषः। धर्तुमना न किं पुनश्चलितुम्। विहङ्गगणोऽपि, तरुतो वृक्षात् निलयं नीडं विहातुमनास्त्यक्तुकामो न इति प्रातस्तन-शीतबाहुल्यं सूच्यते ॥ ८ ॥

शनकैः शनकैः सजवः सजवः
प्रवहन् प्रवहन् पवनः पवनः।
समये समये वनजे वनजे
कुरुतेऽकुरुते सननत् सननत् ॥ ९ ॥

शनकैरिति। शनकैः शनैरेव शनकै शनैः शनैरेव पूर्व मन्दमन्दमेवेत्यर्थः, 'अव्ययसर्वनाम्नामकच्प्राक्टेः' इति शनैश्शब्दस्याकच्, ततः सजवः सजवः जवेन वेगेन सह वर्तत इति सजवः, क्रमशो जवादप्यधिकं जवं धारन्निति द्विरुक्त्यर्थः, प्रवहन् प्रवहन् क्षणान्तरं दत्वा पौन:पुन्येन प्रवाहगतिं प्रवर्धयन्निति द्विरुक्त्याशयः। पवनः पवनं शोधनं कर्म यस्य सः, अर्श आदित्वं परिकल्प्य अच्प्रत्ययः। पवनो वायुः समये समये काले काले पूर्वाह्ण-ऽपराह्ण-मध्याह्न-निशीथेषु, कुत्सितं कुरुतं चीरिकादीनाम् तन्नास्ति यस्मिन्सोऽकुरुतस्तस्मिन् अकुरुते वनजे वनजे तरौ तरौ सननत् सननत् इति वायोः शब्दानुकरणं 'डाचि बहुलम्' इत्यत्र बहुलग्रहणादन्यत्रापि द्वित्वम्, कुरुते ॥ ९ ॥

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मानस-भारती : देवगिरा गुम्फितं मानसम्

--श्री जनार्दन गङ्गाधर रटाटे--
[बी. ए., साहित्याचार्यः]

॥ अथ अरण्यकाण्डम् ॥

सीतालक्ष्मणसंयुक्तं वन्दे रामं पथि स्थितम् ।
कृपाकटाक्षतो यस्य पूर्ति - रारण्यकाण्डिकी ॥

उमे रामचन्द्रस्य गूढा गुणांस्तान्
विदित्वा बुधास्तापसाः स्युर्विरक्ताः ।
परं प्रेम येषां न धर्मे परां ये
हरेस्ते तु मुह्यन्ति मूढा अतीव ॥

पौराणां भरतस्याप्यनुपमा प्रीतिरीश्वरे ।
यथामति मया गीता चरितं तस्य साम्प्रतम् ॥
नर्षिदेवरुचिरं पावनं वनगं शृणु ॥
कुसुमान्येकदा रामो विचित्य कृतवान् प्रभुः ।
स्फटिकस्थो भूषणानि सीतां चालञ्चकार तैः ॥
देवेन्द्रस्य सुतो मूढो जयन्तः काकवेषधृक् ।
प्रभोर्दिदृक्षति बलं यथा सिन्धोः पिपीलिका ॥
सीतायाश्चरणे चञ्चूवाऽऽहत्य मूढः पलायितः ।
रक्तेण रामो विज्ञाय सन्दधे धनुषीषिकाम् ॥

महान् कृपालू रघुनाथकोऽसौ
दीनेषु यः स्निह्यति सर्वदैव ।
मूर्खो जयन्तः खल - दोषगेहं
चकार तं प्रत्यपि कैतवं यः ॥ १ ॥

मन्त्रेरितः शरोऽधावद् भीतः काकः पलायितः ।
निजं रूपं गृहीत्वा स पितरं प्राप्तवान् पुनः ॥
पितेन्द्रो रामविमुखं रक्षति स्म न तं यदा ।
जातो निराशो भीतश्च दुर्वासा इव चक्रतः ॥
भीतोऽभ्रमत् स सर्वत्र विधेर्लोके शिवस्य च ।
तं नोपावेशयत् कोऽपि कः पायात् प्रभुविद्विषम् ॥
यो रामाद् विमुखो मर्त्यस्तस्मै माताऽपि मुञ्चति ।
यमतुल्यः पिता तस्मै सुधा हालाहलं तथा ॥
शतशत्रुक्रियं मित्रं गङ्गा वैतरणी नदी ।
जगद् वह्न्यधिकं सर्वं शृणु तार्क्ष्य सुनिश्चितम् ॥
नारदो विकलं दृष्ट्वा जयन्तं त्वार्द्रतां गतः ।
सन्तः कोमलचेतांसस्त्रिलोक्यां विश्रुता यतः ॥
रामपार्श्वं प्रैषयत् तं सोऽपि देवं समाह्वयत् ।
रक्षेति भीतो जग्राह पादौ रामस्य वासविः ॥
दयालो मां रक्ष रक्ष शक्तिस्ते चातुलेशिता ।
मन्दबुद्धिरहं ज्ञातुं नाशकं तद् रघूत्तम ॥
भुक्तं कर्मफलं त्वाहमिदानीं शरणं गतः ।
विचार्याऽऽगतवानस्मि रक्ष मां रघुनायक ॥
हे शिवे तद्वचोऽतीव दीनं श्रुत्वा रघूत्तमः ।
कृपालुस्तस्य नयनं गृहीत्वैकं मुमोच तम् ॥

वधस्तस्य युक्तोऽभवत्सोऽकरोद्यद्
वशान् मोहरज्जोरिदं द्रोहकर्म ।
तथापीश्वरो मुक्तवांस्तेन तुल्यो
भवेत् कः कृपालू रघोर्वंशजेन ॥ २ ॥

चित्रकूटे वसन् रामः सुधातुल्यानि कर्णयोः ।
चरितान्यकरोत् पश्चान्मनसीत्थं व्यचिन्तयत् ॥
सर्वे जानन्त्यत्र मां तद् भविष्यति जनाकुलम् ।
ततो मुनींस्तानापृच्छ्य ससीतौ भ्रातरौ गतौ ॥
प्राप्तोऽत्रेराश्रमं रामो हृष्टस्तेन महामुनिः ।
पुलकाङ्गोऽत्रिरुत्थायाधावद् रामोऽपि शीघ्रगः ॥
प्रणम्य राममुत्थाप्य सस्वजे तं ततो मुनिः ।
मुनिस्तौ प्रेमपाथोभिरस्नापयदुभौ जनौ ॥
रामशोभां विलोक्यास्य सञ्जाते शीतलेऽक्षिणी ।
ततोऽसौ स्वाश्रमं देवमादरेणानयन् मुनिः ॥
पूजां कृत्वा मिष्टमुक्त्वा ददौ मूलफलानि सः ।
प्रभवे रामचन्द्राय तान्यरोच्यन्त हे शिवे ॥

प्रभुस्त्वासने संस्थितोऽभूत् तदीया-
मतीव प्रवीणो मुनिः प्रेक्ष्य शोभाम् ।
करौ सम्पुटीकृत्य कञ्चायमानो
स्तुतिं देवदेवस्य चक्रे तदानीम् ॥ ३ ॥

[क्रमशः]

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(८ पृष्ठस्य शेषांशः)

शून्यशुद्धहृदयस्य गुरुचरणारविन्द-चञ्चरीकस्य अकारणकरुणापगाप्लावितचेतसो नासीत् किमपि शास्त्रमविषयीकृतम्।

तथाविधं वैदुष्यं प्राप्य १८९८ तमे खिस्ताब्दे 'सेण्ट्रल हिन्दू-कालेज'-नाम्नि विद्यालये संस्थापन-दिवसादेव तत्रत्याधिकारिभिर्नियुक्तोऽसौ तस्मिन् विद्यालये पाठनाय। अध्यापनकार्यं कुर्वाणोऽपि सहसा बाल्य एव पुत्रस्य निधनानन्तरं १९०५ तमे ईशवीये वत्सरे तत्र स्वकीयं त्यागपत्रमसौ महात्मा प्राहिणोत्।

ततः प्रभृति सेवावृत्तिं नैव स्वीकृतवानयम्। गृहे एव शिष्यानध्यापयत्। अतो गुरुपरम्परानुसारिणी गौरवमयी शिष्यपरम्पराऽपि तस्य महाविदुषः कीर्तिं दिशि विदिशि प्रसार्यमाणा सर्वतो दृश्यते। अस्य प्रमुखशिष्याः म० म० पं० सीतारामशास्त्रि, म० म० पं० माधवशास्त्रि, नेने-गोपालशास्त्रि, त्रिपाठ्युनामक सरयूप्रसाद, फडके-अनन्तशास्त्रिप्रभृतयः प्रथिताः।

अनेन विदुषा विरचिता ग्रन्था अपि तथैव प्रामाण्यं भजन्ते यथा तस्य निर्णयः सर्वमान्य आसीत्। ग्रन्थाश्च गुरुवरेणानेन विरचिता इत्थं विलसन्ति—(१) लघुशब्देन्दुशेखरस्य 'दीपक-व्याख्या, (२) संस्कारदीपको भागत्रयात्मकः, (३) कातीयेष्टिदीपकः, (४) अन्त्यकर्मदीपकः, (५) वर्षकृत्यदीपकः—कालनिर्णयसहितः, (६) सापिण्ड्यदीपकश्चेति। विहायैतान् महाशयेनानेन विविधाः ग्रन्थाः सम्पादिताश्च। तेन सम्पादितानां ग्रन्थरत्नानां टिप्पण्यादिना विभूषितानां नामोल्लेखनं पर्याप्तं भवेत्। ते च ग्रन्थाः—(१) जैमिनीय-सूत्रवृत्तिः, (२) मीमांसापरिभाषा, (३) परमलघुमञ्जूषा, (४) कात्यायनश्रौतसूत्रम्, (५) वीरमित्रोदयश्चेति।

अस्य महनीयं पाण्डित्यं समालोक्य समालोच्य च आंग्लदेशीयैर्भारतीशासकैः महामहोपाध्यायपदव्या १९२१ तमे खिस्ताब्दे विभूषितोऽसौ मनीषी। जीवनस्यान्तिमोऽष्टादशवर्षात्मकः कालो रोगग्रस्त एवानेन महात्मना कथञ्चिदपि व्याधिं सहमानेनाऽतिवाहितः। इत्थमतिवाह्य त्रिषष्टि-वर्षात्मकं कालं चतुःषष्टिवर्षसमाप्तेः प्रागेव स्वकीयजीवनस्यावसानं सम्यग् विज्ञाय आश्व-युजे मासि कृष्णपक्षपञ्चम्याम् एकदिनावशिष्टं जीवनमिति निश्चित्य षष्ठ्यां प्रातरेव आतुरसंन्यासं गृहीत्वा वसुमतीं विहातुकामोऽश्वत्थवृक्षस्याधस्तात् मणिकर्णिकातीर्थसविधे जाह्नवीतटमासाद्य प्रणवार्थैकतानमनास्तदनु पावने सप्तमीतिथिप्रवेशे मध्याह्नकाले पाञ्चभौतिकं विनश्वरं शरीरं परित्यज्य स्वकीयेन ब्रह्मवर्चसाऽसौ महापण्डितः प्राप अखण्डब्रह्मरूपताम्। अस्या दीक्षागुरुरपि तपस्वी श्रीमद्भागवतरसामृतपायी च योगिराट् शान्ताश्रमः कराड (सतारा)-निवासी सुप्रसिद्ध एवासीत्। इत्थं च महामनस्विनोऽस्य विदुषः प्रसिद्धेः कारणं तु न सांसारिकवैभवम्, नापि स्वोपार्जिता संपत्, किन्तु असाधारणं वैदुष्यं त्यागो निःस्पृहत्वं चासीत्। एतादृशा विद्वांस एव भारतस्य देशस्य गौरववर्धने प्रभवन्ति। ★

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जनसंख्या-वृद्धेः निदानं वास्तवोपायश्च

--श्री बालचन्द दीक्षितः--

[प्रधानाचार्यः---काशिक-बाजोरिया-संस्कृत-महाविद्यालयस्य]

अद्यत्वेऽमुष्मिल्लोके प्रवर्धमाना जनसंख्या व्याधिरिव समेषां शासकानां जनतानाञ्च कृते अभिशप्ता शिरःपीडेव सम्पन्नेति नाविदितं केषामपि साक्षराणां वृत्तपत्रपाठिनाम्। एतदपि नाविदितं यत्तस्या ह्रासाय समाश्रितेषु सन्ततिनिग्रहौषध-शल्यचिकित्सा - रूपप्रयोगोपायेषु कोऽप्युपायः अद्यावधि न प्राभूदुपेयं निर्व्यभिचरितं लम्भितुम्। तत्कस्य हेतोः ? इति विचारप्रवणे चेतसि स्फुरति एकमात्रमेतदेव यत्तन्निदानमन्तरैव समाश्रिता इमे सर्वेऽप्युपायाः। यतो निदानं निश्चित्यैव विहिता व्याधेश्चिकित्सा स्वयं सफला सती चिकित्सकं यशस्विनं चिकित्स्यञ्च अरुजं सम्पादयतीति सार्व-जनीनो राद्धान्तः।

निदानस्य कस्याप्यन्यस्य वा विषयस्य प्रमेय-विशेषस्य वा निश्चयः प्रमाणैरेव जायते। तानि च प्रत्यक्षाऽनुमानोपमानशब्दरूपाणि चत्वारि प्रथि-तानि। तेषु प्रत्यक्षस्य प्राबल्येऽपि आगमाख्यस्य शब्दस्य सर्वप्रमाणप्राबल्यं वेदान्तादिदर्शनैस्तत्र तत्र ग्रन्थेषु महसाऽऽटोपेन साधितं तत एवा-वसेयम्। अत्र पुनस्तमेव पदं समाश्रित्य सर्वतः प्रबलेन आगमेन जनसंख्यावृद्धेर्निदानं विवेचनीयं प्रस्तूयते।

आगमैः किल मर्त्यलोकवासानुगुणं जनानां कर्मैव समाख्यातम्। हीनोत्कृष्ट-कर्मतारतम्यात् हीनोत्कृष्ट-योनिषु जन्मप्राप्तिः, यच्च 'तद्यथेह रम-णीयाचरणाः' इत्यादि-छान्दोग्यवचनेनैव स्पष्टम्। कर्माणि पुनः सत्त्वं-रजस्तमश्चेति त्रिविधानि। जीवजातस्य मर्त्यलोके जन्म कर्माधीनं चेत् मानव-जन्मापि तथेति अर्थत आयाति। इदमत्र विचार-णीयम्—यदि सर्वे मानवाः सत्त्वप्रसवः स्युः, किमिति तेषां वृद्धिर्भारायिता भवेदस्मभ्यम् ? सत्त्वस्य कदापि दुःखाजनकत्वात्। अतः परमदुर्लभ-मानवयोनौ जातेषु कृतिषु प्रकारान्तरेण जातानां दुःखजनकानामपि समावेशो 'घुसपैठा'ख्यः समजनीति अवश्यं स्वीकरणीयम्। किं तत् प्रका-रान्तरमिति विचारे याज्ञवल्क्यस्मृतौ यतिप्रकरणे स्पष्टं निर्दिशति योगीश्वरो याज्ञवल्क्यः—

असत्कार्यरतोऽधीर आरम्भी विषयी च यः।
स राजसो मनुष्येषु मृतो जन्माधिगच्छति ॥
(३.१३८)

अस्यार्थं कृतवान् मिताक्षराकारः—असत्-कार्येषु तूर्य - वादित्र - नृत्यादिष्वभिरतो य स्तथा अधीरो व्यग्रचित्तः। आरम्भी सदाकार्या-कुलो विषयेष्वतिप्रसक्तश्च स रजोगुणयुक्तः तद्गुणतारतम्यात् हीनोत्कृष्ट - मनुष्यजातिषु मरणानन्तरमुत्पत्तिं प्राप्नोति' इति।

एतदेव भगवान् मनुरपि वदति—

देवत्वं सात्त्विका यान्ति मनुष्यत्वं च राजसाः।
तिर्यक्त्वं तामसा नित्यमित्येषा त्रिविधा गतिः ॥
(१२.४०)

एताभ्यां वचनाभ्यां मनु-याज्ञवल्क्यौ मर्त्यलोके जनसंख्यावृद्धेर्निदानं रजोगुणस्य वृद्धिं मन्येते। रजोगुणस्य परिज्ञानाय स एवास्य लक्षणमाह—

येनास्मिन् कर्मणा लोके ख्यातिमिच्छति पुष्कलाम्।
न शोचत्यसम्पत्तौ तद्विज्ञेयं तु राजसम् ॥
(१२. ३६)

इहलोके महतीं ख्यातिं प्राप्तुयाम् इत्येदर्थमेव यो-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यत्कर्म करोति, न च परलोकार्थम्, न च तत्कर्मफलासम्पत्तौ दुःखीभवति तद्रजोगुणस्य कार्यत्वाद् रजोगुणलक्षणं विज्ञेयमित्यर्थः।

रजोगुणप्रधानस्य किं कार्यं भवतीत्यपि मनुरेव मनुस्मृतौ स्पष्टयति—

आरम्भरुचिता ऽधैर्य - मसत्कार्यपरिग्रहः।
विषयोपसेवा चाजस्रं राजसं गुणलक्षणम्।। (१२.३२)

एतस्य व्याख्यानन्तु 'असत्कार्यरतोऽधीर' इत्यादिपूर्वोक्तयाज्ञवल्क्य-वचनमेवेति न तन्यते तत्।

सम्प्रति हि न केवलं भारतीया एव, अपि तु सर्वदेशस्था जना रजोगुणह्रासाय, प्रवर्धनाय च सत्त्वगुणस्य, प्राचीनकालतः समाश्रितान् समादृताँश्च स्वधर्मग्रन्थान् कर्तव्यत्वेन तद्विहिताँश्च कर्मकलापान् उलङ्घ्योलङ्घ्य कामकारतः प्रवृत्ता बहोः कालादसत्कार्यरता अधीराः सदा कार्याकुला अजस्रं विषयरताः प्रतिक्षणं प्रवर्धयन्तो मर्त्यलोके जनसंख्यावृद्धेर्निदानं रजोगुणं, स्वयंमाकुला जगदपि आकुलयन्तीति नात्र चित्रम्।

एतावता प्रबन्धेन अनादिपरम्परातो यथार्थवक्तृत्वेन समादृता वेद-मनु-याज्ञवल्क्यप्रभृतयो मर्त्यलोके प्रतिदिनं प्रवर्धमानाया जनसङ्ख्याया निदानं रजोगुणस्य वृद्धिं मन्यन्तेतरामिति नात्र सन्देहलेशावसरः।

अथ तन्निरोधोपायोऽपि तद्वीत्यैव विविच्यते। तथा हि तन्नये—

जीवशौ च विशुद्धा चित् तथा जीवेशयोर्भिदा।
अविद्या तच्चितोर्योगः षडस्माकमनादयः।।

इति वेदवादिराद्धान्तेन जीवस्य अनादित्वात् आमोक्षं स्थायित्वाच्च तेन यस्मिँल्लोके चतुरशीतिलक्षयोन्यन्यतमायां यस्यां कस्यां वा योनौ वर्तितव्यमेव। तत्र ये रजोगुणप्रधानास्तेषामत्र मर्त्यलोके वृत्तिरिति प्रदर्शितमेवेतः पूर्वम्। ये तावत् सत्त्वप्रधानास्ते 'देवत्वं सात्त्विका यान्ति' इति मनूक्तया देवा भूत्वा देवलोकावासिनो भवन्ति।

याज्ञवल्क्योऽपि मन्यत एतदेव। तथा चोक्तम्—

आत्मज्ञः शौचवान् दान्तस्तपस्वी विजितेन्द्रियः।
धर्मकृद् वेदविद्यावित् सात्त्विको देवयोनिताम्।। इति।

अस्यैवमर्थो विवृतो मिताक्षरायाम्—

आत्मज्ञो विद्या - धनाऽभिजनाद्यभिमानरहितः शौचवान् बाह्याभ्यन्तरशौचयुक्तः दान्त उपशमान्वितः तपस्वी कृच्छ्रचान्द्रायणादितपोयुक्तस्तथेन्द्रियार्थेष्वप्रसक्तः नित्यनैमित्तिकधर्मानुष्ठाननिरतः वेदार्थवेदी च यः सात्त्विकः, स च सत्त्वोद्रेकतारतम्यवशात् उत्कृष्टोत्कृष्टतरसुरयोनितां प्राप्नोतीति।

ये हि तमोगुणप्रधानास्ते स्वीयतमोगुणतारतम्यात् हीन-हीनतर-पश्वादियोनिषु जायन्ते। तथा हि—

निद्रालुः क्रूरकृल्लुब्धो नास्तिको याचकस्तथा।
प्रमादवान् भिन्नवृत्तो भवेत्तिर्यक्षु तामसः।। इति।

मनुस्तावत् सत्त्वादिगुणान्यतेज-घन्य मध्यमोत्तमत्वादिभेदेन त्रिविधत्वं प्रकल्प्य जघन्यस्य तमोगुणयुक्तस्य स्थावरादियोनिप्रापकत्वम् इत्थं स्वीकरोति—

स्थावराः कृमिकीटाश्च मत्स्याः सर्पाः सकच्छपाः।
पशवश्च मृगाश्चैव जघन्या तामसी गतिः।।

इममेवार्थं प्रकारभेदेन प्रतिपादयति योगीश्वरो याज्ञवल्क्यः—

एतद्यो न विजानाति मार्गद्वितयमात्मवान्।
दन्तशूकः पतङ्गो वा भवेत् कीटोऽथवा कृमिः।। (३.१८८)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कवि-कालिदासः

१. विक्रमादित्यस्य राज्ञः परिषदो यो दिव्यरत्नम्,
स्वकृतिभिः श्रेष्ठं पदं समवाप यश्च विनाप्रयत्नम्।
यस्य काव्येऽलङ्कृतीनां रसानां विपुलो विलासः,
सैष वाणीवरदपुत्रो विजयतां कविकालिदासः॥

२. तपस्त्यागतपोवनानां त्रयाणामधिकं महत्त्वम्,
भारतीयायाः कलायाः संस्कृतेरिदमस्ति तत्त्वम्।
वर्तते तत्त्वे ह्यमुष्मिन् यस्य रचनाया निवासः, सैष

३. मेघदूते वर्तते या कल्पनाशैली नवीना,
नाटके शाकुन्तले या विद्यते दृष्टिः प्रवीणा।
कुत्रचिन्नो यस्य दृष्टेः कल्पनायाः स प्रकाशः, सैष

४. आदिकविरासीदृषिर्व्यासोऽपि विष्णुकलावतारः,
किन्त्वयं कवितल्लजो महनीयमानवतावतारः।
अनुपमा उपमा यदीया हृदयहारी पदन्यासः,
सैष वाणीवरदपुत्रो विजयतां कविकालिदासः॥

—श्री कपिलदेव त्रिपाठी, 'जटिलः'

साम्प्रतिकाः शासका जनाश्च वर्धमानजनसङ्ख्यावरोधाय विभिन्नानुपायाभासान् अवलम्ब्यावलम्ब्य सूचयन्ति यन्नाभीष्टा जनसंख्यावृद्धिः। कीटपतङ्गादिवृद्धिस्तु न पुरा न चाद्यत्वे न चाग्रे अभीष्टा आसीदस्ति भविष्यति वा।

अत एतद्वृद्धयवरोधाय एषामुत्पत्तौ निदानभूतयो रजस्तमगुणयोर्वर्धकं कारणजातं सर्वं सर्वतो न्यकृत्य जीवमात्रस्य अविलम्बेन ब्रह्म-देवभावप्रापकस्य महनीयस्य सत्त्वगुणस्य सम्प्रसाराय समास्थेयः परमः प्रयत्न इत्येव अमुष्मिँल्लोके प्रवर्धमानाया जनसङ्ख्याया निरोधस्य वास्तविकोपायः।

★

शती-समारोह-विवरणम्

वाराणसी। विगतायां पौषकृष्ण-त्रयोदश्यां (तदनुसारं २९ दिसम्बर १९६७ दिनाङ्के) ब्रह्मीभूतानां विद्वन्मूर्धन्य - महामहोपाध्याय-पण्डित-नित्यानन्दपन्त-पर्वतीयमहोदयानां पुण्यशती-समारोहो महता समारम्भेण सम्पन्नः। समारोहस्यास्य प्रमुखः कार्यक्रमः संस्कृतविश्वविद्यालये भूतपूर्वराज्यपालानां श्री श्रीप्रकाश महोदयानामाध्यक्षे समायोजितोऽभूत्। तत्र ब्रह्मीभूतानां पन्तमहोदयानां सर्वतोमुखीनं वैदुष्यमनुपमं व्यक्तित्वं चाधिकृत्य वाराणसेयैरनेकैर्विद्वद्भिः स्वकीय - श्रद्धासुमनांसि समर्पितानि।

सभापतिभिः श्री श्रीप्रकाशमहोदयैः पूज्य-पन्त-चरणसम्बद्धानि नानाविधानि संस्मरणानि श्रावितानि। तैरुट्टङ्कितं यत् श्रद्धेयः पन्तपादाः प्राचीनापाण्डित्यस्य प्रकर्षमुद्वहन्तः कामपि समाख्यामलभन्त। तेषाँ यादृशं पाण्डित्यमासीत्तादृशमेव मनसा वाचा कर्मणा चाभिन्नं प्रखरतरं चरित्रमपि व्यद्योतिष्ट। यादृशं जीवन्मुक्तस्वरूपं दर्शनग्रन्थेषु वर्णितं विद्यते, तस्य दर्शनम् एतेषां जीवने कर्तुं शक्यते स्म।

प्रारम्भे श्री गणेशदत्तशास्त्रिभिः संयोजकैः स्वागतभाषणं व्याहृतम्। अन्ते धन्यवादप्रकाशनं च नैनीतालस्थराजकीय - स्नातकोत्तर-महाविद्यालयीय - संस्कृत-विभागाध्यक्षैः पण्डित श्री गोपालदत्त पाण्डेयैर्विहितम्।

अस्मिन्नवसरे भागवतसप्ताह-वैदिकवसन्त-पूजन -शास्त्रार्थ - विचारादिकं कार्यजातं प्रायः एकसप्ताहव्यापि सम्पन्नम्।

★

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

112601

देवीभागवतमेव महापुराणम्

[विचारस्वातन्त्र्यदृष्ट्या प्रकाश्यतेऽयं लेखः । यदि कोऽपि विद्वान् अस्यापरपक्षेऽपि स्वीयं मतं प्रेषयेत्, तदपि सादरं प्रकाशयिष्यते । —सम्पादकः]

अथादौ भागवतं किमिति प्रश्ने षडैश्वर्यं विद्यते यस्मिन् तद् भागवतम् । लिङ्गत्रये— यथा भगवान् (पुं०), भगवती (स्त्री०), भगवत् (नपुं०) —च भगवतः परमेश्वरस्येदमैश्वर्यं भागवतम्, उत भगवत्या इदं भागवतम् अथवा भगवच्च तदैश्वर्यमिति भागवतम् ? पुं-स्त्री-नपुंसकत्व विशिष्टं भेदातीतं चिद्ब्रह्मनिरूपितं यत्किञ्चिद् वस्तुविशेषं षडैश्वर्यविलसितं यत्तद् भागवतमित्यूह्यम् ।

तत्र तु पुराणेषु भागवतद्वयं प्रसिद्धम् । तयोरेकं महापुराणान्तर्गतं द्वितीयञ्च उपपुराणान्तर्गतमिति पुराणविदो वदन्ति । लोकेऽप्युपलभ्यते देवीभागवत-नाम्ना विष्णुभागवत-नाम्ना चेति । तत्रैकमेव महापुराणं द्वितीयञ्च उपपुराणमिति निर्विवादमेव । कस्यचिन्मते तु उभे महापुराणे इत्यपि श्रूयते । सुतरां संशये जातेऽत्र निर्णयो विधेय एव । यतो ह्यत्र केचिद् देवीभागवतं केचिद् विष्णुभागवतं महापुराणत्वेन उद्घोषयन्ति ।

यद्यपि **नैको मुनिर्यस्य मतं न भिन्नम्** इति न्यायोक्त्या केचिद् विष्णुभागवतं (श्रीमद्-भागवतनाम्ना) महापुराणत्वेन आमनन्ति । केचिच्च देवीभागवतमेव महापुराणेषु प्रमाणयन्ति । किन्तु महापुराणेषु केवलं भागवतमिति शब्देनैव दरीदृश्यते महापुराणं तन्नामकम् । अतो महापुराणेष्वेकमेव भागवतं प्रसिद्धम्, अपरम् उपपुराणेष्वपि दृश्यते ।

एवं पुराणमतभेदेन एकस्यैव पुराणस्य महापुराणत्वोपपुराणत्वसिद्ध्या अन्यत्र च तद्विरोधाभावात्

मद्वयं भद्वयं चैव ब्रत्रयं च चतुष्टयम् ।
आलिपाग्निपुराणानि कूस्कंगारुडमेव च ॥

इति वचनेन वक्ष्यमाण-मुद्गलपुराणप्रमाणेन च देवीभागवतस्यैव महापुराणत्वं सूच्यते । तथा हि—

'ब्राह्मं च वैष्णवं पाद्मं शैवं भागवतं तथा ।
भविष्यं ब्रह्मवैवर्तं मार्कण्डेयञ्च वामनम् ॥
आग्नेयं वायवं मात्स्यम् ....."

इत्यादिश्लोकेषु आमूलात् क्रमशः पञ्चमत्वेन देवीभागवतस्यैव प्रसिद्धत्वात् तदेव श्रीमद्देवीभागवतं महापुराणं भवितुमर्हतीति नात्र सन्देहलेशोऽपि । यतो देवीभागवतविषये **तत्र भागवतं पुण्यं पञ्चमं वेदसम्मितम्** इत्यभिहितत्वात् ।

श्रीमद्देवीभागवतं तु व्यासकृतमेवेति नात्र सन्देहः । तस्य कथमुपपराणेषु अन्तर्भावः ? **अन्यान्युपपुराणानि मुनिभिः कथितानि तु** इत्यादिवचनैः उपपुराणानि व्यासातिरिक्तैरन्यैः मुनिभिः कृतान्येव सन्तीति ।

अपि च शैवपुराणमते मात्स्यपुराणमतेऽपि देवीभागवतमेव महापुराणमिति सिद्ध्यति । शिवपुराणे अष्टादशमहापुराणानां नामानि क्रमशो यथा—

यत्र वक्ता स्वयं तण्डे (मुने) ब्रह्मा साक्षाच्चतुर्मुखः ।
तस्माद् ब्राह्म[1] समाख्यातं पुराणं प्रथमं मुने ॥
पद्मकल्पस्य माहात्म्यं तत्र यस्मादुदाहृतम् ।
तस्मात् पाद्मं[2] समाख्यातं पुराणञ्च द्वितीयकम् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पाराशरकृतं यत्तु पुराणं विष्णु[3]बोधकम् ।
तदेव व्यासकथितं पुत्रपित्रोरभेदतः ॥
यत्र पूर्वोत्तरे खण्डे शिवस्य चरितं बहु ।
[4]शैवमेतत्पुराणं हि पुराणज्ञा वदन्ति च ॥
भगवत्याश्च दुर्गायाश्चरितं यत्र विद्यते ।
तत्तु 'भागवतं' प्रोक्तं न तु देवीपुराणकम् ॥
नारदोक्तं पुराणं तु नारदीय[5] प्रचक्षते ।
यत्र वक्ताऽभवत्तण्डे ! मार्कण्डेयो महामुनिः ॥
मार्कण्डेय-पुराणं हि तदाख्यातं च सप्तमम् ।
अग्नियोगात्तदाग्नेयं[6] भाविष्योक्ते भविष्यकम्[7] ॥
विवर्तनाद् ब्रह्मणस्तु [10]ब्रह्मवैवर्तमुच्यते ।
लिङ्गस्य चरितत्वात् पुराणं लिङ्ग[11]मुच्यते ॥
वराहस्य च वाराहं[12] पुराणं द्वादशं मुने ।
यत्र स्कन्दः स्वयं श्रोता वक्ता साक्षान्महेश्वरः ॥
तत्तु स्कान्दं[13] समाख्यातं वामनस्य तु वामनम्[14] ।
कौर्म[15]कूर्मस्य चरितं मात्स्यं[16] मत्स्यस्य कीर्तितम् ॥
गरुडस्तु स्वयं वक्ता यत्तद् [17]गारुडसंज्ञकम् ।
ब्रह्माण्डचरितोक्तत्वाद् ब्रह्माण्डं[18] परिकीर्तितम् ॥

अथानेन शिवपुराणोक्तप्रवचनेन स्पष्टं प्रतीयते यद् देवीभागवतमेव महापुराणम्, तत्र श्रीमद्भागवतनामकपुराणस्य अभिहितत्वात् । यतो ह्येतात् 'भागवत'शब्दव्युत्त्यापि सुस्पष्टमेव । यथा—भगवत्याः (मूलप्रकृतिनिष्ठ - भुवनेश्वर्याः) इदं (चरितं) भागवतम्' इति व्युत्पत्त्या ग्रन्थप्रतिपाद्य-प्रमुखदेवताचरितसम्बन्धोऽत्र स्पष्ट एव प्रदर्शितः । न ह्यत्र कथमपि महापुराणान्तर्गते भागवते विष्णुभागवतस्यान्तर्भावो 'विष्णुपुराणत्वसम्भवा-दित्यलं विस्तरेण ।

अथ च सर्वत्रैव श्रीमद्भागवतस्य देवीप्रीतये नवरात्रादौ चापि पाठविषय - प्रसङ्गात् माहात्म्यं दरीदृश्यते । तथा हि—

शैवमादिपुराणञ्च देवीभागवतं तथा ।
नवरात्रे तु देवेशि दौर्गं भागवतं पठेत् ।
जपेत् सप्तशतीं चण्डीं नियमेन समाहितः ॥

अपरञ्चात्र—

देवीभागवतं नित्यं पठेद् भक्त्या समाहितः ।
नवरात्रे विशेषेण श्रीदेवीप्रीतये मुदा ॥

इत्यादि - बहुप्रमाणैः देवीभागवतस्य महापुराणत्वं सिद्धयतीति नाऽपरोक्षं विदुषां कृते । पुनश्च—तत्र भागवतं पुण्यं पञ्चमं वेदसम्मितम् इति देवी-भागवतस्य प्रथमस्कन्धोक्तवचनेनापि तस्य महा-पुराणत्वसिद्धिः, महापुराणेषु पञ्चममिदं पुराण-मित्यर्थकत्वात् ।

किञ्च हेमाद्रौ कालिकापुराणे—

यदिदं कालिकाख्यं तन्मूलं भागवतं स्मृतम् ।

इति वचनेनापि देवीभागवतस्यैव महापुराणत्वमुद्-बोध्यते, न वैष्णवं तन्मूलं भवितुमर्हति यतो हि यथा शैवोपपुराणानां शिवपुराणेभ्यः, वैष्णवोप-पुराणनाञ्च विष्णुपुराणेभ्य एवोत्पत्तिर्दृश्यते तथा दैव्युपपुराणानामपि देवीभागवतमहापुराण-मूलकत्वे तत्सामञ्जस्यात् । तस्माद् श्रीमद्देवी-भागवतस्यैव महापुराणत्वं सिद्धम् ।

एवमेव आदित्यपुराणदृष्ट्यापि देवीभागवतमेव महापुराणम् । तत्र रक्तासुरवधप्रसङ्गे—

या जघ्ने महिषं दैत्यं क्रूरं वृत्रासुरं तथा ।
साऽद्य रक्तासुरं हत्वा स्वाराज्यं ते प्रदास्यति ॥

इत्यनेन वचनेन देवीभागवताय स्वसम्मति प्रदत्तेति युक्तमेव । यतो हि न देवीभागवतातिरिक्त सर्वपुराणेषु देवीकृतो वृत्रासुरवधः क्वचिदप्यस्तीति पुराणविद्भिः विद्वद्भिर्मा विस्मारयितव्यम् । तत्रैव

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

च पुराणप्रदानप्रसङ्गे —

ददाति सूर्यभक्ताय यस्तु भागवतं द्विजाः ।
सर्वपापविनिर्मुक्तः सर्वव्याधिविवर्जितः ।
जीवेद्वर्षशतं साग्रमन्ते वैवस्वतं पदम् ॥

इत्येवं पठितम् । वचनेनानेन देवीभागवतपक्षस्य समर्थनमेव सङ्गच्छते, न तु विष्णुभागवतपक्षस्य । तदा तु वैकुण्ठं गच्छेदित्येवं पठितव्यम् । तत्रैकादशा-द्वादशस्कन्धयोश्च सविस्तरं गायत्रीविधान-सहस्र-नामादेः कथनात् सूर्यस्य देवत्वाच्चेति ।

यत्राधिकृत्य गायत्रीं वर्ण्यते धर्मविस्तरः ।
वृत्रासुरवधोपेतं तद्भागवतमिष्यते ॥

इति मात्स्यवचनमपि देवीभागवतस्यैव महा-पुराणत्वं सूचयति । वेदे त्रिपदा गायत्रीति लक्षित-त्वादत्र त्रिपाच्छब्दमधिकृत्य भागवती कथा विस्तृता । पश्यन्तु सुधियः देवीभागवते प्रथमश्लोके **सर्वचैतन्यरूपां तामाद्याञ्च धीमहि । बुद्धिं या नः प्रचोदयात्** इति । अत एव **तत्र भागवतं पुण्यं पञ्चमं वेदसम्मतम्** इत्युक्तं वचनं तथ्यमेव सङ्घटते । सुतराम् 'भागवत'पदेनात्र 'विष्णु-भागवतम्, इत्यर्थग्रहणं विदुषां पुराणविदां दुःसाहस-मेव वक्तव्यम् ।

'गायत्र्यर्थश्च विष्णुध्यानं न तु शिवशक्तिसूर्या-दिध्यानम्' इति यदुक्तम्, तत्तु नास्तिकत्वमूल-कमेव । पश्यन्तु मैत्रायणीयानां वचनम्—**भर्गो वै रुद्रः** इति । श्रुतिवचनादस्मात् प्रपञ्चसारादिसर्वतन्त्रेषु पुराणेषु च शिवसूर्यशक्त्यादिरूपार्थस्य उक्तत्वाच्च देवीभागवतमेव महापुराणमिति ।

अपरञ्चावलोक्यताम्—

हयग्रीव - ब्रह्मविद्या यत्र वृत्रवधस्तथा ।
गायत्र्या च समारम्भस्तद्वै भागवतं विदुः ॥

महर्घते महामाये !

. १ .

महर्घते महामाये शासक-प्राणवल्लभे ।
श्रेष्ठीनां द्रौपदीभूते दीन-दैन्यकरेऽशुभे ॥

. २ .

हट्टे घट्टे विशालेऽस्मिन् भारते भारते प्रभा ।
प्रसृताऽपावनी दृष्ट्वा धन्यस्ते जन्मदायकः ॥

. ३ .

मानिनो धनिनो जाता महान्तोऽपि महत्तराः ।
शासकाः सुखसम्पन्ना दीना दैन्यभृतोऽभवन् ॥

. ४ .

घृते दुग्धे फले तक्रे भोजनाच्छादनादिषु ।
सर्वकृत्ये समासीना कलिकाल-महेश्वरी ॥

. ५ .

पण्डिताः खण्डिता जाता मण्डिता ब्लैक-मेलिनः ।
दण्डिताश्च प्रजाः सत्यं त्वया दारिद्र्यकारिणि ॥

. ६ .

स्वतन्त्रा अत्र ! सञ्जाता यदा भारतवासिनः ।
वद्धा महर्घता कण्ठे परतन्त्रास्तु कीदृशाः ॥

. ७ .

मुद्रैकया किलो शाकं गोधूमं सार्धरूप्यकम् ।
मिष्टान्नं सप्तमुद्राणां मिलतीह महर्घते ॥

. ८ .

श्रेष्ठिनः शासकाश्चान्ये कालाबाजारकारिणः ।
सुखिनः सन्ति लोकेऽस्मिंश्छेषाः शोषत्वमागताः ॥

. ९ .

नमस्तुभ्यं महामाये! शुद्धबुद्धेर्विनाशिके ।
छलछद्म - प्रसाराय वरदा भव सर्वदा ॥

—श्री रामस्वरूपशास्त्री 'अमरः'—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इति पुराणान्तरवचनमपि प्रमाणयति श्रीमद्-देवीभागवतस्यैव महापुराणत्वम्। उक्ता च देवी-भागवते प्रथमस्कन्धे सा हयग्रीवस्य कथा—

"कदाचिद् 'हयग्रीव'नामा असुरोऽभूत्। तेन ब्रह्मप्रतिपादिका 'विद्या' प्राप्ता। सा च स्त्रीदैवत्यो मन्त्रः (मायाबीजात्मकः) ह्रीमिति। एकाक्षरोऽयं मन्त्रः तन्त्रेषु पुराणेषु च प्रसिद्धः। सा मन्त्ररूपा विद्या यत्र विद्यते तद् भागवतं 'देवीभागवतमेव, न तु विष्णुभागवतम्। अस्य पञ्चमस्कन्धेऽपि हयग्रीवमन्त्रस्य विद्यमानत्वात्। नारदीये शारदा-तिलकादिनिबन्धेषु चोक्तम्—

मन्त्राः पुंदेवताः प्रोक्ताः विद्याः स्त्रीदेवताः स्मृताः।

इति। वचनेनानेन सुस्पष्टंयत् पुंमन्त्रः ॐ, स्त्रीमन्त्रश्च 'ह्रीमिति।

अथवा— **सारस्वतस्य कल्पस्य**[1] ... ...इति मात्स्यवचनादपि अस्यैव महापुराणत्वम्। तथा हि— तत्र तत्तत्कल्पवृत्तान्ताश्र'याणि पुराणानि भवन्ती-त्युक्त्वा **यत्राधिकृत्य गायत्रीं वर्ण्यते धर्मविस्तरः। वृत्रासुरवधोपेतं तद्-भागवतमिष्यते** इति पूर्वोक्तं पक्षं द्रढयति। **सारस्वतस्य कल्पस्य मध्ये ये स्युर्नराऽमराः। तद्वृत्तान्तोद्भवं लोके तद्भागवत-मिष्यते** इति च पुराणान्तरवचनात्।

किञ्च—सरस्वतीकल्पस्य अर्थप्राप्तत्वात्तादृश-सारस्वतकल्पसम्बन्धिनो ये देव-दानव-मानवास्तद्-वृत्तान्तस्योद्भवो यस्मात्तत्पुराणं 'भागवतं' विदुः। तथा चात्र प्रधानतया सरस्वत्या आविर्भावप्रति-पादकं पुराणं यत्तद् भागवतमिति पुराणरहस्यार्थः। एतेषु वचनेषु विद्यमानेष्वपि 'भागवत'पदेन विष्णु-भागवतस्य ग्रहणं गगनसुमनोपममेव।

अष्टादशपुराणानि कृत्वा सत्यवतीसुतः।
भारताख्यानमखिलं चक्रे तदुपबृंहितम्॥

इति महाभारतवचनमपि देवीभागवतस्यैव महा-पुराणत्वमुद्बोधयति, श्रीमद्भागवतस्य[2] महाभारत-निर्माणानन्तरं निर्मितत्वात्[3]। तथा चोक्तम्—

वेदशाखाः पुराणानि वेदान्तं भारतं तथा।
कृत्वा सम्मोहसम्मूढोऽभवं राजन् मनस्यपि॥
तदिदं भारताख्यानं बह्वर्थं श्रुतिविस्तरम्।
तत्त्वतो ज्ञातुकामोऽहं भगवन्तमुपस्थितः॥

एतेन सूच्यते यद् भारतोत्तरमेव श्रीमद्विष्णु-भागवतस्योत्पत्तिः। तस्मात्तस्योपपुराणत्वं सिद्धय-त्येव। सुतरामष्टादशपुराणेषु श्रीमद्देवीभागवतस्य पञ्चमत्वात्तस्यैव महापुराणत्वमिति निर्विवादम्।

वैष्णवं नारदीयञ्च तथा भागवतं शुभम्।
गारुडञ्च तथा पाद्मं वाराहं शुभदर्शने।
सात्त्विकानि पुराणानि विज्ञेयानि शुभानि वै॥

इति वचनेनापि 'देवीभागवतंस्य सात्त्विकत्वं प्रदर्शितम्। सुतरां शैव - मात्स्यादिमते श्रीमद्-देवीभागवतमेव महापुराणम्, श्रीमद्विष्णुभागवतम् उपपुराणं चेति सिद्धम्। तथा च निष्कर्षः—

पुराणं पञ्चमं पुण्यं देवीभागवतं स्मृतम्।
दिव्यं तन्त्रपुराणं तन्निगमागमसम्भृतम्॥

---

१. यस्मिन् पुराणे यस्य कल्पस्य प्रथमतः प्रति-पादनं तत्कल्पप्रतिपादकमेव तत्पुराणमिति नियमः, सर्वपुराणेषु तद्दर्शनात्।

१. भारतोत्तरं विष्णुभागवतस्य रचनाकाल-त्वादिति भावः।

२. ब्रह्मसूत्रम्। ३. महाभारतमिति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्री भारतधर्म-महामण्डल-शास्त्रप्रकाश-विभागद्वारा प्रकाशितानि पुस्तकानि

१. धर्म-कल्पद्रुम प्रथम खण्ड	२.००
२. ,, द्वितीय खण्ड	१.५०
३. ,, तृतीय खण्ड	२.००
४. ,, चतुर्थ खण्ड	२.००
५. ,, पंचम खण्ड	२.००
६. ,, षष्ठ खण्ड	३.५०
७. ,, सप्तम खण्ड	२.००
८. ,, अष्टम खण्ड	३.५०
९. धर्म-कल्पद्रुमद्वितीयखण्डसहित रायल, एडी०	५.००
१०. प्रवीण दृष्टि में नवीन भारत प्र० द्वि० खण्ड	२.००
११. नवीन दृष्टि में प्रवीण भारत	१.००
१२. साधन-चन्द्रिका	१.७५
१३. शास्त्र-चन्द्रिका	१.५०
१४. धर्म-चन्द्रिका	१.२५
१५. आर्य-गौरव	०.५०
१६. नीति-चन्द्रिका	०.५०
१७. धर्म-प्रश्नोत्तरी	०.२५
१८. चतुर्देश-लोकरहस्य	०.२५
१९. गीतार्थ-चन्द्रिका सजिल्द	३.००
२०. ,, ,, अजिल्द	२.५०
२१. सनातनधर्म-दीपिका	०.७५
२२. धर्म-विज्ञान प्रथम खण्ड	५.००
२३. ,, द्वितीय खण्ड	४.००
२४. ,, तृतीय खण्ड	४.००
२५. सतीचरित्र-चन्द्रिका	२.००
२६. नित्यकर्म-चन्द्रिका	०.२५
२७. धर्म-सोपान	०.२५
२८. धर्मकर्म-दीपिका	०.२५
२९. सदाचार-सोपान	०.०६
३०. कन्याशिक्षा-सोपान	०.०६
३१. ब्रह्मचर्य-सोपान	०.२५
३२. साधन-सोपान	०.५०
३३. शास्त्र-सोपान	०.२५
३४. उपदेश-पारिजात	०.५०
३५. कल्कि-पुराण	१.५०
३६. पातञ्जल-योगदर्शन	३.००
३७. महामण्डल-रहस्य	१.५०
३८. मन्त्रयोग-संहिता	१.००
३९. हठयोग-संहिता	०.५०
४०. तत्त्वबोध	०.१३
४१. स्तोत्र-कुसुमाञ्जलि	०.२५
४२. भगवद्गीता प्रथम खण्ड	१.००
४३. विष्णु-गीता	१.००
४४. सूर्य-गीता	०.५०
४५. शक्ति-गीता	१.००
४६. बीज गीता	०.७५
४७. शंभु-गीता	१.००
४८. संन्यास-गीता	१.००
४९. गुरुगीता	०.२५
५०. कर्ममीमांसा-दर्शन प्रथम खण्ड	१.५०
५१. ,, द्वितीय खण्ड	२.००
५२. ,, तृतीय खण्ड	५.००
५३. कर्ममीमांसा-दर्शनम् (संस्कृत)	२.००
५४. राम-गीता	२.५०
५५. कहावत-रत्नाकर साधारण रायल	१०.००
५६. रामायण तुलसीकृत	१.५०
५७. दैवीमीमांसा-दर्शन प्रथम भाग	३.५०
५८. ,, द्वितीय भाग	५.००
५९. त्रिवेदी सन्ध्या	०.३७
६०. गोव्रत-तीर्थमहिमा	०.५०
६१. मार्कण्डेय-पुराण प्रथम खण्ड	१.००
६२. ,, द्वितीय खण्ड	१.००
६३. ,, तृतीय खण्ड	१.००
६४. ऋजु-पाणिनीयम्	०.७५
६५. संगीत-सुधाकर	०.२५
६६. पुराण-रहस्य	१.५०
६७. संन्यासधर्म-पद्धति	१.५०
६८. पातञ्जल-योगदर्शनम् (संस्कृत)	४.००

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

पञ्जीकृतसंख्या एल० १८१७
Digitized by Arya Samaj Foundation Chennai and eGangotri

सूर्योदयस्य नियमाः

पत्र-संहिता

१. 'सूर्योदय'-मासिकपत्रस्य वार्षिकं शुल्कं रूप्यकपञ्चकं वर्तते। धनादेश (मनीआर्डर) द्वारा तत्प्रेषणीयम्। वी० पी० द्वारा प्रेषणे ५० पणाः पृथक् प्रदेयाः स्युः।

२. आवर्षं गम्भीरसाहित्यसमन्विताः १२ अङ्काः प्रकाश्यन्ते। नवीनग्राहकत्वं प्रथमाङ्कतः (जनवरी-अंकतः) एव स्वीक्रियते। माध्यमिकेन केनापि अङ्केन ग्राहकत्वं न स्वीक्रियेत।

३. आंग्लमासस्य २६ दिनाङ्के 'सूर्योदयः' प्रकाशितो भवति, वारद्वयं संशोध्य ग्राहकेभ्यः स प्रेष्यते। अतस्तदलाभे पूर्वं स्वकीय-पत्रालयतस्तदनागमनस्य निश्चयं कृत्वैव १० दिनाङ्कानन्तरं वयं सूचनीयाः।

४. लेख-कवितादीनां भाषा संयता, सरला, शुद्धा च भाव्या। प्रकाशनीय-लेखादीनां स्पष्टाक्षरैः कर्गजस्यैकपृष्ठे एव लेखनमावश्यकम्। अस्वीकृता लेखादयः पोस्टविभागीय-चिटिका (टिकट) प्राप्त्यनन्तरं परावर्तयितुं शक्यन्ते।

५. सम्पादकीय-विषयसम्बद्धे पत्र-व्यवहारे 'सम्पादकः' इति, व्यवस्थाविभागीय-पत्रव्यवहारे च 'व्यवस्थापकः' इति च स्पष्टं लेखनीयम्। तेन उत्तरलाभे सुधा विलम्बो न भवेत्।

विज्ञापन-शुल्कम्

सूर्योदये सुरुचिपूर्णं विज्ञापनं प्रकाश्यते। एकवारं तस्य प्रकाशनस्य शुल्कक्रमश्च अधोलिखितोऽस्ति। सार्वकालिकस्य दीर्घकालिकस्य च विज्ञापनस्य कृते विशेष-सौविध्याय पत्र-व्यवहारः कार्यः।

साधारणस्य प्रतिपृष्ठस्य	१००) रु०	साधारणस्य प्रत्यर्धपृष्ठस्य	६०) रु०
साधारणस्य चतुर्थांशपृष्ठस्य	३५) रु०	आवरण-चतुर्थपृष्ठस्य	२००) रु०
आवरण-द्वितीय-तृतीयपृष्ठयोः	१५०) रु०	प्रथमावरणपृष्ठे विज्ञापनं न स्वीक्रियेत।	

—सङ्केतः—

'सूर्योदय'-कार्यालयः, भारतधर्म-महामण्डलम्, जगत्गंज, वाराणसी।

सम्पादकः, प्रकाशकः, मुद्रकश्च—गोविन्द नरहरि वैजापुरकरः,
भारतधर्म-महामण्डलम्, जगत्गंज, वाराणसी-कैण्ट।
मुद्रण-स्थलम्—आनन्दकानन प्रेस, सी० के० ३६/२०, वाराणसी।
CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सूर्योदयः

भारतधर्ममहामण्डलस्य

मासिकं मुखपत्रम्

वर्षम् ४४

अङ्कः ३

सम्पादकः

गो० न० वैजापुरकरः

मार्च

१९६८

वार्षिक-मूल्यम्

५) रूप्यकाणि

प्रत्यङ्क-मूल्यम्

अर्धरूप्यकम्

वासन्ती-लीला

१. मधुकरसङ्कुलकुसुमपराग - रागरसमुग्धमुहासे
रतिपतिमकरध्वजशरहतनरदुःखजनीरजवासे ।
वकनयनजनमनोहराकृतिविकृतिविहीनवराङ्गी
विलसति मनसिजमनसिजनितरतिकलाकेलिनिपुणाङ्गी ॥

२. सरससुतनुमधुराङ्गि कनकवर्णच्छविदीपितदेहे
विमलान्तःकरणद्युतिमद्-भवभीतिहरशुभस्नेहे ।
कलितललितविभवविभूषितवरकरपल्लवमसृणाङ्गी । विलसति० ॥

३. शशिमुखवदनसरोजमधुपनिजकृतकामनाविलासे
सुभगनितम्बिनि कोमललोहितमृदुलकपोलसुभासे ।
उन्नतपीन - पयोधरयुग - संयुगजयकरचपलाङ्गी । विलसति० ॥

४. मधुरसमधुरमधूत्थमृदुलवपुबालविलोकनकाले
झणत्कारकर-तानानिनादित-गीतगीतलयमाले ।
लोलकपोलोल्लोलवासना-वासितसुरभिसदाङ्गी । विलसति० ॥

५. चुम्बनपरिरम्भणकृतिशालिसुशीलसुशालितसदने
मञ्जुलमङ्गलमोदविनोद - विनोदितमोदितमदने ।
पुष्पधनुरनङ्गाङ्गिनयन - मोहिनीकान्तिरजराङ्गी । विलसति० ॥

— श्री वेदप्रकाश उपाध्यायः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्री गायत्रीदेव्याः सप्तमः प्रतिष्ठापन-महोत्सवः

वाराणसी । भारतधर्ममहामण्डलस्थिते श्री गायत्रीमन्दिरे विगत फाल्गुन शुक्ल पञ्चमीतः सप्तमीं (४ मार्चतः ६ मार्च पर्यन्तम्) ब्रह्ममय्या श्री गायत्रीदेव्याः सप्तमः प्रतिष्ठापनमहोत्सवो महता आयोजनेन संपन्नः । प्रतिदिनं महापूजनम्, विशेषशृङ्गारः, पाठादिकं नामसङ्कीर्तनादिकञ्चाभवत् । प्रथमदिने सायं श्री सन्त छोटेजी महाराजानां मानसकथा समभवत् । द्वितीयदिने श्री भगवत्प्रसाद वेदाचार्याणामाध्यक्षे वैदिक-सम्मेलनं वसन्तपूजनञ्च समभवत् । तृतीयदिने श्री स्वामि प्रकाशानन्दानां साभापत्ये अन्तिमं महाधिवेशनं समभूत् ।

अनुक्रमः

प्रपानकः	पत्रपुटम्	परिवेषकः
फाल्गुन-मङ्गलम्	४९	श्री स्व० नारायणशास्त्री खिस्ते
श्री महर्षि-ज्ञानानन्द-चरितम्	५०	श्री विन्ध्येश्वरीप्रसादशास्त्री
नारीत्वं-निवर्तन-सङ्कटं कथं परिहरणीयम्?	५१	सम्पादकीयम् (अग्रलेखः)
स्वर्गीयाः भागवत महोदयाः	५४	सम्पादकीया टिप्पणी
पुरुषसूक्त-देवीसूक्तयोः परमं तात्पर्यम्	५५	श्री पूज्य करपात्रस्वामिनः
(२) धर्मे सर्वं प्रतिष्ठितम्	५७	श्री जगन्नाथ श्रीधरशास्त्री पदे
होलिकामुखे यान्तु···	६०	श्री रामस्वरूप शास्त्री 'अमरः'
शिशिर-विलासः—		श्री लक्ष्मीनारायण द्विवेदः
सव्याख्यः	६१	श्री डा० हरिदत्त पालीवालः
(४१) क्षत्रपति-महाकाव्यम्	६४	श्री उमाशंकर शर्मा त्रिपाठी
धन्यो राजा, धन्यञ्च राज्यम्	६५	श्री 'अङ्गारः'
हरिश्चन्द्रीयं वसन्त-विलसितम्	६६	श्री 'रेखा-रमणः'
(२) गौतमो गोतमो वा ?	६८	श्री ना० वा० मराठे
मानस-भारती	७०	श्री जनार्दन गङ्गाधर रटाटे

श्री कृष्ण देव प्रसाद गौडाय श्रद्धाञ्जलयः—आवरण - तृतीयपृष्ठ

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सूर्योदयः

श्री भारतधर्ममहामण्डलस्य मासिकं मुखपत्रम्

रागद्वेषनिशाटनं विधुरयन् मोहं तमो नाशयन्,
तामिस्रं जडवादकैरवकुलं ज्ञानत्विषा ग्लापयन्।
विद्वत्कोकमशोकयन् नयसुधीरोलम्बमुन्मीलयन्,
सञ्जातः सुमनोमनो मधुरयन् सर्वत्र सूर्योदयः॥

४४ वर्षे] वाराणसी, फाल्गुनः २०२४ : मार्च १९६८ ई० [३ अङ्कः

फाल्गुन-मङ्गलम्

पान्थोन्मादकरैः पलाशकुसुमै रागं दिशां वर्धयन्
झङ्कारैरथ घोषयन् मधुलिहां पौष्पेषवं शासनम्।
बालान् निर्भयमुच्चकैः प्रलपितुं प्रोत्साहयन् मानिनीः
पश्चात्तापमुपादिशन् विजयते मासोऽधुना फाल्गुनः॥ १॥

ईक्षणरक्षितकामं जयति वपुः पारमेश्वरं वामम्।
मुनयो नामं नामं मुदा समर्चन्ति यद्वयःश्यामम्॥ २॥

मातर्भारति! भासय स्वचरणाङ्गुष्ठाग्रजाग्रन्नख-
प्रोत्सृष्टाङ्कसुधाकरस्य किरणैर्मोहाविलं मे मनः।
मात्सर्योपहतात्मनामपि मृषा श्रुत्वा दुरुक्तीर्नृणां
विक्षोभं समुपैतु नैव हृदयं शान्त्या च संयुज्यताम्॥ ३॥

— स्वर्गीयाः श्री महामहोपाध्याय खिस्ते नारायणशास्त्रिपादाः —

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्री महर्षि-ज्ञानानन्द-चरितं महाकाव्यम्

-- श्री विन्ध्येश्वरीप्रसाद शास्त्री --

सम्पश्यतस्तत्सरसीरुहाङ्घ्रि इयं महर्षेर्मनुजाधिपस्य ।
आनन्दपूरो ववृधे निशायाः पति पयोधेरिव सम्प्रवृद्धम् ॥ ३१ ॥

३२. नानाविधानां व्रततीततीनां
संख्यातिगानां क्षुभसन्ततीनाम् ।
मयूर-हंसादि-निषेवितानां
मध्यस्थिते सुन्दर-शाद्वलानाम् ॥

३३. सुधाविलिप्ते निज-राजसौधे
प्रशस्त - सर्वर्तू - सुखाकरे च ।
यतीश्वरं तं महताऽऽदरेण
न्यवासयत् शाहपुराधिनाथः ॥

३४. सत्पाटलाम्भोजनि-यूथिकादि-
सौरभ्यमादाय शनैश्चरिष्णुः ।
वायुर्हि यत्र स्थित-राजदारा-
ऽऽननोत्थवातैर्न तुलां बिभर्ति ॥

३५. यत्र स्थितानां ललनाजनानां
विकस्वरैः प्राकृतिकैः स्वरैश्च ।
न्यक्कारमाप्ताः किल कोकिला हि
कूजन्ती दीप्ता इव खर्वगर्वाः ॥

३६. यत्र स्थितानां नृपकन्यकानां
प्रफुल्ल - पुष्पाञ्चित-केशपाशैः ।
विचित्रिताश्चापि विभोः प्रकृत्या
तिरस्कृतिं बिभ्रति बर्हिबर्हाः ॥

३७. राजस्त्रियां नृत्यविलासलीलां
संशिक्षितुं हर्म्यमुपाश्रितास्ते ।
पुनस्तदभ्यस्तुमिमे मयूरा
नृत्यन्ति यत्रोपवनेषु नित्यम् ॥

३८. सुखप्रदैः सुन्दरवस्तुजातैः
सुसज्जितं हर्म्यमिदं नृपस्य ।
समृद्धिमन्नन्दन - काननस्थं
सुरेन्द्रसौधं हरतीव चित्रम् ॥

३९. न्यक्कुर्वते ये स्वसुखानि सन्तः
स्वजीवनं धर्मकृतेऽर्पयन्तः ।
तेषां पवित्रेषु पदाम्बुजेषु
वसन्ति सर्वाः सुखसम्पदो हि ॥

वेदान्तविद्याश्रय-राजयोगी यो जीवितो मुक्त इह स्थितोऽस्ति ।
धर्म्यं समस्ते भुवनं च येन सङ्गन्तुमिच्छन्ति सुखानि तेन ॥ ४० ॥

[क्रमशः]

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नारीत्व-निवर्तन-सङ्कटं कथं परिहरणीयम् ?

अचिरादेव रूसदेशस्य प्रमुखे 'प्रावदा'पत्रे महिला-सन्देशहर्त्र्याः एल० ग्राफोवा महोदयाया एको लेखः प्रकाशपदवीमुपगतः, यत्र विदुष्या तया रूसदेशीया नार्यः साधिक्षेपं संसूचिताः यत्तासां नारीत्वं सम्प्रति नूनं सङ्कटाकुलम्। तया सुदृढं मन्यते यत् मुक्ति-समतयोः समधिगत्या अद्य रूसदेशीयानां नारीणामन्तरायाः अतितरां प्रचयं गताः! सा लिखति—'रूसदेशीय-नारीभिः सामाजिक-स्वातन्त्र्याय प्रबलः सङ्घर्षः कृतः, आर्थिक-राजनैतिकाधिकाराणां लब्धये नैकान्यभियानानि समाचरितानि, अन्ततश्च सर्वमेतत् प्रत्यक्षतोऽधिगतमपि। सत्यप्येवं देशस्यास्य नारीणामद्य का स्थितिरिति विचार्यमाणे स्फुटं दृश्यते यत् प्रतिसप्ताहं ४० घटिकाः यावत् उत्पादनसंस्थाने (कारखाना-संज्ञके) व्यवस्थाविभागे (कार्यालये) वा तासां कठोरः श्रमः कर्तव्यो भवति, प्रायस्तावानेव गृहेऽपि पारिवारिक-कार्यजाते तदीयश्रमोऽनिवार्यो जायते। इत्थं भृतिद्वयं तासां शिरसि बलात् समापतति। अहो समतायाः, मुक्तेः स्वतन्त्रतायाश्चायं महान् प्रसादः!'

श्रीमत्याः ग्राफोवा-महोदयाया धारणेयं यत् 'पुरुषरूपेण नारीरूपेण च प्रविभक्तेऽस्मिन् संसारे पूर्णं साम्यं किल सर्वथाऽसम्भवि। मन्ये, सम्प्रति प्रगततर-रूसदेशीयो नरो नार्यां नारीत्वदर्शनमेव विस्मृतवानिति। स नारीं केवलां श्रमिकारूपेण सहयोगिनीरूपेण चैव पश्यति। कार्याधिक्येन भराक्रान्तया नार्या पुरुषस्य कृते स्वकीयं प्रत्नतमम् आकर्षणमशेषतोऽपहारितमिव दृश्यते।'

रूसीयनार्याऽस्याः वक्तव्यमिदमस्मान् साम्प्रतिकं भारतीय-नारीसमाजं समीक्षितुं बलात् प्रेरयति। यतो हि सा विदुषी जनसेविका सुपरिष्कृत-पत्रकलाकर्त्री विशुद्ध-भौतिकता-समर्थकस्य प्रगततर-देशस्य भुक्तजनजीवना तथाकथित-प्रगतिशीला महिला। तदुक्तं वचोजातं कथमपि प्रतिगामि सङ्कुचितपूर्वाग्रहाभिभूतम् अननुभूतचरं वावावाक्यायमानं शास्त्रसंस्कारदूषितं वा वक्तुं न पार्येत।

वक्तव्यस्यास्य अंशत्रयम्—१. नारीत्वं सङ्कटापन्नम्। २. अद्यतनीयानां नारीणां कृते पुरुषतः समतायाः स्वतन्त्रतायाः मुक्तेश्च अहो प्रसादः। ३. स्त्री-पुरुष-प्रविभक्तायां संसृतौ उभयोः पूर्णं साम्यं सर्वथाऽसम्भवि च। नारीत्वस्य सङ्कटापन्नतायाः प्रयोजकमनया पुरुषसमता-महाभियानेन नारीत्वस्य प्रत्नाकर्षणापहार एवाभिप्रेयते। समता-स्वतन्त्रता-मुक्तिविषये विवशतोऽधिकश्रमभर एव बाधकः। अत्र उभयोः पूर्णं साम्यं सर्वथा असम्भवीति तस्या अन्तिमो निष्कर्षः। अस्माकं देशे नारीभ्यः पुरुषसाम्यदानाय साटोपं प्रयतमानैः ततो विरतान् प्राचीनांश्च पदे पदे क्रोशयद्भिरिदं विशेषतो विमर्शनीयम्। नारीषु पुरुषसाम्याधानाय नारी-वेषभूषया स्वात्मानं भूषयद्भिस्तथाकथितैः उदाराशयैः स्त्रीदाक्षिण्य-दीक्षितैः पुनरत्र दृढतरमवधेयम्।

विषयेऽत्र सर्वसमन्वयकारिणो वेदान्तदर्शनस्य दृशा विचार्यमाणे स्फुटं दृश्यते यत् सर्गारम्भे सच्चिदानन्दैकरसाखण्डानन्तस्य ब्रह्मणः एकोऽहं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बहु स्याम् इतीच्छा समभवत् । ततो मायाख्या तदभिन्ना शक्तिः पृथक् प्रादुरभवत् । तदनुषक्तं ब्रह्म मिथुनभावमभजत् । ततश्च सृष्टिक्रमः प्रसृतः । एवञ्च सर्गारम्भाय वेदान्तदर्शनेन स्त्री-पुंसोर्मिथुनस्य सममेव प्राधान्यमाम्नातम् । तत्रापि स्त्रीशक्तिर्माया तत्र उपादानं कारणम्, ब्रह्म च निमित्तम् ; तया समनुषक्तत्वादेव ब्रह्मणो जगदुत्पत्तौ तेषां निमित्तोपादान-कारणतावादः । दृशाऽनया विचार्यमाणे कार्येण अयुतसिद्धस्य उपादानकारणभूतस्य नारीतत्त्वस्य स्पष्टत एव वेदान्तेन पुरुषतोऽधिकता स्वीकृता । ततः कुतोऽवसरस्तेन तस्याः समता-वार्तायाः ?

भगवती श्रुतिरपि पितुः पूर्वं मातुर्गौरवं स्थापयति—पूर्वं **मातृदेवो** भव ततश्च **पितृदेवो भव** इति समादिशन्ती । **पितुर्दशगुणा माता गौरवेणातिरिच्यते, यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः** इत्यादिस्मरणैः मन्वादिस्मृतिकारैरपि नारी पुरुषतोऽधिकं समादृतेति सर्वैर्ज्ञायत एव । पुराणकृद्भिः सूत्र-भाष्यादिकारैः पुनस्तत्र तत्र अस्यैव तथ्यस्य समर्थनं कृतम् । परमवीतरागा भगवत्पादाः शङ्कराचार्या भाष्यकारा अपि सौन्दर्यलहरी-ग्रन्थे '**शिवः शक्त्या युक्तो यदि भवति शक्तः प्रभवितुम्**··· इत्यादिना शिवतोऽपि शिवाया नार्यः स्फुटं वैशिष्ट्यमाहुः ।

इत्थं भारतीयसंस्कृतेः पृष्ठभूमिमये प्राचीनवाङ्मये सर्वत्र स्त्रियः सातिशयं पुरुषेण साम्यं समाम्नातम् । इदमत्रावधेयम्—साम्यमन्यत् अभेदश्चान्यः । साम्यं तु भेदानुषक्तमेव स्वात्मानं बिभर्ति, तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्त्वस्यैव सादृश्याकारत्वात् । सत्येवम् कार्यविशेषस्य एकस्मिन्नङ्गे एकस्य स्वगुणतः प्रयोजकत्वम्, अपरस्मिन्नङ्गे अपरस्य । सङ्कलनेन पुनरुभयोः प्रयोजकत्वेन यत्कार्यं सेत्स्यति, तदा तत्र कस्य वैशिष्ट्यं कस्य वा साधारणत्वं वक्तुं शक्यम् ? कथन्नाम तत्र उभयोर्न साम्यमित्यपि वक्तुं कश्चित् पारयेत् ?

वस्तुतः सांख्यदृष्ट्या विचार्यमाणे सत्त्व-रज-स्तमसाम् अन्योन्याभिभवाश्रय - जननमिथुनवृत्तीनां त्रिगुणानां वैषम्येनैव सृष्टिकार्यं प्रचलति । यदा तेषां साम्यं जायते, सा तु प्रलयावस्थैव गीयते । जीवजातानि च एभिरेव गुणैरनुस्यूतानि । सत्येवं जगति को नाम पूर्णं साम्यं कुत्र स्थापयितुं प्रभवेदिति महान् यक्षप्रश्नः ! अत एव श्रीमत्याः ग्राफोवा महोदयाया अन्तिमो निष्कर्षोऽयं साधीयानेव यत् पुरुष-नारीरूपाभ्यां प्रविभक्तेऽस्मिन् जगति उभयोः पूर्णं साम्यं सर्वथाऽसम्भवीति ।

स्यादेतत्—सत्येवं किं स्त्री-पुंसोर्दृश्यमानं वैषम्यं कथमपि न निरोद्धव्यं नाम ? किमस्माकं यत्नस्य क्रमस्तयोर्वैषम्यवर्धनायैव भाव्यः ? इदन्तु कोऽपि मतिमानभिमन्तुं न शक्नुयात् । सर्वदुःखनिदानभूतं वैषम्यपितरं द्वैतं समूलमुन्मूलयितुं प्रवृत्तेन भारतीयदर्शनेन तत्संस्कृत्या वा कथमेतत् स्वीक्रियेत ? तथ्यन्तु इदमेव यत् व्यावहारिके जगति वैषम्यं द्वेधा—एकं स्वाभाविकम्, अपरञ्च कृत्रिमम् । तत्र कृत्रिमस्य वैषम्यस्य सर्वथा निरोधं कृत्वा साम्यापादनं भारतीयसंस्कृतेः परं लक्ष्यम् । स्वाभाविकं वैषम्यं पुनर्यत्नसहस्रेणापि अपोहितुं दुःशकम् ।

स्त्री - पुंसोरात्मदृष्ट्या परं साम्यम्, किन्तु व्यवहारक्षेत्रे द्वयोर्भिन्नं भिन्नं प्रयोजनम्, तदनुसारी च कर्तव्यभेदोऽपि । संसार-रथस्य सञ्चालकं चक्रद्वयं स्त्री पुमांश्च । संसारो व्यवहारो वा द्विधा—बाह्यः आभ्यन्तरश्च । बाह्यपदेन च

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गृहगतकार्यजातमभिप्रेतम्। तत्र बाह्यव्यवहारस्य दायित्वं सर्वथा पुंसि आन्तरिकस्य च दायित्वं स्त्रियमधितिष्ठति। ब्रह्मचारि - वानप्रस्थ-संन्यासि-संज्ञकास्त्रय आश्रमिणो गृहस्थाश्रमिणमेकमेव सर्वथा समाश्रयन्ते। तेनैव तेषां लौकिको योग-क्षेमश्च। चातुराश्रमिक्याः भारतीयसमाज-व्यवस्थायाः गृहस्थाश्रमोऽयं तदधिकृतो गृहस्थश्च किल मेरुमणिः। अत एव भोगसाधनानां भूयसा समवायेऽपि एतादृशगुरुतरदायित्वभराक्रान्ते तदा-श्रमे लोकोत्तरा त्यागप्रधाना संस्कृतिः प्रतिफलति। स्त्री पुमांश्च आश्रममुं सुदृढाभ्यां स्कन्धाभ्यां परिवहतः। अत एव सांसारिक-वासनाबीजानुषक्ता स्त्री पुमान् वा कथमपि न स्वतन्त्रः। उभयोः सुदृढं समुचितं सङ्घटनं परस्परापेक्षता, पर्यायतः परस्परपारतन्त्र्यमेव जगतः श्रेयसे कल्पते, नोभयोः साम्प्रतिकं वैदेशिकसंस्कृत्यनुप्राणितं उच्छृङ्खलं स्वातन्त्र्यम्। नास्माकं संस्कृतिर्भोगवादं प्रोत्साह-यति। यतो हि—

न जातु कामः कामानामुपभोगेन शाम्यति।

इति पूर्वपूर्वतनानां समनुभूतसिद्धान्तात्। सत्येवं प्रधानैककार्यनिर्वाहकैर्नैकैः कार्यभेदैः स्त्रीपुंसोर्मध्ये यदि नाम कियद् वैषम्यं दृश्येत तदाऽस्माकम् इष्टापत्तिरेव भवेदिति निस्सङ्कोचं वक्तुं पारयामः।

अस्माकं दृढं मतं यत् नारी केवलं गृहकार्य-मेव परमया योग्यतया सम्पादयतु। तत्र मनागपि पुरुषावधानमनावश्यकं भवेत्। तस्याः बहिः कार्यकरणं तन्मुखेन धनार्जनञ्च सर्वथा निरोधनीयम्। अस्माकमिदं वक्तव्यं पुरातनसंस्कारदूषितं कामं वदन्तु कथितप्रगतिशीलाः साम्प्रतिकाः। परं श्रीमत्याः ग्राफोवा महोदयाया वक्तव्येनैव स्फुटमेतत् यद् गृहकार्यं स्त्रियो विवशतः सर्वथा करणीय भवति। सा किल तस्याः स्वाभाविकी प्रवृत्तिर्विधि-विहिता। सत्येवं तस्यां बाह्यकार्यभरारोपणं स्त्री-पुंसोः साम्याधायकं स्त्रियो निर्ममम्मुत्पीडनं पर्यन्ते च निन्द्यतमाया दासप्रथाया नवावतारो वेति सुधिय एव विभावयन्तु। स्पष्टमुद्घोषयामो वयं यत् साम्य-स्वातन्त्र्यादिमोहकैः शब्दजालैः स्त्रीणामेतादृशमुत्पीडनं भारतीयसंस्कृतिः कदापि सोढुं न प्रभवेत्। भारतीयसंस्कृति-चर्माच्छादिता पाश्चात्त्यसंस्कृतिरेव देशे परिचाल्या चेन्नात्र कोऽप्याग्रहः।

अन्यच्च—साम्प्रतं स्त्रीशिक्षायास्तासां भृत्य-वृत्तेर्वा यावता महत्परिमाणेन प्रचलनं जातं तेन पुरुषाणां शिक्षा भृत्यवृत्तिश्च प्रत्यक्षं परं बाधिता दृश्यते। कार्याभावेन अद्यैव सहस्रशः पुरुषाः निरु-पयोगिनः संवृत्ताः। अद्यापेक्षाकृता स्त्रीणां कृते शिक्षा-भृतिवृत्त्यादेर्व्यवस्था दृश्यते। परं कियता कालेन तासामपि शिक्षावृद्ध्या तत्रापि स्थितिरियं नूनं समापतेत्। अनेनाभिक्रमेण कीदृशं विकृतं रूपमस्माकं समाजस्य भवेत्, तद्वक्तुमेव न पार्यते। बाह्यकार्यकरणभरेण, गौरवेन, स्पर्धया च सम्प्रत्येव बहुषु परिवारेषु पारिवारिकजीवनस्य वास्तविक आनन्दो विलुप्तो दृश्यते चेत् सर्वा-धारेऽस्मिन् आश्रमे श्रद्धाकेन्द्रान्यतमस्य अतिथे-रपचितेः कथैव दूरायाता। स्वतन्त्रतया अर्थार्जनेन स्वभावतस्तासां पुरुष-निःस्पृहता वर्धते, येन आत्मार्पण - पृष्ठभूमिमाश्रित्य पल्लवनशीलाया प्रेमवल्ल्यास्तावान् विकासोऽवरुद्ध्यते। एवमादयो बहवोऽनर्था गार्हस्थ्यजीवनान्तरायभूताः प्रवर्तन्ते।

अनेन विवेचनेन प्रश्नोऽयमनायत्या पुरः-स्फुरति—किमेवं सदैव स्त्रियः पुरुषाधीना एव

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

करणीयाः ? ताभ्यः किमपि स्वातन्त्र्यं न देयं नाम ? तासां विविधेषु सांसारिकक्षेत्रेषु प्रगतिः किं सर्वथा निरोधनीया इति ? अत्रोच्यते—अस्माकं निरूपणमेतत् साधारणं समाजव्यवस्थापनमालक्ष्यैव प्रवृत्तम्। सर्वसाधारणरूपेण स्त्रीणां कृते सर्वविधकार्येषु पुरुषसाम्याधानाय जायमानः प्रयत्नः सर्वथा हानिकर इत्येवास्माकमुद्दिष्टम्। सामान्यतः स्त्रीणां पुरुषाणाञ्च पृथक् पृथक् कार्यक्षेत्राणि भाव्यानि यानि च परस्परपूरकाणि भवेयुः। तत्र साङ्कर्यं सर्वथाऽनपेक्षितम्। सत्येवं याः स्त्रियः पूर्वसंस्काराद्युद्बोधक-सामग्रीवशेन पौरुषेषु क्षेत्रेषु प्रगतिं कृत्वा स्ववैशिष्ट्यं दर्शयेयुश्चेत् तदस्माभिर्न निषिद्ध्यते। भारतीयेतिहासे एतादृशा नैकाः ब्रह्मवादिन्यो वीरबालाः विदुष्यः सम्भूता यासां गौरवमयैः कार्यैः संस्कृतेर्देशस्य च शिरः समुन्नततरमभवत्। परं तदपवादभूतम्। सामान्यतः प्रत्येकस्य पुंसः स्त्रियश्च कार्यक्षेत्रमसङ्कीर्णमेव भाव्यम्। तदैव तत्तत्क्षेत्रीयं कार्यं पूर्णतः सम्पन्नं भवितुं शक्नुयात्। मन्यामहे यदनेनैव पथा नारीत्वं विशेषतो भारतीयं नारीत्वं सङ्कटेभ्यः पारं गच्छेत् यदर्थं श्रीमती ग्राफोवा महाशया अतितरां चिन्तिता दृश्यते।

अन्यच्च, भारतदेशेन स्त्रियः स्वरूपं सर्वाधिकेन मातृत्वपदेन गौरवितं वर्तते। सर्वसमर्थस्य पुंसः प्रसवित्री निर्मात्री च केवला इयमेव। अद्य सा केवलं प्रसवित्री भवति, मातृत्वं पुनः सुदुर्लभतमं सञ्जातम्। बालकस्य भोजनं मातृहस्तेन शिक्षणञ्च मातृमुखेनैव यदाऽस्माकं देशे प्रचलेत्तदैव प्राचीनकालवत् भारत-वसुन्धरा नैकान् वीरान्, विदुषो ब्रह्मवादिनश्च समुद्भावयितुं प्रभवेत्। विषयोऽयं विशेषनिवेचनमपेक्षते। लेखगौरवादिच्छद्भिरप्यस्माभिः अद्यात्र विषये विवशतो मोहसंवरणं क्रियते। तथापि यथावकाशमत्र नूनं विचारयिष्यते। समासतः प्रकृतविषये इदमेव वक्तव्यं यत् श्रीमत्या ग्राफोवा-महोदयया प्रश्नोऽयं सुदृढसमाजव्यवस्थास्थापनदृष्ट्या अतीव समुपयोगी समुपन्यस्तो यत्रास्माभिः स्वीया विचाराः प्रस्ताविताः। अन्यैरपि समाजधुरीणैरत्र गभीरं विचार्य कश्चित् परमश्रेयान् सुनिर्धारितश्च पन्थाः प्रदर्शनीय इत्येव साग्रहं निवेदनम्।

स्वर्गीयाः श्री भागवत महाभागाः

वाराणसेयाः श्रीविनायक गणेश भागवत महाभागाः मार्चमासस्य १९ दिनाङ्के ७५ वर्षावस्थायामितो वैकुण्ठवासाय प्रस्थिताः। वस्तुतस्तेषामभावेन 'कृत्वा समुपदेश'रूप प्राचीनपरम्परायाः एका सुदृढा शृङ्खला भग्ना। एते प्रसिद्धकीर्तनकाराः नारदीय-सङ्कीर्तन-परम्परायाः प्रमुखा आचार्या आसन्। एतेषां प्रतिभा बहुमुखी आसीत्। संस्कृत-हिन्दी-मराठी-काव्यरचनासु सिद्धहस्ताः, सङ्गीतशास्त्रमर्मज्ञाः मृदङ्ग-मर्दकादि-चर्मवाद्यध्वनीनां नव्यार्थव्यञ्जकाः भाषाशास्त्रविदश्च एते भगवतो विट्ठलस्य परम भक्ता अपि आसन्। यथार्थतः सर्वं स्वात्मनो जीवनं भगवति समर्प्य सुख-दुःखयोः समां मतिमास्थाय तैर्जीवनं समग्रं यापितम्। प्रसिद्धविट्ठलभक्तस्य एकनाथमहाराजस्येव व्यवहारस्थितावपि तदासक्तिर्वर्जिता अन्तर्बाह्यसारल्यमूर्तय एते सकृद्दर्शनेन एतादृशगुणगरिमावन्त इति ज्ञातुमशक्यमभवत्। त इमे महाभागाः स्वीयप्रभोर्भक्तवरस्य एकनाथमहाराजस्यैव पुण्यतिथिं स्वात्मनोऽपि पुण्यतिथिं सम्पाद्य अस्माकं मध्याद् गता इत्यस्माकं महती अपूरणीया क्षतिः। अद्य तु एभिदेव शब्दैस्तेभ्य अयं सप्रश्रयं श्रद्धाञ्जलिः समर्प्यते। ★

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुरुषसूक्त-देवीसूक्तयोः परमं तात्पर्यम्

---श्री पूज्य करपात्रस्वामिनः---

केषाञ्चित् शाखिनां मते अपरेयं षोडशी ऋक्—

वेदाहमेतं पुरुषं महान्त-
मादित्यवर्णं तमसस्तु पारे ।
सर्वाणि रूपाणि विचित्य धीरो
नामानि कृत्वाऽभिवदन् यदास्ते ॥

अर्थः—'अहं वेद्मि महात्मानं रामं सत्यपराक्रमम् । वसिष्ठोऽपि महातेजा ये चेमे तपसि स्थिताः' इत्यादिवत् तादृश तत्त्वस्य स्वीयसाक्षात्कारविषयत्वं वेदपुरुष आह—अहमेतं परमात्मानं महान्तम् अपरिच्छेद्यं पुरुषं वेद वेद्मि । आदित्यवर्णं सूर्यसमानवर्णम्—'नीलतोयदमध्यस्था विद्युल्लेखेव भास्वरा' 'य एषोऽन्तरादित्ये हिरण्मयः पुरुषः', 'सर्वे निमेषा जज्ञिरे विद्युतः', 'पुरुषादधि' इत्यादिश्रुतिभ्यः । तमसः मूलप्रकृतेः पारे ऊर्ध्वप्रदेशे त्रिपाद्विभूतौ 'अक्षरं तमसि लीयते, तमः परे देवे एकीभवति । पाद्मोत्तरखण्डे (१२७ अध्याये)—'असंख्यप्रकृतेः स्थानं निबिडध्वान्तमव्ययम् । ऊर्ध्वं तु सीम्नि विरजा निःसीमाधः सनातनी । प्रधानपरमव्योम्नोरन्तरे विरजा नदी । वेदाङ्गस्वेदजनिततोयैः प्रस्राविता शुभा । तस्याः पारे परे व्योम्नि त्रिपाद्भूतिः सनातनी' इति । धीरो यत्सर्वाणि रूपाणि विचित्य नामानि कृत्वाऽभिवदन् तमसः पारे आस्ते एतमहं वेद । धिया रममाणो धीरः, धीमतामग्रेसरो भगवान् स्वानभिज्ञानामपि संसारिणां योग्यकरण-कलेवरप्रदानेन स्वानुभवयोग्यतां सम्पादयति । अभिवदन् स्वप्राप्तिपर्यन्तामाशिषं वदन् 'देवानां पूरयोध्या', 'तस्यां हिरण्मयः कोशः स्वर्गो लोको ज्योतिषा वृतः' इत्यादिश्रुतिस्मृतिप्रसिद्धेऽतिरमणीये नित्यज्ञानानन्दमये निरतिशयसौगन्ध्य - सौकुमार्यादिविशिष्टानन्त - भोगपर्यङ्के श्रीभूनीलाभिः परिचरित - चरणयुगलो विराजते तमहं वेद ।

धाता पुरस्ताद्यमुदाजहार
शक्रः प्रविद्वान् प्रदिशश्चतस्रः ।
तमेवं विद्वानमृत इह भवति
नान्यः पन्था अयनाय विद्यते ॥

अर्थः—धाता चतुर्मुखः पुरस्तात् सृष्टिकाले यं परमपुरुषम् उदाजहार अस्तौषीत् । यद्वा—धाता पुरस्तात् पूर्वकाले यमुदाजहार 'तद्धैतद् ब्रह्मा प्रजापतय उवाच, प्रजापतिर्मनवे, मनुः प्रजाभ्यः' इत्युक्तरीत्या उपादिशदित्यर्थः । प्रविद्वान् भगवतो वामदेवादवाप्ततत्त्वज्ञानः प्रतर्दनाय ब्रह्मविद्योपदेष्टा च शक्रोः यमुदाजहारेत्यनुषज्यते । प्रदिशश्चतस्रः प्रधानभूताश्चतस्रो दिशस्तदुपलक्षिता एकत-द्वित-त्रितसनकादयश्च यमुदाहरन्तीति विपरिणतस्यानुषङ्गः । तमेवं विद्वानमृत इह भवति नान्यः पन्थाः अयनाय विद्यते ।

इत्थं विस्तृतेन विवेचनेन स्वप्रकाशे परस्मिन् ब्रह्मण्येव पुरुषसूक्ततात्पर्यं स्फुटीभवति ।

देवीसूक्तम्

एवं देवीसूक्तस्यापि अत्रैव तात्पर्यमिति प्रदर्श्यते—वेदान्तादि - सकल - सच्छास्त्र-परमतात्पर्यबोध्यं परमतत्त्वमेव स्त्री-पुं-नपुंसकातीतमपि सर्वरूपेण विवर्तते । 'त्वं कुमार उत वा कुमारी त्वमु जीर्णो

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दण्डेन वञ्चसि। जातो भवति विश्वतोमुखः ॥' 'नैव स्त्री न पुमानेष न चैवायं नपुंसकः। यद्यच्छरीरमादत्ते तत्तद् भवति पूरुषः' इत्यादिश्रुतिभ्यः चिच्छक्ति - त्रिपुरसुन्दर्यादिरूपेण तदेव स्त्रीत्वेन आत्म-परमात्म-शिव-विष्णु-रामादिरूपेण तदेव पुरुषत्वेन ब्रह्मादिरूपेण नपुंसकत्वेन च तदेव व्यपदिश्यते। यथा गर्भस्थो वामदेवः स्वात्मानमेव मनु-सूर्यादिरूपेण व्यपदिशति। प्रतर्दनाय स्वात्मानमेव उपास्यत्वेन इन्द्र उक्तवान्। 'अहं ब्रह्मास्मि, तत्त्वमसि' प्रभृतिमहावाक्यैः प्रत्यक्परमात्मनो ऐक्यविधानात् समष्टि-व्यष्टिमये स्थूल-सूक्ष्म-कारणात्मके शरीरत्रये साक्षिरूपेण वर्तमाना स्वप्रकाशचिदेव त्रिपुरसुन्दरी। सैव विश्वप्रपञ्चोत्पादिनी - शक्ति-संवलिता जगदुत्पत्त्यादिहेतुभावमुपगता सती सर्वरूपा भवति। शास्त्रदृष्ट्या तदभेदं पश्यन्ती वागाम्भृणी तन्माहात्म्यावद्योतकं सूक्तं ददर्श। तद्यथा—

अहं रुद्रेभिर्वसुभिश्चरा-
म्यहमादित्यैरुत विश्वदेवैः।
अहं मित्रावरुणोभा बिभर्म्य-
हमिद्राग्नी अहमश्विनो भा ॥
(ऋ० सं० १०. १२५. १)

अर्थः—अस्य सूक्तस्य वागाम्भृणी ब्रह्मवादिनी द्रष्ट्री। सैव वामदेववत् 'अहं ब्रह्मास्मी'त्यादिशास्त्र-दृष्ट्या तेन ब्रह्मात्मना प्रत्यगात्मानं पश्यन्ती वदति—अहमिति। जगत्कारणं ब्रह्म तद्रूपा भवन्ती वदति—अहं रुद्रेभिः एकादशभिः, इत्थंभावि-तृतीया, तदात्मना चरामि। एवं वसुभिस्तदात्मना चरामि। अहमेव आदित्यैः उत अपि विश्वदेवै-श्चरामि। तथा मित्रावरुणा मित्रावरुणौ उभा उभौ अहमेव बिभर्मि, 'सुपा सुलुगि'ति द्वितीयाया आकारः। उभौ अश्विनावपि अहमेव बिभर्मि। मय्येव सर्वं जगत् शुक्तौ रजतमिव अध्यस्तं सद् दृश्यते। निर्विकारमपि ब्रह्म मायाविशिष्टं सत् प्रपञ्चाकारेण विवृतं सन् प्रपञ्चरूपमिव प्रतीयते ॥ १ ॥

अहं सोममाहनसं बिभर्म्यहं
त्वष्टारमुत पूषणं भगम्।
अहं दधामि द्रविणं हविष्मते
सुप्राव्ये३ यजमानाय सुन्वते ॥
(ऋ० सं० १०, १२५. २)

अर्थः—अहं परब्रह्मरूपिणी सैवाऽहम्। आहनसम् आहन्तव्यमभिषोव्यं लतारूपं सोमम्। यद्वा—शत्रूणाम् आहन्तारम्। आहनसम् दिवि तं देवरूपं सोमं बिभर्मि। तथा त्वष्टारम् उत अपि पूषणं भगञ्च अहमेव बिभर्मि धारयामि। तथा हविष्मते हविष्याय सुप्राव्ये शोभनं हविर्देवानां प्रापयते, शोभनैस्तैः तत्तर्पयित्रे, तर्पणार्थाद् अवतेः ईप्रत्ययान्तस्य रूपं सुप्राव्ये। शोभनं हविः, प्रापयितृत्वं तैस्तर्पयितृत्वञ्च तदर्थः। तथा सुन्वते सोमाभिषवं कुर्वते यजमानाय द्रविणं कर्मफलरूपम् अहमेव दधामि धारयामि, कर्मणामज्ञत्वात् जीवानामल्पज्ञत्वाच्च ब्रह्मण एव फलदातृत्वोपपत्तेः ॥ २ ॥

अहं राष्ट्री सङ्गमनी वसूनां
चिकितुषी प्रथमा यज्ञियानाम्।
तां मा देवा व्यदधुः पुरुत्रा
भूरिस्थात्रां भूर्यावेशयन्तीम् ॥
(ऋ० सं० १०.१२५.३)

अर्थः—अहं राष्ट्री सर्वस्य जगत ईश्वरी वसूनां धनानां सङ्गमनी उपासकानां धनप्रापयित्री

(शेषांशः ७१ पृष्ठे)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

धर्मे सर्वं प्रतिष्ठितम्

--श्री जगन्नाथ श्रीधरशास्त्री पदे--

[माननीयशास्त्रिपादानां लेखस्यास्य आदिमोंऽशो गताङ्के प्रकाशितः। तत्रादौ विविधैः प्रमाणैः धर्मस्य धर्मिप्रतिष्ठापकत्वेनैव कार्तार्थ्यं निरूप्य तैः धर्मज्ञानाय धर्मिज्ञानं नान्तरीयकतया व्यवस्थापितम्। अत एव तैस्तदनु तत्रैव धर्मिणो ब्रह्मणः निरूपणं समनुक्रान्तम्। तदेव अस्मिन्नङ्केऽपि श्रुति-स्मृति-युक्तिभिः, विशेषतस्तस्य धर्मिणो ज्योतिष्ट्वं साधितं विदुषां चेतो नूनमावर्जयेदिति।—सम्पादकः]

यस्त्वेतमेवं प्रादेशमात्रमभिविमानमात्मानं वैश्वानरमुपास्ते स सर्वेषु लोकेषु सर्वेषु भूतेषु सर्वेष्वात्मस्वन्नमत्ति। तस्य ह वा एतस्यात्मनो वैश्वानरस्य मूर्धैव सुतेजाश्चक्षुर्विश्वरूपः प्राणः पृथग्वर्त्मा सन्देहो बहुलो वस्तिरेव रयिः पृथिव्येव पादावुर एव वेदिर्लोमानि बर्हिर्हृदयं गार्हपत्यो मनोऽन्वाहार्यपचन आस्यमाहवनीयः। (छा. ५-१७-२)

तेजः परस्यां देवतायाम्। (छा. ६-८-६)

तेजसा हि तदा सम्पन्नो भवति। (छा.८-६-३)

एष सम्प्रसादोऽस्माच्छरीरात् समुत्थाय परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभि निष्पद्यते। (छा. ७-१२-३)

अङ्गुष्ठमात्रः पुरुषो ज्योतिरिवाधूमकः। ईशानो भूतभव्यस्य स एवाद्य स उ श्वः। एतद्वै तत्॥ (कठ. २-४-१३)

न तत्र सूर्यो भाति न चन्द्रतारकं
नेमा विद्युतो भान्ति कुतोऽयमग्निः।
तमेव भान्तमनुभाति सर्वं
तस्य भासा सर्वमिदं विभाति॥

(कठ. २-५-१४; मुण्डक. २-१-१०; श्वेता. ६-१४; कौषी. २५-५-१५)

हिरण्मये परे कोशे विरजं ब्रह्म निष्कलम्।
तच्छुभ्रं ज्योतिषां ज्योतिस्तद्यदात्मविदो विदुः॥ (मुण्डक. २-२-९)

सत्येन लभ्यस्तपसा ह्येष आत्मा
सम्यग् ज्ञानेन ब्रह्मचर्येण नित्यम्।
अन्तः शरीरे ज्योतिर्मयो हि शुभ्रो
यं पश्यन्ति यतयः क्षीणदोषाः॥ (मुण्डक. ३-१०-५)

महान् प्रभुर्वै पुरुषः सत्त्वस्यैव प्रवर्तकः।
सुनिर्मलामिमां प्राप्तिमीशानो ज्योतिरव्ययः॥ (श्वेता. ३-१२)

शारीरमिति कस्मात्? अन्नयो ह्यत्र श्रियन्ते ज्ञानाग्निर्दर्शनाग्निः कोष्ठाग्निरिति। तत्र कोष्ठाग्निर्नाम अशित-पीत-लेह्य-चोष्यं पचति। दर्शनाग्नी रूपाणां दर्शनं करोति। ज्ञानाग्निः शुभाशुभं च कर्म विन्दति। (गर्भोपनिषत् ५)

—इत्यादयः।

स्मृतयश्च—

ये विनिद्रा जितश्वासाः सत्त्वस्थाः संयतेन्द्रियाः।
ज्योतिः पश्यन्ति युञ्जानास्तस्मै योगात्मने नमः॥ (महाभा० शान्ति० ४७-५५)

योऽन्तः सुखोऽन्तरारामस्तथान्तर्ज्योतिरेव यः।
स योगी ब्रह्मनिर्वाणं ब्रह्मभूतोऽधिगच्छति॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दिवि सूर्यसहस्रस्य भवेद्युगपदुत्थिता ।
यदि भाः सदृशी सा स्याद् भासस्तस्य महात्मनः ॥

किरीटिनं गदिनं चक्रिणं च
तेजोराशिं सर्वतो दीप्तिमन्तम् ।
पश्यामि त्वां दुर्निरीक्ष्यं समन्ताद्
दीप्तानलार्क - द्युतिमप्रमेयम् ॥
अनादिमध्यान्त - मनन्तवीर्य-
मनन्तबाहुं शशिसूर्यनेत्रम् ।
पश्यामि त्वां दीप्तहुताशवक्त्रं
स्वतेजसा विश्वमिदं तपन्तम् ॥
नभः स्पृशं दीप्तमनेकवर्णम् ।
तेजोभिरापूर्य जगत् समग्रं
भासस्तवोग्राः प्रपतन्ति विष्णो ।
मया प्रसन्नेन तवार्जुनेदं
रूपं परं दर्शितमात्मयोगात् ।
तेजोमयं विश्वमनन्तमाद्यं
यन्मे त्वदन्येन न दृष्टपूर्वम् ॥

ज्योतिषामपि तज्ज्योतिस्तमसः परमुच्यते ।
ज्ञानं ज्ञेयं ज्ञानगम्यं हृदि सर्वस्य विष्ठितम् ॥
न तद् भासयते सूर्यो न शशाङ्को न पावकः ।
यद् गत्वा न निवर्तन्ते तद्धाम परमं मम ॥
यदादित्यगतं तेजो जगद् भासयतेऽखिलम् ।
यच्चन्द्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकम् ॥
अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः ।
प्राणापानसमायुक्तः पचाम्यन्नं चतुर्विधम् ॥
—(गीता ५.२४; ११.१२, १७, १९, २४, ३०, ४७; १३-१७; १५-६, १२, १४)

आत्मन्नेवाहमलब्ध्वैतद्धितं सेवस्व नाहितम् ।
अथान्येषु प्रतीच्छामि साधुष्ठानमनपेक्षया ॥
महान्तं तेजसस्कायं सर्वत्र निहितं प्रभुम् ।
(आपस्तम्बधर्मसूत्रम् ८ पटलः, ६ सूत्रम्)

एतमेके वदन्त्यग्निं मनुमन्ये प्रजापतिम् ।
इन्द्रमेके परे प्राणमपरे ब्रह्म शाश्वतम् ॥
(मनु० १२-१२३)

द्वासप्ततिसहस्राणि हृदयादभिनिःसृताः ।
हिताहिता नाम नाड्यस्तासां मध्ये शशिप्रभम् ॥
मण्डलं तस्य मध्यस्थ आत्मा दीप इवाचलः ।
स ज्ञेयस्तं विदित्वेह पुनराजायते न तु ॥
अनन्यविषयं कृत्वा मनोबुद्धिस्मृतीन्द्रियम् ।
ध्येय आत्मा स्थितो योऽसौ हृदये दीपवत् प्रभुः ॥
मोहजालमपास्येह पुरुषो दृश्यते हि यः ।
सहस्रकरपत्रेभः सूर्यवर्चाः सहस्रकः ॥
स आत्मा चैव यज्ञश्च विश्वरूपः प्रजापतिः ।
विराजः सोऽन्नरूपेण यज्ञत्वमुपगच्छति ॥
अनन्ता रश्मयस्तस्य दीपवद् यः स्थितो हृदि ।
सितासिताः कर्बुरूपाः कपिला नीललोहिताः ॥
ऊर्ध्वमेकः स्थितस्तेषां यो भित्त्वा सूर्यमण्डलम् ।
ब्रह्मलोकमतिक्रम्य तेन याति परां गतिम् ॥
यदस्यान्यद्रश्मिशतमूर्ध्वमेव व्यवस्थितम् ।
तेन देवशरीराणि सधामानि प्रपद्यते ॥
येनैकरूपाश्चाधस्ताद्रश्मयोऽस्य मृदुप्रभाः ।
इह कर्मोपभोगाय तैः संसरति सोऽवशः ।
ततो ध्येयः स्थितो योऽसौ हृदये दीपवत् प्रभुः ॥
(याज्ञवल्क्यस्मृतिः ३.१०८, ९, ११, १९, २०, ६६-६९, २०१)—इत्यादयः ।

सर्वा एताः श्रुतयः स्मृतयश्च ब्रह्म स्वयं ज्योतिःस्वरूपमिति बोधयन्ति । शारीरकमीमांसायां भाष्ये च ब्रह्म स्वयं ज्योतिःस्वरूपमित्येव प्रस्थापितम् । तथा हि—

ब्रह्मण एव ज्योतिःशब्दाभिधेयत्वप्रतिष्ठापनपरे ज्योतिश्चरणाधिकरणे (ब्र० सू० १.१.२४-२७)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ज्योतिर्ब्रह्मेति प्रतिष्ठापितम्। परमेश्वरस्यैव वैश्वानरत्वप्रतिपादनपरे वैश्वानराधिकरणे (ब्र० सू० १.२,२४-३२) वैश्वानरः परमेश्वर इति प्रतिपादितम्। चैतन्यस्य सर्वजगद्भासकत्वद्योतनपरे अनुकृत्यधिकरणे (ब्र० सू० १.३.२२-२३) ब्रह्म तु नान्येन ज्योतिषोपलभ्यते, स्वयंज्योतिःस्वरूपत्वादिति सिद्धान्तितम्। ब्रह्मण एव ज्योतिष्ट्वविचारणपरे ज्योतिरधिकरणे (ब्र० सू० १.३.४०) परमेव ब्रह्म ज्योतिःशब्दमिति विचारितम्। तथा 'आत्मा प्रकरणादि'ति सूत्रे (ब्र० सू० ४.४.३) आत्मैवात्र ज्योतिःशब्देनावेद्यते प्रकरणादिति मीमांसितम्।

भाष्यकारैरपि—

इदं तु पारमार्थिकं कूटस्थनित्यं व्योमवत् सर्वव्यापि सर्वविक्रियारहितं नित्यतृप्तं निरवयवं स्वयंज्योतिःस्वभावम्।

(शां० भा० १.१.४)

ज्योतिरिति ब्रह्म प्रतिपत्तव्यम्।

(शां० भा० १.१.२४)

तथा सति ब्रह्मणोऽपि चैतन्यरूपस्य समस्तजगदवभासहेतुत्वादुपपन्नो ज्योतिःशब्दः।

(शां० भा० १.१.२४)

सर्वमिदमित्यविशेषश्रुतेः सर्वस्यैवास्य नामरूपक्रियाकारकफलजातस्य याऽभिव्यक्तिः सा ब्रह्मज्योतिः सत्तानिमित्ता।

(शां० भा० १.३.२२)

यतः यदुपलभ्यते तत् सर्वं ब्रह्मणैव ज्योतिषोपलभ्यते। ब्रह्म तु नान्येन ज्योतिषोपलभ्यते स्वयंज्योतिःस्वरूपत्वात्।

(शां० भा० १.३.२२)

परमेव ब्रह्म ज्योतिःशब्दम्।

(शां० भा० १.३.४०)

अपि च—जागरिते विषयेन्द्रियसंयोगादादित्यादिज्योतिर्व्यतिकराच्चात्मनः स्वयंज्योतिष्ट्वं दुर्विवेचनमिति तद्विवेचनाय स्वप्न उपन्यस्तः।

(शां० भा० ३.२.४)

विज्ञानादिशब्दैश्च चैतन्यप्रकाशात्मकत्वमुक्तम्।

(शां० भा० ४-१-२)

आत्मैवात्र ज्योतिःशब्देनावेद्यते प्रकरणात्।

(शां भा० ४.४.३)

—इत्यादिना भाष्येण ब्रह्मणो विस्पष्टं स्वयंज्योतिःस्वरूपत्वं प्रतिपादितम्।

योगशास्त्रे च—

विशोका वा ज्योतिष्मती। (यो० सू० १.३६)

एतस्यामवस्थायां गुणसम्बन्धातीतः स्वरूपमात्रज्योतिरमलः केवली पुरुषः।

(यो० भा० २.२७)

नाभिचक्रे हृदयपुण्डरीके मूर्ध्नि ज्योतिषि नासिकाग्रे जिह्वाग्रे इत्येवमादिषु देशेषु बाह्ये वा विषये चित्तस्य वृत्तिमात्रेण बन्ध इति धारणा। (यो० भा० ३.१)

मूर्धज्योतिषि सिद्धदर्शनम्। (यो० सू० ३.३२)

शिरःकपालेऽन्तश्छिद्रं प्रभास्वरं ज्योतिः। तत्र संयमात् सिद्धानां द्यावापृथिव्योरन्तरालचारिणां दर्शनम्। (यो० भा० ३.३२)

तदा पुरुषः स्वरूपमात्रज्योतिरमलः केवली भवति। (यो० भा० ३.५५)

—इत्यादिष्वात्मनो ज्योतिःस्वरूपत्वमुक्तम्।

सर्वाण्येतानि प्रमाणजातानि ब्रह्मणो ज्योतिः-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वरूपं प्रस्थापयन्ति। तस्मादेकमेवाद्वितीयं ब्रह्म एकमेवाद्वितीयं स्वयंज्योतिरित्येव प्रतिपत्तव्यम्। एकमेवाद्वितीयं स्वयंज्योतिरग्निरेव साक्षान्न पदार्थान्तरम्। तेन एक एवाद्वितीयोऽग्निर्ब्रह्मशब्देन व्यपदिश्यत इति सिद्धान्तः। लौकिकाग्नेरग्निशब्देन ग्रहणं मा भूदिति बृहत्वाद् बृंहणत्वाद् विराडग्नि-ग्रहणार्थं ब्रह्मशब्दप्रयोगः। 'अथातो ब्रह्मजिज्ञासे'ति ब्रह्मशब्देन शारीरकमीमांसारम्भश्च। विराडग्नेः स्वरूपं शतपथब्राह्मणे अग्निरहस्यकाण्डे श्रूयते। तथा हि—

तदाहुः, किं छन्दः का देवताऽग्नेः शिर इति ? गायत्री छन्दोऽग्निर्देवता शिरः ॥ १ ॥ किं छन्दःका देवता ग्रीवा इति? उष्णिक् छन्दः सविता देवता ग्रीवाः ॥२॥ किं छन्दः का देवताऽनूक-मिति? बृहतीछन्दो बृहस्पतिर्देवताऽनूकम् ॥३॥ किं छन्दः का देवता पक्षाविति ? बृहद्रथन्तरं छन्दो द्यावापृथिवी देवते पक्षौ ॥ ४ ॥ किं छन्दः का देवता मध्यमिति? त्रिष्टुप् छन्द इन्द्रो देवता मध्यम् ॥५॥ किं छन्दः का देवता श्रोणी इति ? जगती छन्द आदित्यो देवता श्रोणी ॥६॥ किं छन्दः का देवता यस्मादिदं प्राणाद्रेतः सिच्यत इति? अनिश्छन्दाश्छन्दः प्रजापतिर्देवता ॥७॥ किं छन्दः का देवता योऽयमवाङ् प्राण इति? यज्ञायज्ञियं छन्दो वैश्वानरो देवता ॥८॥ किं छन्दः का देवतोरू इति ? अनुष्टुप् छन्दो विश्वेदेव्य देवतोरू ॥ ९ ॥ किं छन्दः का देवताऽष्ठीवन्ताविति ? पङ्क्तिश्छन्दो मरुतो देवताऽष्ठीवन्तौ ॥ १० ॥ किं छन्दः का देवता प्रतिष्ठे इति? द्विपदा छन्दो विष्णुर्देवता प्रतिष्ठे ॥११॥ किं छन्दः का देवता प्राण इति?विच्छन्दा-श्च्छन्दो वायुर्देवता प्राणाः ॥१२॥ किं छन्दः का देवता ऊनातिरिक्तानीति?न्यूनाक्षरा छन्द आपो देवता ऊनातिरिक्तानि। सैषात्मविद्यैव। एत न्मयो हैवैता देवता एनमात्मानमभिसम्भवति। न हात्रान्या लोक्यताया आशास्ति ॥ १३ ॥

(माध्यन्दिनशतपथ-१०.३.२)

अयमेव ऋग्यजुःसामसु दृष्टः संस्तुतश्च स्वयंज्योति-विराडग्निर्वेदान्तेषु बृहत्वाद् बृंहणत्वाच्च ब्रह्म-शब्देन व्यपदिश्यते। देहपरिच्छिन्नोऽग्निर्विराडग्नि-रेक एवेति सिद्धान्तः। अग्नेर्विराट्त्वं द्योतयितुं तस्य ब्रह्मशब्देन परामर्शः। अस्यैव जिज्ञासार्थं शारीरक-मीमांसाशास्त्रं प्रवृत्तम्। (क्रमशः)

❀

होलिकामुखे यान्तु !

१. परद्रव्यापहर्तारः परदाराभिमर्षिणः।
परपैशुन्यकर्तारो यान्तु ते होलिकानने ॥
२. वञ्चका गुरुलोकानां लोकानां लुण्ठकाः पुनः।
सेवका युवतीनां ये यान्तु ते होलिकामुखे ॥
३. त्रासदा दानिदीनानां देव-वाणीविनाशकाः।
शासकाः पक्षपातेन यान्तु ते होलिकानने ॥
४. निन्दका देवसाधूनां मातृ-पितृपराङ्मुखाः।
परान्नैर्जीविनो ये स्युर्यान्तु ते होलिकानने ॥
५. निन्द्यानां नीचजाराणां नेतारः पापजीविनाम्।
नास्तिकाश्चाटुकारा ये यान्तु ते होलिकामुखे ॥
६. भक्तेभ्यो भीतिदातारो दस्यूनां भ्रातरस्तथा।
नास्तिका निर्दया दुष्टा यान्तु ते होलिकानने ॥
७. समुत्कोचधनेनैव जीविका-शासनं चलेत्।
येषां दृष्टिः परस्त्रीषु यान्तु ते होलिकानने ॥
८. क्रोधिनः कामिनः क्रूराः कंसा गोवधकारिणः।
हारिणो धनधान्यानां यान्तु ते होलिकामुखे ॥

—श्रीरामस्वरूपशास्त्रीः, 'अमरः'

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शिशिर-विलासः । सव्याख्यः

मूललेखकः— ४ —व्याख्याकारः

श्री लक्ष्मीनारायण द्विवेदः डॉ० हरिदत्त पालीवालः

[कविरत्न श्री लक्ष्मीनारायण द्विवेद ग्रथितस्य 'ऋतुविलास'-महाकाव्यस्य शिशिर-विलासाख्यः सव्याख्यः सर्गोऽयं शिशिरर्तुत एव प्रकाशपदवीमुपगतोऽपि स्थानसङ्कोचेन तदृतावसमाप्तः माधवमपि समालिलिङ्ग । नात्र अनौचित्यम्, यतो हि तेन सह तस्य भूयसा संवादित्वं भासते । परं सर्वथा प्रतीपं ग्रीष्मं कथं नाम स सहेत इति विमृश्य विवशतोऽस्मिन्नेवाङ्के तत्पूरणाय २०तमश्लोकतो निर्व्याख्य एव विलासोऽयं विस्तार्यते । अतः क्षन्तव्या वयं व्याख्याकृतो इति ।—सम्पादकः]

रमणीरमणीयतनोः प्रतनो-
रतियाति मृदूनिह कोमलता ।
अलिमानित-मानमदा विपिने
ननु कण्टकिताऽद्य शिरीषलता ॥ १६ ॥

रमणीति । प्रतनोः प्रकृष्टं तनुः प्रतनुरतितन्वी तस्याः । रमणी-रमणीयतनोः रमणीया तनुरिति रमणीयतनुः, रमण्या रमणीयतनू रमणीरमणीयतनुस्तस्याः । कोमलता इह मृदून् मार्दवसंपन्नान् पदार्थान् अतियाति अतिक्राम्यति । अलिमानितमानमदा अलिभिः षट्पदैर्मानितः पूजितो मानमदो मानोत्सेको यस्याः सा । शिरीषलता अद्य शिशिरे विपिने कण्टकिता कोरकिता ननु । वृत्यन्त्यच्छेकानुप्रासाः ॥ १६ ॥

कमलैः कमलैरलमङ्गभुवः
शरतां सुरतेषु दरस्मयिनी ।
कुरुते सुतरां दृगरालदृशा-
मिति तानि हतानि तुषारलवैः ॥ १७ ॥

कमलैरिति । कमलैः कं जलं तस्य मलैर्मलभूतैः 'कं शिरोऽम्बुनोः' इत्यमरः । कमलैररविन्दैः अलं मा भावि 'गम्यमानाऽपि क्रिया कारकविभक्तौ प्रयोजिका' इति सिद्धान्तात् कर्तरि तृतीया । अरालदृशाम् अराला कुटिला दृग् यासां तास्तासां वामलोचनानाम्, 'अरालः कुटिले सर्जरहे समददन्तिनि' इति मेदिनी । दरस्मयिनी स्मयः स्थितमस्ति यस्याः सा स्मयिनी, दरमीषत् स्मयिनी दरविकसिता । दृक् सुरतेषु अङ्गभुवः स्मरस्य । शरतां शरत्वं कुरुते सुतरां सम्यक्तरम् । इति हेतोस्तानि कमलानि तुषारलवैस्तुषारकणैः हतानि विनाशितानि, अकिञ्चित्करस्य व्यपासनीयत्वात् । 'अरविन्दमशोकं च चूतं च नवमल्लिका । नीलोत्पलं च पञ्चैते पञ्चबाणस्य सायकाः' इति । अत्र कमलविघाते हेतुरुत्प्रेक्षित इति श्रुतिच्छेकानुप्रासाः ॥ १७ ॥

जडतातिशयोऽस्य यदात्मभुवो
वसतिर्हरिवामदृशोऽपि हता ।
अमुनेत्यरुणोऽत्यरुणोऽपि रुषा
हिमताण्डव-खण्डन - माचरति ॥ १८ ॥

जडतेति । अस्य हिमस्य जडतातिशयः, जडता शीततैव जडता मौढ्यं तस्या अतिशयोऽतिवेलता अत्यन्तशीततैव अत्यन्तमूढता । का नु सा? इत्याह— यदमुना हिमेन आत्मभुवो ब्रह्मणः 'ब्रह्मात्मभूः सुरज्येष्ठः' इत्यमरः, वसतिरासनभूतकमलात्मिका, विरिञ्चेः कमलासनत्वात् । अपि च हरिवामदृशः हरिर्विष्णुस्तस्य वामदृग्वामलोचना लक्ष्मीस्तस्या अपि वसतिः कमलरूपा, 'विरञ्चिः कमलासनः'

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'लक्ष्मीः पद्मालया पद्मा कमला श्रीर्हरिप्रिया' इत्यमरोक्तेः, तथा 'पद्मे स्थितां पद्मवर्णाम्' इति श्रीसूक्तञ्च। सा हता विनाशिता, इति हेतोः अरुणः सूर्यः स्वभावारुणः सन्नपि रुषा अत्यरुणोऽतिरक्तः सन् क्रोधातिताम्रवर्णः सन्, 'विकर्तनार्कमार्तण्ड मिहिरारुणपूषणः' इत्यमरः। हिमताण्डवखण्डनं हिमस्य ताण्डवमुद्धतस्वैराचारः, शिवनृत्यार्थरूढोऽपि ताण्डवशब्दो लक्षणया उद्धतस्वैराचरणार्थे प्रयुक्तः, तस्य हिमताण्डवस्य खण्डनं ध्वंसनमाचरति करोति। इत्ययं शिशिरर्तुपरिवर्तनलक्षणं दर्शितं भवति। अत्युद्धताचारो मूढजनः समर्थेन उन्मूलनीय एवेति भावः। सूर्येण हिमात्याचारापहारोदाहरणरूपं लक्ष्मी-विरिञ्चिनिवासरूप-कमलविनाशनं हिमताण्डवखण्डने हेतुत्वेनोत्प्रेक्षितम्। कमलस्य सूर्यात्मप्रियत्वं त्वत्र गोप्यत्वेन न प्रकाशितम्। महात्मानो हि स्वस्मिन् परकृतामवमाननां मृष्यन्ति, न तु पुनरभिमतानां सतां विषये तां ते सोढुं प्रभवन्ति ॥ १८ ॥

मधवेंऽशुमतः सुहृदा मरुता
हिमहानि-कृतोपकृतो नियतम्।
श्लथशीततति र्जगतो हितकृद्
वपुरेष ऋतुः परिवर्तयते ॥ १९ ॥

मधव इति। अंशुमतोऽर्कस्य सुहृदा। अत एव हिमहानिकृता हिमस्य हानिकृता हानिं करोतीति हानिकृत् तेन, रविकार्ये हिमताण्डवखण्डनरूपे सहकारित्वान्मरुतः सुहृद्भावः। मरुता पवनेनैष ऋतुः शिशिरो नियतमुपकृतः। हेमन्ते हिमसंचयः, शिशिरे हिमविधूननम्, इति भेदेन मरुतः शिशिरोपकारकत्वमभिप्रेयते। अत एव श्लथशीततितिः श्लथा शिथिलतां प्राप्ता शीततितिः शीतगुणविस्तृतिर्यस्मिन् स तथाभूतः सन्। अत एव जगतो लोकस्य हितकृद्भवन् मधवे वसन्ताय वपुरात्माऽङ्गं परिवर्तयते आत्मस्वरूपमन्यथयतीत्यर्थः ॥ १९ ॥

तुहिनेन न तुन्न - विजीव - तद्-
ङ्गचितोत्थित-धूमकुलैः कलुषम्।
दिवसस्य मुखं द्युमणेः सयुजा
मरुता रभसेन शुचि क्रियते ॥ २० ॥

व्यञ्जनं हि सुरभेः सहकारे-
ष्वङ्गनावदन - मञ्जुलगन्धः।
सस्तनोन्मद - शिलीमुखसार्थैः-
र्दृश्यते स्मरशरः प्रसवोऽत्र ॥ २१ ॥

अमृतामृत - सारकद्रुमै-
रसृतप्राञ्चि हरन्ति मानसम्।
अमितानि फलानि दृश्यते
प्रदिशद्भिर्वसुधा सुधामयी ॥ २२ ॥

रागिणां मदकरी कटुगन्धा
निस्त्रपेन युवतिर्विवृताङ्गी।
दर्शितार्तवगुणा कुसुमेन
तिष्ठते वत जनाय तमाखुः ॥ २३ ॥

अद्य कुन्दलतिकासु विकास-
श्चन्द्रकान्तिविशदः प्रियगन्धः।
प्रोषितान् स्मरयति प्रमदानां
केलितल्पकृत - हासकलानाम् ॥ २४ ॥

सर्षपः कुसुमितो मधुपाली-
र्बोधयन्निव - वसन्तलतानाम्।
पीतिमानमुपलिप्त न माऽयं
क्षेमभूषु मधुरङ्गमहीषु ॥ २५ ॥

प्रलिप्त-कश्मीरजसङ्गि - चन्दना-
ङ्गनास्तनश्रीभरणानि सम्प्रति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हरन्ति सौगन्ध्यभरेण पश्यतां
न नागरङ्गाणि न मानसं नृणाम् ॥ २६ ॥
अत्र स्वभावाच्चपलेक्षणाभ्यः
कटाक्षविद्यां ननु खञ्जरीटः ।
अधीत्य शिक्षामनिमेष रामा-
जनाय दातुं त्रिदिवं प्रयाति ॥ २७ ॥
आलोचयन्नथ समीपमितं वसन्तं
वातस्त्वराञ्चितगतिस्तरवो लताभिः ।
नूत्नीभवन्त्विति पुराणदलानि तेभ्यो
जीर्णावतंसनमिवाऽपनयत्यखिन्नः ॥ २८ ॥
मण्डलानि दधता ननु भूय-
स्ताण्डवस्य सरणिः पवनेन ।
स्वीकृतोद्धत - विधूनितधूलि-
व्यस्तपर्णनिचय - स्वनमूर्च्छम् ॥ २९ ॥
शाखिनः प्रचलितायतशाखा-
व्याहतातिशयित - ध्वनितानम् ।
उत्पतत् - पतग - सङ्कुलमालं
विस्मृतस्खलित - पर्णविभूषम् ॥ ३० ॥
वेणवो ललित - कूजितमुच्चै-
र्झर्झरध्वनिभि - रुत्तमतालाः ।
उत्तरङ्गहतिभिः कृततालं
साह्यमस्य ददते सरितोऽपि ॥३१॥ (युग्मम्)
धान्यानां नवकणमञ्जरीर्नभस्वा-
नापाकश्रिय-मधिलम्भयन्नमन्दः ।
केदार्यं कनकविलिप्तिमादधानो
गृह्णीते परकृतिदत्तचित्तकीर्तिम् ॥ ३२ ॥
अश्वस्थो विगलितपर्ण-नग्नपिण्डः
शाखाभिः क्वचन च कम्पितैकपर्णः ।
निर्द्वन्द्वः कठिनतपोऽपयातरागः
सञ्जातश्चलितकचो जरन् यतीव ॥ ३३ ॥
यद्धैते सकलमहीरुहा लताभि-
र्वीताशा दुरधिगमं तपश्चरन्तः ।
व्याक्षिप्तच्छदन- विभूषणांशुकाद्या
आराधां दधति मधोर्ऋतूत्तमस्य ॥ ३४ ॥
शय्यात्वं च्युतदलसञ्चयैः पशूनां
गोप्तृभ्यस्तरुशरणं समाश्रयद्भ्यः ।
आत्तं यत्परहितहेतवेऽङ्गभाजः
क्षीणत्वेऽपि च न निजव्रतं त्यजन्ति ॥ ३५ ॥
विभ्रष्टा दलनिचयाः पुनस्तरूणां
मूर्धानं पुनरपि वायुनोह्यमानाः ।
न स्थानं कथमपि तत्र लब्धुमर्हा
विभ्रष्टस्य निजपदाद् दशेदृशी हि ॥ ३६ ॥
निःशेषापगत - विपक्वपत्रनिर्यत्-
कम्राङ्गी पदतलचारुपल्लवाढ्या ।
भङ्गाली - प्रमदमहं प्रवर्तयन्ती
सोल्लासा शुकगण-सेविता वनाली ॥ ३७ ॥
तरुवरैः स्फुटरागतयोल्लसत्-
प्रचुर - कोरक - कण्टकशालिभिः ।
समधुलिण्मृदु - गुञ्जितवाद्यकैः
सुरभये शिशिरः किल तिष्ठते ॥ ३८ ॥
होलिकालक्ष्यमात्रान् नभो रञ्जयत्
कुङ्कुमैर्वारिभि - र्भूरिरङ्गैरयम् ।
हर्षसम्मर्दरम्यो जनानामृतुः
स्वागतायर्तुराजस्य राजक्रियः ॥ ३९ ॥
अयमभिनवलक्ष्मी लालिताभिर्लताभिः
सह विलसितसौख्यं स्पर्शयन् भूरुहाणाम् ।
उपनतमृतुनाथं पूजयन् भव्यभावै-
रिति शिशिरऋतुर्वः प्रीणयन् सञ्जिहीते ॥४०॥

★

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्षत्रपति-महाकाव्यम्

--श्रीउमाशङ्कर शर्मा त्रिपाठी--

[आंग्लभाषा-प्राध्यापकः—काशीविद्यापीठम्, वाराणसी]

कम्पः खलत्सूनकरावलग्ना
निमीलिताक्षी हृतचेतनेव ।
हठात् पतन्ती लघु तेन सास्र-
मङ्के धृता दैन्यकृशाङ्गयष्टिः ॥ ८९ ॥

स्वस्था सती ताननुगान् निरीक्ष्य
प्रोवाच माता जितलोकधाम्नः ।
पुत्राः भवत्स्नेहबलेन नूनं
नष्टाऽप्यहं पुत्रवती कृताऽद्य ॥ ९० ॥

पुण्यं न पश्यामि किमप्यमोघ-
मित्थं स्वभाग्योदयवर्त्मदर्शि ।
भवादृशा वा कथमल्पपुण्यै-
र्लभ्याः सहायाः कुटिलेऽपि काले ॥ ९१ ॥

ततो भृशं पूरितदिङ्मुखानां
वाद्योत्तमानामपि विस्मृतानाम् ।
नादः शिवस्यागमनं प्रजाभ्यो
न्यवेदयच् - छोकनिशावसानम् ॥ ९२ ॥

पूर्णालवालो मुमुदे रसालो
मही च सा तन्महती प्रतिष्ठा ।
निरस्तदोषा पुनरुद्भवाय
सङ्कल्पसंश्लेषमवाप शक्तिः ॥ ९३ ॥

हव्यानि जग्राह हिरण्यरेताः
स्वाहार्पितानीव विभास्वरार्चिः ।
छन्दस्वती ब्रह्मविदां दिशाभिः
धृताऽवतंसप्रवणा श्रुतौ वाक् ॥ ९४ ॥

हठान्महाराष्ट्रजनान् विमुच्य
विभ्यत्तमः स्वाश्रयमाप्तुकामम् ।
सपत्न - कान्तावदनेन्दु-लेखां
घनापरागोपहतं चकार ॥ ९५ ॥

अन्यावरोल्लासमिवा-ऽवरोद्धुं
क्षणे क्षणे कीलितकर्णपूरः ।
घोषः शतघ्नीजनितस्ततोऽसौ
शून्यात्मनोऽरीन् बिभराम्बभूव ॥ ९६ ॥

किं वेपसे गर्भगृहेऽपि लीनो
दीनो यथा मत्परिधानवर्मा ।
शेषे कथं नाथ न मुक्तशङ्कं
जानन्नपि स्त्रीषु शिवाऽऽर्यपद्याम् ॥ ९७ ॥

अर्धोऽशुकं स्यूतसुरत्नगुच्छं
नीवी - सुयत्नोदित - हीरनीवी ।
चोलान्तरे चोल्लसतीन्द्रनीलं
नष्टेऽपि दुर्गे विपुलेयमुर्वी ॥ ९८ ॥

इत्थं सपत्नीभिदुरानुविद्धे
समीहमानाऽऽत्मनि शल्यरोपम् ।
दुर्गादपि श्लाघ्यतमं स्वमानं
रिरक्षुरेका स्वपतिं बभाषे ॥ ९९ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

धन्यो राजा, धन्यञ्च राज्यम्

—श्री 'अङ्गारः'—

इंग्लैण्डदेशे चतुर्थः हेनरी राज्यं कुर्वन् आसीत्। तदा पञ्चमो हेनरी युवराजपदासीनः अभवत्। एकदा तस्य कश्चित् भृत्यः केनापि अपराधेन निगडितः। युवराजस्तं मोचयितुं बहु प्रयतितवान्। तथापि प्रमुख-न्यायाधीशेन श्री गैस्की महाभागेन सोऽनुरोधः अनादृतः, अपराधी च योग्येन दण्डेन संयोजितः।

युवराजः क्रुद्धो भूत्वा न्यायालये समागत्य न्यायाधीशं समाज्ञप्तवान्—'एनं क्षिप्रं मोचय' इति।

न्यायाधीशः सप्रश्रयं न्यायमर्यादाम् अवगमयन् युवराजं समाहितवान्—'यदि भवान् भृत्यं मोचयितुं वाञ्छति, तदा क्षमाप्रदानाय चतुर्थो हेनरी प्रार्थयितव्यः' इति।

युवराजाय अयमुपायो नारोचत। स बलात् अपराधिनं मोचयितुं प्रावर्तत। दृष्ट्वेदं न्यायाधीशो युवराजं न्यायालयात् बहिर्निगन्तुमाज्ञप्तवान्।

एतेन युवराजः परं प्रकुपितो बभूव। स सत्वरं न्यायसिंहासनाभिमुखं चलितः। जनैर्विचारितं यदयं न्यायाधीशं हन्तुमेव आगच्छति। किन्तु द्वित्रपदानि अतिक्रम्य न्यायाधीशस्य तेजःपूर्णं गम्भीरञ्च मुखमालक्ष्य स तत्रैव प्रतिष्टब्धोऽभवत्। अग्रे सतुं तस्य साहस एव नाभवत्।

दृष्ट्वैतत् न्यायाधीशो गभीरया गिरा प्रावोचत्— 'युवराज! न्यायासने अधिष्ठितवता मया राज्ञो गौरवो रक्ष्यते। भविष्यति भवताऽपि न्यायालयस्य गौरवं रक्षित्वा प्रजाः शासनीयाः। ताः स्वीयादर्शनैव शिक्षणीया यत् न्यायालयस्य राजनियमानाञ्च गौरवः एवं रक्ष्यते इति। सीमद्भिरद्य यदौद्धत्यं प्रदर्श्य न्यायालयः अवमतः, तदर्थं भवद्भ्यः कारावासदण्डो दीयते।'

युवराजः श्रुत्वेदं सावहितो भूत्वा स्वकृत्यविषये पश्चात्तापं कुर्वन् तूष्णीं कारागारं प्रस्थितः।

तत्पिता महाराजो हेनरी चतुर्थो वृत्तमिदं श्रुत्वा अतिवेलम् आनन्दभरेण प्रावोचत्—'राजनियममर्यादारक्षक एतादृशो न्यायाधीशो यत्रराज्ये वर्तते, नूनं तद्राज्यं धन्यम्। नियमानुलङ्घ्यापि नियमपालनाय सप्रश्रयं यस्य राज्ञः पुत्रो दण्डमुपभुञ्जते, स राजाऽपि धन्य इति मे दृढा मतिः।

(मराठी-कथातोऽनूदितम्)

हर्षे ततः स्थैर्यमिवाऽनुचिन्त्ये
श्रद्धाबलं स्वास्थ्यमिवेष्टमार्गे।
शिवस्य शून्योरसि माथुरास्ते
प्राकाशयन् तत्तनयेन्दुवक्त्रम्॥ १००॥

को नाम विश्रम्भपणर्णमोक्षं
हेम्नोऽद्रिणाऽपि प्रभवेद्विधातुम्।
श्रियाऽऽत्मरूपं विदधत् नृपोऽतो
विश्वासरावानपि नाप तोषम्॥ १०१॥

ऐन्द्रजालिकमनोरथं हठा-
दित्थमापदि नियन्त्रितोऽप्यसौ।
यत्नसाहस-विलोभिसम्पदा
निर्विभिद्य शुशुभेऽधिकं शिवः॥१०२॥

दम्भोद्योगमपास्य कौशलबलान्नक्रस्य दिल्लीपतेः
दृष्ट्वा निस्त्रपडुण्डुभांश्च नृपतीन् दिल्लीदयाजीवितान्।
मार्गे गूढमवेक्ष्य सैन्यरचनां देशान् स्वभावं स्थितिं
भूयोऽवाप्य निरापदं जनिभुवं सूनुञ्च रेजे नृपः॥१०३॥

॥ इति पञ्चदशः सर्गः॥

---

१. मथुरानिवासिनो द्विजाः, येषां हस्ते सम्भाजिसंज्ञं रोगदुर्बलं पथक्लेशाक्षमं तनयं निक्षिप्य पुरः प्रचलितो महाराजः शिवराजः। २. विश्वासरावानिति—एतन्नामा द्विजवरो योऽकलयन जीवितसंकटं सुतनिविशेषप्रेम्णा पालयन् बालकं अतिक्रान्तानेकप्रत्यूहो महाराष्ट्रयात्रां विधाय पुनः समर्पितवान् शिवराजकरे तत्सुतम्। महाराजेनाऽपि प्रदत्ताशेषनिधिना समाराधितो द्विजवर्य इतीतिहासः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हरिश्चन्द्रीयं वसन्त-विलसितम्

--श्री 'रेखा-रमणः'--

जैन-साहित्ये 'जीवन्धरचम्पू'-नामा ग्रन्थः साहित्यशास्त्रीय-सर्वगुणसम्पन्न इति स्वानुभव-साक्ष्येन वक्तुं पार्यते। काव्यीय-गद्य-पद्योभयधारा-सङ्गमिनीं चम्पूस्थलीं समाश्रितेन जीवन्धरस्वामि-विषयकाद्भुततम-कथा-वस्तुसमवलम्बितेन उपान्ते तन्मोक्षलक्ष्मीप्राप्तिवर्णनरञ्जितेन, अन्ते शान्तरसा-स्वादपुरस्सरं निरतिशयाह्लादजनकेन ग्रन्थेनानेन महाकविना श्रीहरिश्चन्द्रेण तत्र तत्र प्रसङ्गोचितं वर्णनं सर्वाङ्गभूषितं भावभरितञ्च समुपनिबद्धम्। अयं महाकविः हरिश्चन्द्रः १०७५ मितेशवीय-संवत्सरतः ११७५ मितेशवीय - वत्सरान्तकालस्य मध्ये समभूत्।

तत्र विद्याधरकन्यकया गन्धर्वदत्तया समं पाणिग्रहणानन्तरं जीवन्धरस्वामी तया सह लौकिकान् विषयान् उपभुञ्जान उवास इति तृतीयलम्भ-कथा। चतुर्थलम्भारम्भे ग्रन्थस्यास्य महाकविः हरिश्चन्द्रो लिखति—

अथ जीवन्धरो वीरो रेमे गन्धर्वदत्तया।
समं भोगं यथायोग्यं संसारविषयोद्भवम्॥
ततः समागतः कालो वसन्तसमयाभिधः।
वनं वृक्षलताव्याप्तं जननेत्रसुखावहम्॥

अतीव रसभावा - ऽलङ्कारवक्रोक्त्यादि - लोको-त्तरचमत्कृतिजनकसामग्रया समलङ्कृतं मनसिज-सचिवस्य माधवस्येदं वर्णनं 'सूर्योदय'-पाठकेभ्यः समास्वादनायाऽत्र प्रस्तूयते—

माकन्दद्रुममञ्जरी - मधुझरी - संसक्तमाध्वीलिहां
झङ्कारैः पिकमञ्जुगानकलितै-र्मारोत्सवाशंसिनः।
प्राप्ताः केचन वासराः कुरवकप्रोन्मीलितैः कोरकै-
र्दन्ताभैर्विहसन्मुखा विरहिणां मर्मच्छिदाकर्मठाः॥

तदानी जगज्जयोद्युक्त - पञ्चबाणप्रयाणसूचक-माञ्जिष्ठ-दूष्यनिलयनिकाश - पल्लविताशोकपेशलं सुवर्णशृङ्खलसन्नद्ध - वनदेवताञ्चितपेटिकायमान-रसालपल्लवसमासीन-कोकिलकुलं तरुणजनहृदय-विदारणदारुण - कुसुमबाणनखरायमाण - किंशुक-कुसुमसङ्कुलं मदन - नरपाल - कनकदण्डायित-केसरकुसुमभासुरं विलीनशिलीमुख-जराभीरुशरधि-सरूपपाटलपटलं वियोगीजनस्वान्त - नितान्त-कृन्तनकुन्तायित-कैतकदन्तुरितं वनमजायत।

मार्गे मार्गे माधवीमानिनीभिः
सूनार्चाभिर्मानितो वातपोतः।
भृङ्गस्त्रीणां गीतसक्तं कुरङ्ग-
मारुह्यासावाववौ मन्दमन्दम्॥
पुरान्निरीयुः प्रमदाजनेन
पौराः समस्ता नरपालमुख्याः।
क्रीडां विधातुं द्विविधे वनेऽपि
मधौ दुरन्ते विरहिव्रजस्य॥
तुङ्गं शताङ्गमारूढः स्वामी सहचरैः सह।
पौरस्त्रीनयनानन्दमातन्वन् निरगात् पुरात्॥

ततो जनकोलाहलोद्भ्रान्त - शकुन्तवृन्दतया माधवागमनकौतुकेन उत्क्षिप्तवैजयन्तीमिव सञ्चर-च्चञ्चरीकघोरणी-हरिन्मणिमय-तोरणमालाविरा-जिता पल्लवकवलनतत्पर-पयोजबान्धवस्यन्दन-गान्धर्ववदनबिलनिपतित - फेनशकलसंभाव्य-कलिकाविलसितोन्नत - महीरुहराजितामभि-सारिकामिवोच्चैः स्तनशिखरशोभित-पत्र विचित्राम्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अनेकविटपसंस्पृष्ट-पयोधरतटां चारामवीथीमासाद्य पौराः पुष्पावचयं कर्तुमारभन्त।

तत्र निजकान्तां कोपकलुषितस्वान्तामाध्याय कश्चिदाह—

प्रसार्य दृशं पुरः क्षणमिदं वनं विन्दतां
स्थलोत्पलकुलानि वै कलय तन्वि मन्दस्मितम्।
पतन्तु कुसुमोच्चया दिशि दिशि प्रहृष्टालयः
स्फुटीकुरु गिरं पिकः सपदि मौनमाडौकताम्॥

परिफुल्ल-नवपल्लवतल्लजाधरपुटां विकच-कुसुम-मन्दहासां चञ्चरीक-चूचुकमेचकित गुलुच्छ-स्तनयुगलां वासन्तीलतामन्यामिव लताङ्गीं पश्यन्तमात्मानं प्रति कुपितां प्रेयसीं परिसान्त्व-यितुकामः कश्चिदेवमब्रवीत्—

सञ्चारिणी खलु लता त्वमनङ्गलक्ष्मी-
रम्लानपल्लवकरा प्रमदालिजुष्टा।
यस्या गुलुच्छयुगलं कठिनं विशाल-
शाखे शिरीषसुकुमारतमे मृगाक्षि॥
उपरिज - तरुजार्थं वामहस्तेन काचिद्
विधृतसुरभिशाखा सव्यहस्तापकाञ्ची।
अमलकनकगौरी निर्गलन्नीविबन्धा
नयनसुखमनन्तं कस्य वा द्राङ् न तेने॥
काचिद्वरङ्गी कमितुः पुरस्ता-
दुदस्तवाहोः कुसुमोद्यतस्य।
मूलं नखाङ्काञ्चितमंशुकेन
तिरोदधे मङ्क्षु करान्तरेण॥
अन्तर्वणं करसरोरुहकान्तिभिन्नं
पत्रव्रजं सपदि पल्लवशङ्कयाऽन्या।
संस्पर्शमार्दवकलाविरहाद् विसृज्य
गुच्छभ्रमेण नखकान्तिमहो चकर्ष॥
वपुषि कनकगौरे चम्पकानां स्रगेषा
वितरति परभागं नेति कश्चित्प्रियायाः।
उरसि बकुलमाला-मावबन्धाम्बुजाक्ष्याः
स्तनकलशसमीपे चालयन् पाणिपद्मम्॥
वक्षःस्थलेष्वत्र चकोरचक्षुषां
प्रियैः प्रकल्पिताः सुममालिका बभुः।
अन्तःप्रवेशोद्यत - शम्बरद्विषः
सूनाततास्तोरणमालिका इव॥

जलकेलि-विलासः

अथ ललाटन्तप - तपनबिम्बे गगनकाननमध्य-पुञ्जीभूत - दवहुताशनसकाशे, सशावक - मृगपूगेन सह मूलतलमाश्रिते नमेरुतरुच्छाये, सरोराजहंसेषु नलिनमुत्सृज्य पत्रच्छायामाश्रितेषु दीर्घिकाजलेषु शफरोद्वर्तनैरार्कसन्तापादिव क्वथत्सु, शिखण्डिषु नृत्तलीलाविरहेऽपि बर्हभारं छत्रीकृत्य केकिनीः सेवमानेषु, मधुकरेषु गजगण्डतलात् कर्णपाली-माश्रितेषु, कुसुमावचयश्रान्ताभिः कान्ताभिः सह व्यात्युक्षिकां कर्तुकामा भर्तारः शनैः शनैः नवा-पगामाजग्मुः।

नवापगेयं नलिनेक्षणानां
द्विजारवैर्द्राक् कुशलानुयोगम्।
विधाय डिण्डीर - मनोज्ञहासा
चलोर्मिहस्तैर्दिशति स्म पाद्यम्॥

तावद् यौवनदिनमणि-प्रकाशपरिवर्धितामोद-वक्षोरुह-चक्रवाकयुगलासु कान्तिकल्लोलनिर्लोलासु मञ्जुगुञ्ज-कलहंसकासु अपरास्विव तरङ्गिणीषु पुरतरुणीषु दयितैः समं सरितमवगाह्य जलक्रीडा-मातन्वतीषु—

कश्चिदम्भसि विकूणितेक्षणं
हेमयन्त्र - विगलज्जलै - र्मुहुः।
कामिनीमुखमसिञ्च - दञ्जसा
चन्द्रबिम्बमिव द्रष्टुमागतम्॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गौतमो गोतमो वा ?

---श्री ना० वा० मराठे---

[ग्रन्थपालः—इण्डियन इंस्टीट्यूट ऑफ एडवान्स स्टडी, शिमला]

न्यायसूत्रकर्तुः गोतमो गौतमो अक्षपादो वा इति विभिन्ननामधेयैः पृथक् पृथक्काले उल्लेखाः समुपलभ्यन्ते। तत्र विषये व्युत्पत्तिं समाश्रित्य देवीपुराणे काचन कथा प्राप्यते। यथा—

गौर्वाक् तयैव तमयन् परान् 'गोतम' उच्यते।
गोतमान्वयजन्मेति गौतमोऽपि स चाक्षपाद् ॥

गोतमस्य भवानी-शङ्करस्य च वादयुद्धे निर्जीतः प्रसन्नोऽभूत् महादेवः। स कथयति—

साधु गौतम! भद्रं ते तर्केषु कुशलो ह्यसि।
त्वामृते वादयुद्धेन को मां तोषयितुं क्षमः ॥
अनेन तव वादेन तोषितोऽहं महामुने।
त्वन्नाम धारयिष्यामि त्वं त्रिनेत्रो भविष्यसि ॥
इत्येवं ब्रुवतः शम्भोः, जजृम्भे वाहनो वृषः।
दर्शयन् दन्तलिखितान् प्रमाणादींश्च षोडश ॥
शम्भोः कृपामनुप्राप्य यदीक्षामकरोन्मुनिः।
तेन चान्वीक्षिकीं संज्ञां विद्यां प्रावर्तयत् क्षितौ ॥
आदेशेन शिवस्यैव स शिष्यान् दशभिर्दिनैः।
पाठयामास तां विद्यां नास्तिक्यमतनाशिनीम् ॥
ततः कालेन कियता व्यासो गुरुनिदेशतः।
समावृत्तो गृहस्थोऽभूद् वेदव्याख्यानकोविदः ॥
स तर्कं निन्दयामास ब्रह्मसूत्रोपदेशकः।
तच्छ्रुत्वा गौतमः क्रुद्धो वेदव्यासं प्रतिष्ठितः ॥
प्रतिजज्ञे च नैताभ्यां दृग्भ्यां पश्यामि तन्मुखम्।
यः शिष्यो द्वेष्टि वै तर्कं चिराय गुरुसम्मतम् ॥
व्यासोऽपि भगवांस्तस्य गुरोः कोपं विमृश्य च।
आययौ त्वरितस्तत्र यत्राभूद् गौतमो मुनिः ॥
असकृद् दण्डवद् भूत्वा पादयोः प्रणिपत्य च।
प्रसादयामास गुरुं कुतर्को निन्दितो मया ॥

काचन चपलजडापहृत - दुकुलपट्टे रुचि-विजितस्फटिकपट्टे घनजघनफलके नखक्षतिव्याजेन मकरकेतनस्य जगज्जयप्रशस्ति-वर्णावलिमिव बिभ्राणा, करनिपीडनोद्गीर्ण - रक्तिमधारामिव विद्रुमयन्त्र - निर्गलत्पयोधारां शयकान्ति-संक्रान्त-रक्तवर्णतया कुङ्कुमरसानुकारिणीं प्रियलपनतले सहर्षं ववर्ष।

सुदतीकुचकुड्मलाग्रमारात्
तरुणः कश्चिदसिञ्चदम्बुभिः।
हृदयस्थलजात - रागकल्प-
द्रुमवृद्ध्यै किमु कामुकः परम् ॥
अन्या काचिद्वल्लुभं वञ्चयित्वा
सख्या साकं वारिमग्ना मुहूर्तम्।
तस्या गात्रामोदलोभाद् भ्रमद्भि-
र्भृङ्गैर्ज्ञाता सासुनाऽऽलिङ्गिता च ॥
सरोजिनीमध्य - विराजमाना
काचिन्मृगाक्षी कमनीयरूपा।
वक्षोजकोशा मृदुबाहुनाला
नालक्षि वक्त्रायतफुल्लपद्मा ॥
च्युतैः प्रसूनैर्घनकेशबन्धान्
मृगीदृशां तारकिते जलेऽस्मिन्।
निरीक्ष्यमाणां तरुणैश्चकोरैः
कस्याश्चिदास्यं शशभृद् बभूव ॥

महाकवेः हरिश्चन्द्रस्य वसन्तविलसितं जल-केलि-विलाससङ्गतं नूनं 'सूर्योदय' - पाठकानां मोदाय कल्पेत। अयमेव सहृदयानां तेषां वासन्तो-पहारः परिकल्प्यताम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रसन्नो गौतमो व्यासे प्रतिज्ञां स्वां च संस्मरन् ।
पादेऽक्षि स्फोटयामास सोऽक्षपादस्ततोऽभवत् ॥

महाभारतगता अपरा कथापि अत्रानुसन्धेया—

गोतमोऽहमतो धूमोदयस्ते समदर्शनात् ।
गोभिस्तमो मम ध्वस्तं जातमात्रस्य देहतः ।
विद्धि मां गोतमं कृत्ये यातुधानि ! निबोध मे ॥

प्रचलति काप्यन्या कथा । तदनुसारेण 'गोतम' इति सूत्रकर्तुः उपाधिः दृश्यते । जन्मतोऽन्धः दीर्घतमस् ऋषिः उतथ्यपुत्रो मामतेयः (ममतानाम-मातुः जातः), स एव गोतमः ।

महाभारते मत्स्यपुराणे च अस्याः कथायाः उल्लेखो वर्तते । यथा—

अथोतथ्य इति ख्यातः आसीत् धीमान् ऋषिः पुरा ।
ममता नाम तस्यासीद् भार्या परमसम्मता ॥
(म० भा० आ० प० १०४.९)

अथोशिज इति ख्यात आसीद् श्रीमान् ऋषिः पुरा ।
पत्नी वै ममता नाम बभूवास्य महात्मनः ॥
(म० पु० ४८-३२)

ऋग्वेदे च—

दीर्घतमा मामतेयो जुजुर्वान् दशमे युगे ।
अपामर्थं यतीनां ब्रह्मा भवति सारथिः ॥
(ऋ० १.१५८.६)

इति । अस्य दीर्घतमसो ममतायाः पुत्रत्वं निर्दिष्टं वर्तते । सायणाचार्येणापि 'मामतेयो ममतायाः जातः' इत्यर्थः स्वीकृतः । ममतायाः उशिजर्षेः पत्नीत्वं च 'औशिजाय वणिजे' (ऋ० १.११२.११) इत्यत्र निर्दिष्टम् । तथा च—

ये पायवो मामतेयं ते अग्ने पश्यन्तो
अन्धं दुरितादक्षरन् । (ऋ० १. १४७.३)

इत्यत्र सायणभाष्ये 'मामतेय' - शब्दोपलक्षिता कथैका उल्लिखिता । सा यथा—अथैकदा उतथ्यर्षेः भार्या ममता ऋषिभ्रातृणा बृहस्पतिना सङ्गमनार्थं विज्ञप्ता । किन्तु गर्भिणी सा तेन सार्धं गन्तुं नापारयत् । अन्तःस्थेन बालकेन स निवारित इति क्रोधाविष्टो बृहस्पतिस्तं बालकं शशाप येन जन्मत एव बालो दीर्घतमस्-नाम्ना प्रसिद्धोऽभूत् ।

स दीर्घतमस् ऋषिः अग्निमुद्दिश्य स्तौति ऋग्वेदे (१. १४३.३) । यथा—

अस्य त्वेषा अजरा अस्य भानवः
सुसंदृशः सुप्रतीकस्य सुद्युतः ।
भात्वक्षसो अत्यक्तुर्न सिन्धवो
ऽग्ने रेजन्ते असमन्तो अजराः ॥

जन्मान्धत्वमस्यर्षेः अन्यत्रापि उल्लिखितं यथा—

स वै दीर्घतमा नाम शापाद्ऋषिरजायत ।
जात्यन्धो वेदविद् प्राज्ञः पत्नीं लेभे स विद्यया ॥
(म० भा० आ० प० १०४.३३)

तथा च हरिवंशे—

ऋषिर्दीर्घतमा नाम जात्यन्धो गुरुशापितः ।
त्वत्प्रसादाच्च चक्षुष्मांस्तेन सत्येन मोक्षय ॥

मत्स्यपुराणे च—

यस्मात्त्वमीदृशे काले गर्भस्थोऽपि निषेधसि ।
मा मैवमुक्त्वांस्तस्मात्तमो दीर्घं प्रवेक्ष्यसि ॥
(म० पु० ४८-४१)

अनेनैव दीर्घतमसा सुरभिकामधेनुं प्रसाद्य दिव्या दृष्टि समासादिता । यस्य तमः अन्धत्वं गवा नष्टं स 'गोतम' इत्यार्षः शब्दो जगति रूढोऽभवत् । अत एव

गोभिस्तमो मम ध्वस्तं जातमात्रस्य देहतः ।
विद्धि मां गौतमं भृत्ये ।

इत्यादि सङ्गच्छते । मत्स्यपुराणेऽपि—

आयुष्मांश्च वपुष्मांश्च चक्षुष्मांश्च ततोऽभवत् ।
गोभिर्हते तमसि वै गोतमस्तु ततोऽभवत् ॥
(म० प० ४८.८३-८४)

तदेतत् सम्यग् विचिकित्सिते एवं प्रतिभाति यत् मामतेयो उतथ्यपुत्रः दीर्घतमस् इत्येव न्यायसूत्रकर्तुः गोतमस्य नामधेयम् । स हि गोभिस्तमो ध्वस्तमिति 'गोतम'नाम्ना प्राचीनाचार्येषु प्रसिद्धः । स एव जन्मान्धत्वेन 'अक्षपाद' इति आलङ्कारिकं नामधेयमधिगतवान् । 'गौतम' इत्याधुनिकपण्डितानां व्यवहारस्तु निराधारः । 'गौतम' र्षेः उपनिषदादिषु परंपरया प्रसिद्धत्वात् 'गौतम एव न्यायसूत्रकारः' इति धारणाऽभवत् इत्यभ्युपगन्तुं शक्यते । ★

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मानस-भारती : देवगिरा गुम्फितं मानसम्

—श्री जनार्दन गङ्गाधर रटाटे, बी. ए. साहित्याचार्यः—

श्रुत्वा तस्या वचः सीता प्रणनामाऽऽदरेण ताम्।
कृपानिधिः प्राह मुनिमाज्ञा चेद् याम्यतो वनम् ॥
मय्यस्तु ते कृपा नित्यं दासे स्नेहो न हीयताम्।
रामस्य धर्मिणो वाक्यं श्रुत्वोचे ज्ञानवान् मुनिः ॥
कृपां यस्येच्छन्ति शम्भु-ब्रह्मज्ञाः सनकादयः।
स निष्कामप्रियो दीनबन्धुरीदृग् वचोऽवदत् ॥
ज्ञाता श्रियश्चतुरता त्यक्त्वान्यांस्त्वाभजत् तु या।
येन तुल्योऽधिको वा न शीलं तस्येदृशं न किम् ॥
अन्तर्यामिन् वद कथं गच्छेत्युच्चारये गिरम्।
इत्युक्त्वा पश्यतः साश्रू नेत्रे रोमाञ्चिता तनुः ॥

मुनेर्वपुर्विकासयुङ् मनश्च हार्दसंयुतम्।
प्रभोर्मुखाब्ज आहितेऽक्षिणी व्यचिन्तयत् तदा ॥
किमीदृशो जपस्तपोऽथवा कृतं मया पुरा।
यदद्य वाङ्मनःपरं प्रभुं विलोकयाम्यदः ॥
नरो जपैः समाधिभिस्त्वनेक - धर्मसञ्चयैः।
अतुल्यभक्तिमीश्वरे लभेत रामभद्रके ॥
रघूत्तमस्य पावनं चरित्रमुत्तमं ततः।
तुलस्यनन्यदासको दिवानिशं प्रगायति ॥

कलेर्मलानां प्रचयस्य हर्तृ
यशोऽस्ति रामस्य सुखस्य कर्तृ।
शृण्वन्ति ये चित्तशमं नरास्तद्
रामो भवेत् तेषु सदानुकूलः ॥ ६ ॥ (क)

महानस्ति कोशो मलस्यैष कालो
न धर्मोऽथवा ज्ञानयोगौ जपो न।
अतो ये विहायाश्रयं लोकसंस्थं
भजन्तीह रामं नरास्ते प्रवीणाः ॥ ६ ॥ (ख)

नत्वा मुनेः पादपद्मं नृदेवेशो ययौ वनम्।
अग्रे रामोऽनुजः पृष्ठे मुनिवेषौ सुशोभितौ ॥
द्वयोर्मध्ये शोभते श्रीर्मायेव प्रत्यगात्मनोः।
नद्यो वनाद्रिदुर्गाणि ज्ञात्वेशं पदवीं ददुः ॥
विदधत्यम्बुदाश्छायां यत्र यत्रेश्वरो गतः।
प्राप्त एव तु रामेण विराधः पातितः पथि ॥
असुरो हतमात्रः स सञ्जातो दिव्यदेहयुक्।
दृष्ट्वा तं दुःखितं रामः प्राहिणोद्धाम नैजकम्।
शरभङ्गं मुनिं प्राप्तः ससीतः सानुजः प्रभुः ॥

विलोक्य रामस्य मुखारविन्दं
सन्नेत्रभृङ्गौ मुनिपुङ्गवस्य।
रसं रसात्तौ पिवतः स्म तस्य
चिराय धन्यं शरभङ्गजन्म ॥ ७ ॥

मुनिः प्राह ततो रामं कृपालो रघुनायक।
हे शम्भुमानसे हंस गच्छन्नासं विधेः पदम् ॥
तदैव श्रुतवान् रामो वनमायास्यति ध्रुवम्।
ततः प्रतीक्षमाणस्ते मार्गमस्मि दिवानिशम् ॥
इदानी शीतलं चित्तं जातं मे तव दर्शनात्।
सर्वसाधनहीनं मां दीनं ज्ञात्वा कृपा कृता ॥
भारो नायं मयि तव भक्तचित्तापहारक।
स्वप्रतिज्ञैव भवता कृत्येनानेन रक्षिता।
प्राप्स्यामि त्वां तनुं हित्वा तावद् दीनः प्रतीक्ष्यताम् ॥
इत्थं मुनिः स सकलं योगयज्ञजपादिकम्।
समर्प्य जगृहे रामाद् वरं भक्तिं सुदुर्लभाम्।
ततस्त्यक्त्वा सर्वसङ्गं स चितायामुपाविशत् ॥

नीलाम्बुदश्यामलदेह देव
सीतानुजाभ्यां सहितः प्रभो मे।
कुरुष्व चित्ते सगुणो निवासं
सदेत्ययाचद् रघुनन्दनं सः ॥ ८ ॥

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(५६ पृष्ठस्य शेषांशः)

चिकितुषी सर्वज्ञोपजातं स्वात्मतया साक्षात्कृतवती। अत एव यज्ञियानां यज्ञार्हाणां पूज्यानां प्रथमा मुख्यां एतादृशीं मां भूरिस्थात्रां भूरिभावेन बहुभावेन प्रपञ्चात्मना अवतिष्ठमानाम्। भूरि भूरीणि बहूनि भूतजातानि आवेशयन्तीं जीवनभावेन आत्मानं प्रवेशयन्तीं मां पुरुत्रा बहुषु देशेषु व्यदधुः देवा विदधति कुर्वन्ति, उक्तप्रकारेण वैश्वरूपेण अवस्थानात्। यद्यत्कुर्वन्ति तत्सर्वं मामेव कुर्वन्तीत्यर्थः ॥३॥

मया सो अन्नमत्ति यो विपश्यति
यः प्राणिति य ईं शृणोत्युक्तम्।
अमन्तवो मां त उप क्षियन्ति
श्रुधि श्रुत श्रद्धिवं ते वदामि॥
(ऋ० सं० १०.१२५.४)

अर्थः—यः अन्नमत्ति सः भोक्तृशक्तिरूपया मया एव अन्नमत्ति। यः विपश्यति, आलोकयति, यश्च प्राणिति निःश्वासोच्छ्वासरूपं व्यापारं करोति, यश्च उक्तं शृणोति सोऽपि तत्तच्छक्तिरूपया मयैव तत्तद्व्यापारं करोति। य ईदृशीम् ईं कामकलारूपामन्तर्यामिरूपेण स्थितां मां न जानन्ति, ते अमन्तव अमन्यमाना अजानन्तः उपक्षिपन्ति उपक्षीणा भवन्ति। यद्वा—भावार्थं तु प्रलयान्तस्य अमन्तव इति रूपम्, तेन मद्विषयज्ञानरहिता मामन्तवः ते उपक्षिपन्ति। हे श्रुत विश्रुतसखे श्रुधि वक्ष्यमाणं शृणु विश्रोतव्यम्। श्रद्धिवं श्रद्धिः श्रद्धा तया युक्तम्। श्रद्धायत्नेन लभ्यम्। 'श्रदन्तरोपसर्गवद्वृत्तिः' (३.३.१०६ संख्यक-पाणिनीयसूत्रस्थेन) इति वार्तिकेन श्रच्छब्दस्योपसर्गवद्वृत्तित्वे 'उपसर्गे घोः किः' (पा० सू० ३.३.९२) इति किप्रत्ययान्तस्य रूपम्, मत्वर्थो भावः ईदृशं ब्रह्मात्मकं वस्तु ते तुभ्यं वदामि ॥ ४ ॥

अहमेव स्वयमिदं वदामि
जुष्टं देवेभिरुत मानुषेभिः।
यं कामये तं तमुग्रं कृणोमि
तं ब्रह्माणं तमृषिं तं सुमेधाम्॥
(ऋ० सं० १०.१२५.५.)

अर्थः—अहं स्वयमेव इदं वस्तु ब्रह्मात्मकं वदामि। तदेतद् देवेभिः इन्द्रादिभिः देवैरपि मानुषेभिः मनुष्यैश्च जुष्टम् ईदृग्वस्तुस्वरूपाहं यं कामये रक्षितुमहं वाञ्छामि तं तं पुरुषमुग्रं सर्वेभ्योऽधिकं कृणोमि करोमि। तमेव ब्रह्माणं स्रष्टारं करोमि, तमेव ऋषिमतीन्द्रियार्थदर्शिनं करोमि, तमेव सुमेधां शोभनप्रज्ञञ्च करोमि ॥ ५ ॥

अहं रुद्राय धनुरा तनोमि
ब्रह्मद्विषे शरवे हन्तवा उ।
अहं जनाय समदं कृणोम्यहं
द्यावापृथिवी आ विवेश॥
(ऋ० सं० १०. १२५.६)

अर्थः—पुरा त्रिपुरविजयसमये रुद्राय = रुद्रस्य, षष्ठ्यर्थे चतुर्थी, महादेवस्य धनुः चापं अहम् आतनोमि करोमि। किमर्थम्? ब्रह्मद्विषे ब्राह्मणानां द्वेष्टारं शरवे शरूं हिंसकं त्रिपुरवासिनममुरं हन्तवे हन्तुं हिंसितुम्। हन्तेः 'तुमर्थे सेसेन्...' (पा०सू०३.४.९) इति तवैप्रत्ययः। उ पादपूरणार्थः। अहं जनाय भक्तजनार्थं समदं मधुकैटभ-महिषासुर-शुंभनिशुंभादि-शत्रुभिः संग्रामं कृणोमि। तथा द्यावापृथिवी दिवञ्च पृथिवीं चान्तर्यामितया आविवेश प्रविष्टवती ॥ ६ ॥

अहं सुवे पितरमस्य मूर्धन्
मम योनिरप्स्वन्तः समुद्रे।
ततो वि तिष्ठे भुवनानु विश्वो
तामूं द्यां वर्ष्मणोप स्पृशामि॥
(ऋ०सं० १०.१२५.७.)

अर्थः—'द्यौः पिता' इति श्रुतेः पितरं दिवम् अहं सुवे प्रसुवे जनयामि। कुत्रेति? तदाह—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अस्य परमात्मनः मूर्धन् मूर्धन्युपरि कारणभूते, तस्मिन् हि वियदादिकार्यजातं सर्वं वर्तते तन्तुषु पट इव। मम च योनिः कारणं ब्रह्म। समुद्रे। समुद्रः परमात्मा तस्मिन्, अप्सु व्यापनशीलासु धीवृत्तिषु अन्तः मध्ये यद् ब्रह्मचैतन्यं तन्मम कारणमित्यर्थः। यत ईदृग्भूता अहमस्मि ततो हेतोः विश्वा विश्वानि भूतानि अनुप्रविश्य जातानि अनुप्रविश्य वितिष्ठे विविधं व्याप्य तिष्ठामि। उत अपि च अमू द्यां विप्रकृष्टदेशेऽवस्थितं स्वर्गलोकं तदुपलक्षितं विकारजातं वर्ष्मणा कारणभूतेन मायात्मकेन स्वकीयेन देहेन उपस्पृशामि। अथवा यस्य भूलोकस्य मूर्धन् मूर्ध्न्युपरि अहं पितरमहं सुवे समुद्रे उदकेष्वन्तर्मध्ये मम योनिः कारणभूते आमृण्याख्य ऋषिः। अथ समुद्रे अन्तरिक्षे अप्सु अप्मयेषु देवशरीरेषु मम कारणं ब्रह्म चैतन्यम्। ततोऽहं कारणात्मिका सती सर्वाणि भुवनानि व्याप्नोमि ॥ ७ ॥

अहमेव वात इव प्र वाम्यारभमाणा भुवनानि विश्वा।
परो दिवा पर एना पृथिव्यै-
तावती महिना सं बभूव ॥

(ऋ० सं० १०.१२५.८)

अर्थः—विश्वा सर्वाणि भुवनानि भूतजातानि कार्याणि आरभमाणा कारणरूपेण उत्पादयन्ती अहमेव परेणानधिष्ठिता स्वयमेव वात इव प्रवामि प्रवर्ते। अहमेव दिवा दिवः परः सकारान्तोऽयं परशब्दः, दिवः परस्तात् तथा एना अस्याः पृथिव्याः परस्तात् तदुपलक्षितात् सर्वस्मादपि विकारजाताच्च परस्ताद् वर्तमाना। असङ्गोदासीनकूटस्था ब्रह्मरूपाऽहं महिना महिम्ना एतावती संबभूव सर्वजगद्रूपेण संभूतास्मि ॥ ८ ॥

एवञ्च सर्वस्यापि सूक्तजातस्य निरतिशयानन्दरूपे शक्त्यधिष्ठिते परब्रह्मण्येव चरमं तात्पर्यम्। तदेव च जगति कामेश्वरी-कामरूपेण, सीता-रामरूपेण राधा-कृष्णादिरूपेण च नैकरूपो विलसतीति एष निष्कण्टकः पन्थाः। ★

'सूर्योदय'स्य स्वामित्वादिविषयकं विवरणम्

प्रपत्रम् : ४ (द्रष्टव्यो नियमः ८)

१. प्रकाशनस्थलम्	:	वाराणसी
२. प्रकाशनावधि	:	मासिकम्
३. मुद्रक-नाम	:	गोविन्द नरहरि वैजापुरकरः
राष्ट्रियता	:	भारतीयः
पत्र-संकेतः	:	३०।४० घासीटोला वाराणसी
४. प्रकाशक-नाम	:	गो० न० वैजापुरकरः
राष्ट्रियता	:	भारतीयः
पत्र-संकेतः	:	वाराणसी
५. सम्पादक-नाम	:	गो० न० वैजापुरकरः
राष्ट्रियता	:	भारतीयः
पत्र-संकेतः	:	वाराणसी
६. तेषां व्यक्तीनामंशभागीनां वा नामानि पत्रसङ्केताश्च, येषां सविधे समग्रस्य मूलधनस्यैकप्रतिशततोऽधिको भागो वर्तते	:	श्रीभारतधर्ममहामण्डलम् जगतगंज, वाराणसी कैण्ट वाराणसी

अहं गोविन्द नरहरि वैजापुरकर एतद्द्वारा घोषयामि यदुपरिलिखितं विवरणं मदीयज्ञानविश्वासानुसारं सत्यमस्ति।

दिनाङ्कः १-३-'६८

(ह०) गोविन्द नरहरि वैजापुरकरः

प्रकाशकः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हास्यरसावताराय श्री कृष्णदेवप्रसादाय श्रद्धाञ्जलयः

हा हा हास्यकलानदीष्ण कवितासीमन्तिनीसत्पते !
हिन्दीगौरववर्धनोद्यतमते ! साहित्यविद्यार्णव ।
उर्दूवाङ्मयतत्त्वविन् ! निजकुलालङ्कारहीरोपम !
त्वां निर्वाणपदे गतं गुणनिधिं दृष्ट्वा मनः सीदति ॥ १ ॥

छात्राणां कल्पवृक्षो रसिकवरमणिर्नायकः सत्सभानां
शिक्षाशास्त्रे धुरीणो नटवरनगरीवासिनां माननीयः ।
साहित्ये नीतिशास्त्रे परमनिपुणधी - र्गौडवंशावतंसो
व्यङ्ग्यात्मा हास्यमूर्तिः सुरसदनगतः श्रूयतेऽस्माभिरद्य ॥ २ ॥

स्नेहस्फीतं निजपरिजनं प्रोज्झ्य शोकाग्निदग्धम्,
प्रौढां निद्रां कथमुपगतो जागरूक-स्वभाव ।
वाग्मी मौनं श्रयति किमहो व्यञ्जनाशक्तिपूर्णः
कस्मादद्य त्वयि गुणगणा वैपरीत्यं भजन्ते ॥ ३ ॥

नाट्ये कृष्णः सुखे देवः प्रसादः काव्यबन्धने ।
शब्दत्रयेण ते नाम सार्थकत्वं बिभर्ति हि ॥ ४ ॥

स्वनामधन्यो जगदेवसूनुः ख्यातो धरित्र्यां स हि कृष्णदेवः ।
मनुष्यदेहं प्रविहाय जीर्णं देवत्वमाप्तुं त्रिदिवं प्रयातः ॥ ५ ॥

मन्ये सुरेन्द्रेण विचारगोष्ठ्यां सम्मेलने वा द्युसदां विशिष्टे ।
आकारितो येन मनुष्यलोकं त्यक्त्वा दिवं त्वं गतवान् कवीन्द्रः ॥ ६ ॥

तृप्तो नु काव्यरसतो ह्यत एव दिव्यां प्रातुं सुधां सुरपतेः सविधे गतोऽसि ।
ताम्बूलभक्षणरुचे ! तदभावयुक्ते स्वर्गे प्रसीदति मनस्तव तर्कयामि ॥ ७ ॥

बह्वीः सभाः सकलबन्धुजनानकस्मात् त्यक्त्वाऽद्य काव्यरसिकान् कविपुङ्गवांश्च ।
स्वर्गं गतोऽसि कविकुञ्जर ते वियोगे दैन्यं गताः कतिपया अपरे च मौनम् ॥ ८ ॥

सर्वे च ते विरहवेदनया प्रणुन्ना शोकश्रुपूरितदृशः सहसा पुमांसः ।
श्रद्धाभरेण नमिता मणिकर्णिकायां गङ्गोदकैरपचितिं सुतरामकार्षुः ॥ ९ ॥

द्विपञ्चनवचन्द्राब्दे वैक्रमे कार्तिके सिते । एकादश्यां कविः कृष्णदेवः काश्यामजीजनत् ॥
वेदयुग्माभ्रयुग्मेऽब्दे वैक्रमे फाल्गुने सिते । दशम्यां श्रीकविः कृष्णदेवः स्वर्गं गतः किल ॥ ११

छात्रान् मित्राणि बन्धूंश्च पत्नीं कन्ये विहाय हा ।
स्वर्गतोऽसि तथापि त्वं शाश्वतीं शान्तिमाप्नुहि ॥ १३ ॥

—श्री बलदेव त्रिपाठी, एम. ए., साहित्याचार्यः—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

पञ्जीकृतसंख्या ए० ८९७

Digitized by Arya Samaj Foundation Chennai and eGangotri

सूर्योदयस्य नियमाः

पत्र-संहिता

१. 'सूर्योदय'-मासिकपत्रस्य वार्षिकं शुल्कं रूप्यकपञ्चकं वर्तते। धनादेश (मनीआर्डर) द्वारा तत्प्रेषणीयम्। वी० पी० द्वारा प्रेषणे ५० पणाः पृथक् प्रदेयाः स्युः।

२. आवर्षं गम्भीरसाहित्यसमन्विताः १२ अङ्काः प्रकाश्यन्ते। नवीनग्राहकत्वं प्रथमाङ्कतः (जनवरी-अङ्कतः) एव स्वीक्रियते। माध्यमिकेन केनापि अङ्केन ग्राहकत्वं न स्वीक्रियेत।

३. आंग्लमासस्य २६ दिनाङ्के 'सूर्योदयः' प्रकाशितो भवति। वारद्वयं संशोध्य ग्राहकेभ्यः स प्रेष्यते। अतस्तदलाभे पूर्वं स्वकीय-पत्रालयतस्तदनागमनस्य निर्णयं कृत्वैव १० दिनाङ्कानन्तरं वयं सूचनीयाः।

४. लेख-कवितादीनां भाषा संयता, सरला, शुद्धा च भाव्या। प्रकाशनीय-लेखादीनां स्पष्टाक्षरैः कर्गजस्यैकपृष्ठे एव लेखनमावश्यकम्। अस्वीकृता लेखादयः पोस्टविभागीय-चिटिका (टिकट) प्राप्त्यनन्तरं परावर्तयितुं शक्ष्यन्ते।

५. सम्पादकीय-विषयसम्बद्धे पत्र-व्यवहारे 'सम्पादकः' इति, व्यवस्थाविभागीय-पत्रव्यवहारे च 'व्यवस्थापकः' इति च स्पष्टं लेखनीयम्। तेन उत्तरलाभे मुधा विलम्बो न भवेत्।

विज्ञापन-शुल्कम्

सूर्योदये सुरुचिपूर्णं विज्ञापनं प्रकाश्यते। एकवारं तस्य प्रकाशनस्य शुल्कक्रमश्च अधोलिखितोऽस्ति। सार्वकालिकस्य दीर्घकालिकस्य च विज्ञापनस्य कृते विशेष-सौविध्याय पत्र-व्यवहारः कार्यः।

साधारणस्य प्रतिपृष्ठस्य	१००) रु०	साधारणस्य प्रत्यर्धपृष्ठस्य	६०) रु०
साधारणस्य चतुर्थांशपृष्ठस्य	३५) रु०	आवरण-चतुर्थपृष्ठस्य	२००) रु०
आवरण-द्वितीय-तृतीयपृष्ठयोः	१५०) रु०	प्रथमावरणपृष्ठे विज्ञापनं न स्वीक्रियेत।	

—सङ्केतः—

'सूर्योदय'-कार्यालयः, भारतधर्म-महामण्डलम्, जगद्गंज, वाराणसी।

सम्पादकः, प्रकाशकः, मुद्रकश्च—गोविन्द नरहरि वैजापुरकरः,
श्रीभारतधर्ममहामण्डलम्, जगद्गंज, वाराणसी वैट।
मुद्रण-स्थलम्—आनन्दकानन प्रेस, सी० के० ३६/२०, वाराणसी।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सूर्योदयः

भारतधर्ममहामण्डलस्य

मासिकं मुखपत्रम्

वर्षम् ४४

अङ्कः ४

सम्पादकः

गो० न० वैजापुरकरः

अप्रैल

१९६८

वार्षिक-मूल्यम्

५) रूप्यकाणि

प्रत्यङ्क-मूल्यम्

अर्धरूप्यकम्

भगवत्पाद श्रीशङ्कराचार्यानुस्मरणम्

बोधाभीपुशतैरबोधतिमिरं हृद्व्योमगं दारयन्,
प्रज्ञा-वारिधिमुन्नतिं च गमयन् सोमः सदोदेतिः यः ।
तं संसार-सहस्ररश्मिजनित-क्लेशापहं दक्षिणा-
मूर्तिं निर्मलयोयिचिन्त्यचरणाम्भोजं भजे शङ्करम् ॥१॥

वेदान्तार्थतदाभास-क्षीरनीर-विवेकिनम् ।
नमामि भगवत्पादं परहंस - धुरन्धरम् ॥२॥

वक्तारमासाद्य यमेव नित्या
सरस्वती स्वार्थसमन्विताऽभूत् ।
निरस्त - दुस्तर्क - कलङ्कपङ्का
नमामि तं शङ्करमर्चिताङ्घ्रिम् ॥३॥

श्रुति-स्मृति-पुराणानामालयं करुणाकरम् ।
नमामि भगवत्पादं शङ्करं लोकशङ्करम् ॥४॥

अज्ञानान्तर्गहन - पतिता - नात्मविद्योपदेशै-
स्त्रातुं लोकान् भवदवशिखातापपापच्यमानान् ।
मुक्त्वा मौनं वटविटपिनो मूलतो निष्पतन्ती
साम्भोमूर्तिर्विलसति भुवने शङ्कराचार्यरूपा ॥५॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अनुक्रमः

प्रपानकम्	पत्रपुटम्	परिवेषकः
मम निर्णायको रघुवरः	७३	श्री स्व० लक्ष्मण शास्त्रि तैलङ्गः
श्रीमहर्षि-ज्ञानानन्द-चरितम्	७४	श्री विन्ध्येश्वरीप्रसाद शास्त्री
मातृहस्तेन भोजनम्, मातृमुखेन शिक्षणञ्च	७५	सम्पादकीयम्
द्वैवार्षिकी-कविभारती-परिचयः	७७	श्री रतिनाथ झा
रसस्वरूप-विमर्शः, भक्तिरसश्च	७९	श्री पूज्य करपात्रस्वामिनः
(१) भारतीया राजनीतिः	८१	श्री पण्डितराज राजेश्वरशास्त्रिणः
चक्रि-चूडामणिः	८४	श्री उमाशङ्कर शर्मा त्रिपाठी
वृत्तिः—लघुकथा	८९	श्री 'अङ्गारः'
मम मानस-वासिनी	९०	श्री आनन्दतीर्थ वरखेड़करः
विवाहवयोमर्यादा-प्रकल्पस्य शास्त्रीयतरत्वं समाजहितकारकत्वं च	९१	श्री अनन्त शास्त्री पिंगले
मानस-भारती	९३	श्री जनार्दन गङ्गाधर रटाटे
आस्तिको महर्षिः कणादः	९४	श्री शिवकुमार शास्त्री

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सूर्योदयः

श्री भारतधर्ममहामण्डलस्य मासिकं मुखपत्रम्

रागद्वेषनिशाटनं विधुरयन् मोहं तमो नाशयन्,
तामिस्रं जडवादकैरवकुलं ज्ञानत्विषा ग्लापयन्।
विद्वत्कोकमशोकयन् नयसुधीरोलम्बमुन्मीलयन्,
सञ्जातः सुमनोमनो मधुरयन् सर्वत्र सूर्योदयः॥

४४ वर्षे] वाराणसी, चैत्रः २०२५ : अप्रैल १९६८ ई० [४ अङ्कः

मम निर्णायको रघुवरः !

कामाप्तिहेतुमभिरामाङ्गभास - मतिकामायुता - ऽऽयतरुचि
वामाङ्कपालिगत - कामाङ्गना - रुचिरवामाङ्गना-सहचरम्।
सोमाभवक्त्रमथ हेमाङ्गदं कुसुमदामाभिभूषिततनुं
रामाभिधान - परमात्मान - माश्रितसमाराधनं भुवि भजे ॥ १ ॥

घर्माधिकारभृ - दधर्मान्तिकृत् - परमशर्मा - र्थिकामफलदः
कर्मारमा भरणकर्मा प्रजावृजिनमर्मावि - दुन्नतमनाः।
नर्मानुविद्ध - शुभमर्मातिरेककृ - दकर्माङ्क - दण्डनपटु-
श्चर्मासिमात्रपरिकर्मा पिनद्धवरवर्मा-ऽवताद् रघुवरः ॥ २ ॥

तीर्णाम्बुधिर्जनवितीर्णाश्रयः परिविशीर्णारिरि - निचयः
कीर्णाशुभा अपि च तूर्णाशुगो भवतु पर्णाशनैरविदितः।
कर्णामृता - चरितकर्णाधिको भृशमपर्णाप्तीरितमति-
र्जीर्णायुषो रिपुनिगीर्णान्तिरस्य मम निर्णायको रघुवरः ॥ ३ ॥

—स्वर्गीयाः महामहोपाध्याय-श्री लक्ष्मणशास्त्रि तैलङ्गाः—

मासावतरणिका

रसालतरुमञ्जरी - स्फुरितसौरभोल्लासभि-
र्भुर्जङ्गकृतभोजनैरिव कृशैः समीरैर्जडैः।
मनांसि मदयन्, दिशः पिकरुतैस्तु वाचालयन्
शिरीष - कुसुमावली जयति वैभवेनोन्नता ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्री महर्षि-ज्ञानानन्द-चरितं महाकाव्यम्

—श्री विन्ध्येश्वरीप्रसादशास्त्री—

सदा सदारैः सहितो नृपेन्द्रो यतीन्द्रसेवार्पितजीवनः सन् ।
सुदुर्लभैर्वस्तुभिरन्वहं तैर्नवैर्नवैस्तं हि यतिं सिषेवे ॥ ४१ ॥

४२. महात्मनां जीवनमुक्तिभाजां
विनिन्दका ये परिपोषकाश्च ।
दुष्कर्म सत्कर्म भुवि क्रमेण
गृह्णति शास्त्रेष्विति निर्णयोऽस्ति ॥

४३. सच्छास्त्रमर्मज्ञवरो नरेन्द्रो
ज्ञात्वेति योगिप्रवरस्य सेवाम् ।
अनारतं संविदधे प्रसन्नः
सहात्मवर्गै - र्विनयान्वितः सन् ॥

४४. सायन्तने शाद्वल-सन्निविष्टाः
शिष्टाः स्वदारैः सह सम्प्रहृष्टाः ।
पौराः समं शाहपुराधिपेन
धर्मोपदेशं मुनिपुङ्गवस्य ॥

४५. सुवर्ण - सिंहासन-मास्थितस्य
महार्हरत्नैः खचितं विचित्रैः ।
कर्णामृते ध्वस्त - समस्तपापं
निपीय नित्यं परितोषमापुः ॥

४६. एवं व्यतीतेषु बहुष्वहस्सु
यतेरियं कर्म - परम्पराभिः ।
प्रवृत्तिरश्रावि शुभोदयस्य
पुरस्य वीरेन्द्र-महारणेन ॥

४७. श्रीराजराजेन्द्र - महारणोऽसौ
तस्योदयाख्यस्य पुरस्य नाथः ।
श्रीसूर्यदेशे सुगृहीतजन्मा
सम्मानभाग् यः पृथिवीपतीनाम् ॥

४८. वीराग्रणीर्धर्मधुरन्धरः श्री-
फतेहसिंहाभिध - राजसिंहः ।
सिंहोरुसत्त्वो - ऽतिदयार्द्र-चेताः
प्रसिद्ध - 'चित्तौड़गढ़ा'-ऽभिधस्य ॥

४९. पौरस्त्य-पाश्चात्त्य-समस्तविद्या-
केन्द्रस्य चात्यन्त - विशालमूर्तेः ।
आर्याख्यजाते - र्भुवि गौरवस्य
देवापगा - पूरतटे स्थितस्य ॥

सहस्रशः सौधविराजितस्य ह्यवर्णनीयस्य च सत्कवीन्द्रैः ।
'श्रीविश्वविद्यालय'-नामधेय-संस्थानकस्याप्रतिमस्य लोके ॥ ५० ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

[क्रमशः]

Digitized by Arya Samaj Foundation Chennai and eGangotri

मातृहस्तेन भोजनम्, मातृमुखेन शिक्षणञ्च

गताङ्केऽस्माभिः 'नारीत्व-निवर्तन-संकटस्य' परिहाराय बहु प्रपञ्चितम्। तत्रैव 'उपसंहारे भारतदेशे नार्याः गौरवास्पदं मातृत्वपदं सर्वतोऽधिकं संरक्षणीयं सङ्कटस्यास्य परिहारायेति सङ्केतितम्। मातृहस्तेन भोजनं मातृमुखेन च शिक्षणं तस्यास्त्युपाय इत्यपि अनुषङ्गतः समुल्लिखितम्। अद्य स एव विषयोऽत्र कियद्भिः शब्दैः प्रपञ्च्यते। प्रायो दशवर्षेभ्यः पूर्वं भूदान-ग्रामदान-पदयात्रा-प्रसङ्गे महाराष्ट्रप्रदेशस्य दक्षिणसतारा-मण्डलान्तर्गते एकस्मिन् ग्रामे आचार्य विनोबा भावे महोदयैः यत्प्रवचनं कृतम्, विषयस्यास्य विवेचने तदस्माकं बहुश आदर्शायितमिति साभारं संसूच्यते।

मातृयौवनोद्यानच्छेदनाय कुठारीभूतस्य वस्तुतो योनिजसृष्टिमात्रस्य कृते स्वांशदानपुरस्सरं गर्भभरधारण-श्रमवहनदृष्ट्या मातुः जायमाना नैके उपकाराः, सद्योजातस्य किशोरीकरणरूपे कार्ये तदीया निरुपधिकृपाविलासाश्च अनन्यसाधारणं मातुर्गौरवं सडिण्डिमघोषं घोषयन्ति। यावद्धि तस्यास्तानि कार्याणि प्रचलिष्यन्ति, तावन्न जातु नारीत्व-निवर्तनस्य सङ्कटं वास्तविकम्। साम्प्रतिकं विवर्तितं तत्सङ्कटं केवलं पुरुषस्य तत्कृतज्ञता-विस्मृतिप्रभवम्। यदि सा कृतज्ञता पुनरुद्बुद्धा क्रियेत तदा सङ्कटमेतज्जलबुद्बुद इव सद्यो विलीयेत। पुरुषेषु तादृशाज्ञाननिरसनाय न केवलं मातुः पुत्रहितकर्म तदुपासनं वा प्रभवेत्। तदर्थं पुत्रे ज्ञानाधानमपि अत्यावश्यकम्। अत एव 'मातृहस्तेन भोजनं मातृमुखेन च शिक्षणम्' इत्ययं राद्धान्तः सामञ्जस्यं भजते। आद्यं तस्य उपासनम्, अपरञ्च तस्मै ज्ञानदानम्। कर्मणा तदुपकृतिस्तु प्रत्येकया मात्रा क्रियत एव।

एतेनेदं सिद्ध्यति यत् प्रतिभासमानं नारीत्व-निवर्तनसङ्कटं यदि वयं निरोद्धुं नाशयितुं वा वाञ्छामस्तदाऽस्माभिः 'मातृहस्तेन भोजनम्, मातृमुखेन च शिक्षणमि'त्यस्य सर्वत्र व्यापकः प्रसारः कार्यः। नैकेषां सामयिकानामुपायानामनुग्रहेऽपि यावदेतौ उपायौ नाश्रीयेते, तावत् नारीत्व-निवर्तन-सङ्कटम् अशेषतो निरोद्धुं सर्वथाऽक्षममित्यस्माकं दृढं मतम्।

मातृहस्तेन भोजनस्य महिमा भगवता नन्दनन्दनेनैव स्फुटीकृतः। कंसवधादिसदृशानि महत्तराणि कार्याणि कृत्वाऽपि षोडशवर्षदेशीयं श्रीकृष्णं सखीभिः खेलन्तं दृष्ट्वा पित्रा व्रजराजेन नन्देन अक्षरग्रहणाय स महर्षेः सान्दीपिनेराश्रमं प्रापितः। तत्र षड्भिरेव मासैस्तेन गुरोरशेषा विद्या समधीता महाप्रभाववत्त्वात्। अतो गुरुणा ततः परं तस्मै किमवशिष्टं पाठनायेति विचार्य पाकाय वनेभ्यः काष्ठानयनकार्यं समाज्ञप्तं गुरुणा। साक्षात् भगवद्रूपेण श्रीकृष्णेन गुरोराज्ञेयं शिरोधारिता। प्रतिदिनं वने गत्वा गुरोः पाकाय इन्धनानयनं तस्य कर्म समभूत्। अन्ते यदा समावर्तनकालः समुपस्थितस्तदा तुष्टेन गुरुणा उक्तम्–'वरं ब्रूही'ति। भगवता उक्तम्–'देहि मे वरमेकं मातृहस्तेन भोजनमि'ति। गुरुणा 'तथाऽस्तु' इत्युक्तम्। सर्वे जानन्त्येव यद् भगवान् श्रीकृष्णः ११६ वर्षपर्यन्तं जीवित्वा यावज्जीवं मातृहस्तेनैव भोजनमकरोत्। तेषां स्वर्गारोहणानन्तरमेव तन्माता स्वर्गतेति। इत्थं मातृहस्तेन भोजनस्य अतितरां माहात्म्यम्।

अद्य तु माता पिता च उभावपि परसेवा-कार्येण जीविकां निर्वाहयतः। तस्मिन् गार्हस्थ्ये

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुत्राणां 'मातृहस्तेन भोजनम्' दुर्लभतरं संवृत्तम्। 'होटला'ख्ये विपणिगते भोजनालये भुज्यते बालैः। केवलं एकस्मिन् वृक्षे विहगानामिव रात्रौ सर्वेषां पारिवारिकाणां निद्रा-सम्मेलनं जायते। एवं-स्थितौ कथं नाम नारीत्वनिवर्तनसङ्कटं परिहृतं भवेत्? नव्यशिक्षादीक्षिता मातरश्च सद्योजातायापि अर्भकाय स्वीयं स्तन्यं न ददति, स्वीयशरीरसौष्ठव-मोहेन। सत्येवं को नाम पुमान् (पुत्रो) नार्या-स्तन्निरतिशयं प्राक्तनं महत्त्वं संरक्षयितुं विवशो भवेदिति नूनं विवेचनीयं नवचिन्तकैः।

इत्थमेव 'मातृमुखेन शिक्षणम्' अपि सर्वथा-ऽनुग्राह्यं संकटस्यास्य निराकरणाय, समाजसुव्य-वस्था-निर्माणाय च। जीवने शिक्षणस्य महत्त्वं निर्विवादम्। तद्धि शिक्षणं साक्षरत्वरूपं सृष्टि-परिज्ञानरूपञ्च। यथासमयम् ईश्वर एव कालसह-कृतः प्रत्येकस्मै सृष्ट्युपादानकं शिक्षणं प्रददाति। तथापि परकीयदासताकाले आंग्लशासकैः साक्षरेभ्य एव मतदाताधिकारः प्रदत्त आसीत्। स्वातन्त्र्योत्तरं शिक्षणस्यापरं रूपमधिकृत्य निर्णीतं यत् यः एक-विंशतिवर्षीयो भवेत्, स ईश्वरेणैव तथा शिक्ष्यते, अतः स शिक्षित इति मत्वा मतदानाधिकारी विधेय इति।

सत्यप्येवं साक्षर-शिक्षणस्यापि महत्त्वं नाप-ह्नोतुं शक्यम्। अक्षरज्ञानेन एकत्र स्थित्वा सदा-सर्वदा सर्वविधं ज्ञानमासादयितुं शक्यते। सर्वं सृष्टि-प्रसृतं ज्ञानमेकस्मिन् पुस्तके सङ्गृहीतुं शक्यते। अत एव तदपि शिक्षणं सर्वथा संग्राह्यमेव। अत एव स्वतन्त्रे भारते उत्तरोत्तरं नैकाः शिक्षणसंस्था अहरहो निर्मीयन्ते। लक्षावधिकाश्छात्राश्च तत्र पठन्ति। इत्थं राष्ट्रस्य समुन्नतौ साक्षरता (शिक्षा)-प्रसारस्य सर्वाधिकं महत्त्वं साम्प्रतं निर्विवादतया स्वीक्रियते। अन्नोत्पादनकर्ता पांसुलपादो हालिक-पुत्रोऽपि एतादृशशिक्षणाय अहमहमिकया प्रवर्तते। सस्योत्पादनायाऽपि एतादृशी साक्षरतारूपा शिक्षा अनिवार्या मन्यते सर्वैः। सत्येवं मानव-सर्जिकाणां नारीणां कृते तादृशशिक्षणस्य अनिवार्यताविषये किमु वक्तव्यम्?

वस्तुतः नारी-शिक्षणं कस्यापि राष्ट्रस्य कृते सर्वथाऽनुपेक्ष्यम्। तदपि न साक्षरतामात्रम्, सृष्टि-विषयकम् ईश्वरीयं शिक्षणमपि पूर्णतया तस्याः कृते परमावश्यकम्। वात्सल्यरसपूरितस्य तच्छिक्ष-णस्य पात्राणि किशोरका एव। पूर्वमासीत् मान्यता 'दण्डेन सर्वे वशाः' इति। भाषायामपि उच्यते स्म —'छड़ी लागे चमचम, विद्या आये घम घम' इति। परमतीतोऽद्य सः कालः। शिक्षामनोविज्ञानेन स्पष्टमेव सिद्धान्तितं यच्छिक्षणं खेलनमिव सर्वथा भारानभिभूतं भाव्यमिति। तादृशं वैज्ञानिकं शिक्षणं नारी, माता स्वगृहे एव पुत्रेभ्यः किशोरेभ्यो दातुं क्षमा। अद्य धार्मिकशिक्षाया अपि अत्यावश्यकत्व-मुद्घोष्यते तैस्तैः नेतृभिः। तदपि नारी स्वगृहे एव परिचालयितुम् अञ्जसा प्रभवति। अपक्वभाजने सैव स्थायिनः संस्कारान् समाधातुं क्षमा। अत एव उच्यते—'मातृमुखेन शिक्षणमि'ति। मातुस्तच्छि-क्षणं 'प्रेम-शिक्षणम्' इति गीयते, यच्च प्रेम आब्रह्म-स्तम्बपर्यन्तं जीवजातं बलादात्मायत्तं कर्तुं प्रभवति।

अनेनेदं सिद्ध्यति यन्नारीसमाजस्य कृते शिक्षणं प्राकृतिकं साक्षरतारूपञ्च उभयविधं नितान्तमावश्यकम्। तत्रापि भारतीय-सभ्यता-संस्कृतेः साक्षात्परिचायकं संस्कृतवाङ्मयजातज्ञानं भारतीयस्त्रीसमाजेन यावदधिक्रियेत, तावदेव भार-तीयसंस्कृते राष्ट्रस्य चाधिकाधिकः समुत्कर्षो

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

द्वैवार्षिकी 'कवि-भारती'--संक्षिप्तः परिचयः

—श्री रतिनाथ झा, प्रधानमन्त्री—

[प्राध्यापकः- संस्कृत-महाविद्यालयस्य, हि० वि० वि० वाराणसी]

विगतवर्षद्वयतः काशिकैः कतिपयैः संस्कृतमूर्धन्यकविभिरियं 'कविभारती' - संस्था परिचाल्यते। विशुद्धसाहित्यरसोद्बोधन-समास्वादनैककार्यां मासिकाधिवेशनमुखेन कारयन्ती कोमलबालिकेयं श्रेष्ठानां कविवराणाम् आकर्षणकेन्द्रमेव नाभवत्, राष्ट्रमङ्गलकरे तेषां सङ्घटनकर्मण्यपि शशिकलेव वर्धते। नैकान् सुप्तशक्तिकान् कवीन् कविकर्मणे प्राबोधयत् प्राबोधयति चेयम्। अचिरादेव गतमार्चमासि अस्या द्वितीयं वार्षिकमधिवेशनं डा० प्रियव्रतशर्मणाम् आध्यक्ष्ये वाराणसेये दक्षिणामूर्ति-संस्कृतमहाविद्यालये समभवत्। तत्र च विभारत्याः वर्तमानप्रधानमन्त्रिभिः श्री रतिनाथ झा महोदयैः संस्थायाः परिचयात्मकमिदं विवरणं समुपस्थापितं पाठकानां लाभाय प्रकाश्यते। प्रयासस्यास्य हार्दिकमभिनन्दनं कुर्वन् 'सूर्योदयो'ऽस्या उत्तरोत्तरं समुन्नतिं कामयते। वर्षेऽस्मिन् अस्या अध्यक्षाः श्री बटुकनाथशास्त्रि खिस्ते महोदयाः, उपाध्यक्षौ च डा० प्रेमलताशर्म-कृष्णमोहनठक्कुरौ वर्तेते।—सम्पादकः

काव्यं हि नाम सहृदयास्वाद्यं मधुरमधुरं पीयूषम्। कविवचनामृतं सादरं पिबतां हृदयमसङ्कीर्णं सम्पद्यते। इतरेषां सुखदुःखादिषु समानं संवेदनं सञ्जायते। काव्यमाध्यमेन देशकालादिव्यवधानं समवधूय सार्वजनीनं चैक्यमुपश्लोकयितुं शक्यते। समानशीलव्यसनेषु सख्यं प्रख्याप्यते। मनसि रञ्जनं रमणं च सम्भावयितुमुत्साह्यते। एवं भेदेषु अभेदं भावयितुं काव्यं भव्यतमं निदानमिति नात्र विकल्पस्य लेशोऽपि सन्तिष्ठते। इदानीं देशे विदेशे च अनैक्यवृत्तायः शिर उन्नयन्ति। अन्योऽन्यं हार्दं सौहार्दं न भजन्ति जनाः। सर्वत्र त्रासाकुलो जनो दृष्टिपथमवतरति। अतः सर्वथा विप्लवपरिपूर्णे जगति रागात्मिकां वृत्तिं जागरयितुं यत्न आस्थेयः। रागात्मिकायाः वृत्तेर्जीवातुभूतं काव्यम्। अतः काव्यस्य अभिनवनिर्माणप्रसक्त्या समुद्भाविते रागतत्त्वे वैषम्यं शमयितुं शक्यत इति धिया गद्ययुगेऽपि सद्वृत्तसम्भावितं सहृदयहृदयसंवादभाजनं भव्यं पद्यात्मकं काव्यं समुद्भावनीयमिति धिया एतादृशस्य संरम्भस्यारम्भः कृतः।

इयं 'कविभारती' बहूनां प्रतिभावतामपि कवीनां सुषुप्तप्रायनिर्माणशक्तिं प्रबोधितवती। बहून्नवीनानपि कविकर्मणे प्रोत्साहितवती। अनेका ललना अपि काव्यप्रणयनाय प्रोल्लासितवती। तरुणान् छात्रानपि प्रौढ्या व्युत्पत्त्या शक्त्या च संयोजितवती। एवं विविधाभिर्विधाभिः प्रतिमासमायोजिताभिः गोष्ठीभिः कश्चन नवीनः समुत्साहः स्फूर्तिमभजत।

'कविर्मनीषी परिभूः स्वयम्भूः, कविं पुराणमनुशासितारम्' इत्यादिश्रुति-स्मृति-प्रभृतिभिः प्रतिपादितः परमेश्वर एव कविनाम्ना प्रस्तावितः। यथा क्रान्तदर्शी परमेश्वरः स्वकीयनिर्माणकौशलेन विविधाकारं जगदुत्पादयति तथैव कविप्रजापतिरपि निसर्गरमणीयं काव्यात्मकं सर्गं प्रकटीकरोति। विधातुः सृष्टयपेक्षया कवेः सृष्टिरुत्कृष्टेति डिण्डिमघोषपूर्वकं मम्मटादय आचार्यवर्याः प्रतिपादयांबभूवुः। अहो प्रभावः कविवचसाम्! एतत्प्रभावात् कातराः शूरायन्ते, दरिद्रा धनिकायन्ते, कृपणा उदारायन्ते, जडाः पण्डितायन्ते, दुराचाराः पवित्रायन्ते। यथा च विविधानि शास्त्राणि श्रेयःसम्पादनाय जाग्रति जनुष्मतां तथैव काव्यमपि श्रेयो विधातुं समुल्लसति। इयाँस्त्वत्र विशेषो यदत्र न प्रेयसः परित्यागः, न दुस्त्यजस्य भोगस्य परिवर्जनम् न च गृहाश्रम-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मर्यादाया उपेक्षणम् । अत एव साम्प्रतिके युगे प्रेयसि बद्धादरान् जनान् सर्वथा श्रेयोऽनुकूलमाकलयितुं सुदुःसहं प्रतिभाति । फलतः काव्यमार्गेण विनेयान् सत्पथे प्रवर्तयितुं सुकरमिति धिया सर्वतः समीचीनोऽयं मार्गोऽवलम्बनीय इति कृत्वा 'काष्ठा परा सा कविता ततो नः' इति नीलकण्ठस्वरेण सहैव वयमपि स्वकीयस्य कण्ठस्वरस्य सौरस्यमुद्घोषयामः ।

कविभारत्या द्वितीयेऽस्मिन् वर्षे नियमेन प्रतिमासमुपवेशनं सञ्जातम् । वत्सरारम्भेषु गोष्ठीसंरम्भाय कविताजन्ममूमेः शारदादेशस्य महाराजस्य मध्येनगरं श्रीरणवीर-संस्कृतपाठशालायाश्छात्रनिकेतनीभूतं वर्तमानं भव्यं समाकक्षं तत्संरक्षकस्य कविसहृदयधुरीणस्यानुमत्या भूयोभूयः उपयोगे समानीतम् । ततः परं विविधेषु महाविद्यालयेषु प्राप्तनिमन्त्रणेयं कविभारती स्वकीयां गरिष्ठां गोष्ठीमातनोत् । तत्र प्राचार्याणाम् आचार्याणामन्तेवसताञ्च समृद्धे समाजे भृशमाद्रियमाणा संस्थेयमासादयत् परमां प्रतिष्ठाम् । प्रसङ्गेऽस्मिन् स्याद्वादसंस्कृतमहाविद्यालयो भद्रवनीस्थः, श्रीमारवाड़ी-सङ्घ-संस्कृत-विद्यालयः असीस्थः, श्रीनन्दलाल बाजोरिया संस्कृत महाविद्यालयः असीस्थः, श्री मारवाड़ी संस्कृत महाविद्यालयः मीरघट्टस्थः, मङ्गलागौरीस्थो नेपाली संस्कृत महाविद्यालयश्च विशेषतः स्मरणीयः ।

काशी हिन्दूविद्यालये स्नातकोत्तरायुर्वेदानुसन्धानसंस्थान-सञ्चालकस्य कविवरस्य सुजनशिरोमणेः डा० प्रियव्रतशर्मणो निकेतनेऽपि एकमुपवेशनमजायत । ततः पश्चात् साहित्य-एकेडेमी दिल्लीतः 'चित्रकाव्यकौतुकं' नाम ग्रन्थमधिकृत्य पञ्चसहस्ररूप्यकाणां निधिना पुरस्कृतानां कविभारत्या आद्यसभापतीनां परमोत्साहमूर्तीनां चित्रकवीनां श्रीरामरूप पाठक महोदयानामभिनन्दनाय एकं विशिष्टमधिवेशनं डा० प्रेमलताशर्मदेव्या भव्यागारे समायोजितम् । इहागतवतः अमेरिकादेशीय - वाशिंगटन - विश्वविद्यालयस्य संस्कृताध्यापकस्य सम्मानाय श्री प्रेमलतादेव्या गृहे एकं साधारणमुपवेशनं कृतम् । इत्थमधिवेशनद्वयं विशेषेण समायोजितम् ।

वत्सरेऽस्मिन् संस्थाया निबन्धनमपि जातम् । एतस्मिन् कर्मणि नितरां व्याप्रियमाणः संस्थाया उपसभापतिः श्री कृष्णमोहन ठक्कुरो विशेषतः स्मरणीयः प्रशंसनीयश्च । कविभारत्या अधिवेशनेषु श्रावितानां काव्यानां ग्रन्थरूपेण प्रकाशनाय संस्कृतायोगः सम्प्रार्थितः । तस्य च विषयस्य पत्रव्यवहारः सम्प्रत्यपि प्रवर्तनीयः । सत्यवसरे प्रयासोऽयमवश्यं सफलतामेष्यतीति निश्चितं मतम् । यावत् परिपूर्णतया ग्रन्थोऽयं न प्रकाशमासादयति, तावत् प्रतिनिधिभूतायाः कतिपयरचनाया एको लघुकायः 'कविभारती-कुसुमञ्जलिः' इतिनाम्ना संग्रहः प्रकाश्यते । अस्य प्रकाशनस्य मुद्रणं व्रजवासी-मुद्रणालयाधिपतेः श्री हरस्वरूप चौबे महोदयस्योदारेण सहयोगेन सञ्जायते । रचनायाः संग्रहे सम्पादने च संस्थायाः उपसभापतिपदमलङ्कुर्वती डा० प्रेमलताशर्ममहोदया धन्यवादैरुपस्तूयते । प्रतिमासं पठितानां काव्यानां सङ्कलने श्रीमती कमला चुनेकर महोदया उपमन्त्रिपदस्य दायित्वं निभालयन्ती भृशं समाद्रियते । सर्वेऽपि सदस्याः सादरमभिनन्द्यन्ते ये सर्वविधं क्लेशं सहन्तोऽपि आयोजितासु गोष्ठीसु मिलित्वा संस्थाया गौरववर्धनं समये समये कुर्वन्ति, कृतवन्तश्च ।

[शेषांशः ८० पृष्ठे

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पूर्वतोऽनुवृत्तः

रस-स्वरूप-विमर्शः, भक्तिरसश्च

—पूज्य श्री करपात्रस्वामिनः—

[पूज्यपादानां प्रस्तावितस्य भक्तिरसार्णवस्येदम् अष्टमं प्रकरणम्। अस्य कियानंशः स्वल्पतमो विगतवर्षेषु प्रकाशमुपगतः। ततः परं शिष्टोंऽशः कथमपि नष्टः। पुनः स्वामिपादैः नवेनायं ग्रन्थः सुरक्षित-टिप्पणपत्रैः ग्रथितः। सोऽस्माभिः क्रमशः प्रकाश्यते। प्रसङ्गानुसारमिदम् अष्टमप्रकरणमप्यत्र प्रारभ्यते। पूर्वप्रकाशितांशतः संवादित्वेऽपि बहुत्र तैनवो विचारोऽत्र संग्रथित इति सन्दर्भस्यास्य न सर्वथा पौनरुक्त्यमिति कृत्वाऽत्र स पुनः प्रकाश्यते।—सम्पादकः]

रसो वै सः इति श्रुत्या रसस्य ब्रह्मरूपता उक्ता। तस्य चावेद्यत्वे सति अपरोक्षतया स्वप्रकाशत्वमेव, सहृदयानां नाट्यदर्शिनां प्रत्यक्षविषयता च। **आत्मनस्तु कामाय सर्वं प्रियं भवति** इति श्रुत्या निरतिशयपरप्रेमास्पदत्वेन आत्मनः परमानन्दरूपत्वमनुमातुं शक्यम्। तस्यैव च रसात्मकतया तदभिन्नाभिन्नस्य रसस्याप्यनुमेयत्वं वक्तुं सुशकमेव। तत्र फलान्तरेच्छाधीनेच्छाविषयत्वेन सोपाधिकप्रेमास्पदत्वेन पुरुषार्थस्य गौणत्वम्, तदनधीनेच्छाविषयत्वेन तु मुख्यत्वम्। तत्त्वञ्च निरतिशयानन्दस्वरूपात्मन्येव पर्यवस्यति। रसशास्त्रकारैस्तु 'गुडजिह्विका' - न्यायेन प्राकृताधिकारिणां प्राकृतरसपरिचयेन अप्राकृतरसे चेतोऽवताराय प्रथमतः प्राकृतरस एवोपवर्णितः। प्रयोजनपार्थक्यं प्रस्थानपार्थक्यं प्रयोजयति। ये च संसारचक्रचङ्क्रमणशीला अपरिशीलितपरमपुरुषार्थपद्धतयः सुकुमारमतयो विविधवासनावासितहृदयाः काव्यार्थचिन्तनचतुरास्तान् **असत्ये वर्त्मनि स्थित्वा ततः सत्यं समीहते** इतिरीत्या गुडजिह्विकान्यायेन रसे प्रवर्तयितुं रसाचार्या प्राकृतरसमास्वादयन्ति। परमरसास्वादलेशोऽपि यावत् नानुभवगोचरीकार्यते, अप्राकृते तावत् कथं ते दिव्यरसस्पृहयालवोऽपि क्रियेरन्। दिव्यरसस्तु श्रवणादिभिः साधनैः सर्वानर्थनिदानोन्मूलने चिरसञ्चितकर्मकलापदाहेन दुष्करप्रायेण ज्ञानेन तत्साध्यभक्तियोगेनैव अनुभवितुं शक्यः। स तु श्रीमद्भागवतादौ निरूपितः।

अप्राकृत एव रसो नाट्यशास्त्ररीत्या 'भाव' इत्याख्यायते। स एव च भक्तिरसः। रसत्वव्यपदेशहेतोस्तादृशानन्दात्मकताया उभयत्र सत्त्वात्।

सात्त्विकमनोवृत्तिरूपं सुखवृत्तिप्रतिबिम्बितसुखाभासरूपमेव तु सुखं तैस्तैराचार्यैः हेयत्वेनाभिमतम्। तस्य परमानन्दात्मत्वाभावेन परिणामतापसंस्कारदुःखाद्यावृतत्वात्। तदात्मनः बौद्ध-चार्वाक-जैन - नैयायिक - वैशेषिक - सांख्य-योगादिमतरीत्या परमानन्दरसरूपता नोपपादयितुं शक्या। तथा हि—आद्ययोरात्मनो भङ्गुरत्वेन तृतीयस्य कथञ्चिन्नित्यत्वेऽपि अनानन्दरूपत्वेन अन्येषां नित्यत्वेऽपि रसात्मकत्वाभावेन तदनुपपत्तेः। द्वैत-विशिष्टाद्वैत-द्वैताद्वैत-शुद्धाद्वैता-ऽद्वैतपर्यवसायिनामौपनिषदानां तु नित्यत्वमानन्दरूपत्वञ्च आत्मनः सम्प्रतिपन्नमेव। रसस्वरूपो भगवानेव रसः। तस्य चांशभूतो जीवोऽपि सिन्धोर्बिन्दुरिव तत्स्वभाव एव। प्राकृताप्राकृतभेदेन तस्य रसस्य द्वैविध्यम्। प्राकृतालम्बनतया प्राकृतत्वम्, अप्राकृत-भगवदालम्बनतया तु अप्राकृतत्वम्।

अत्र **विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः** इति भरताचार्यसूत्रम्। विभावयन्ति = आविर्भावयन्ति, उद्बोधयन्ति प्रसुप्तं स्थायिनमिति

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विभावाः—आलम्बनानि, उद्दीपनानि च। तथा च विषयतासम्बन्धेन स्थायिविशिष्टमालम्बनम्, स्वोद्बोधकतासम्बन्धेन स्थायिविशिष्टमुद्दीपनम्। स्थायिकार्यत्वे सति आलम्बनचेष्टारूपोऽनुभावः। आलम्बनावच्छेदेन आविर्भूष्णुस्तिरोभविष्णुः स्थायिपोषको व्यभिचारी च। तदुक्तं काव्यप्रकाशादिषु—

विभावेन उत्पाद्योत्पादकभावरूपाद् अनुभावेन गम्यगमकभावरूपाद् व्यभिचारिणा पोष्यपोषकभावरूपात् संयोगात् सम्बन्धाद् रसनिष्पत्तिः = उत्पत्तिः, अभिव्यक्तिः, पुष्टिश्चेति तदर्थः। तथा हि—ललनादिभिरालम्बनविभावैः स्थायी रत्यादिको जनितः, उद्यानादिभिरुद्दीपनविभावैरुद्दीपितः, कटाक्षभुजाक्षेपणादिभिरनुभावैः प्रतीतियोग्यः कृतः, व्यभिचारिभिरुत्कण्ठादिभिः पोषितः, रामादौ अनुकार्ये रसः। नटे तत्तुल्यरूपतानुसन्धानबलाद् आरोप्यमाणः सामाजिकानां साश्चर्यानुभवश्चमत्कारहेतुरिति भट्टलोल्लटप्रभृतयः।

तदन्ये न सहन्ते। तत्र दण्डादीनां निवृत्तौ घटादीनामिव विभावादिनिवृत्तावपि रसस्यअवस्थानप्रसङ्गात्। किञ्च—तत्र सामाजिकेषु तदभावे तत्र चमत्कारानुभवविरोधश्च। न च तज्ज्ञानमेव चमत्कारहेतुः; शब्दतज्ज्ञानेऽपि तदापत्तेः। लौकिकशृङ्गारादि दर्शनेनापि चमत्कारप्रसङ्गात्। उत्पत्तिपक्षे आलम्बनस्य उद्दीपकत्वहानिप्रसङ्गात्। नापि पोषकत्वम्; अभिव्यक्तेः भट्टलोल्लटादिभिरनङ्गीकारात्। नापि ईषदतिशयाधानहेतुत्वमुद्दीपकत्वम्; जनित इति पदविरोधात्। किञ्च—साश्चर्यानुभव इति कीदृशोऽनुभवः ? सामाजिकानां न मानससाक्षात्कारः; असन्निकर्षात्। नाप्यनुमितिः; गृहीतरामविभेदेन नटे रत्याद्यनुमितौ बाधात्।

[क्रमशः]

सम्पादकीयम् [७६ पृष्ठस्य शेषांशः

भवेत्। एतदर्थं संस्कृतसमुन्नयने बद्धपरिकरैः व्यक्तिभिः संस्थाभिः शासनेन च सुनियोजितो यत्नो विधेय एव। परमेतादृशीनां शिक्षितानां नारीणां कार्यक्षेत्रं गृहे किशोरसमाज एव मुख्यतो भाव्यः। संस्कृतविदुष्योऽपि मातरो यदि नाम धनार्जनाय द्वारि द्वारि श्ववृत्तिं स्वीकरिष्यन्ति तदा गता संस्कृतसमुन्नयनस्याशा। माता बालकं पाठयन्ती यथावसरं क्रमशः स्वीयज्ञानस्य परिवर्धनाय अप्रमदिता प्रयतेत। भारतस्यामूल्यो निधिः संस्कृतवाङ्मये निहितोऽस्ति। तदाविष्काराय सुपरिष्कृत-सुसंस्कृत-पुरुषरूप-भूमिकानिर्माणे नारीसमाजस्य परं साहाय्यं भवेत्। एवं कृते नूनमत्र राष्ट्रे कदापि नारीत्व-निवर्तनसङ्कटं कृतपदं न भवेदित्यस्माकं सुदृढं मतम्। ★

कवि-भारती [७८ पृष्ठस्य शेषांशः

अन्ते भगवान् विश्वनाथः सम्प्रार्थ्यते यदियं संस्था न केवलं काश्याम्, अपि तु स्थानान्तरेऽपि शाखा-प्रशाखादिभिः प्रवर्धमाना चिरस्थायितामुपेयात्। सङ्कल्पोऽयं यथा पूर्णो भवेत्तथा योजना विधातव्या। इदानीमपि काव्यं कुर्वतां भवतु साहाय्यसम्पादिका प्रोत्साहनप्रदायिका चेयं कविभारती। अधिकारं पदं वा हस्तयितुमुदासीनानां स्वकर्तव्यपदवीमेव अध्यासीनानां सदस्यमहानुभावानां यथा पारस्परिकं निर्व्यलीकं प्रेम प्रवर्धतेऽद्यत्वे, तथैव चिरं वर्धतामित्याशंसां कुर्वाणोऽयमुपसंहरन् निवेदयति।

द्वैवार्षिकी कोमलबालिकेव
स्फुरद्द्विजै-रुज्ज्वलिताननश्रीः।
स्खलत्पदाप्यस्फुटवाग्विभूतिः
सूतां मुदं वः कविभारतीयम्॥ १॥

कवीन्द्रहंसानधिरुह्य मुग्धा
सालङ्कृता सद्गुणिनी सुवृत्ता।
मुदा भ्रमन्ती भुवनेऽभ्युपेता
सम्मोदयेद्वः कविभारतीयम्॥ २॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भारतीया राजनीतिः--तात्त्विकं विवेचनम्

--- श्री पद्मभूषण-पण्डितराज राजेश्वरशास्त्री द्राविडाः ---

यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः । तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम ॥ १ ॥
नमः शास्त्राय महते त्रिवर्गस्यैकयोनये । नमस्तस्य प्रणेत्रे च कौटिल्याय महर्षये ॥ २ ॥

१.

पाश्चात्यैर्हि उन्नीतासु विद्यासु कलासु देदीप्यमानासु सतीषु कोऽयं जीर्णकलेवरस्य पुरातनस्य राजनीतिशास्त्रस्य अवसर इति चिन्ता सर्वानेव संस्कृतसाहित्यविदः क्लेशयन्ती आस्ते । तत्रोत्तरं नीतिसारकृतो निम्नलिखितवचनेन स्फुटीभवति । तत्र ह्येवमुक्तम्—

आन्वीक्षिकी त्रयी वार्ता सतीर्विद्याः प्रचक्षते ।
सत्योऽपि हि न सत्यस्ता दण्डनीतेस्तु विप्लवे ॥
दण्डनीतिर्यदा सम्यङ् नेतारमधितिष्ठति ।
तदा विद्याविदः शेषा विद्याः सम्यगुपासते ॥
(का० नी० २. ८. ९) इति ।

प्रत्यक्ष-परोक्षा-ऽनुमानलक्षणप्रमाणत्रयनिर्णीतेष्टसाधनताककर्मानुष्ठानं नीतिरिति नीतिलक्षणं जयमङ्गलादिपर्यालोचनेन निष्कृष्टं सिध्यति । तत्र अनुमानप्रमाणं आन्वीक्षिक्या प्रदीयते, परोक्षप्रमाणं त्रय्या, प्रत्यक्षप्रमाणं च वार्तादण्डनीतिभ्यां, यथासंभवमितराभिश्चेति स्थितौ अद्यत्वे प्रचलिताभ्यां वार्ता-दण्डनीतिभ्यां उपस्थाप्यमानयोः संस्कृतिनीत्यनुष्ठानयोः आन्वीक्षिकी-त्रयीभ्यां किमपि पवित्रीकरणेन सतीत्वसम्पादनं इतरासाधारणं वस्तु भारतीयराजनीतेर्विषयः । 'नीतिकामशास्त्रानुसारेण वर्तनं धर्मः' इति वदता चार्वाकाणापि प्रत्यक्षप्रमाणगौरवात् प्रत्यक्षानुमान एव प्रमाणे इति वद्दभिः अपरैश्च बौद्धादिभिः प्रत्यक्षानुमानप्रमाणगौरवात् नीतिलक्षणस्य शास्त्रस्यानष्ठानतः प्रामाण्यमनुमन्यते । तथा आस्तिकैरपि शास्त्रप्रमाणगौरवात् इति वस्तुस्थितिः । कौटिल्यकामन्दकिभ्यां वैदिकमहर्षिभ्यां बौद्धेन जयमङ्गलाकृता, जैनाचार्यैः नीतिवाक्यामृतकृद्भिश्च एकस्यैव पूर्वोक्तलक्षणस्य नीतिधर्मस्य कृता व्यवस्थापना सर्वेषां नः प्रत्यक्षा ।

अत एव—

यदा यदा हि धर्मस्य ग्लानिर्भवति भारत ।
अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम् ॥
परित्राणाय साधूनां विनाशाय च दुष्कृताम् ।
धर्मसंस्थापनार्थाय संभवामि युगे युगे ॥
(भग० ४. ७-८)

इति गीताश्लोक-व्याख्यानावसरे 'धर्मसंस्थापनार्थाये'ति भागस्य "धर्माशी नीतिशी शेज भरी" इति व्याख्यानं संतशिरोमणिभिः ज्ञानेश्वरमहोदयैः कृतमिति पश्यामः ।

राजनीतिर्महालक्ष्मीर्धर्मो नारायणः स्वयम् ।

इति वाक्यानुसारेण जगन्मङ्गलकारकयोः लक्ष्मीनारायणात्मकयोः धर्मनीत्योः सामानाधिकरण्यं अभेदपर्यवसायि इति ज्ञानेश्वरीय-पद्यव्यङ्ग्यार्थः एकशय्योपवेशनपर्यायेण "शेज भरी" इति महाराष्ट्रानुवादेन स्फुटोऽस्ति साहित्यविदाम् । इदमेव सरसं वस्तु 'वेदबोधित-इष्टसाधनताकत्वं धर्मत्वमिति मीमांसककृतेन धर्मलक्षणेन प्रत्यक्षानुमानवेदबोधितेष्टसाधनताक-कर्मानुष्ठानत्वमिति आन्वीक्षिकीभाषया प्रतिपाद्यमानेन स्थिरीभवति । अत एव

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

लक्ष्मीसहस्रनामसु 'राजनीतिप्रभा' इत्येकं नाम लक्ष्म्याः पठ्यते ।

यथा ब्राह्मणसामान्यान्तर्गताः षट्कर्मभाजो गृहस्थाः अग्निहोत्रादिगृहस्थधर्ममाचरन्तः आश्रमधर्मानुष्ठानवेलायां ब्राह्मणत्वं विहाय न तिष्ठन्ति, विशेषधर्मस्य सामान्यधर्मव्याप्यत्वात् । जगद्रक्षकस्य लोकप्रियस्य गृहस्थधर्मस्य ब्राह्मणधर्म एव विशेषाधायकत्वाच्च । तथैव प्रत्यक्षानुमानागमरूपप्रमाणत्रयसंपन्नो नीतिधर्मः आगमप्रमाणकस्य धर्मसामान्यस्यान्तर्भूत एव, लोकप्रियत्वात्, मीमांसकोक्तलक्षणस्य धर्मस्य चारुतमरूपत्वं महालक्ष्मीरूपत्वञ्च स्वत एवाभिव्यनक्ति । ज्ञानेश्वरमहाराजोक्तं गीतातात्पर्यमेवेदं श्री गोस्वामितुलसीदासपादैरपि निम्नलिखितवचनैः रामचरितमानसग्रन्थे षोडशशताब्दीमध्येऽपि पुनः समर्थितमिति वयं पश्यामः । यथा—

शम शीतल नहि त्यागहि नीति ।
सरल सुभाऊ सबहि सन प्रीति ।
कोटि विघ्न ते संत कर ।
मन जिमि नीति न त्याग ॥
राजु कि रहे नीति बिनु जाने ॥
जो अनीति कछु भाषऊ भाई ।
तौ मोहि बर्जहु भय बिसराई ॥
गुरु पद प्रीति नीति रत जेई ।
द्विज सेवक अधिकारी तेई ॥

देशभक्तिप्रधान-वर्तमानयुगमधिकृत्य अस्मिन्प्रसङ्गे किमपि कथनं नासङ्गतमिति मत्वा तद्विषये भारतीयराजनीतिशास्त्रस्य दृष्टिकोणो भवतां पुरतः समुपस्थाप्यते ।

यस्यां शासनसभायां देशरक्षणाय नियमा निर्धार्यन्ते तत्सदस्यानां मन्त्रिसंज्ञया व्यवहारो राजनीतिशास्त्रे इष्यते । कैर्गुणैर्निर्वाचिता मन्त्रिणः तत्रत्याः शासनक्षमा भवितुमर्हन्ति ? कथं च तदीयगुणाः परीक्षणीयाः ? इत्ययमंशः नीतिशास्त्रे विचारितः । तथा हि —

स्ववग्रहो जानपदः कुलशीलबलान्वितः ।
वाग्मी प्रगल्भश्चक्षुष्मानुत्साही प्रतिपत्तिमान् ॥
स्तम्भचापलहीनश्च मैत्रः क्लेशसहः शुचिः ।
सत्यसत्त्व धृतिस्थैर्य-प्रभावा-ऽऽरोग्य-संयुतः ॥
कृतशिल्पश्च दक्षश्च प्रज्ञावान् धारणान्वितः ।
दृढभक्तिरकर्ता च वैराणां सचिवो भवेत् ॥
स्मृतिस्तत्परतार्थेषु वितर्को ज्ञाननिश्चयः ॥
दृढता मन्त्रगुप्तिश्च मन्त्रिसंपत् प्रकीर्तिता ॥
(का० नी० ४.२७–३०) इति ।

अनेन हि ग्रन्थसन्दर्भेण पञ्चविंशतिगुणाः मन्त्रिणः कृते अपेक्षिता इति स्फुटीभवति । तेषां गुणानां परीक्षाप्रकारश्च उत्तरग्रन्थे प्रतिपादितस्तत्रैव । तथा हि—

साधु तेषाममात्यानां तद्विद्येभ्यस्तु बुद्धिमान् ।
चक्षुष्मत्तां च शिल्पं च परीक्षेत गुणद्वयम् ॥
स्वजनेभ्यो विजानीयात् कुलं स्थानमवग्रहम् ।
परिकर्मसु दाक्ष्यं च विज्ञानं धारयिष्णुताम् ॥
गुणत्रयं परीक्षेत प्रागल्भ्यं प्रतिभां तथा ॥
कथायोगेषु बुध्येत वाग्मित्वं सत्यवादिताम् ॥
उत्साहं च प्रभावं च तथा क्लेशसहिष्णुताम् ।
धृतिं चैवानुरागं च स्थैर्यं चापदि लक्षयेत् ॥
भक्तिं मैत्रीं च शौचं च जानीयाद् व्यवहारतः ।
संवासिभ्यो बलं सत्त्वमारोग्यं शीलमेव च ॥
अस्तब्धतामचापल्यं वैराणां चाप्यकर्तृताम् ।
प्रत्यक्षतो विजानीयात् भद्रतां क्षुद्रतामपि ॥
(का० नी०, ४.) इति ।

एतेषु केचन प्रत्यक्षेण, अन्ये च अनुमानेन, अपरे

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

च शब्दप्रमाणेन निर्धारणीया इत्युक्तं जयमङ्गलाकृता। तथा हि —

'कथममात्यगुणा ज्ञेया इति चेत् प्रमाणत्रयात्। राज्ञां हि प्रत्यक्ष-परोक्षा-ऽनुमानानि त्रीणि प्रमाणानि।' 'प्रत्यक्षपरोक्षानुमेया हि राजवृत्तिः। स्वयं दुष्टं प्रत्यक्षं, परोपदिष्टं परोक्षं, कर्मसु कृतेनाकृतावेक्षणमनुमेयम्' (कौ० अ० १.९.५) इति।

तत्र आगमप्रमाणमात्रवेद्यानधिकृत्य जयमङ्गलोक्तमुद्धियते—

'तदेव दर्शयति—साधु तेषाममात्यानामिति। तद्विद्येभ्यश्च बुद्धिमानिति। तद्विद्येभ्यः—तुल्यशास्त्रशिल्पविद्येभ्यः। स्वयमपि तद्विद्यः चक्षुष्मत्तां शिल्पं च परीक्षेत गुणद्वयम्। समानविद्येभ्यः आगमयेदित्यर्थः।

'स्वजनेभ्यो विजानीयात् कुलं स्थानमवग्रहम्।' इति।

स्थानम्—जनपदं, स्वजना हि विशेषेण कुलादीन् जानन्ति, एभ्य एवागमयेदित्यागमप्रदर्शनमेतत्। (परिकर्मसु दाक्ष्यं च विज्ञानं धारयिष्णुतां गुणत्रयं परीक्षेतेति सम्बन्धः। दाक्ष्यं दुर्गादिकर्मसु अनालस्यम्। विज्ञानं प्रज्ञया अपूर्वव्युत्पादनम्। धारयिष्णुता इदं कृतमिदं कार्यं चेति। अतोऽन्यदनुभवादेव, न तु तर्कागमाभ्यां जानीयात्।)

(प्रागल्भ्यं प्रतिभां तथा। 'कथायोगेषु बुध्येत वाग्मित्वं सत्यवादितामि'ति कथाप्रस्तावेषु प्रागल्भ्यादीन् अनुभवादेव जानीयादीति प्रत्यक्षदर्शनमेतत्।)

(आपदि लक्षयेदिति आपत्काले उत्साहादीस्तर्कयेत्। तद्यथा योऽस्यामापदि निषीदति न मन्दप्रभावः, क्लेशांश्च सहते, सः अन्यान्यपि कर्माण्यारभत इति। 'धृतिं चैवानुरागं च स्थैर्यं चापदी'ति अनुरागः प्रागुद्दिष्टः—'सानुरागाः कृताकृतम्' इत्यत्र। अन्तरे यो न स्याद् दुर्मनाः न विरज्यते, न त्यजति, स अन्यदापि सुतरां तथैवेति।)

(व्यवहारत इति। संव्यवहाराद् दृढभक्तित्वादीनि तर्कयेत्। यथेह महत्सु कार्येषु यो न भ्रश्यति न द्वेष्टि नार्थशीलो वा भवति, तस्यैते गुणा इत्यनुमानसंदर्शनम्)। संवासिभ्य इति। तत्सहोषितेभ्यो बलादीनि अतर्कणीयान्यागमयेत्।

अस्तब्धतामचापल्यं च संवासिभ्य एवागमयेत् (वैराणामकर्तृताम् अकरणम्। भद्रतां लोकप्रियतां प्रत्यक्षत एव जानीयात्। भद्रतागुणश्च 'अक्षुद्रपरिवारता' इत्यत्र समुद्दिष्टः। तद्विपर्ययेण क्षुद्रताऽपीह निर्दिष्टा। स हि प्रधानत्वात् अन्वय-व्यतिरेकाभ्यां परीक्षणीय इति।)

तत्र 'वोट' (VOTE) द्वारा निर्वाचनं हि आगमप्रमाणान्तर्भूतम्। तत्र विदुषां बहुमतं ज्ञातिबहुमतं, संवासिबहुमतं च एकस्यैव मन्त्रिणः अपेक्षित-गुणनिर्धारणायेति प्रतिपादितम्। 'साधु तेषाममात्यानाम्', 'स्वजनेभ्यो विजानीयात्', 'संवासिभ्यो बलं सत्त्वम्' इति पद्यैरिति वयं पश्यामः।

[क्रमशः]

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चक्रि-चूडामणिः

—श्री उमाशङ्कर शर्मा त्रिपाठी—

[आंग्लभाषा-प्राध्यापकः—काशी-विद्यापीठम्, वाराणसी]

['क्षत्रपति-महाकाव्य'-कवयितृरूपेण 'सूर्योदय'-पाठकानां सुपरिचितैः काशी-विद्यापीठीया-ऽऽङ्गलभाषाप्राध्यापकैः श्री उमाशङ्करशर्म त्रिपाठिमहाभागैः अप्रैलमासस्य प्रथमदिनमनुलक्ष्य 'चक्रि-चूडामणिः' इत्याख्यं मुक्तक-काव्यं हास्य-व्यङ्ग्यसमुपोद्वलितमद्य 'सूर्योदय'-पाठकेभ्यः सप्रेम उपायनीक्रियते। चक्रि-वर्णन-प्रसङ्गेन प्रासङ्गिकेषु नैकेषु प्रश्नेषु सुमधुरोऽपि तेषां मार्मिकोऽयमुपालम्भो नूनं सर्वेषां तोषाय मार्गदर्शनाय च प्रभवेदित्याशास्यते। अत एव अङ्केऽस्मिन् क्षत्रपति-महाकाव्यं न दीयते। —सम्पादकः]

१. नृत्यत्पादैर्मुहुरतितरां कम्पयन्ती धरित्रीं
घूर्णद्रागोन्मदिरनयनं निस्सहं भ्रामयन्ती।
वर्षत्स्वेदाञ्चिततनुरुहा कामदा व्यस्तवर्त्मा
सा तत्तानां हरतु दुरितं 'रासभीमानवानाम्॥

२. स्वेदारम्भात् स्नपयति तनुं माधवे घोरघर्मे
स्निग्धच्छायां श्रयति विहगे गोव्रजे च द्रुमेषु।
शून्यं घट्टं जहति रजके मारुते चालसार्द्रे
एको भूमौ विहरति खरः खे च जागर्ति भानुः॥

३. लोके लीने तुहिनशयने कस्त्रियामान्तयामे
आर्तो भारादपि लघुगतिः प्राप्य रोधोद्युसिन्धोः।
सायं वोढा पुनरपि धुरां प्रत्यहं संयमेन
गङ्गां भीष्मस्मरणकरुणापूरिताक्षीं करोति॥

४. ज्वालामालावति दिनपतौ माधवे चातपार्ते
तापात् त्यक्तं युवतियुवकैर्दाहशुष्यद्विलासैः।
सत्वैरन्यैरपि मनसिजं विस्मृतं सेवमानः
कामारामस्त्वमिव भुवने राजसे त्वं खरेन्द्र॥

५. सद्योजाते कुलधरमुखे वीक्ष्य तालुव्रणं ते
माता तातः कुशलभिषजो बान्धवा मूढयत्नाः।
लब्ध्वा पुण्यैरमृतपरमं त्वद्वधूस्तन्यदानं
गायन्तीष्टं तव कुलयशो जातमङ्के निधाय॥

६. त्वय्युल्लासात् प्रकृतिपरमे लुण्ठनोत्साहरागे
स्फूर्तिं लब्धुं विकरति नवां होलिकाचूर्णमुष्टिम्।
आवोत्कीर्णा वसतिरपि सा क्षोभिता त्वत्खुराग्रै-
द्यौर्दिग्वध्वो भुवनमचिरं धूलिदिग्धा रमन्ते॥

७. वज्राकारे पतति लगुडेऽनारतं पृष्ठशैले
'भूभू'नादैश्चरति समजेऽमर्षिणां कुक्कुराणाम्।
नानाध्वानैर्भरति गगनं बाललोकेऽपि कोऽन्यः
पत्री धावन्निव मृगयते वल्लभां लक्ष्यभूमिम्॥

८. अश्वारूपं सजवमभजत् कामदोहाय संज्ञा
पूर्वं साऽसौ खरकरवधूं वै खरीं विस्मरन्ती।
कामाध्याये किमतिशयितुं शास्यतेऽश्वा खरीं तां
मन्ये दिव्या युवतिरपि तन्नापदं मोहवृत्तेः॥

९. नागैर्नष्टं नरपतिकुले वीतगर्भाङ्कसुप्ते
ह्यश्वैरस्तं बहुविधनवे कल्पिते यन्त्रयाने।
गोभिर्लीनं जयति भुवनं दुग्धचूर्णे विदेशात्
एक स्वस्थस्त्वमिह रमसे धुर्धरो रासभेन्द्र॥

१०. क्षिप्तो बन्धो दुरितपरमो जन्मसम्बन्धलक्ष्मा
दण्डश्चासौ व्यसननिकृतिर्निष्प्रयासं निरस्तः।
आधिव्यूहो भुवि मलधुरां पातितः क्वापि मार्गे
दिव्याह्लादे विहरति मुदा चक्रिणि स्नेहसिन्धौ॥

११. ज्योत्स्नास्निग्धे जगति गगने
कीर्ण-मुक्ता-प्रसूने
सुप्ते लोके नवतरु-लता
लासके गन्धवाहे।

---

१. रासभी + मानवानाम्, रासभीमा + नवानां वा इति च्छेदः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मानच्छेदं विदधति पिके
माधवे जृम्भमाणे
माद्यन् चक्री स्मरमपि नवा-
भ्यास-लोलं करोति ॥

१२. संख्यावृद्धिं भृशमहरहो वर्धमानां नियन्तुं
देशाधीशा विफलमतयो दैन्यदग्धे स्वदेशे ।
सेवेरन्ते यदि तव विधिं श्रद्धया सिद्धिकामा
एषा नश्येदचिरमुदिता रक्तबीजी विपत्तिः ॥

१३. निष्प्रत्यूहा सुरति रतिः सर्गविस्तारयागे
प्रेक्षा केलिर्भयविरहिता साहचर्यानुबन्धः ।
भोगोद्योगो नवसखिरसो नग्नता कामचार
एभिर्योगैस्तरति नियतं घोरसंख्याऽऽपदं भूः ॥

१४. दण्डो बन्धः परमविषमो
दुस्सहो वाऽनुयोगः
नान्यक्षेत्र - प्रणयिनमये !
वारितुं त्वां क्षमेत ।
चेतःस्वास्थ्यं यदि बहुमतं
देहतः शास्त्रवत्सु
कः शारीरैरपि न सहते
पीडनैः सेवितुं तत् ॥

१५. पार्श्वस्थानामपि कतिपयान्
पञ्चषान् वीक्ष्य दृप्यन्
तारोद्गारैः प्रतिपदनवो-
त्कर्षशौण्डः प्रणादैः ।
स्वैराचारः स्फुरितनयन-
स्ताण्डवा-लीढभावः
प्राजातन्त्र्ये जयति सहटं
रासभो वाऽथ नेता ॥

१६. त्वज्जातिनां सहजनियतं कर्म यन्त्रैर्निषेव्य
पाश्चात्त्यास्ते यदि विफलतां
त्वत्प्रसूते-र्वनन्ति ।
पारम्पर्यव्रतविरहिते पश्चिमे वञ्चकेऽपि
देशः प्राच्यां लसति वसतिर्भारतो जन्मभूर्वः ॥

१७. यस्मिन्नर्चां व्रजति वृषभो वन्दनीयो गरुत्मान्
मुक्ताशङ्कं भ्रमति परितो मूषको दूषकोऽपि ।
काकः पाकं सविधि लभते पुण्यवाहो वराहो
देशे तस्मिन् त्वमपि सततं श्याध्यजन्मा रमस्व ॥

१८. गङ्गासिन्ध्वोरिह परिसरे भारते विस्तृतेऽस्मिन्
गूढाचारोपचितकनकाः श्रेष्ठिनश्चेद् वसन्ति ।
नेतारस्ते तदनुगतिका राजभृत्याश्च सर्वे
तन्निश्शङ्कं विहर वसतिः त्वद्विधानामिहैव ॥

१९. कान्तां बन्धूनपि परिहरन्
दिव्यमार्गे पुराऽसौ
यन्नामुञ्चत् शुनकमनुगं
धर्मराजोऽपि पार्थः ।
तन्मा भैषी श्चर खरमणे !
त्वां विना नेतृवर्गो
भौमं दिव्यं किमपि कमते
नैव भोक्तुं वरेण्यम् ॥

२०. लम्बौ कर्णौ वहसि नयने विभ्रपे दीर्घदीर्घे
श्रोतुं द्रष्टुं ननु विनियतो जीवलोकं विधात्रा ।
श्रावं श्रावं स्वजननिकृतिं वीक्षमाणोऽभितश्च
वीतामर्षस्तदपि सहसे साधुवर्त्मा स्वदैवम् ॥

२१. मुक्ताकाशं शिरसि चरणे मेदिनी मुक्तसीमा
प्राणाधारं प्रकृतिसुलभं वारि दूर्वाङ्कुरञ्च ।
युक्त्या लोकस्तदपि भवतो दण्डबन्धं विधत्ते
दासेऽधीशाः सततमथवा वर्तितुं साधुचाराः ॥

२२. धूर्मालिन्यं वसतिरगृहं दैवमज्ञातहर्षं
त्रुट्यद्बन्धे वपुषि परुषो भेषजं दण्डपातः ।
सेवाधर्मो हृतनिशमहः स्तोकमस्वादु भैक्ष्यं
गङ्गाकूले तदपि चरितुं मुच्यसे बद्धपादः ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

२३. प्राचां गाथां मतिविलसितां
प्राणिनो ये वहन्तो
ज्ञानालोकं तदवधिरमं
घोषयन्तः शुकाभाः।
नान्यत् किञ्चिल्लवमपि नवं
तत्सतीर्थ्यं नयन्तो
विद्वांसस्ते यदिह कथिता
रासभाः केऽधुनाऽपि ॥

२४. श्रुत्वाऽऽयान्तं रमणमचिरं
दीर्घकाल - प्रवासाद्
औत्सुक्यार्ता मलिनवसनं
लज्जया धारयन्ती।
दीना, घर्मे दधति मृदुतां
सायमुद्वेग - लोला
त्वामेवैकं सुभग कमते
वाससे द्रष्टुमेका ॥

२५. मध्ये यूनां तरलमनसां
होलिका ऽऽन्दोलितानां
नानारङ्गाभिनवरचना-
चित्रवेषं दधानः।
रासैर्नादै-रुपचितमदैः
केवलं त्वां विहाय
कोऽन्यो धन्यः पशुषु सुकृती
राजते हर्षबन्धुः ॥

२६. यासां मार्गे नवलवयसां
लब्धुकामाः प्रसादं
मोघोद्योगा अपि सुरसिकाः
स्थाणुवृत्तिं भजन्ते।
तासां चोलं नवकुचसखं
मध्य- सेव्यांऽशुकञ्च
विभ्रत् पृष्टे हससि युवकान्
त्वं तटस्थोऽपि मन्दान् ॥

२७. दण्डैर्बन्धैः परुषवचनै-
र्भर्त्स्यमानोऽपि बालैः,
धावं धावं वहसि सुमते !
तान् स्मरन् लोकतन्त्रम्।
पृष्ठे छात्रानिव कुलपति-
र्दुष्पथांश्चाऽपि धीरः,
आयुष्कामः प्रणयविनयै-
स्तोषयत्येव यत्नैः ॥

२८. नेता योऽसावधमरजको
नित्यपाना - ऽनुभावो
मालिन्यानां धुरि परिरमन्
पृष्ठदेशा-ऽऽसनोऽपि।
दण्डाघातै-र्व्यवसितविधि-
र्घासमुष्टिं विकीर्य
प्राजातन्त्र्ये जनमिव खलस्त्वां कदर्थीकरोति ॥

२९. प्रत्यन्ताद्रीन् मरुमपजलं प्रान्तरं शून्यवर्त्म
नद्याः कूलं विपिनमथवा लीलया सेवमानाः।
जायाजीवाश्चलवसतय-स्त्वामवाप्यैकमित्रं
नाधिक्षामे पथि वसुमतां स्तोकमप्युत्सहन्ते ॥

३०. कामं लोको हसतु भवतो
वर्तमानं सहेलम्,
त्वत्पूर्वेषां प्रथितमहसां
साक्ष्यभूत् भूतकालः।
पौलस्त्ये त्वामुपरि शिरसां
साभिमानं दधाने
के देवानां भयहतगिरो
नाऽनटन् क्लैब्यलीलाम् ॥

३१. ज्ञाताः सर्वैः प्रभववसतिः श्रीमतस्तत्र देशे
लोकाराध्यो हिमगिरिवरो दक्षिणे भाति यस्य।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यत्र क्षोणी मरुविलसिता कामचारः स्वभावः
साम्यं नित्यं मृगमनुजयोरेकवृत्तिर्विभर्ति ॥

३२. वृत्ति - र्यानं, कृषिरसरला,
वाहनं वेश्म सम्पत्
सर्वं तेषां त्वमसि सुमते !
काम्यमत्रा - ऽपरत्र।
दत्वा दारानपि मतिभृतो
रक्षितुं त्वां सयत्ना-
र्ज्ञाने जाताः, त्वयि धृतधियो
दैवतं त्वां भजन्ते ॥

३३. स त्वं सत्त्वं धृतनिजतनुः
पालयन् साधुवर्त्मा
नित्यं लुण्ठन् रजसि सहटं
राजसं सेवमानः।
माद्यन् चित्तं प्रबलतमसा
पण्डितम्-मन्यमानम्
निस्त्रैगुण्य-स्त्रिगुणविषयो-
ऽपि स्थिरात्मा विभासि ॥

३४. श्लिष्यद्वर्णं तव मुखबिला-
न्निस्सृतं तूर्यनादं
श्रावं श्रावं यदि कतिपये
गीतिमाध्वीं स्वदन्ते।
नैवाश्चर्यं यदिह बहवः
सन्निशम्या-ऽऽङ्गलभाषां
दुष्टात्पर्यामपि हितकरीं
मन्वते भारतीयाः ॥

३५. 'अन्यद्दूरे' तदिह रुचिरं स्थानमादर्शदर्शम्
एलालाली-वनपरिसरं वारिनाथोर्मिधौतम्।
आर्ये देशे नवमभिधया 'रासभोल्लासनादम्'
लब्ध्वा युक्त्याऽप्रतिहतमतिः पूरयामृत्समानम् ॥

३६. दिष्ट्या देशं श्रयति नवला
काऽपि 'गोपाल-सेना'
नागानां वा मदयति मनो
'नागसेनाऽपि काचित्।
श्रेयस्कामा अवहितधियो
रक्षिताः सेनया चेत्
स्वत्वोद्योगे तदिह भवतां
चक्रिसेना श्रियेऽस्तु ॥

३७. यद्वै सत् तन्निखिलमसतो
व्याहरन्तीह नव्याः
प्राञ्चो द्वन्द्वं तमसि नियतं
पत्स्यमानं विदन्ति।
यादृग् यत्तद् ध्रुवमवितथं
मोहमूलं यदैतत्
आदावन्ते प्रतिनिधिरत-
स्त्वं तवाऽयं विलासः ॥

३८. दुर्भिक्षेऽस्मिन् विलसति शठे
सर्वजीवा - ऽन्तकारे
निर्दूर्वायां भुवि परिचरन्
मा गमः शोकभूमिम्।
विस्तीर्णेयं जलधिवसना
भूरिभैक्ष्या विदेशा
मद्भिक्षुत्वं भुवनविदितं
चापनेतुं क्षमः कः ॥

३९. हृद्यैः पद्यैः सरसमधुरैः सत्पताकैः सदङ्कैः
दृश्यैः श्रव्यैरमृतभरितैर्वर्णनाचारुवृत्तैः।
ऐतिह्यैर्वा नृपकुलकथाभासुरैर्-दिव्यकल्पैः
किं साहित्यैर्यदि विरहितं त्वद्यशःकौमुदीभिः॥

४०. हिंस्रान् सत्वान् विरल-विरलान्
पक्षिणो वा भुजङ्गान्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संज्ञाशेषानपि बहुविधान्
प्राणिनः पालयन्तः ।
एतच्चिन्त्यं यदिह सुधियो
जन्तुशालासु गोप्तुं
सेवामार्ग - प्रथितपथिके
त्वय्युपेक्षां वहन्ति ॥

४१. भ्रान्ते चित्ते स्खलति चरणे मूर्ध्नि सङ्कम्पमाने
मन्त्री मुक्तो यदिह रमते राज्यपालासनेषु ।
त्वामारम्भादपि सतिमिरं वार्धके गर्तलीनं
कस्माल्लोको दिशति न दिशं
त्वत्पुरस्कार - योग्याम् ॥

४२. अस्यां योनौ यदि न भवता-
ऽऽसादितं पुण्यसूति
मा मा खेदैर्व्यसनविकलो
मुञ्च तद्धैर्यकन्थाम् ।
सत्यं शास्त्रं यदि भगवती
साऽप्यवन्ध्या श्रुतिश्चेत्
आत्मायत्तं कुलपतिपदं
विद्धि जातः पुनस्त्वम् ॥

४३. विद्याऽऽजीवान् विभवविरहे-
ऽकिञ्चना-नप्यभिज्ञान्
लक्ष्मीभाजो धनपतिसखान्
मोहने कामदोहे ।
सेवाधर्मे विदितविपदो
भारतीया - ऽनसंख्यान्
चित्रीकुर्वन् त्वमसि जनता-
ऽऽदर्शकल्पः खरेन्द्र ॥

४४. दिग्वासस्त्वं, प्रकृतिशुचिता,
कामचारोऽपबाधम्,
स्वार्थं न्यायो, वसतिरगृहं,
यत्पुरस्तद्धि वर्त्म ।
यद्यल्लोके नवयुववराः
शीलिताचारसिद्धाः
काङ्क्षन्ते तत् तव विलसितं
त्वं नवादर्शभूमिः ॥

४५. राजस्त्रीणां नवलरुचिषु क्लृप्तवेषांऽशुकेषु
श्यामच्छाया रजकतनयाऽऽयामपुष्टाङ्गयष्टिः ।
त्वामारुढा चपलजघनस्पर्शमोहश्लथाङ्गं
कच्चित् चित्ते पुलकभरिते संस्मृतिं वा तनोति ॥

४६. वर्षद्धारे नभसि सघने संस्थितो द्वारभूमौ
शीते स्फीते तुहिनपवनेऽनावृतो हृष्टरोमा ।
ग्रीष्मोन्मादे दहनकिरणे धावमानो वृषार्के
त्वं निश्शङ्कं प्रतिनिधिरहो
भारतीय-प्रजानाम् ॥

४७. यत्नाद् धृत्वा शकटमसुरं
पूतनां वा बकं वा
कृष्णो विष्णुः किल मधुपुरी-
पार्थिवं मातुलञ्च ।
धर्मक्षेत्रे विषमकदनं
मन्त्रयन् कौरवाणां
वृन्दारण्येऽहन - दकरुणं
केशिनं किं स देवः ॥

४८. यो गोपानामविरतगतिः यो गवामेकगोप्ता
गोपीपीनस्तनमदरमो नन्दिताऽनिन्दितानाम् ।
एकं तेनाऽनुचितमहहाऽनुष्ठितं केशिघाताद्
यस्मात् पापाद्यदुकुलवधं
सोऽपि रोद्धुं न सेहे ॥

४९. स्वाधीनेऽस्मिन् भरतभुवने
राजधान्यां विशेषात्
हर्षावर्ते पतति बहुधा यौवते वार्धके च ।
नान्यो धन्यः प्रभवति पशुर्मूर्खसम्मेलनेषु
नेत्राह्लादं फलयितुमये कौतुकोन्मादितानाम् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वृत्तिः

श्री 'अङ्गारः'

एकदा महाराजो भोजः अश्वम् आरुह्य कस्यचन क्षेत्रस्य उपसीमतः गच्छन् आसीत्। प्रावृट्कालवशात् तस्मिन् क्षेत्रे कियान् पङ्कः सञ्चितः अभवत्। तत्र एको मत्स्याजीवः तत्रैव पर्णकुटीं निर्माय अधिवसन् आसीत्। राज्ञा दृष्टं यत् तदा स तत्र रन्ध्रगतान् कर्कटकान् गृह्णन् आसीत्। ग्रहणकाले स मत्स्याजीवो रन्ध्रे हस्तं प्रसार्य विशिष्टपद्धत्या कर्कटकान् गृहीत्वा समीपस्थे उत्ताने पात्रे निक्षिपन् आसीत्। कुतूहलवशात् राजा तस्य तां कृतिं निरीक्षमाणः कतिपयनिमिषाणि यावत् तत्रैव उवास।

मत्स्याजीवेन प्रथमम् एकः कर्कटको गृहीतः। तं च तस्मिन् पात्रे निक्षिप्य तद् आच्छादितम्। किन्तु तदनन्तरं प्रत्येक-कर्कटक-ग्रहणकाले तेन तत्पात्रम् अनाच्छाद्य अपिहितमेव स्थापितम्। पात्रं पूरितम्, तथापि तेन न तद् आच्छादितम्।

राजा अनेन व्यवहारेण अतितरां विस्मयान्वितः अभवत्। तेन मत्स्याजीवः पृष्टः—'धीवर, ते कर्कटक-ग्रहणकार्यं चिरात् निरीक्षमाणः आसम्। किन्तु मे एकं महत् आश्चर्यं जायते।

'किं तत् महाराज ?'—धीवरेण जिज्ञासितम्।

'यदा त्वया प्रथमः कर्कटको गृहीतः, तदा पात्रं समाच्छादितम्। ततः परं प्रत्येककर्कटक-निक्षेपकाले तत् अनाच्छादितमेव स्थापितम। अनाच्छादितादपि पात्रात् एकोऽपि कर्कटको बहिर्न निर्गतः। त्वमपि तेषां बहिर्गमनस्य चिन्तां सर्वथा विहाय स्वकार्यं तथैव कुर्वन् आसीः। कोऽत्र हेतुः ?'

तेन मत्स्याजीवेन उत्तरितम्—

'महाराज, भवादृशेषु मानवेषु नैकाः एतादृशनीचवृत्तिमन्तः सन्ति। तादृशीनां कतिपयानां नीचवृत्तिनाम् एते कर्कटका अपि कथम् अपवादरूपाः भवेयुः ? यदा मया प्रथमः कर्कटको गृहीतः, तदा स्वभावत एव निर्धारितवान् अस्मि यत् स स्वात्मानं मोचयितुं प्रयतेत इति। अत एव प्रथमवारं मया पात्रं पिहितम्। किन्तु ततः परं सर्वदा पात्रम् अनावृतमेव संस्थापितम्। यतो हि यदा द्वौ द्वयधिका वा कर्कटकाः गृह्यन्ते, तदा प्रत्येकः स्वात्मानं मोचयितुं प्रयतते। परम् अपरः कर्कटकस्तस्य स यत्नः तत्पादौ समाकृष्य व्यर्थतां नयति। अत एव द्वितीयवारतः पात्रपूरणपर्यन्तं तत्पात्रं मया अनावृतमेव संस्थापितम्' इति।

—मराठी कथातोऽनूदितम्।

---

५०. निर्मर्यादे पथि विलसितं तामसी धीरशौच-
मन्यक्षेत्राभिरतिरनिशं दण्डबन्धेऽप्यखेदम्।
मूकीकर्तुं सुरगुरुमपि ख्यातिरभ्रप्रणादै-
रेतैर्नैता तव गुणगणैर्भूषितः पाति लोकम्॥

५१. स्थूलान् भारानपि मलधुरो
विभ्रदुत्साहलीढो
भाग्यायत्तं यदिह मनुषे
निश्चितं त्वं खरोऽपि।
नेतारो ये दलविनिमये
सन्ति बद्धानुरागा-
स्तेषां जातिर्ननु खरतरा
काऽपि मृग्या विधिज्ञैः॥

५२. पूर्वस्मिन् वा किमिव जननेऽनुष्ठितं रासभेन्द्र
यस्मादेवं वहसि मलिनं सान्वयं भारमार्तः।
मोहाद्धर्मोऽभ्युदयमहिमा
क्षोभितः च्छद्मना किं
स्वार्थाभ्यासे रहसि विकृतः सत्कृतश्चोपदेशे॥

५३. मञ्चारूढः कचिदुपदिशन्
वञ्चयन् वा प्रतीतिं
स्वार्थोन्मादे जनहितजुषो
दूषयन् वाऽधिकारान्।
निर्णेतुं वा चषकविजितो
न्यायपीठेऽभियोगान्
नृसीनो वा रजकभवने
विश्वरूपोऽसि चक्रिन्॥

५४. यावच्चित्तं प्रभवति तमो जातिवर्णादिभिश्च
शस्यम्मन्यो ग्रसति कवलं यावदन्यान्निपात्य।
यावत्साध्येऽस्खलितचरणाः पूरुषाः नोत्सहन्ते
तावल्लोके विहर निभृतं रासभीरासबन्धो॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मम मानस-वासिनी

(एकं खण्डकाव्यम्)

कामपि ललितावयकमनीयां कामिनीं मनसि
कलयतो यूनः कोऽप्यनाकलितपूर्वो
भावना-बन्धः

— श्री आनन्दतीर्थ वरखेड़करः —

१. निशि विहायसि भाति सुधाकरे
विदधती कुटिलालक-लालनम् ।
सुवसना मम मानसवासिनी
वद कदा नयने मयि पातयेत् ॥

२. तदनघं वदनं स्मृतिसादनम्,
धृतमदं नयनं तदनाविलम् ।
तदलसं चलनं च मृगीदृशः
प्रतिपलं विकलं नु तनोति माम् ॥

३. मम विलास-रसालसमङ्गकं
तव समागमलालसतां गतम् ।
इति गृणन्त्यवशा सरसा च सा
वद कदा रतये मम संभवेत् ।

४. सुवसनं कलसीत्कृतिसुन्दरं
करविधूनन - शामितदीपकम् ।
वदनसञ्चित - चारुकचोच्चयं
वपुरहो मम मानसमोहनम् ॥

५. अयि विधे न विधेहि रुषं भृशं
मयि मनोजशराहत - चेतसि ।
सपदि सा मम मानसवासिनी
भवतु मे पुरतः कलभाषिणी ॥

६. यदि विलोकयते ललना तु सा
ललितलोल - विलोचनकोणतः ।
सपदि यन्ति लयं निगमागमाः
सह मनोहरसंसृति-किल्बिषैः ॥

७. कृतक - रोषपराहत - मानसां
करतलाकलित - स्वकपोलकाम् ।
अनुनयेन नयेय कदा नु ता-
मनुमतां मम मानसवासिनीम् ॥

८. विधुकलाः सकला अपि निष्प्रभाः
सुविकचं कमलं च मलाविलम् ।
यदि पुरो वपुषः सुषमा भवे-
दविकला विमला च मृगीदृशः ॥

९. रहसि सा रभसादुपगूहिता
विदधती वदने चिरमञ्चलम् ।
कलविलासरसै - र्विलसत्त्रपा
वद कदा रसयेन्मम मानसम् ॥

१०. करयुगेन रसादवलम्ब्य मां
रहसि सा शनकैरिव यद्वचः ।
वदति, तन्मम मानसमोहनं
भवति संभृतसौरभनिर्भरम् ॥

११. ननु वृथा सुमसौरभसम्पदो
विदधता विधिना विहितः श्रमः ।
किमथवा वृथया कथयाऽनया
कविरवोचदहो जडतां विधेः ॥

१२. इवसति स यदि तामरसानना
मदभरादलसायत - लोचना ।
सपदि मञ्जुल-गुञ्जन शिञ्जितै-
रलिकुलोऽप्युपयाति मदाविलः ॥

१३. "नयननीरजमञ्जित - कज्जलं
मनसिजेन विराजितमायतम् ।
व्रजति नैव कदापि समागमं
किमु मयेति" रतौ कथिते मयि ॥

१४. नहि नहीति ह्रिया नतकन्धरा
मदभरादलसा मदिरेक्षणा ।
नयनकोण - निरीक्षणनर्मणा
वद कदा रमयेन्मम मानसम् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विवाहवयोमर्यादाप्रकल्पस्य शास्त्रीयतरत्वं समाजहितकारित्वं च

— श्री अनन्तशास्त्री पिंगले —

[सीनियरशास्त्री—डेक्कन कालेज, पूना]

अस्मिन् खलु प्रकल्पे प्रथमे विभागे वाङ्निश्चयाख्ये वाग्दानविधि-प्रतिपादन एव तात्पर्यम्। न च स धर्मशास्त्रेऽनुपदिष्टः, यतो मनुना सप्तपदाद्यन्यविधीन् अमुख्यान् मत्वा वाग्दानविधेरेव स्वाम्यकारणत्वमुपपादितम्। तथा हि—

मङ्गलार्थं स्वस्त्ययनं यज्ञश्चासां प्रजापतेः।
प्रयुज्यते विवाहेषु प्रदानं स्वाम्यकारणम्॥

(मनु. ५.१५२)

तत्र मुख्यटीकाकाराः कुल्लूकभट्ट मेधातिथिप्रभृतयो विस्तारयन्ति—'यदासां स्वस्त्ययनशान्त्यनुमन्त्रवचनादिरूपं, यश्चासां प्रजापतियागः प्रजापत्युपदेशेन आज्यहोमादिकं विवाहेषु क्रियते तत्, मङ्गलार्थम् अभीष्टसम्पत्त्यर्थं कर्म। यत्पुनः प्रथमं दानं वाग्दानात्मकं तदेव भर्तुः स्वाम्यजनकम्। ततश्च वाग्दानादारभ्य स्त्री भर्तृपरतन्त्रा' इति। मेधातिथिरपि—'प्रदानादेवासत्यपि विवाहे स्वाम्यमुत्पद्यते इत्येतदत्र ज्ञाप्यते' इति समर्थयति। राघवानन्दादयोऽपि प्रदानाद् वाग्दानादेव स्वाम्यमुद्घोषयन्ति।

यत्तु—

पाणिग्रहणका मन्त्रा नियतं दारलक्षणम्।
तेषां निष्ठा तु विज्ञेया विद्वद्भिः सप्तमे पदे॥

(मनु. ८.२२७)

मन्त्रैर्यथाशास्त्रप्रयुक्तैर्भार्यात्वेन निष्पत्तेः। तेषां मन्त्राणां **सखा सप्तपदी भव** इति मन्त्रेण कल्पनया सप्तमे पदे दत्ते भार्यात्वनिष्पत्तेः। एवञ्च सप्तपदीदानात्प्राग् भार्यात्वानिष्पत्तेः सत्यनुशये जह्यात् नोर्ध्वम्'इति; तत्तु 'भार्यात्वसंस्कारार्थमित्यविरोधः' इति समाहितम्।

एवञ्च वाग्दानस्यैव सप्तपदीविधेः प्राधान्यं सिध्यति। भार्यात्वपूर्णतायै स विधिः। स च न प्रथमविभागे प्रकल्पकारस्याभिमतः, द्वितीये विभागे एव पूर्णताया इष्टत्वात्। 'सप्तपदीदानात् प्राग्भार्यात्वानिष्पतेः सत्यनुशये जह्यात्, नोर्ध्वम्' इत्याशयेनैव प्रकल्पे सप्तपदीपर्यन्तः प्रथमो भागः कृतः। तत्र 'प्राङ् मर्यादाभिविध्योः' इत्यत्र 'तेन विना मर्यादा, तत्सहितेऽभिविधिः' इतिवत् पर्यन्तपदस्यापि व्यर्थत्वम्। येषां दृढे वाग्दाने अनुशयस्याग्रेऽसंभवः, तैः सप्तपदीसहितो वाग्दानविधिः कर्तव्यः, इतरेषां कृते तु मर्यादार्थ एवाभिप्रेतः। अपरे विभागे स विधिर्निवर्त्य इत्यभिप्रायेणात्र पर्यन्तपदप्रयोगः।

एवञ्च यस्या बालिकायाः प्रकल्पमतानुसारेण न सप्तपदीविधिः, तद्विषये बालवैधव्यशङ्का नास्त्येव। यस्यास्तु स विधिः सञ्जातः, दैवयोगेन पतिमृतिरपि प्रसक्ता, परं तस्याः पतिसम्बन्धाभावात् अक्षतयोनित्वं वर्तत एव।

अत्र केचित् यद्यपि सप्तपदीपर्यन्तं संस्कृतायाः ऊढायाः **पुरा पुरुषसंयोगान्मृते देयेति केचन** इति वचनाद्विवाह्यतामुद्घोषयन्ति, तथापि केचित्पुनर्न।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

याज्ञवल्क्यदर्शन-समर्थकाः मिताक्षराकाराः विज्ञानभिक्षवस्तु व्यवहाराध्याये नारदस्य अग्रिम-वचनपुरस्कारेण अक्षतयोनिकन्यायाः पुनःसंस्कारं समर्थयन्ति। प्रथमम्—

अक्षता च क्षता चैव पुनर्भूः संस्कृता पुनः।

इत्यत्र 'अन्यपूर्वा द्विविधा—पुनर्भूः स्वैरिणी चेति। पुनर्भूरपि द्विविधा क्षता अक्षता च। तत्र क्षता संस्कारात्प्रागेव पुरुषसम्बन्धदूषिता। अक्षता पुनः संस्कारमात्रदूषिता' इति निरूप्य व्यवहाराध्याये तस्याश्च पुनःसंस्कारं अभिमतेन नारदवचनेन उपपादयन्ति, 'यथाह नारदः—

कन्यैवाक्षतयोनिर्या पाणिग्रहणदूषिता।
पुनर्भूः प्रथमा प्रोक्ता पुनःसंस्कारकर्मणा।
देशधर्मानवेक्ष्य स्त्री गुरुभिर्या प्रदीयते॥

इति। एतद्वचनेन च **सा चेदक्षतयोनिः स्यात्पुनः-संस्कारमर्हती**ति उल्लिखितास्मद्ग्राद्धान्त एव न स्पष्टतया प्रतिपादित इति को वा मनीषी मन्येत? नो चेन्नारदस्य वचनं मिताक्षराकारैः प्रमाणत्वेन नैव परामृश्येत। अत्र 'पाणिग्रहणदूषिता' इति पदस्य सप्तपदीसहितविवाहमन्त्रैः संस्कृता, अत एव दूषिता इति न खलु प्रतिपादनावश्यकता विचक्षणानाम्। शास्त्रे सामान्यपुनर्विवाहस्य असम्मतत्वेऽपि एतादृशकन्यासंस्कारे न कोऽपि दोषलेशः। तेन च प्रकल्पस्य नाशास्त्रीयत्वम्, प्रत्युत बहुश्रुतविदुषां मतेन शास्त्रीयतरत्वमेव सिद्ध्यतीत्यत्र न सन्देहः। अतः **विभेत्यल्पश्रुताद्वेदो मामयं प्रहरेदिति** इति न्यायेन अल्पश्रुतपण्डितम्मन्यदर्शित-मार्गेण गत्वा समाजधुरीणैः सुधीभिर्न प्रतारितैर्भव्यमिति संप्रार्थ्य अस्य प्रकल्पस्य प्रचलितसमये व्यवहारदृष्ट्या समयोचितं महत्त्वं किञ्चिदुपवर्ण्यते।

प्रकल्पस्य साम्प्रतिकी आवश्यकता

अधुना यत्समाजव्यङ्ग्यभूतमिव तत्र तत्र नगरेषु दरीदृश्यमानं शुश्रूयमाणं च प्रौढसीमाग-काङ्क्षिणीव्रातव्रात्यत्वजनिसमाजास्वास्थ्यं, तन्मा भूदिति त्रिंशद्वर्षेभ्यः प्राक् शारदाशासनेन जायमानचतुर्दशवयोमर्यादाविरोधाय वर्णाश्रमस्वराज्यसङ्घादिद्वारेण पण्डितैः विशेषतः अस्मद्गुरुचरणकल्पैः पण्डितराज-द्रविड-शास्त्रि-पितापुत्रैः महदभियानं कृतम्। तत्र तत्र प्रदेशेषु व्याख्यानादिभिर्जनजागृतिश्च संपादिता इति नाद्यापि विस्मृतिपथं प्राप्तम्। पण्डितानां राजकीयभाषावैधुर्येण अपाण्डित्यमिव च प्राप्तम्। तेषां राजकीयव्यवहारेऽप्रवेशेन शारदाशासनं सामाजिकास्वास्थ्यमूलमपि सम्मतम्। पण्डिताभियानादि च निष्फलं सञ्जातम्। अन्ततश्च वर्तमानसमये गृहे गृहे तथा समाजेऽपि उषाभार्गव-हण्डूपरमेश्वरी-प्रकरणादिवत् कुमारीषु महदापत्तिरूपं शारदाशासनस्य कटुफलमनुभूयते।

विवेकिनो विरला भवन्ति। ते च न शासकाः। ये च शासकास्ते विवेकिजनं न संमानयन्ति। अधुनेयं मर्यादा विंशतिवर्षपर्यन्तं नीयते। किं कुर्मः? महाभियानानुभवस्तु कृत एव। चतुर्विंशतिवर्षदेशीयानामपि कुमारीणां विवाहः चिन्तया ग्रस्तः वर्तमाने समये। अतः परं तु त्रिंशद्वर्षीयाणामपि तथा स्यात्।

विचार्यताम्! एतादृशोऽत्र उपायश्चिन्तनीयः, यो न राजशासनविरोधी, न धार्मिकपरम्पराप्रतीपः, समाजहितद्वारा आनन्दजनकश्च भवेत्। प्रकल्पश्चायं तथैव वर्तते। वाग्दानेन विंशतिवर्षेभ्यः प्राक् यथोचितं वाग्दानविधिः कर्तव्यः राजसम्मतवयसि चापरो विवाहविधिभागः, वध्वाः पतिगृहप्रवेशश्चानुष्ठेयः। अत्र औचित्यानुसारेण किञ्चित्परिवृत्तावपि न दोषः शास्त्रीयत्वे। अतः सामाजिकैः काश्मीरप्रदेशेऽन्यत्र चावश्यं एतस्या आचरणपरम्परा प्रचारितव्या। सैव समयोचिता आगामिविपद्विध्वंसिका चेति जनतानगरेषु [illegible] उपनयन-संस्कारस्तु इति निवेद्यते। ❀

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मानस-भारती—देवगिरा गुम्फितं मानसम्

—श्री जनार्दन गङ्गाधर रटाटे—

[बी० ए०, साहित्याचार्यः]

तनुं योगाग्निना दग्ध्वा वैकुण्ठं प्रययौ मुनिः ।
पूर्वं वराद् भेदभक्तेर्न लीनः स तनौ हरेः ॥
ऋषेर्गतिं विलोक्यान्ये मुनयः प्रमुदान्विताः ।
सर्वेऽस्तुवंस्ततो रामं ते तत्रस्था महर्षयः ॥
कृपाकन्दो विजयते नतकल्याणकारकः ।
पुनरग्रे ययौ रामो वनं मुनिगणान्वितः ॥
दृष्ट्वास्थिपुञ्जं पप्रच्छ दयालुस्तस्य कारणम् ।
ऊचुस्ते मुनयो रामं किमज्ञ इव पृच्छसि ॥
श्रुत्वाऽस्रपैर्भक्षितान् स मुनीनश्रुभिराचितः ॥

भुजौ समुत्तोल्य चकार सन्धां
रक्षोविहीनां पृथिवीं करिष्ये ।
गत्वाऽऽश्रमान् सौख्यमदाच्च राम-
स्तेभ्योऽखिलेभ्यस्तपसां निधिभ्यः ॥ ९ ॥

अगस्त्यस्य मुनिः शिष्यः सुतीक्ष्णो नाम बोधवान् ।
सर्वरीत्या रामसेवी स्वप्नेऽप्यन्याश्रयो न सः ॥
प्रभोरागमनं श्रुण्वन्नेवाधावत् त्वरान्वितः ।
चिन्तयन् यद् विधे दीनबन्धुः किं वञ्चके द्रवेत् ॥
सानुजो दासमिव मां किं मिलिष्यति मे प्रभुः ।
न विश्वासो यतो ज्ञानं भक्तिर्वा न विरागिता ॥
न सत्सङ्गो जपो योगोऽथवा यज्ञोऽस्ति मे क्वचित् ।
केवलं रामपदयोरनुरागोऽस्ति मे दृढः ॥
सेयं रामस्य वाक् तस्मै निराधारः प्रियो जनः ।
नेत्रे मे सुफले स्यातां दृष्ट्वा राममुखाम्बुजम् ॥
शिवे प्रेमनिमग्नस्य दशा तस्य न वर्ण्यते ।
स मुनिर्नं दिशो वेदमार्गं स्वं वा प्रयायिनम् ॥
पृष्ठे याति कदाचित् स गायन् नृत्यति च क्वचित् ।
प्रमां भक्तिं रामचन्द्रे सुतीक्ष्णः प्राप सात्वतीम् ॥

तरुगुप्तः प्रभुर्दृष्ट्वा बहुप्रीतिसमन्वितः ।
प्रादुर्बभूव हृदये भवभीतिहरस्तदा ॥
दृष्ट्वा प्रभुं हृदि मुनिः पनसेन समोऽभवत् ।
आगत्य रामो भक्तस्य दशया प्रमुदं गतः ॥
रामोऽजागरयत् तं तु ध्यानानन्दी न जागृतः ।
रामो भूपवपुर्हृत्वा दर्शयत् तं चतुर्भुजम् ॥
सर्पो यथा हृतमणिर्मुनिस्तु सहसोत्थितः ।
दृष्ट्वाऽग्रे सानुजं सीतायुतं सुखगृहं प्रभुम् ॥
ननाम दण्डवत् प्रेममग्नो धन्यो मुनिस्तदा ।
रामो भुजाभ्यामागृह्यातिप्रीत्या श्लिष्टवान्मुनिम् ॥
कृपालुः शुशुभे स्वर्णद्रुं तमालो मिलन्निव ।
मुनिस्तु चित्रगो नूनं पश्यंस्तब्धः प्रभोर्मुखम् ॥

सङ्गृह्य धैर्यं हृदये ततः स
संस्पृश्य पादौ मुहुरीश्वरस्य ।
आनीय देवं निजमाश्रमञ्च
पुपूज नानाविधिभिः कृपालुम् ॥ १० ॥

अशुक्लपद्ममालिकातनुं जटाकिरीटिनम्,
मुनेः पटेन वेष्टितं धनुःशरान्वितं करे ।
निषङ्गिकक्षसुन्दरं सदा नमामि राघवम्,
विमोहदावपावकः सदब्जकानने रविः ॥
कुलाय यातुहस्तिनां मृगाधिपो मतोऽस्ति यः,
प्रपञ्चपक्षिनाशनः खगः सदैव पातु नः ।
सुरक्तपद्मलोचनं सुरूपवेषधारिणम्,
विदेहपुत्रि-चक्षुषे चकोरकाय भाधिपम् ॥
गिरीशमानसे रतं मरालबालरूपिणम्,
विशालबाहुवक्षसं नमामि राममीश्वरम् ॥

(शेषांशः ९६ पृष्ठे)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आस्तिको महर्षिः कणादः

— श्री शिवकुमारशास्त्री, व्याकरणाचार्यः —

[प्रधानाचार्यः—संस्कृत-महाविद्यालयः, इटारसी]

महर्षिः कणादो वैशेषिकदर्शनस्य प्रणेता। परमाणूनां भेदानुमापकस्य स्वतोव्यावर्तकत्वरूपस्य विशेषस्य अङ्गीकाराद् दर्शनमिदं 'वैशेषिकदर्शनम्' इत्याख्यायते। उलूकापर-नामधेयोऽप्यासीदयम्, इत्येतत्कृतं दर्शनम् 'औलूक्यदर्शन'मपि अभिधीयते। भक्त्या प्रसन्नो भूत्वा शिवो भगवानेव उलूकरूपधरोऽस्मै पदार्थज्ञानमुपदिदेश, ततोऽपि औलूक्यमिति केचित्। ज्ञानसामान्यार्थकाद् दृशधातोः 'दृश्यते साक्षात्क्रियत आत्मा अनेन' इति व्युत्पत्त्या करणे ल्युटा दर्शनशब्दो निष्पद्यते।

दर्शनानि च आस्तिक-नास्तिकभेदेन द्वादश। तत्र वैशेषिक (काणाद) न्याय (गौतमीय) सांख्य (कापिल) योग (पातञ्जल) पूर्वमीमांसा (जैमिनीय) उत्तरमीमांसा (वैयासिक) दर्शनानि षड् आस्तिकदर्शनानि। आर्हत - लौकायतिक-सौत्रान्तिक - वैभाषिक - योगाचार - माध्यमिकभेदेन नास्तिकदर्शनान्यपि षट्।

तत्र महर्षिकणादप्रणीतं वैशेषिकदर्शनमेव काणाद-पदवाच्यम्। **धर्मविशेषप्रसूताद् द्रव्यगुण-कर्मसामान्यविशेषसमवायानां षण्णां पदार्थानां साधर्म्यवैधर्म्याभ्यां तत्त्वज्ञानान्निःश्रेयसाधिगमः** इति कणादसूत्रस्य, **प्रमाण-प्रमेय-संशय-प्रयोजन-दृष्टान्त - सिद्धान्ता-ऽवयव-तर्क-निर्णय-वाद-जल्प-वितण्डा-हेत्वाभास-च्छल - जाति - निग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगमः** इति गौतमसूत्रस्य च व्याख्यातॄणां व्याख्यासु महदन्तरम्। सर्वेषामेव दर्शनानां निःश्रेयसमुद्दिश्य क्रमशः एकप्रयोजनवत्त्वम्। आस्तिकदर्शनानि सर्वाण्येव तत्त्वज्ञानम् आत्यन्तिकं दुःखध्वंसञ्च समुद्दिश्यैव प्रवृत्तानि इति तेषामेकप्रयोजनवत्त्वं सिध्यति। परं तत्तद्दर्शनानां सोपानारोहणक्रमेण प्रतिपादनशैली काचिद् भिन्नेव प्रतीयते। स्थूलविषयविज्ञानपुरस्सरमेव सूक्ष्मसूक्ष्मतरविज्ञानं बुद्धावुपारूढं भवितुं शक्नोति। नहि सूक्ष्मतमात्मैकत्वविज्ञानमेकपदे अवगमयितुं क्षमम्। सर्वेषां दर्शनानां क्रमशोऽङ्गाङ्गिभावतया न तत्र विरोधबुद्धिः।

एतमेवार्थं श्रीमधुसूदनसरस्वतीपादा अप्याहुः- 'सर्वेषां प्रस्थानकर्तॄणां मुनीनां विवर्तवादपर्यवसानेन अद्वितीये परब्रह्मण्येव प्रतिपाद्ये तात्पर्यम्। नहि ते मुनयो भ्रान्ताः सर्वज्ञत्वात्तेषाम्। किन्तु बहिर्विषयप्रवणानामापाततः परमपुरुषार्थे प्रवेशो न सम्भवतीति नास्तिक्यवारणाय तैः प्रकारभेदाः प्रदर्शिता इति।

निरपेक्षरवस्वरूपाः श्रुतयोऽपि **क्षुरस्य धारा निशिता दुरत्यया दुर्गं पथस्तत्कवयो वदन्ति। यस्यामतं तस्य मतं मतं यस्य न वेद सः। अविज्ञातं विजानतां विज्ञातमविजानताम्** इत्यादिशब्दैर्यदात्मतत्त्वमतिगहनं दुर्ज्ञेयञ्च व्याहरन्ति, तत् एष महामोहाब्धिसंसृतिगर्तपतितो जनः कथं सुखेनावबोद्धुं शक्नुयादिति महाजनानुगृहीतः पन्थाः प्रचारमापादितः। प्रथमतः शरीरात्मवादिनां चार्वाकाणां शरीरमेवात्मेति प्रतिपन्नानां मतं न ह्यञ्जसा शक्यतेऽपोहितुमेकत्वावगमेन इति शरीरात् पृथगात्मनः साधनाय प्रयतितम्।

काणादा हि षट्पदार्थवादिनः प्रत्यक्षाऽनुमानभेदेन प्रमाणद्वयं च स्वीकुर्वते। ते शब्दस्य प्रमाणा-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

न्तरत्वमनभ्युपगम्य अनुमान एव तमन्तर्भावयन्ति। एष षट्पदार्थवादस्तु लोकोपयोगितामप्यावहति। परमाणुकारणवादमधिकृत्य ते सञ्जिरन्ते यत् चेतनस्य जगदुपादानकारणत्वे सर्वं जगत् चेतनमेव स्यात् नाचेतनम्। कार्यं हि कारणानुगुणमिति प्रसिद्धम्। शुक्लसूत्रनिर्मितः शुक्ल एव पटो यथा, एवं चेतनोपादानकस्य जगतश्चेतनत्वमेवापतेत्। तस्मादगत्या अचेतनोपादानकमेव जगदभ्युपेयम्। अचेतनसमवायिकारणत्वं च ते परमाणूनामेव अभ्युपगच्छन्ति। सूक्ष्माद्धि कारणात् स्थूलकार्योत्पत्तिर्दृष्टा। वैशेषिकमते सर्वतोऽपकृष्टपरिमाणः परमाणुः। स च निरवयवोऽतिसूक्ष्मतमश्च। ततोऽदृष्टवशाद् ईश्वरसिसृक्षावशाच्च तदिच्छात्मसंयोगात् परमाणुक्रियोत्पत्तिः। ततः परमाणुरपरेण परमाणुना संहत्य द्व्यणुकं जायते। एवं द्व्यणुकादिक्रमेण वायुप्रभृतीनामुत्पत्तिः। सेयं सृष्टिप्रक्रिया।

एवम् आत्मादृष्टवृत्तिनिरोधे सञ्जिहीर्षावशात् परस्परं संयोगनिवृत्तौ पवनादीनां परमाण्वन्तविभागरूपो विनाशः। एवं पृथिव्यादीनां क्रमशः परस्मिन् परस्मिन् पूर्व-पूर्वविलयः। धर्माधर्मवासनावताञ्च आत्मनामवस्थितिः। सेयं संहारप्रक्रिया।

संक्षेपेण च पृथिव्यादिभूतचतुष्टयस्य नित्यनिरवयवपरमाणूनां द्व्यणुकादिक्रमेण परस्परसंयोगादेव विश्वप्रपञ्चः। नित्यविभुरूपाणामात्मनां प्राक्तनजन्मसञ्चितादृष्टवशतः प्रतियोनितत्तद्देहैः सार्धं भोगाधायकः सम्बन्धविशेष एव जन्म इति आख्यायते। जीवात्मकर्माण्यपेक्ष्यैव च ईश्वरः सृष्टिस्थितिसंहारनियामकः। शरीरेन्द्रियादिभिन्नेन तत्त्वज्ञानसहकृतेन च आत्मसाक्षात्कारेण मिथ्याज्ञानरूपात्यन्तिकदुःखध्वंसपुरस्सरा निःश्रेयसप्राप्तिरिति।

वैशेषिकाणामयं परमाणुवादः षट्पदार्थवादश्च सर्वतः प्रथमं शरीरात्मवादमधिकृत्य प्रवृत्तेभ्यो नास्तिकदर्शनेभ्यो जनमानसान्यावर्ज्य विचारप्रवर्तनाय प्रथमः प्रयासः। वैशेषिकाणां शब्दान्तर्भावपूर्वकं प्रत्यक्षानुमानाभ्युपगमोऽपि नास्तिकमतनिरसनाय परमावश्यकः। एकं प्रत्यक्षं प्रमाणयतां नास्तिकानामग्रे शब्दस्य स्वतन्त्रप्रमाणत्वाभ्युपगमे ते किन्नोपहास्याः स्युः? अतोऽपि प्रत्यक्षातिरिक्तानुमानाङ्गीकृतिस्तेषां क्षोदक्षमतामेव आविष्करोति। शब्दस्य प्रामाण्यं तु तेऽभ्युपयन्त्येव। तमनुमान एवान्तर्भावयन्ति इति त्वन्यदेतत्। शब्दप्रामाण्यानभ्युपगमे तु तेषामास्तिक्यमेव विलीयेत।

शब्दोपमानयोर्नैव पृथक् प्रामाण्यमिष्यते।
अनुमानगतार्थत्वादिति वैशेषिकं मतम्॥

दर्शयिष्यते चानुपदं श्रुतिप्रामाण्यरूपेण शब्दप्रामाण्यं वैशेषिकाणामपि मते। शरीरात्मवादि-कुतार्किक-नास्तिकनियमनाय तन्मतदूषणाय च प्रवृत्तमिदं दर्शनं नास्तिकानां समक्षं शब्दप्रामाण्ये विशेषतः कथं बलमादधीत इति दर्शन-दर्शन-चारुधिषणाः सुधिय एव विमृशन्तु। शरीरेन्द्रियमनोव्यतिरिक्तम् आत्मानम् अमन्यमानानां नास्तिकानां मतं निराकर्तुं प्रयतमानस्य महर्षेः कणादस्य विशेषतोऽनुमाने पक्षपातः सर्वथा विचारसहः। नैतावता शब्दप्रामाण्यस्य अनभ्युपगमः।

कणाद आस्तिको नास्तिको वा?

इदानीमयं प्रश्नः समाधेयो यन्महर्षिः कणाद आस्तिको नास्तिको वा? तत्र स्वतन्त्र श्रुतिप्रामाण्यं वेदादिषु चानुपलभ्यमानं परमाणुकारणवादं षट्पदार्थीञ्च अभ्युपगच्छतो महर्षेः कणादस्य कथमास्तिकत्वमिति जागर्ति शङ्का समेषां विचारकाणां

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चेतसि। एवं हि आस्तिक-नास्तिकशब्दयोरपि निर्वचनीयता समापतति । अत्र 'अस्ति परलोक उपलक्षणत्वेन देहादिभिन्न आत्मा ईश्वरः पुनर्जन्म वेदप्रामाण्यमिति मतिर्यस्य स' आस्तिकः। 'नास्ति परलोकादिकमिति मतिर्यस्य स' नास्तिकः। तत्र **यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः, दृष्टादृष्टप्रयोजनमभ्युदयाय** इत्यादिसूत्रयतः शरीरादिजडवर्गव्यतिरिक्तञ्च आत्मानमभ्युपगच्छतो महर्षेः कणादस्य परलोकस्तु सर्वथा अभिमत एव। पुनर्जन्मापि एतेन व्याख्यातम्। **तद्वचनाद्** (ईश्वरवचनाद्) **आम्नायस्य प्रामाण्यम्, संज्ञाकर्म त्वस्मद्विशिष्टानां लिङ्गम्** इत्यादिसूत्रैः ईश्वरस्वीकृतिः स्फुटा। **आत्मान्तरगुणानामात्मान्तरेऽकारणत्वात्** इति सूत्रेणापि एकस्यैवात्मनो धर्माधर्मजनितसुखदुःखभोक्तृत्वे कथिते पुनर्जन्मप्रतीतिः। वायुनामधेयप्रस्तावे **तस्मादागमिकम्, नानात्मवादे च शास्त्रसामर्थ्याच्च** इति सूत्राभ्यां षष्ठे **बुद्धिपूर्वा वाक्यकृतिर्वेदे** इत्यादिसूत्रैः शास्त्रागमशब्दाभ्यां च वेद एव अभिप्रेयते। इत्थम् अनेकैः सूत्रैर्वेदप्रामाण्याभ्युपगमो महर्षेः कणादस्य स्पष्टमास्तिकतां द्रढयति।

प्रेत्यभावे च **आत्मकर्मसु मोक्षो व्याख्यातः** (वैशे० ६. २. १६) इति सूत्रे श्रवणमननादिपूर्वो मोक्षोपदेशः। आत्मकर्मसु षट्पदार्थज्ञानमाद्यमात्मकर्म, आत्यन्तिकं दुःखध्वंसमुद्दिश्यापि मुख्यतो व्यावहारिकविषयमुपादायैव वैशेषिकदर्शनकृता नास्तिकमतखण्डनाय शरीरादिविवेकेन सुखित्वादि अनूद्यैव आत्मा प्रत्यायितः। स्थूलद्वारा हि सूक्ष्मार्थावगतिः, देहेन्द्रियाद्यात्मबुद्धिनिरासेन ततः सूक्ष्मार्थप्रवेशस्तु कारित एव।

सर्वस्यास्य निरूपणस्य इदमेव तात्पर्यं यत् नहि वैशेषिकाभिमतमेव अन्तिमसाधनम् इत्यभिनिवेष्टव्यम्। परं वेदोद्यानाभिरक्षणार्थं कण्टकावृत्तिवद् इदमपि दर्शनम् उपादेयमेव। अत एव **काणादं पाणिनीयं च सर्वशास्त्रोपकारकम्** इति अभियुक्ता व्याहरन्ति। परमाणुवादोऽपि **अणोरणीयान्** इति, **न्यग्रोधफलमत आहर** इत्यादि आरुणि-श्वेतकेतूपाख्यानेन च बीजान्वेषणवद् अनुसन्धातव्यः। सर्वथा चायं महर्षिर्वैदिकमर्यादासंरक्षणेन नः प्रणम्य एव।

❀❀❀

मानस-भारती—(९३ पृष्ठस्य शेषांशः)

भ्रमाहि-पन्नगाशनः कुतर्क-दुःखनाशनः,
भवान्तकः सुपर्वणां कुलस्य रञ्जने रतः॥
दयासमूहमूर्तिकः सदैव रक्षकोऽस्तु नः,
गुणैर्विना गुणान्वितं समं परं त्वतीन्द्रियम्।
मनोगिरामगोचरं सुनिर्मलं त्वनन्तकम्,
धरातिभारभञ्जनं नमामि राममागतम्॥
मनोरथद्रु-काननं स्वसेवकेभ्य अद्भुतम्,
प्रतर्जनं मदक्रुधोस्तथैव लोभकामयोः।
अतीव चातुरीयुतो भवाब्धिसेतुरुत्तमः,
दिनेशवंशमुध्वजः सदैव पातु राघवः॥

अतुल्यदोःप्रतापवान् बलस्य सन्निवासनम्,
कलिप्रपञ्च-नाशनाभिधः सुधर्मरक्षकः।
सुखप्रदैर्गुणैर्युतस्तनोतु शं सदा मम,
रजोविहीन-रूपधृग् विनाशहीन-तत्त्वभृत्॥
मनस्यपि स्थितोऽनुगः खरद्विडस्ति सर्वगः,
तथापि सानुजः श्रिया वनेचरोऽस्तु मे हृदि।
विनागुणं गुणैर्युतं मनोऽनुगं विदन्तु वा,
परन्तु कोशलेश्वरो मनोऽयनं करोतु मे॥

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्री भारतधर्म-महामण्डल-शास्त्रप्रकाश-विभागद्वारा प्रकाशितानि पुस्तकानि

१.	धर्म-कल्पद्रुम प्रथम खण्ड	२.००	
२.	,, द्वितीय खण्ड	१.५०	
३.	,, तृतीय खण्ड	२.००	
४.	,, चतुर्थ खण्ड	२.००	
५.	,, पंचम खण्ड	२.००	
६.	,, षष्ठ खण्ड	३.५०	
७.	,, सप्तम खण्ड	२.००	
८.	,, अष्टम खण्ड	३.५०	
९.	धर्म-कल्पद्रुम द्वितीयखण्डसहित राजकीय संस्करण	५.००	
१०.	प्रवीण दृष्टि में नवीन भारत १-२ खण्ड	२.००	
११.	नवीन दृष्टि में प्रवीण भारत	१.००	
१२.	साधन-चन्द्रिका	१.७५	
१३.	शास्त्र-चन्द्रिका	१.५०	
१४.	धर्म-चन्द्रिका	१.२५	
१५.	आर्य-गौरव	०.५०	
१६.	नीति-चन्द्रिका	०.५०	
१७.	धर्म-प्रश्नोत्तरी	०.२५	
१८.	चतुर्दश-लोकरहस्य	०.२५	
१९.	गीतार्थ-चन्द्रिका सजिल्द	३.००	
२०.	,, ,, अजिल्द	२.५०	
२१.	सनातनधर्म-दीपिका	०.७५	
२२.	धर्म-विज्ञान प्रथम खण्ड	५.००	
२३.	,, द्वितीय खण्ड	४.००	
२४.	,, तृतीय खण्ड	४.००	
२५.	सतीचरित्र-चन्द्रिका	२.००	
२६.	नित्यकर्म-चन्द्रिका	०.२५	
२७.	धर्म-सोपान	०.२५	
२८.	धर्मकर्म-दीपिका	०.२५	
२९.	सदाचार-सोपान	०.०६	
३०.	कन्याशिक्षा-सोपान	०.०६	
३१.	ब्रह्मचर्य-सोपान	०.२५	
३२.	साधन-सोपान	०.५०	
३३.	शास्त्र-सोपान	०.२५	
३४.	उपदेश-पारिजात	०.५०	
३५.	कल्कि-पुराण	१.५०	
३६.	पातञ्जल-योगदर्शन	३.००	
३७.	महामण्डल-रहस्य	१.५०	
३८.	मन्त्रयोग-संहिता	१.००	
३९.	हठयोग-संहिता	०.५०	
४०.	तत्त्वबोध	०.१३	
४१.	स्तोत्र-कुसुमाञ्जलि	०.२५	
४२.	भगवद्गीता प्रथम खण्ड	१.००	
४३.	विष्णु-गीता	१.००	
४४.	सूर्य-गीता	०.५०	
४५.	शक्ति-गीता	१.००	
४६.	बीश-गीता	०.७५	
४७.	शंभु-गीता	१.००	
४८.	संन्यास-गीता	१.००	
४९.	गुरुगीता	०.२५	
५०.	कर्ममीमांसा-दर्शन प्रथम खण्ड	१.५०	
५१.	,, द्वितीय खण्ड	२.००	
५२.	,, तृतीय खण्ड	५.००	
५३.	कर्ममीमांसा-दर्शनम् (संस्कृत)	२.००	
५४.	राम-गीता	२.५०	
५५.	कहावत-रत्नाकर साधारण रायल	१०.००	
५६.	रामायण तुलसीकृत	१.५०	
५७.	देवीमीमांसा-दर्शन प्रथम भाग	३.५०	
५८.	,, द्वितीय भाग	५.००	
५९.	त्रिवेदी सन्ध्या	०.३७	
६०.	गोव्रत-तीर्थमहिमा	०.५०	
६१.	मार्कण्डेय-पुराण प्रथम खण्ड	१.००	
६२.	,, द्वितीय खण्ड	१.००	
६३.	,, तृतीय खण्ड	१.००	
६४.	ऋजु-पाणिनीयम्	०.७५	
६५.	संगीत-सुधाकर	०.२५	
६६.	पुराण-रहस्य	१.५०	
६७.	संन्यासधर्म-पद्धति	१.५०	
६८.	पातञ्जल-योगदर्शनम् (संस्कृत)	४.००	

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

पञ्जीकृतसंख्या एल० १८९७
Digitized by Arya Samaj Foundation Chennai and eGangotri

सूर्योदयस्य नियमाः

पत्र-संहिता

१. 'सूर्योदय'-मासिकपत्रस्य वार्षिकं शुल्कं रूप्यकपञ्चकं वर्तते। धनादेश (मनीआर्डर) द्वारा तत्प्रेषणीयम्। वी० पी० द्वारा प्रेषणे ५० पणाः पृथक् प्रदेयाः स्युः।

२. आवर्षं गम्भीरसाहित्यसमन्विताः १२ अङ्काः प्रकाश्यन्ते। नवीनग्राहकत्वं प्रथमाङ्कतः (जनवरी-अङ्कतः) एव स्वीक्रियते। माध्यमिकेन केनापि अङ्केन ग्राहकत्वं न स्वीक्रियेत।

३. आंग्लमासस्य २६ दिनाङ्के 'सूर्योदयः' प्रकाशितो भवति। वारद्वयं संशोध्य ग्राहकेभ्यः स प्रेष्यते। अतस्तदलाभे पूर्वं स्वकीय-पत्रालयतस्तदनागमनस्य निर्णयं कृत्वैव १० दिनाङ्कानन्तरं वयं सूचनीयाः।

४. लेख-कवितादीनां भाषा संयता, सरला, शुद्धा च भाव्या। प्रकाशनीय-लेखादीनां स्पष्टाक्षरैः कर्गजस्यैकपृष्ठे एव लेखनमावश्यकम्। अस्वीकृता लेखादयः पोस्टविभागीय-चिटिका (टिकट) प्राप्त्यनन्तरं परावर्तयितुं शक्यन्ते।

५. सम्पादकीय-विषयसम्बद्धे पत्र-व्यवहारे 'सम्पादकः' इति, व्यवस्थाविभागीय-पत्रव्यवहारे च 'व्यवस्थापकः' इति च स्पष्टं लेखनीयम्। तेन उत्तरलाभे मुधा विलम्बो न भवेत्।

विज्ञापन-शुल्कम्

सूर्योदये सुरुचिपूर्णं विज्ञापनं प्रकाश्यते। एकवारं तस्य प्रकाशनस्य शुल्कक्रमश्च अधोलिखितोऽस्ति। सार्वकालिकस्य दीर्घकालिकस्य च विज्ञापनस्य कृते विशेष-सौविध्याय पत्र-व्यवहारः कार्यः।

साधारणस्य प्रतिपृष्ठस्य	१००) रु०	साधारणस्य प्रत्यर्धपृष्ठस्य	६०) रु०
साधारणस्य चतुर्थांशपृष्ठस्य	३५) रु०	आवरण-चतुर्थपृष्ठस्य	२००) रु०
आवरण-द्वितीय-तृतीयपृष्ठयोः	१५०) रु०	प्रथमावरणपृष्ठे विज्ञापनं न स्वीक्रियेत।	

—सङ्केतः—

'सूर्योदय'-कार्यालयः, भारतधर्म-महामण्डलम्, जगत्गंज, वाराणसी।

सम्पादकः, प्रकाशकः, मुद्रकश्च—गोविन्द नरहरि वैजापुरकरः,
श्रीभारतधर्ममहामण्डलम्, जगत्गंज, वाराणसी कैण्ट।
मुद्रण-स्थलम्—आनन्दकानन प्रेस, सी० के० ३६/२०, वाराणसी।
CC-0. In Public Domain. Panini Kanya Maha Vidyalaya Collection. Varanasi

Digitized by Arya Samaj Foundation Chennai and eGangotri

सूर्योदयः

भारतधर्ममहामण्डलस्य

मासिकं मुखपत्रम्

वर्षम् ४४

अङ्कः ५

सम्पादकः

गो० न० वैजापुरकरः

मई

१९६८

वार्षिक-मूल्यम्

५) रूप्यकाणि

प्रत्यङ्क-मूल्यम्

अर्धरूप्यकम्

गङ्गां हृदब्जे स्मरेत्

राकाचन्द्रसमप्रभां शशिकलाराजत्किरीटाञ्चितां
पद्मं सौधघटं वरं च दधतीं हस्ताम्बुजैश्चाभयम् ।
शुभ्रैराभरणैस्तथैव वसनैर्माल्यैर्विलेपैर्युतां
शुक्लग्राहकृतासनां त्रिनयनां गङ्गां हृदब्जे स्मरेत् ॥१॥

गङ्गे ! तवैष तरलोर्मिततिः प्रवाहो
द्राङ् मानसं विशतु पङ्कलवाविलं मे ।
निष्पङ्कतामुपगते विपुले च येन
यस्मिंश्चिराय विहरिष्यति राजहंसः ॥२॥

विष्णोर्निरन्तरमुपासनयैति विष्णुं
शम्भोरुपैति समुपासनयैव शम्भुम् ।
यैकैव दातुमुभयोश्च पदे समर्था
तां त्वामिहाम्ब ! वरिवस्यति को न धीरः ॥३॥

श्रद्धाऽथवा जननि ! भक्तिरुभे निदाने
वैद्यस्य कर्मनिकरस्य फलप्रदाने ।
त्यक्त्वाऽपि ते पयसि ते शकृदानिमज्ज-
न्नो जातु जायत इतीह विचित्रमेतत् ॥४॥

—पं० नारायणभट्ट पर्वणीकरः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अनुक्रमः

प्रपानकम्	पत्रपुटम्	परिवेषकः
लक्ष्मी नृसिंह मम देहि करावलम्बम्	९७	श्रीमदाद्यशङ्कराचार्याः
श्री महर्षि-ज्ञानानन्द-चरितम्	९८	श्री विन्ध्येश्वरीप्रसादशास्त्री
संस्कृत परीक्षा अस्माकं कर्तव्यश्च	९९	सम्पादकीयम्
रसस्वरूप-विमर्शः भक्तिरसश्च	१०३	श्री पूज्य करपात्र स्वामिनः
(२) भारतीया राजनीतिः-तात्त्विकं विवेचनम	१०५	श्री पण्डितराज राजेश्वरशास्त्रिणः
पिकविलापः	११०	श्री त्र्यम्बकः कविवरः
छत्रपतिमहाकाव्यम्	१११	श्री उमाशंकर शर्मा त्रिपाठी
मिथ्या गर्वो न कर्तव्यः	११५	श्री 'अङ्गारः'
मानस-भारती	११६	श्री जनार्दन गङ्गाधर रटाटे
दर्शनपीयूष निर्झरः	११७	काशीपीठाधीश्वराः जगद्गुरुशङ्कराचार्याः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सूर्योदयः

श्री भारतधर्ममहामण्डलस्य मासिकं मुखपत्रम्

रागद्वेषनिशाटनं विधुरयन् मोहं तमो नाशयन्,
तामिस्रं जडवादकैरवकुलं ज्ञानत्विषा म्लापयन्।
विद्वल्लोकमशोकयन् नयसुधीरोलम्ब्यमुन्मीलयन्,
सञ्जातः सुमनोमनो मधुरयन् सर्वत्र सूर्योदयः॥

४४ वर्षे] वाराणसी, वैशाखः २०२५ : मई १९६८ ई० [५ अङ्कः

लक्ष्मीनृसिंह, मम देहि करावलम्बम्

संसारवृक्षमघबीज - मनन्तकर्म-
शाखाशतं करणपत्रमनङ्गपुष्पम्।
आरुह्य दुःखफलितं पततो दयालो
लक्ष्मीनृसिंह मम देहि करावलम्बम्॥ १॥

संसार-सागर- विशाल - कराल-काल-
नक्र - ग्रह-ग्रसन-निग्रह - विग्रहस्य।
व्यग्रस्य राग-रसनोर्मि-निपीडितस्य
लक्ष्मीनृसिंह मम देहि करावलम्बम्॥ २॥

संसार-जाल-पतितस्य जगन्निवास
सर्वेन्द्रियार्थ - बडिशार्थझषोपमस्य।
प्रोत्खण्डित - प्रचुर-तालुक - मस्तकस्य
लक्ष्मीनृसिंह मम देहि करावलम्बम्॥ ३॥

अन्धस्य मे हृतविवेक - महाधनस्य
चौरैः प्रभो बलिभिरिन्द्रियनामधेयैः।
मोहान्धकूप - कुहरे विनिपातितस्य
लक्ष्मीनृसिंह मम देहि करावलम्बम्॥ ४॥

संसारभीकरकरीन्द्र - कराभिघात-
निष्पिष्टमर्मवपुषः सकलार्तिनाश।
प्राणप्रयाण - भवभीति - समाकुलस्य
लक्ष्मीनृसिंह मम देहि करावलम्बम्॥ ५॥

—श्रीमद्भगवत्पादशङ्कराचार्यः—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्री महर्षि-ज्ञानानन्द-चरितं महाकाव्यम्

— श्री विन्ध्येश्वरीप्रसादशास्त्री —

संस्थापको भूतहिते रतश्च बुधो भरद्वाज-कुलावतंसः।
यो मोहनोऽभूत् मदनस्य नाम्ना महर्षिवर्यो भुवनेषु वन्द्यः॥ ५१॥

५२. वाराणसेयस्य च हिन्दु-विश्व-
विद्यालयस्या - ऽऽदृतमध्यभागे।
संस्थापयिष्यन् प्रभुमाशुतोषं
श्री विश्वनाथं जगदेकवन्द्यम्॥

५३. चिकीर्ष्यमाणस्य महाद्भुतस्य
सन्मन्दिरस्या - ऽप्रतिमस्य तस्य।
शुभं शिलान्यासविधिं विधित्सु-
र्निमन्त्रयामास महारणं यम्॥

५४. राजर्षिवर्यस्य नृपैर्नुतस्य
यस्यानुपस्थानतया सुधीन्द्रः।
चेखिद्यमानो मुनिमालवीयः
सदात्मना न्यासविधिं चकार॥

५५. कुले यदीये जनिमाप्नुवन्तः
सहस्रशः सङ्गरसुप्रसिद्धाः।
दुर्धर्षशत्रुञ्जय - वीरसाङ्गा-
कुम्भादयः ख्यातकथा बभूवुः॥

५६. विख्यात - चित्तौरगढस्य रक्षा-
मतीतसंख्याः सुविधातुकामाः।
ऊर्जस्वल - क्षत्रियपुङ्गवास्ते
सम्मेनिरेऽसून् युधि वै तृणाय॥

५७. वंशेऽद्भुते यस्य जनुर्गृहीत्वा
च्छित्वा सपत्नार्बुदमस्तकानि।
कबन्धशेषा अपि सन्निपात्य
शतं निपेतुर्भुवि सङ्गरस्थाः॥

५८. चित्तौरदुर्गप्रसरे ह्यधःस्थे
स्थित-द्विषत्कोटिबलानि येषाम्।
प्रहार - विध्वस्त - वपूंष्यनेका-
नद्वान् सुसंत्रस्तमनांसि तस्थुः॥

५९. गोरा तथा बादल इत्यनेके
कुञ्चालकाः कोमलबालकाश्च।
प्रचक्रिरे यत् तदतीतवृत्त-
विपश्चितोऽद्यापि न विस्मरन्ति॥

चित्तौरदुर्गस्य दुरापमूर्तेर्लसत्सु वै सप्तसु तोरणेषु।
हत्वा सहस्राणि च ये रिपूणां तेषु स्थिता वीरगतिं प्रपन्नाः॥ ६०॥

[क्रमशः]

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतपरीक्षाः अस्माकं कर्तव्यञ्च

अस्माकमन्तरङ्गेण एकेन मित्रवरेण विगत-मासि सम्पन्नायां वाराणसेय-संस्कृतविश्वविद्यालय-परीक्षायां निरीक्षकरूपेण दिनचतुष्टयं यावत् कार्यं कृत्वा योऽनुभवः समासादितः, सोऽस्माकं पुरत-स्तेन समुपस्थापितः। तं श्रुत्वा चेतः परां खिन्नतां गतम्, विवशतश्च वक्तव्यं भवति यत् संस्कृतशिक्षा-प्रसार-विकासदृष्टया स्थितिरियं नूनमशिवङ्करा। तेनोक्तम् —

आचार्यकक्षा-परीक्षार्थिनोऽपि संस्कृत - शिक्षा-मातृगृहभूते वाराणसीनगरे परीक्षाकाले प्रश्नोत्त-रीम्, पाठ्यपुस्तकं तत्पत्रखण्डं वा चिटिकालिखि-तानि टिप्पणादीनि च गुप्तरूपेण समानीय समुद्-घाट्य ततः प्रश्नान् समुत्तरन्तो दृष्टाः। मुहुर्मुहुः निषिद्धा अपि ते न ततो विरताः। द्वित्रिवारं निषि-ध्यापि तथैव समाचरणेन तेषां परीक्षालयतो निष्कासनं नवोत्तर-पुस्तिका - प्रदानपूर्वकं पूर्वोत्तर पुस्तिकायाः अवैधत्वनिर्णयात्मकः क्रमः स्वीकृतः। तदा कतिपये तथापरीक्षार्थिनः परीक्षोत्तरं बहिरेक-त्रीभूय निरीक्षकं शासितुं कृतसङ्कल्पा दृष्टाः। निरीक्षकः पुनरन्येन पथा निर्गत्य तां बाधां समु-त्तीर्णवान्। स्वयं परीक्षाधिकारिभिरपि परीक्षा-काले अकस्माद् भूयसा समागत्य स्थितिरियं दृष्टा अयमेव क्रमश्च समनुसृतः इति।

अस्मन्मित्रवरः अग्रेऽवदत् — 'परीक्षाधिकारि-णोऽस्य क्रमस्य अनुपदमेव एकः परीक्षार्थी निरीक्षकं प्रावोचत् यद् गुरो इतः परं तु पुस्तकं दृष्टैव प्रश्नान् उत्तरयिष्यामि, अन्यथा अनुत्तीर्णः स्यामि-ति। दयालुर्निरीक्षकस्तं प्राह अधुनैव संवृत्तं सर्वं दृष्ट्वाऽपि ते ईदृशं साहसं परमाश्चर्यावहम्। बत एतादृशं साहसं तेऽध्ययने विनियुक्तं स्यात्! कृपया एतादृशं कर्म कृत्वा आत्मनो वर्षहानिः, निरीक्षकस्य चाधिकारिणां पुरतोऽपमानश्च न कार्यः। अर्ध-घटिका एवावशिष्टा ते ऐषमपरीक्षाकालस्य। अन्तिमेऽस्मिन् समये किमेतत् आचरसि एवमपि हठं करिष्यसि तदा विवशतो त्वं परीक्षातो निष्का-स्येत। अन्यूनं वर्षद्वयं ते वृथा स्यात्। गौरव-लाघवं परिचिनु इति। तदनन्तरं तेनोक्तम् — 'गुरो भवता उक्तमिति भवद्गौरवेण काममनुत्तीर्णः स्याम्, पुस्तकं न विलोकयिष्यामी'ति। ज्ञातव्यमे-तत् परीक्षासमाप्तौ स एव छात्रो निरीक्षकस्य अक्ष्णोः पुरत एव मुद्रित–पाठ्य–पुस्तकस्य भूयांसि पत्रखण्डानि समादाय परीक्षाभवनान्निष्क्रान्त'इति।

श्रूयते छात्राणामयं परीक्षासमुत्तरणस्य अवैधः क्रमः प्रतिवर्षं सुदीर्घकालत एव नैकाभिर्धाराभिः प्रसरति। १. प्रथमं प्रश्नपत्रनिर्माणानन्तरं तत्संशोधन-काले वा केषाञ्चन स्वकर्तव्यनिर्वहणे अशक्तानाम् अनपेक्षितदयाशीलानां वा गुरूणां कृपया छात्राणा-मयं परीक्षासागरः स्वल्पतरश्रमेण सुतरो जायते। २. ततः परम्, परीक्षाकाले तैः अवलम्बनीया विधय उपरिष्टात् चर्चिता एव। परस्य परीक्ष्यच्छात्रस्य लेखानुलेखनमद्य दुर्बलतरं संवृत्तम्, यतो हि तादृ-शानुलेखनीयप्रश्नोत्तरलेखाश्छात्रा अद्य अङ्गुलि-गण्या एव दृश्यन्ते। भूयसा एकजातीया अनुलेखन-प्रिया एव छात्राः समुपलभ्यन्ते। ये तादृशाः प्रकृष्ट-मतयो भवन्ति, ते किमर्थमेतेभ्य एतादृशं साहाय्यं दातुं समुत्सुका भवेयुरित्यप्यस्ति विषयेऽत्र बाधा। अतः सः विधिः कदाचिदेव अनुग्राह्यते साम्प्र-तिकैश्छात्रैः। मुख्यत उपरिष्टात् चर्चित एव।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

३. तदनन्तरम्, उत्तरपुस्तिकाः कस्य परीक्षकस्य सविधे गच्छन्ति इत्यस्य गवेषणं जायते, यत्र परीक्षालयीया निम्नतरा भृत्या विशेषतः समुपयोगिनो भवन्ति। अवगत्येदं प्रत्यक्षमप्रत्यक्षं वा स परीक्षकः साम-दान - भेद - दण्डैर्यथायथं वशीकृत्य स्वकार्यं साध्यते। दौर्भाग्यात् अनधिकृता अपि योग्यताविशेषेण (?) परीक्षकपदमासादिताः परीक्षकास्तेषामेतैः इषुभिरनाविद्धाः स्थिरधृतयश्च न तिष्ठन्ति। इत्थं सुबहुछलछद्मानौचित्यजातं कृत्वा सहस्राधिकाश्छात्राः प्रतिवर्षं तत्तत्परीक्षाः समुत्तीर्य कियता कालेन पदवीधरा जायन्ते। अद्य एतादृशानां पदवीधराणां भारते वनमिव प्रसृतं वरीवर्ति।

इदन्तु स्पष्टमेव यदेतादृशेन दुरभिसन्धिना नहि सर्वे परीक्षार्थिनो लिप्ताः, न वा सर्वेऽपि गुरवस्तेषामस्मिन् अवैधकर्मणि सहयोगं ददति। अद्यापि सन्ति नैके एतादृशाः परीक्षार्थितो ये सविधि आवर्षं सुयोग्यगुरुमुखादधीत्य समग्रं पाठ्यग्रन्थं समभ्यस्य च परीक्षालये प्रविशन्ति। प्रतिभा-धारणाऽभ्यासपाटवेन सुनियोजितश्रमेण च ते पृष्टान् प्रश्नान् उत्तरयन्ति। परीक्षकांश्च निष्पक्षपरीक्षणाय सर्वविधं सौविध्यमाचरन्ति। अन्ततस्ते न्यायतः स्वयोग्यतानुरूपं परीक्षासागरं समुत्तरन्ति परमेतादृशा अङ्गुलिगण्या एव। न चैतादृशैरङ्गुलिगण्यैः परीक्षाह्रदं मलीमसं कुर्वतां निष्कृतिर्जायते। पर्यन्ते गोधूमैः सह घुणोऽपि पेषणीयचक्रयोरन्तरालगतः कामपि दयनीयां दशामनुभवतीत्यहो दौर्भाग्यम्।

संस्कृत-परीक्षार्थीनुद्दिश्य प्रक्रान्तेऽस्मिन् लेखेऽस्माभिर्दर्शिता विचारिता च स्थितिर्यद्यपि प्रत्यक्षतः संस्कृत-परीक्षाक्षेत्रसम्बद्धा, तथापि तस्या व्याप्तिः आङ्ग्लाद्याधुनिकविषय-परीक्षाक्षेत्रेष्वपि समानैव वक्तुं शक्यते। मूलतः आधुनिकशिक्षा-व्यवस्थायाः केन्द्रित-लेखबद्धपरीक्षाविधेश्च अपरिहार्योऽयमभिशापस्तत एव संस्कृत परीक्षाक्षेत्रे समागतः। तत्र सोऽयमभिशापोऽद्य परां कोटिमाटीकते। निरीक्षकस्य प्रधानाचार्यस्य च ताडनम्, हिंसादिकन्तु श्रुतपूर्वमस्माभिः। आंग्लपरीक्षाच्छात्राणां महत्पौरुषरूपं वर्षेऽस्मिन् पटनानगरे सन्दर्भेऽस्मिन् यत्सम्पन्नम्, तदभूतपूर्वमेव। वृत्तपत्रपाठकैर्ज्ञायते यदेषमे वार्षिक-परीक्षासत्रे तत्र छात्रैः परीक्षालयतः कथमपि प्रश्नपत्रान् बहिरासाद्य तत्र सविधि ध्वनि-विस्तारकयन्त्रस्य योजनं कृत्वा ततः प्रश्नपत्राणां तेषामुत्तराणि समुद्घोषितानि छात्रनेतृभिः, येन परीक्षालयस्थाः सर्वे छात्रास्तानि श्रुत्वा उत्तरपुस्तिकासु लेखयेयुः। राजपुरुषा अधिकारिणश्च कृत्यस्यास्य निरोधेऽसमर्थाः समभवन्। अर्थात् परीक्षाप्येवं विशुद्धं राजनैतिकमभियानमेव संवृत्तम्।

संस्कृतक्षेत्रे पुनरयं सांसर्गिको व्याधिः विश्वविद्यालयप्रवर्तनेन सह समागतश्चेन्न तत्र बहु विस्मयावहम्। विस्मयावहमेतदेव यत् क्षिप्रतरमनुकरणकुशलः संस्कृतसमाजोऽद्यापि विषयेऽत्र परीक्षानिरीक्षकभयाधानमात्ररूपाम् एतद्विषयककौमारस्थितिमेव निर्वर्तमानो दरीदृश्यते, यद्यपि तान् स्वीकृत्य वयं गुरव उच्चतराधिकारिणोऽपि पददलितान् कर्तुमहरहः प्रयतामहे। काममेतद् विस्मयावहं न भवेत्, परं संस्कृतसमुन्नयनप्रचार-प्रसारदृष्ट्या नूनमशिवङ्करमेव वक्तव्यं भवेत्।

सुदृढं ध्येयमेतद् यत् संस्कृतभाषा संस्कृतवाङ्मयञ्च विश्वस्मिन् प्राणिमात्रस्य ऐकान्तिकहिताय शाश्वतशान्त्यै एव प्रवृत्तम्। 'न जातु कामः कामानाम्' इत्यादि चिरानुभूताभियुक्तो-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्तिभिः भोगानां शाश्वतशान्तये सर्वथा विप्रतीपत्वमालोच्य त्यागप्रधानां संस्कृतिमेव समुपदिशति वाङ्मयमिदम्। अतो यद्यपि आधुनिकवैज्ञानिकसुख-सुविधानामर्जनाय प्रयतमानैरपि अस्माभिः संस्कृतसेविभिः कथमपि तथा न वर्तनीयं येनास्माकं मूललक्ष्यमेव विहतं भवेत्। तथा सति संस्कृतस्य संस्कृतज्ञानां वा ये किल प्रागैतिहासिककालीनां सहजामत एव अपरिष्कृतां रीतिं नीतिमेव समाश्रयन्ते, अद्य वैज्ञानिके युगे न काऽप्यावश्यकता तेषाम्। तदर्थं यदि शासनं प्रभूततरं धनं व्ययीकुरुते सोऽपव्यय एव। संस्कृतसमुन्नयनस्य यावदिदमाडम्बरं शासनेन जनैश्च समायोज्यते, तदक्षरश आडम्बरमेव, अभ्यन्तरे खमिव शून्यम्। राष्ट्रधनस्य राष्ट्रशक्तेश्च तत्र नियोजनं यावच्छीघ्रं समर्पितं भवेत्तावदेव वरम्। किन्तु यदि उत्तरोत्तरं वर्धमानं महाशक्तिप्रलयङ्करं विज्ञानं नियन्त्र्य विश्वकल्याणे तद्विनियोगः काम्येत चेत् तदिव सुदृढं तन्नियन्त्रकमपि आत्मज्ञानोद्बोधकं संस्कृतवाङ्मयं भाव्यम्, तथैव तत्समुपासकैरपि भाव्यम्। एतादृशगुरुतरवैश्विककार्यकर्तॄणां योगक्षेमयोः पूर्णदायित्वमपि भारतशासनेन भारतीयजनैश्च वोढव्यमित्यस्माकं निर्विचिकित्सितं मतम्।

दिशाऽनया विवेच्यमाने सामान्यतः सर्वविषयेषु विशेषतश्च ज्ञान-विज्ञानक्षेत्रे संस्कृतज्ञैः सर्वथा तात्विकी निष्ठा समुपासनीया। तदनुसारं ज्ञानमपि सर्वथा रजस्तमोऽनभिभूतम् एकमात्रसत्वसंवलितं भाव्यम्। तादृशसत्वस्य प्रकर्षः प्राचीनशिक्षा-प्राचीन-पाठ्यप्रणाल्यैव सुलभः। संस्कृत-विश्वविद्यालय-सञ्चालकैर्विशेषतोऽत्र अवधेयम्।

संस्कृत-विश्वविद्यालयः संस्कृत-विद्यापीठानि संस्कृतोन्नयन-कामुकाः संस्थाः अधिकारिणो जनसाधारणाश्च तदैव कृतकार्याः स्युर्यदा न शीघ्रातिशीघ्रं प्राचीनाध्ययनाध्यापन-प्रणालीं तत्वतः कार्यरूपतां परिणमयिष्यन्ति। आधुनिकविश्वविद्यालयेष्विव यदि तत्रापि क्षुद्रतम-दलगतराजनीतेः प्रवेशः स्यात्तदा दूरे ततः समुन्नयनाशा। वाराणसेय-संस्कृत-विश्वविद्यालयो हि प्राचीनतमायाः काशिक-राजकीय-संस्कृत-प्रधान-पाठशालायाः प्रतिनिधिभूतः, यस्याः प्रायः प्रत्यब्दापकस्य शतशः शिष्याः वर्तमानमेकैकं विश्वविद्यालयं सञ्चालयितुं प्रभवन्त आसन्। किन्तु विगतेभ्यः कतिपय-वर्षेभ्यस्तत्र एतादृश्यो घटनाः श्रूयन्ते, याः किल कस्यापि प्रतिष्ठित-संस्कृत-प्रतिष्ठानस्य कृते शोभनीया नैव वक्तुं शक्या। कोऽपि तटस्थो वक्तुं शक्नोति यदेतादृशघटनादीनामेवायं साम्प्रतिकः परीक्षादिविषयकः सर्वोऽप्यभिशापः। किं कश्चित् हृदि हस्तं निधाय वक्तुं शक्नोति यद्विगतवर्षीय - पूरकपरीक्षा - कालीनाऽव्यवस्था छात्रेभ्य एतादृशमाहसदानाय कथमपि प्रेरिका नाभवत्?

ध्येयमेतत्, सामान्यनियमोऽयं यद् यत्र प्रतिष्ठाने केवलं सङ्कुचित-दलीय-जातीय-दृष्टिमवलम्ब्यैव कार्यकर्तारो नियोज्यन्ते, योग्यतरोऽपि प्रत्याशी 'कोऽपि योग्यो नास्तीति' कृत्वा क्षुद्रस्वार्थेन निषिद्ध्यते, तत् प्रतिष्ठानं कथमपि कीदृशीमपि अनुशासनहीनतां निरोध्य सुव्यवस्थाधानाय न प्रभवेत्। तदर्थं तेन प्रतिष्ठानेन प्रातःस्मरणीयमहामनसां मालवीय-पादानामिव अखिलभारतीयाः सुयोग्यतमा विद्वांसोऽनुभविनश्च कार्यकर्तारः संकलनीयाः। तेश्च सुतनिर्विशेषं सर्वे छात्राः सर्वविध-राजनीतिचक्रैरनवलिप्य आवर्षं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्राच्याध्यापन-प्रणाल्या पाठनीयाः। छात्रैरपि अभ्यस्यते न वेति सावहितं द्रष्टव्यम्। स्वीयप्रतिष्ठानस्य गौरववर्धनमोहेन स्वीयच्छात्रेषु परकीयच्छात्रेषु च अनुचितः पक्षपातो जातुचिदपि न विधेयः। अन्यच्च, अनुशासनहीनताया आधायकाः अन्येऽपि हेतवो निरोद्धव्याः। अर्थशौचम्, मनःशौचम्, देहशौचञ्च सर्वथा नियन्त्रकैः परिपालनीयम्। सत्येवं शुभसाधनजातसमवधानेन केवले संस्कृत-परीक्षाक्षेत्रे वर्धमानेयम् अनुशासनहीनता निरुद्धा भवेत्, अपितु संस्कृतच्छात्रेभ्यः सर्वविधा सा नूनं निरुद्धा स्यात्। यदा प्रत्येकश्छात्रो दृढं जानीयात् यत् केवलं 'यथातथा परीक्षोत्तीर्णतया मे नाभीष्टपदलाभो भवेत्, न च 'मदीयः पितृव्य' इतिकृत्वा तल्लभ्येत। प्रत्युत शतप्रतिशतं यदाऽहं योग्यः सिद्ध्येयम्, तदैव मया तल्लभ्येत,' तस्य तादृशदृढज्ञानस्य प्रमाणमपि क्रियात्मकरूपेण तेन भूयसा अनुभूयेत, तदैव छात्रा अपि तथाकरणाद् विरता भवेयुः।

नायमस्माकं कस्यापि व्यक्तिविशेषस्य संस्थाविशेषस्य वा कृते आक्षेपः। संस्कृत-समुन्नयने वर्तमानपरीक्षाप्रणालिप्रभवं बाधकं तत्वं दूरीकर्तुमेव अखिल-भारतीय-संस्कृतपरीक्षा-प्रतिष्ठानानां विद्यापीठानाञ्च कृतेऽस्माकमयं कान्तासम्मितो हितोपदेशः। आशास्यते च सम्बद्धाः सर्वे संस्कृतप्रणयिनोऽत्र सविशेषमवधास्यन्तीति।

——:❀:——

[११४ पृष्ठस्य शेषांशः]

तत्क्षणं तुमुलनादबोधितो
वल्लभाद्दढभुजार्गलाद् द्रुतम्।
जिह्मतामुदयभानुरीक्षितुं
जिह्मशोणनयनः समाविशत्॥ ५५॥
योषितामसिभृताञ्च निस्सहं
सन्ततस्फुरदरालदर्शिनी।
यस्य निर्गलति सम्मुखं हठात्
मानकीर्तिरनपायविह्वला॥ ५६॥
युद्धतूर्यमुत किङ्किणीस्वनं
तस्य दृप्तभुजगस्य वक्षसि।
उत्सुकानिव बलान्मनोरथान्
वीरपानलुलितान् विधित्सति॥ ५७॥
पक्षघातमवलोक्य निर्दयं
कौशिकैरिव बलोन्मदारिभिः।
कम्पयन् धनगिरा नभोऽवनिं
वारयन्निव रिपुं जगाद सः॥ ५८॥

——: ० :——

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पूर्वतोऽनुवृत्तः

रस-स्वरूप-विमर्शः, भक्तिरसश्च

—पूज्य श्री करपात्रस्वामिनः—

श्रीशङ्कुकस्तु—अनुमितिपक्षमङ्गीकृत्य स्थायिनो विभावादिभिरनुमाप्यानुमापक - भावरूपसम्बन्धाद् रसस्य निष्पत्तिरनुमितिरित्याह। तत्र रामत्वादिना गृहीते नटात्मके पक्षेऽकृत्रिमत्वेन गृहीतैर्विभावादिभिर्हेतुभी रामादिगतरत्यादिरनुमीयते रसः। तथा हि—नियतविषया धीः सम्यग्धीः। यथा 'राम एवायम्, अयमेव रामः' इत्ययोगान्ययोगव्यवच्छेदविषये। अनन्तरावतीर्णबाधानुमिथ्याधीः। यथौत्तरकालिके 'न रामोऽयमि'ति बाधे 'रामोऽयमि'ति। विरुद्धोभयकोटिका धीस्तु संशयः, यथा 'अयं रामो न वा ?' सादृश्योभयविषया धीः सादृश्यधीः। यथा 'रामसदृशोऽयमि'ति। ताभ्यो लोकप्रसिद्धाभ्यो विलक्षणया चित्रे 'तुरगोऽयमि'तिवत् रामोऽयमि'ति बुद्ध्या प्रथमं पक्षभूतो नटो विषयीक्रियते। ततस्तत्र अविद्यमानमपि विभावादित्रयं लिङ्गमवगम्यते। पूर्वमेव रोमाञ्चाद्याविर्भावनेगुरुशिक्षामासाद्य कृतातिशयिताभ्यासेन नटेन—

सेयं ममाङ्गेषु सुधारसच्छटा
सुपूरकर्पूरशलाकिका दृशोः।
मनोरथश्रीर्मनसः शरीरिणी
प्राणेश्वरी लोचनगोचरं गता॥
दैवादहमद्य तया चपलायतनेत्रया वियुक्तश्च।
अविरलविलोलजलदः कालः समुपागतश्चायम्॥

इत्यादिकाव्यानुसन्धानबलात् आलम्बनोद्दीपनव्यक्तौ तदनुगुणस्य रोमाञ्चादेः दर्शनीयस्याविर्भावनेन व्यञ्जनीयस्य उत्कण्ठादेस्तत्कार्यप्रकटनेन च प्रकाशनात्।

अत्र तैः कृत्रिमत्वेन अतल्लिङ्गैरपि कृत्रिमत्वेनाज्ञानात् स्थायी रत्यादिरनुमीयते। सैव चानुमितिः सचमत्कारप्रतीतिरूपा चर्वणा। तया विषयीक्रियमाणः स्थायी रस इत्युच्यते। चर्वणा च सामाजिकानामिति तेष्वेव रस इति व्यवहारः।

ननु साक्षात्कार एव सचमत्कारो नानुमित्यादिरपि। अन्यथा सुखादावनुमीयमानेऽपि स स्यात्। यद्यपि वस्तुसौन्दर्यबलाद्रसनीयत्वेन स्थायिनामन्याऽनुमेयवैलक्षण्येन तदप्रसक्तिः; तथापि स्थायिनां नटेऽसत्त्वाद् बाधावतारेणानुमितिरेव कथं स्यादिति चेन्न। अभावनिश्चयाभावात्। स्थायितया सम्भाव्यमानत्वादिति।

तदपि नान्ये रोचयन्ते। 'प्रत्यक्षमेव ज्ञानं सचमत्कारं नानुमित्यादिरि'ति लोकप्रतीतिमवधूय अन्यथाकल्पने मानाभावात्। सूत्रस्यान्यथैव योजनसम्भवादिति काव्यप्रदीपकृत्।

किञ्च—रसस्य प्रतीतिः परगतत्वेन स्वगतत्वेन वा ? नाद्यः; स्वरसनीयत्वाभावेन सर्वदा रसस्य नटे रसोऽस्तीत्येवमाकारेण तटस्थत्वप्रसङ्गात्। न द्वितीयः; अनुमीयमानत्वचर्व्यमाणत्वयोर्विरोधात्। करुणे दुःखित्वप्रसङ्गेन तत्र प्रवृत्त्यभावप्रसङ्गाच्चेति।

किञ्च—नटेऽनुमीयमानो रत्यादी रसः ? सामाजिकनिष्ठं तदनुमानं वा ? नाद्यः; सामाजिकानामरसिकत्वापत्तेः; तत्रानुमितिमात्रसम्भवात्। नापरः; अनुमितेः सुखानात्मकत्वेन तद्दोषतादवस्थ्यात्। न च वेदान्तिमीमांसकयोर्जिज्ञास्यसुखत्वाङ्गीकृतिः; साक्षात्कारस्यैव तयोस्तत्राङ्गीकारेणानुमितौ तदयोगात्। एवं लौकिकरत्यनुमितेरपि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रसत्वं स्यात्। अनुकर्तरि अनुमीयमानस्य तस्यास-त्वोपगमेऽनुकार्ये वस्तुसतस्तद्व्याकोपात्। न च विभा-वादीनामुपायानामलौकिकत्वेन तदलौकिकत्वम्; असतस्तदनुपपत्तेः, धर्मिग्राहकप्रमाणस्यैव अलौकि-कत्वसाधनप्राप्तत्वादिति विस्तारिकाकृत्।

भट्टनायकरीत्या तु स्थायिनां विभावादिभिः संयोगाद्भोग्यभोजकभावसम्बन्धात् रसस्य निष्प-त्तिर्भुक्तिरिति सूत्रार्थः।

न च भोगपक्षेऽपि दोषावकाशः; भोगस्यालौ-किकत्वात्। तथाप्यन्यनिष्ठः स्थायी अन्यनिष्ठैरेव विभावादिभिः कथमन्येन भोक्तव्यः, अन्यथाऽतिप्रस ङ्गादिति चेदुच्यते।

शब्दात्मनः काव्यस्य त्रयो व्यापाराः—अभिधा, भावकत्वं भोजकत्वञ्च। तत्राऽभिधा निरन्तर-सान्तरार्थनिष्ठत्वेन द्विधा। भावकत्वं साधारणीक-णम्। तेन व्यापारेण विभावादयः स्थायी च साधा-रणीक्रियन्ते, अनुकार्यायत्वेन उपस्थाप्यन्ते। तच्च सीतादिविशेषाणां कामिनीत्वादिसामान्येनोपस्थितिः। स्थाय्यनुभावादीनां च सम्बन्धविशेषानवच्छिन्न-त्वेन उपस्थितिश्च साधारणीकरणम्। अन्त्यव्यापार-द्वयं नाट्येऽपि। एवं काव्ये नाट्ये वा द्वितीयव्या-पारेण साधारणीकृतैर्विभावादिभिस्तृतीयव्यापार-साहित्येन तथाकृत एव स्थायी भुज्यते।

भोगश्च सत्त्वगुणोद्रेकात् प्रकाशते य आनन्द-स्तत्स्वरूपा अनन्यालम्बना या संवित् तत्स्वरूपो लौकिकसुखानुभवविलक्षणः। सत्त्वरजस्तमसाँ गुणानामुद्रेकेण क्रमात् सुखदुःखमोहाः प्रकाश्यन्ते। सत्त्वोद्रेकश्च स्वेतरावभिभूयावस्थानमिति सांख्य-सिद्धान्तानुसारेण ज्ञेयः।

तदपि नान्येऽभ्युपगच्छन्ति। तादृशव्यापारद्वय-ल्पने प्रमाणाभावात्। भुक्तेर्ज्ञानातिरेकस्यानुभव-बाधितत्वेन निष्पाद्यमानस्य चाभिव्यक्तिपक्ष एवा-न्तर्भावान्न सम्यगिति काव्यप्रदीपकृत्। प्रकृतिव्यति-रिक्तस्य भोगशब्दार्थस्य निर्वक्तुमशक्यत्वादुत्प-त्त्यनङ्गीकारे रसस्य नित्यत्वप्रसङ्गात्। अभिव्य-क्त्यतिरिक्तस्यानङ्गीकारे रसस्यासत्त्वप्रसङ्गात्। उत्पत्त्यभिव्यक्त्यतिरिक्तपक्षसद्भावे प्रमाणा-भावात्।

अत्र पक्षे भावनोपनीतो रामादिरत्यादिश्चिदा-नन्दाख्यतासाक्षात्कारविषयो रस इति पर्यवस्यति। तत्र सम्भोगेच्छारूपस्य रामादिरत्यादेः सुखरूप-त्वाभावेनारसत्वम्, तस्य तदेकरूपत्वात्। न च सुखात्मकज्ञानविषयत्वेन तस्याः स्वाद्यता; प्रमाणा-भावात्।

किञ्च—रागसम्भेदे विद्वत्प्रकाशो न स्यात्, रागिणामेव काव्यनाट्यादिताश्चमत्कारात्। विर-क्तस्य तद्विरहाच्छब्दनिष्ठक्रमिकव्यापारत्रयस्य प्रामाण्यशून्यत्वादेव अत्रारुचिः।

भट्टनायकादिमतविवरणे पण्डितराजः—ताट-स्थ्येन रसप्रतीतेरनास्वाद्यत्वमात्मगतत्वेन च प्रती-तेरसम्भवः, शकुन्तलादीनां सभ्यान् प्रत्यविभाव-त्वात्। विभावमन्तराऽनालम्बनस्य रत्यादेरप्र-तिपत्तेः।

न च कान्तात्वं साधारणविभावतावच्छेदकम-त्राप्यस्तीति वाच्यम्; अप्रामाण्यनिश्चयानालिङ्गि-ताऽगम्यात्वप्रकारकज्ञानविरहस्य विशेष्यतासम्ब-न्धावच्छिन्नप्रतियोगिताकस्य विभावतावच्छेदक-कोटाववश्यं निवेश्यत्वात्, अन्यथा स्वस्मादेरपि कान्तात्वादिना तत्त्वापत्तेः। एवमशोच्यत्व-कापुरुष-त्वादिज्ञानविरहस्य तथाविधस्य करुणरसादौ तादृशज्ञानानुत्पादस्तु तत्प्रतिबन्धकान्तरनिर्वचन-मन्तरेण दुरुपपादः। [क्रमशः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भारतीया राजनीतिः-तात्त्विकं विवेचनम्

—पद्मभूषण श्रीपण्डितराज राजेश्वरशास्त्रि द्राविडः—

पण्डितराजैः लेखेऽस्मिन् भारतीयराजनीतेः मौलिकं तथ्यं संङ्क्षिप्तैरपि गभीरार्थैः शब्दैः युक्तिप्रमाणोपन्यास-पूर्वकमुपस्थापितं राजनयिकानां पथप्रदर्शनाय नूनं फलेग्राहि भवेदित्याशास्महे । —सम्पादकः

आधुनिकराजनीतिस्तु संवासिनामेव बहुमतेन केवलेन मन्त्रिसभासद्योग्यतां प्रतिपादयन्ती शत-प्रतिशतं मन्त्रिणां विद्वद्बहुमतैकवेद्ययोः चक्षुष्मत्व-शिल्पयोः, ज्ञातिबहुमतैकवेद्यानां कुलस्थानाव-ग्रहाणां, विषये उदासीना सती संवासिमात्रबहु-मतवेद्येषु बलसत्त्वारोग्यशीलास्तब्धताऽचापल्येषु षड्गुणेषु निर्भरमादधानैव दृश्यते ।

प्राचीनराजनीतिशास्त्राचार्या हि **नगरे पत्तने खर्वटे ग्रामे वा महति सज्जनाश्रये स्थानम्** इति सूचनानुसारेण सज्जनपदसूचितानां बलसत्त्वा-रोग्यादीनां पूर्वोक्तानां षड्गुणानां आश्रयेणैव नगर-खर्वट-ग्रामादीनां निर्मितिमवस्थितिं च सूचयन्ति । तदाश्रयणेनैव च गृहस्थानां धनिनां मानिनां मर्या-दावतां च रक्षणं भवति । स्पष्टमेतत् शतप्रतिशतं दुर्जना यत्र वसन्ति तत्र कथमपि सर्वात्मना देश-सेवकानामपि रक्षायाः सौकर्यं न संभवति इति ।

अनात्मवान् नयद्वेषी वर्धयन्नरिसंपदः ।
प्राप्यापि महदैश्वर्यं सह तेन विनश्यति ॥

इति पद्योक्तायाः स्थितेरेतादृश एव स्थाने प्रादु-र्भावो निश्चितः । एवं स्थिते महत्त्वाकाङ्क्षिणां शासनसभां प्रविविक्षूणां भारतीयराजनीतिज्ञानां आधुनिकराजनीतिज्ञानां च अविप्रतिपन्नोऽयमर्थः यत् शासनसभासदस्यत्वाभ्युपायो जनबहुमत-स्यार्जनमिति । तस्मिंश्च जनबहुमतार्जने बल-सत्त्वारोग्यशीलास्तब्धताऽचापल्यरूपाणां षड्गुणा-नाम् अव्यभिचरितं साधनत्वमित्यपि उभयोरविप्र-तिपन्नमेव वस्तु ।

२.

यथा **अस्तेयप्रतिष्ठायां सर्वरत्नोपस्थानम्, ब्रह्म-चर्यप्रतिष्ठायां च वीर्यलाभः** इति योगशास्त्रोक्ते सिद्धौ निश्चिते अपि तत्तत्फलोद्देशेन क्रियमाणत्वे तद्व्रतयोः स्वरूपमेव निघ्नतः परद्रव्येष्वभिध्यानस्य मानसस्तेयरूपत्वात्, वीर्यलाभोद्देश्यस्य **स्मरणं कीर्तनं केलिः** इत्यादिरीत्या ब्रह्मचर्यस्वरूपविघातकत्वाच्च । तथैव जनबहुमतसंग्रहणाय निर्दिष्टानां षड्गुणानाम् आचरणमपि आस्तिक्यपूतेन अन्तःकरणेन कृतमेव स्थायिफलसंपादनक्षमं भवति । अन्यथा तु नेति आमनन्ति नीतिशास्त्रकाराः । अत एवोक्तम् —

स्वाम्यमात्यश्च राष्ट्रं च···

एतावदुच्यते राज्यं सत्त्वबुद्धिव्यपाश्रयम् ।

आलम्ब्य बलवत्सत्त्वम्··· इत्यादि ।

एवंरीत्या अपेक्षितस्य सत्त्वगुणस्य, लक्षणानि मानसरोगचिकित्साप्रसङ्गे आयुर्वेदशास्त्रकारैः निर्दिष्टैः सत्त्वादियुक्तमनोलक्षणैः स्फुटीभवन्ति । तथा हि, तत्र सत्त्वयुक्तस्य—

आस्तिक्यं प्रविभज्य भोजनमनु-
ष्ठापश्च तथ्यं वचो
मेधाबुद्धिधृतिक्षमाश्च करुणा
ज्ञानं च निर्दम्भता ।
कर्मानिन्दितमस्पृहं च विनयो
धर्मः सदैवादरा-
देते सत्त्वगुणान्वितस्य मनसो
गीता गुणा ज्ञानिभिः ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रजोयुक्तस्य तु—

क्रोधस्ताडनशीलता च बहुलं
दुःखं सुखेच्छाधिका
दम्भः कामुकताऽप्यलीकवचनं
चाधीरता दुष्कृतिः।
ऐश्वर्यादभिमानिताऽतिशयिता-
ऽऽनन्दोऽधिकश्चाटनं
प्रख्याता हि रजोगुणेन सहित-
स्यैते गुणाश्चेतसः॥

एवं तमोयुक्तस्य—

नास्तिक्यं सुविषण्णताऽतिशयिता-
ऽऽलस्यं च दुष्टा मतिः
प्रीतिर्निन्दितकर्मशर्मणि सदा
निद्रालुताऽहर्निशम्।
अज्ञानं किल सर्वतोपि सततं
क्रोधान्धता मूढता
प्रख्याता हि तमोगुणेनसहित-
स्यैते गुणाश्चेतसः॥ इति।

(भावप्रकाशे)

तत्र नास्तिक्यस्य तमःसूचकत्वम्, अभिमानस्य रजःसूचकत्वं च निर्दिश्य यदुच्यते तत्र कारणं पूर्वोक्तेषु षड्गुणेषु नास्तिक्यस्य, **'हितसाधनता भ्रमजन्यप्रवृत्तिः' परस्परविरुद्धार्थबुद्धीनामव्यवधानेनोत्पत्तिः' 'आत्मप्रकाशनपरा चेष्टा'** इति अन्यतमात्मकस्य चापलस्य साहित्यशास्त्रविद्भिः आन्वीक्षिकीपरिभाषया व्याख्यातस्य जगद्बहुमतसम्पादक षड्गुणान्तर्गतस्य षष्ठगुणस्य विघातकत्वम् 'अभिमानिताऽतिशयिता' इति व्याख्यातस्य रजोगुणस्य बहुमताधानहेतोः पूर्वोक्तषड्गुणान्तर्गतस्य पञ्चमस्य अस्तब्धतागुणस्य विघातकत्वं चेति स्पष्टमेव सहृदयानाम्।

अतः सिद्धमेवैतत् सर्वेषामपि महत्वाकाङ्क्षिणाम् आधुनिकानां पुरातनानामपि च आस्तिक्यसहभूतानाम् एतेषां षड्गुणानाम् आश्रयणमेव ईप्सितोपायः। तच्च एतस्य षट्कस्य सम्यगनुष्ठानेनैव भवति।

सोऽयं गुणषट्करूपो धर्मः वर्णाश्रमधर्मात्मक एव भवतीति हेतोः—**वर्णाश्रमाचारस्थितिलक्षणत्वाच्च लोकयात्रायाश्चरेद् धर्मानीति वात्स्यायनः** इति कामसूत्रांशं व्याचक्षाणेन जयमङ्गलाकृता निम्नलिखितग्रन्थेन व्यवस्थापितः—

'वर्णा ब्राह्मणादयः, आश्रमा ब्रह्मचर्यादयः गार्हस्थ्यादयश्च, तेषामाचारः स्वधर्मः, तस्य स्थितिर्व्यवस्था, सैव लक्षणं यस्याः लोकयात्रायाः, सा लोकायतिकैः मा भूदव्यवस्थायां मात्स्यो न्याय इति दृष्टार्थं वर्णिता 'संवरणमात्रं हि लोकयात्राविदः' इति। तां च लोकविश्वासनार्थम् आचरद्भिः कथं नाचरितो धर्मः? दृष्टार्थश्च यद्यदृष्टार्थोऽपि स्यात् को विरोधः?' इति।

त्रयी तत्रापि मघवन् लोकपक्तिप्रयोजना।

इति अर्थशास्त्रगतजयमङ्गलावचनमपि तत्र प्रमाणम्। इदमेव तथ्यं हृदयमङ्गीकृत्य—

स्नेहं दयां च सौख्यं च यदि वा जानकीमपि।
आराधनाय लोकस्य मुञ्चतो नास्ति मे व्यथा॥

(उत्तररामचरितम् १.१२.)

इति भगवतो रामचन्द्रस्य मुखेन महाकविर्भवभूतिर्व्यनक्ति। वैदिकधर्मानुसारेण हि—

भूमिर्धेनुर्धरणी लोकधारिणी।
उद्धृतासि वराहेण कृष्णेन शतबाहुना।

(नारायणोपनिषद् ३८)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इति वैदिकमन्त्रे धेनुधरण्योः समेव देवतात्वमाश्रित्य लोकाराधनं गोरक्षणं च जनबहुमतस्यावर्जकं देवताराधनरूपत्वात् वेदविहितो धर्म इति भारतीयराजनीतिज्ञा आमनन्ति।

पाश्चात्यराजनीतिस्तु उभयस्मिन्नप्यस्मिन् धर्मे परलोकसम्बद्धे न विश्वसिति। तथा च पूर्वोद्धृतयोः अस्तेयब्रह्मचर्यव्रतयोः ऐहिकमात्रोद्देशेन कृतयोर्व्यर्थत्ववत् पूर्वोक्तस्य गुणषट्कस्य परमेश्वराराधनरूपेण अननुष्ठितत्वे स्थायिबहुमतस्यार्जनावर्जकत्वविघातकमेव लभमाना सेयं पाश्चात्यराजनीतिर्व्यर्था भवति। विशेषतश्चेदं स्थायिसन्धिविचारप्रसङ्गे 'शांति का अग्रदूत' इति ग्रन्थे अस्माभिर्निरूपितम्। 'उत्कोचप्रवृत्तेः सर्वत्र व्यापकता समभूत्, तस्या अपसारणोपायः कः? अर्थप्रधानेषु धनिकेषु कृपणेषु विद्यमानेषु अन्येषां सामान्यजनानाम् आपत्तिपरिहारार्थं समाजवादस्य प्रचारणमुचितं न वा? शिष्टपरिपालनस्य दुष्टनिग्रहस्य च अशक्यावस्थायाः परिहारः कथं कर्तव्यः? महर्घतानिरासः, अन्नसमस्यायाः समाधानं च कथं भवेत्?' एतादृश्यः सर्वा अपि समस्या एतन्मूला एव।

पूर्वोक्तानां षण्णामपि गुणानाम् अन्येषां च राजनीत्युपयुक्तगुणानां सर्वेषां निष्कर्षो नीतिशास्त्रे—

त्यागः सत्यं च शौर्यं च त्रय एते महागुणाः।
प्राप्नोति हि गुणान् सर्वानेतैर्युक्तो महीपतिः॥

(का० नी० ४.२३)

इति प्रतिपादितः। तत्र त्यागात् आश्रयेप्सुभिः अभिगम्यते, यथाप्रतिज्ञातकारित्वेन सत्येन च सद्भिः, शौर्याच्च परचक्राक्रमणाद् देशस्य रक्षया सर्वैरिति निष्कर्षस्तद्व्याख्यातृभिर्दर्शितः—

तथा हि—'एवं मन्यते—त्यागादाश्रयेप्सुभिः तावद् अभिगम्यते, सत्यव्रतत्वात् स्वमण्डलस्य पालयिता, शौर्यात्तु लब्धप्रतापः परमण्डलस्य विजेतेति सर्वमुपपन्नम्, यतः परिशिष्टानां गुणानाम् एतावदेव प्रयोजनमिति।

(का० ज०)

अभयं सत्त्वसंशुद्धिर्ज्ञानयोगव्यवस्थितिः।
दानं दमश्च यज्ञश्च स्वाध्यायस्तप आर्जवम्॥
अहिंसा सत्यमक्रोधस्त्यागः शान्तिरपैशुनम्।
दया भूतेष्वलोलुप्त्वं मार्दवं ह्रीरचापलम्॥
तेजः क्षमा धृतिः शौचमद्रोहो नातिमानिता।
भवन्ति संपदं दैवीमभिजातस्य भारत॥

(भगवद्गीता १६-१, २, ३)

इति वदन्ती गीता पूर्वोक्तगुणत्रयस्यापि उत्पत्तिं दैवीं संपदं वदति। अन्यत्र च—

दम्भो दर्पोऽभिमानश्च क्रोधः पारुष्यमेव च।
अज्ञानं चाभिजातस्य पार्थ संपदमासुरीम्॥

(भगवद्गीता १६.४)

इति आसुरीं सम्पत्तिं वदति। अत आस्तिक्यसहभाविन एते त्रयो गुणाः पूर्वोक्तसकलगुणहेतवः कथमपि दृष्टिपथात्तिरोधातुं न शक्यन्ते बुद्धिमता।

तत्र त्यागसत्वयोः संक्षिप्तेऽस्मिन् व्याख्याने यथोचितं फलमुपवर्णितम्। शौर्यस्य च

शौर्यं भवेदनुद्भूतभयं युद्धे प्रवर्तनम्।

इति प्रतिपादितस्य हतो वा प्राप्स्यसि स्वर्गं जित्वा वा भोक्ष्यसे महीम् इति शास्त्रमात्रगम्यास्तिक्यस्य स्वभावमात्रकृतत्वात्—

आहारेष्वथ योनौ च बीजे कर्मणि चापि यः।
शुचिः कृच्छ्रगतस्यापि न पापे रमतेऽस्यधीः॥

इति जयमङ्गलोक्तं स्वरूपं न विस्मरणमर्हति।

"स्मृतिमन्तो भक्तिमन्तः कृतज्ञाः प्रज्ञाः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शुचयो महोत्साहा दक्षा धीराः समरविक्रान्त-योधिनः त्यक्तविषादाः सुव्यवस्थितगतिगम्भीर-बुद्धिचेष्टाः कल्याणाभिनिवेशिनश्च सत्त्व-साराः, एषां स्वलक्षणैरेव गुणा व्याख्याताः।

(चरक, वि० ८.१२)

इति चरकवचनदर्शनात् आयुर्वेदोऽप्यमुमर्थं समर्थयते। वस्त्यास्य विषयस्य विस्तरस्तु अस्माभिः प्रणीते 'शांति का अग्रदूत' इति ग्रन्थे साङ्ग-वेदविद्यालयविवरणे च ततो द्रष्टव्यतामर्हति।

अत्र शौर्यगुणस्य प्रसङ्गात् परचक्राक्रमणतो वर्तमाने 'अणुबम' (Atom Bomb) युगे कथं देशरक्षा भविष्यतीत्ययं विषयो भारतीयराजनीति-दृष्ट्या किञ्चिदिह विमृश्यते।

आधुनिक - भौतिकशास्त्रदृष्ट्या "लाइटनिंग-कंडक्टर्स" (Lightning Conductor) इति पदा-भिलप्यं विद्युन्निवारकं यन्त्रं, तावत् लोकप्रसिद्ध-मेव। सूक्ष्माग्रस्य तदीयशूलस्य वातावरणोपरि स्थापितस्य समीपे विद्युज्जागृतस्य मेघस्यागमने सति "एलेक्ट्रोस्टाटिक् इण्डक्शन् (Electrostatic Induction) इति पदाभिलप्येन विद्युत्प्रवर्तनेन स्वल्पतमसूक्ष्मपरिमाणेन उत्पन्ना विद्युच्छक्तिः तत्संसृष्टे वायौ सजातीयां विद्युतमुत्पाद्य तत्प्रति-क्षेपेण विद्युद्युक्तं महाकायमपि मेघमपसारयति। कदाचित् ततः पूर्वमेव विद्युदुत्सर्जने जाते तु तामाकृष्य भूमावन्तर्धत्ते, तदेव यन्त्रमिति वयं पश्यामः।

एवं स्थिते भारतीयार्थशास्त्रेण दुर्गनिर्माण-प्रसंगे बहुविधानि शूलानि दुर्गाद् बहिः स्थापनीया-नीति यदुच्यते तत्रायं न्यायो योजियतुं शक्यः। "आटमबम"स्य (Atom Bomb) प्रलयकारि भयंकरं रूपं हि मेघवत् बाष्पीभावावस्थायां विद्युदाविष्टेषु कणेषु" एक्सरे (X-Ray) किरणवत् "गामा" (Gama Ray) किरणानां परिणामेनैव भवतीति वक्तव्यम्। तत्र 'एलक्ट्रान्' (Electron) 'प्रोटन' (proton) संज्ञकानां विद्युदा-विष्टानां कणानां पाश्चात्त्यपरिभाषया 'आयन्स्' (Ions) भूतानां प्रतीकारस्तु सीमायां 'सीग्-फ्रीड्' (Seighfreied Iine) 'मैजिनो लाइन' (Maginot Line) वत् कृताभिः दुर्गपंक्तिभिः भवितुमर्हति। सजातीयविद्युत्कणरूपाणां आयुधानां परिक्षिप्तानां तत्सजातीयविद्युत्कणाविष्टत्रिशूलैः—कण्टकप्रतिसरैः लोहमयैः यथाविधि पूर्वमुपवर्णितैः तेषां तथाविधि संस्थापनेन भवितुमर्हति। 'न्यूट्रन्' (Neutron) पदाभिलप्यानां संहारकार-काणां कणानां च 'वैद्युतेन भस्मना मृत्संयुक्तेन करकवारिणा अवलिप्तं च' इति अर्थशास्त्र-तदीय-व्याख्यापर्यालोचनेन अवगन्तुं शक्यते। तथा हि—

'न तत्रान्योऽग्निर्ज्वलति, अन्योऽपि वैद्युतो-ऽग्निर्नास्मिन् प्रभवतीति। वैद्युतेनेति, वैद्युतो-ग्निस्तज्जेन भस्मना मृत्संयुक्तेनावलिप्तं च। अन्योऽग्निर्मानुषो दिव्यो वा न दहति इति वर्तते।'

इति तदीयजयमङ्गलायां निर्दिश्यते। तत्र 'परमाणुभट्टी'—संज्ञके स्थले 'ग्रफाइट् सीमेंट कांक्रीट' (Graphite Cement Concrete) निर्मित-भित्तिद्वारा प्रलयकराणां किरणानां निवारणं यदाधुनिकैः सिद्धान्ततमनुष्ठीयते, तदेव 'ग्रफाइट्' (Graphite) पदाभिलप्यमेव 'वैद्युतेन भस्मना' इत्यनेन 'सीमेण्ट कांक्रीट' (Cement Concrete) सूचकेन मृद्भस्मना करकवारिणा इति पदेन च सूच्यते इति वयं पश्यामः। वैज्ञानिकैः सूक्ष्मेक्षिकया अवधातव्यमिति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

छत्रविशेषनिर्माणद्वारा 'परमाणुबम'तः (Atom Bomb) संरक्षणं भवितुमर्हति इत्यधुना 'आज' पत्रे २९-८-६६ दिनांके 'भारत के संरक्षण का एकमात्र उपाय' इति शीर्षकेण उमाशङ्करसिंह-महोदयद्वारा लिखितं दृश्यते।

स्वयं प्रयोगं कर्तुमशक्नुवानेन सामान्यनियमाननुसृत्य विचारार्थमुपक्षिप्तोऽयं विषयः यावत्प्रयोगद्वारा न परीक्षितः स्यात्, तावत्पर्यन्तं यद्यपि सिद्धतया न वक्तुं शक्यः तथापि तर्कमात्रेण सम्भावितोऽयं विषयः।

एवं रीत्या सीमारक्षायां सुसाधितायां आकाशयुद्धे 'बम' (Bomb)-वर्षणमपि विद्युत्प्रतिरोधकचर्ममयावरणसम्पादनेन भवतीति सूचितमर्थशास्त्रे तत एव द्रष्टव्यम्।

परंतु :—

अत्युच्चाः परितः स्फुरंति गिरयः
स्फारास्तथाम्भोधयः
तान् सर्वानपि बिभ्रती किमपि न
श्रान्तासि तुभ्यं नमः।
आश्चर्येण मुहुर्मुहुः स्तुतिमिति
प्रस्तौमि यावद्भुवः
तावद् बिभ्रदिमां स्मृतस्तवभुजो
वाचस्ततो मुद्रिताः॥

इति न्यायेन काश्मीरयुद्धे भारतीयवीरैः प्रदर्शितस्य शौर्यस्याभावे तु व्यर्थमेव। निष्कर्षस्तु इयानेव यदेतत्सर्वमद्य सिद्धं सिद्धचमानञ्च तर्कबलेन ज्ञातुं शक्यमिति भारतीयराजनीतिज्ञानन्तु आवश्यकमेव तेन सह तर्कशास्त्रज्ञानं तदर्थञ्च तर्कविद्या प्रसारोऽप्यावश्यक एव। आशासे यद्भारतीया विद्वांसोऽत्र अवधास्यन्तीति।

★

रस-स्वरूप विमर्शः [७७ पृष्ठस्य शेषांशः

न च स्वात्मनि दुष्यन्ताद्यभेदबुद्धिरेव तथेति वाच्यम्; नायके पुरुषधौरेयत्व-धीरत्वादेरात्मनि चाधुनिकत्वादेर्वैधर्म्यस्य स्फुटं प्रतिपत्तेरभेदबोधस्यैव दुर्लभत्वात्।

किञ्च—केयं प्रतीतिः? प्रमाणान्तरानुपस्थानात् शाब्दीति चेन्न। व्यावहारिकशब्दान्तरजन्यनायकमिथुनवृत्तान्तवित्तीनामिव अस्या अपि अहृद्यत्वापत्तेः। नापि मानसी; चिन्तोपनीतानां तेषामेव पदार्थानां मानस्याः प्रतीतेरस्या वैलक्षण्योपलम्भात्। न च स्मृतिः; तथा प्राग्ननुभवात्। तस्मादभिधया निवेदिताः पदार्थाः भावकत्वव्यापारेण अगम्यत्वादिरसविरोधिज्ञानप्रतिबन्धद्वारा कान्तात्वादिरसानुकूलधर्मपुरस्कारेण अवस्थाप्यन्ते।

अत्र भावकत्वव्यापारस्य नवीनस्य स्वीकारः भोगव्यञ्जनया अज्ञानावरणमपसार्य सत्त्वोद्रेकाद्भग्नावरणचिद्विशिष्टो रत्यादिः भग्नावरणचिदेव वा यथा रसत्वेनास्वादविषयीक्रियते तथा भोजकत्वव्यापारेण सत्त्ववृद्धौ सत्यां निजचित्स्वभावनिर्वृत्तिलक्षणेन साक्षात्कारेण विषयीकृतो रत्यादिरेव रसत्वेनाभ्युपेयते। ततश्च भोजकत्वं व्यञ्जनास्थानीयम्।

अन्यैस्तु—रसोत्पत्तेः पूर्वं शकुन्तलादिषु दुष्यन्तादे रतौ व्यञ्जनया गृहीतायां सहृदयतोल्लासितभावनाविशेषरूपदोषस्य महिम्ना कल्पितदुष्यन्तत्वावच्छादिते स्वात्मन्यज्ञानावच्छिन्ने शुक्तिवाद्यां रजतमिव समुत्पद्यमानोऽनिर्वचनीयः साक्षिभास्यः शकुन्तलादिविषयकरत्यादिरेव रसः। स्वोत्तरभाविना लोकोत्तराह्लादेन भेदाग्रहात् स सुखपदव्यपदेश्यो भवति, स्वपूर्वोपस्थितेन रत्यादिना भेदाग्रहाद् रतित्वेन एकत्वाध्यवसानाद्वा व्यंग्यो वर्णनीयश्चोच्यते। (क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पिकविलापः

— श्री त्र्यम्बकः कविवरः —

१. प्रमोदलहरीर्हरन्मनसि गोपिकानामिह
स्वभावमधुरस्वनान्वितमिलिन्द- वृन्दाकुले ।
सकुन्द सुमनोरजः-सुरभिगन्धवाहे वने
मुकुन्द-मुरलीध्वनि-र्हरतु मामकीनं मनः ॥

२ हरन्ति सन्तः कवयो निरन्तरं
लसन्तमन्तःकरणस्य दूषणम् ।
सरस्वती यद्रसनाङ्गणे गुणै-
श्चिरं विरन्तुं सरसा रसामले ॥

३ प्रकाममेतत् कविवर्ण्यतां गता
प्रसूनसंस्था किल माधवीरुचिः ।
वनप्रियामोदरसप्रसारतः
कथं समाकर्षति मानसं न सा ॥

४. परं पिकानामपि काऽस्तु दुष्कृति-
र्यतोऽद्य वाचंयमतामितश्चिरम् ।
सवेणुवाद्ये शिखिनृत्तकौशले
विहाय तैर्गीतमहो फुतो गतम् ॥

५. न कोकिलानां किल कापि दुष्कृतिः
कलेरिदं स्यादपकारकं फलम् ।
क्वचित् खलानां स्खलनैरिह व्यथा
मुधा बुधैरप्यनुभूयते यतः ॥

६. विलोक्य लोके मधुशोभया भयाद्
रसालसालं परभृत्कुलाकुलम् ।
पलायितेनाद्य पिकेन केनचिद्
विलप्यतेऽस्राकुलितेक्षणं क्षणम् ॥

७. कृतं रसालेन रसाप्यसौननः
ससारतामेति पदार्पणे कथम् ।
यतोऽद्यमाने कवयोरसारता
गता मृषा तथ्यविवेकशून्यताम् ॥

८. 'स्वयं वयं किञ्च कलस्वराः पिकाः ?'
इति ब्रुवाणैः परमात्मघोषताम् ।
यदि श्रिताश्चूतगतैः समानतां
न तानिता स्यादविवेकिता कुतः ॥

९. अमन्दसारा रसवृन्दवर्णने-
ऽप्यतीव पात्रं किल भारतीरतेः ।
अदर्पतां येषु समाश्रिताः स्तुता
महानि हा ! सत्कविभिर्गतानि तैः ॥

१०. असूत्यकाव्योडुवशादिदं जगत्
तमोविमोहावृतमुज्ज्वलं यदि ।
अलं सुधासारयुतामित - प्रभा-
लसन्महाकाव्य - विधूदयाशया ॥

११. 'कृतं कृतं कोकिलकूजितैर्जितं
जितं धृतालापबलैर्बलिद्विजैः ।
तलेऽखिलेऽप्यत्र खिलीकृते खलैः
सतां सतामर्हणया द्रुतं द्रुतम् ॥

१२. 'विरच्य वाग्जालमनल्प - जल्पनं
कयापि शक्त्याऽऽन्तरया स्यादपि ।
पदार्थबोधेऽप्यबला विलोक्यतां
प्रयान्ति सन्तः कविनामवाच्यताम् ॥

१३ 'यान्कीर्तिरेत्य कवितासु कृतानुरागान्
याता दिगन्तमनु मानकषायितेव ।
स्याद् भूषितं किमु समुज्ज्वलबोधसान्द्रै-
स्तैर्हन्त भूतलमिदं न पुनः कवीन्द्रैः ॥'

१४. इत्थं पिको बहु विलप्य विलुप्ततेजाः
कालक्रमात् कविरुदेष्यति कोऽपि विद्वान्
सत्पक्षपातनिरतः किमिति प्रतीक्षा-
दक्षो मुधा धृतमुनिव्रतभारमास्ते ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्षत्रपति-महाकाव्यम्

—श्री उमाशंकर शर्मा त्रिपाठी—

[आंग्लभाषा-प्राध्यापकः—काशी-विद्यापीठम्, वाराणसी]

॥ अथ षोडशः सर्गः ॥

[विनिष्क्रान्तकारः क्षत्रपतिः स्वबलवृद्धये षाड्गुण्यं सेवमानः रिपुवशगां स्वदुर्गतां पुनरधिकृत्य सिंहगढ़दुर्गमपि चूड़ामणिमिव बलवतां स्वबालबन्धोः पुण्यधाम्नः तानाजि-मालुसरे-सेनापतेः शौर्यात् रिपुकुलमवजित्य जितवान् । अस्मिन् सर्गे तानाजि-पराक्रमो वर्णितः । तद्यथा—।]

देहलीशमवधूय लीलया
[1]शाहिसूनुरथ सूनुविक्रमः ।
वर्धयन् बलमरातिसूदनं
निश्चलोऽप्यरिमनांस्यचालयत् ॥ १ ॥

निर्गते निगडनिग्रहाच्छिवे
कूटवर्त्मपरमस्य वैरिणः ।
व्याहतप्रभमनोरथोऽशिवं
सर्वतः प्रसृतमैक्षतात्मनि ॥ २ ॥

शस्त्रिणां शतमखोपमप्रभं
दत्तजीवमपि भूपभूतये ।
दुर्दशैव जयसिंहमाश्रयत्
गर्हितैव किल जिह्मभृत्यता ॥ ३ ॥

आर्यसम्पदुदयायतिर्ध्रुवं
तस्य शान्तनवतेजसो लयः ।
विद्विषोऽपि गुणवर्तिनं शिवं
मारुतिध्वजमिवान्वतापयत् ॥ ४ ॥

भूभृदात्मभिदुराभिरन्वितो
वाहिनीभिरिव वाहिनीपतिः ।
शासनाय परिबृंहितोद्यमो
विद्विषामयतताऽनयात्मनाम् ॥ ५ ॥

साऽभिचारगुणरागमागरा[2]
छद्मजालमवचिन्त्य निष्फलम् ।
निस्त्रपा शिवमनन्दयद्द्रुतं
स्वैरिणीव कलजल्पितैर्मुहुः ॥ ६ ॥

तत्तथैव समयाऽऽग्रहात्मना
स्वीकृतं सुकृतिनाऽनुबन्धनम् ।
निश्चितं तदवधौ समुत्सुका
तच्च भूपचयमाप काङ्क्षितम् ॥ ७ ॥

नाशकद् यमनुशासितुं बलैः
सख्यसन्धिललितैः छलैरपि ।
तं शठोऽयतत कृत्रिमाग्रहैः
क्रोडवर्ङ्ग[3]नृपसन्निभः श्रुतः ॥ ८ ॥

शत्रुपुत्रमतिदक्षिणं क्रमाद्
विश्रुतार्जवगुणं गुणस्थिरा ।
वाहिनी शिवनिदेशपालिनी
संश्रिताऽपि तमरातिमस्मरत् ॥ ९ ॥

अस्थिरासनवतोऽवतोऽर्वनि
भूभृतो मनसि शङ्किते ततः ।

---

१. शाहजी भोसले, जनकः शिवभूपतेः । २. आगरा, राजधानी दिल्लीपतेः । ३. औरंगजेबः मुगलनृपः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आत्मजादपि समाविशन् भियो
द्वेषजर्जरधियां क्व वा स्थितिः ॥ १० ॥
इङ्गितैः समवगत्य मन्त्रितं
भोसलेपतिरुपासितेश्वरः ।
पूर्वमेव सबलच्छलग्रहा—
दार्यराज्यमुपसीममाविशत् ॥ ११ ॥
नूनमस्तधिषणैव देहली
शङ्कते यदि निजौरसोदयम् ।
पूर्वजाऽभ्यसितवर्त्मसत्क्रियो
वष्टि को न कुलजः परम्पराम् ॥ १२ ॥
षड्गुणान् गुणिनि वीक्ष्य संश्रितान्
शक्तयस्तदनुगाः स्तमन्वगुः ।
सोऽप्युपायपरमः प्रजापति-
स्तान् पुपोष नयनन्दिता शिवः ॥ १३ ॥
सुव्रतादितिरिवैकदा प्रसू
रायदुर्गशिखराट्टवर्तिनी ।
'कोण्डना'मरिनिकारमूर्च्छितां
वीक्ष्य नाक्षमत धैर्यमात्मनि ॥ १४ ॥
सत्वरं तदनुतापनिर्भरे-
ऽकालमेघमलिने मनोऽम्बरे ।
काऽपि विद्युदिव युक्तिरद्भुता-
ऽराजत स्मितमुखेन सिद्धिदा ॥ १५ ॥
तन्मनोरथपदानुगो यथा
सद्य एव ददृशे पुरः सुतः ।
तां वहन् सुकृतसम्पदं हठात्
सादरं स्वशिरसेव मातरम् ॥ १६ ॥
मानसव्यसनमेकनिश्चया
शोधितुं व्यसनवर्त्मनैव सा ।
अक्षदेवनविधौ मनस्विनी
पुत्रमादिशदनल्पविस्मयम् ॥ १७ ॥
क्रीडनग्लहमिवाक्षसङ्करे
लब्धुमेकवरमात्मकाङ्क्षितम् ।
घोषितो जितजनाज्जयी द्वयोः
कौशलाग्रहपुरस्क्रियोपमम् ॥ १८ ॥
विस्मयाम्बुधिनिमग्नमात्मजं
सा जिगाय सरलं यशोधरा ।
पूर्वरङ्गमिव तद्विविच्य सो
वस्तुनि व्यतनुतोत्तरे स्पृहाम् ॥ १९ ॥
तारकारिमिव साऽऽह पुत्रिणी
तत्क्षणं सुतमुदारदर्शना ।
'विस्तृतेऽपि वद दुर्गमण्डले
दुर्गता तनय केन मेऽधुना' ॥ २० ॥
कृत्स्नमेव गजवाजिराजितं
त्वत्पदाब्जकरुणाऽर्णवायति ।
किन्न राज्यमिदमम्ब ! तावकं
ब्रूहि वा कमिह दुर्गमीहसे ॥ २१ ॥
मेऽद्य नूनसुदिताशिषोऽसवः
स्वेहितैर्यदनुकम्पसे जनम् ।
मारुतेरिव निदेशवर्तिन-
स्त्वत्कृते मम किमस्ति दुष्करम् ॥ २२ ॥
कोण्डनां तदनु कामनामिव
प्राप्तुमेकवचना जिजावती ।
भाववर्णमिव तन्मुखाङ्कितं
व्यक्तमापठितुमैक्षत स्थिरम् ॥ २३ ॥
सस्मिताधरकपोलमण्डलो
मण्डलेशमदखण्डनः शिवः ।
'एवमस्तु' कथयन्नुपास्पृशत्
तावदेव जननीपदाम्बुजम् ॥ २४ ॥
व्रीडितोऽस्मि पुरतस्तव ध्रुवं
कोण्डना यदधुनाऽपि नोद्धृता ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

निश्चितं जननि वैरवर्मणां
सेवमेतु सुखशर्वरी क्षयम् ॥ २५ ॥
दुर्बलेषु शठसाहसोद्यमात्
स्वायुषे हि विरमन्तु जिह्मगाः ।
मत्कृपाणशिवधारमज्जिताः
मज्जिता दधतु तेऽथवा रतिम् ॥ २६ ॥
वारयोषिदुपचारजीविनो
नूपुरस्वननिलीनचेतसः ।
तुन्दिला अपि सपत्ननायका
मेदसामनुभवन्तु शोषणम् ॥ २७ ॥
आत्मजोपयमयानदीक्षितं
मित्रमालसुरसार्यरक्षिता ।
कोण्डनाविजयकीर्तिलब्धये
सादरं प्रणिधिना समाह्वयत् ॥ २८ ॥
तत्क्षणं नृपसभौ समागतः
प्रीतिमान् कृतकमन्युदुर्मनाः ।
आक्षिपन् कलहकौतुकोम्भितै-
स्तं वचोभिरपवारितोत्सवम् ॥ २९ ॥
देवमातरमसौ जिजावतीं
श्रद्धया समभिवाद्य वत्सलाम् ।
मातृभक्तपरमां निजस्थितिं
तन्निदेशमहितामिवाश्रयत् ॥ ३० ॥
कोण्डनामुदयभानुशासना-
दौग्रसेनिनिगडादधोक्षजः ।
दैवकीमिव न मोचये यदि
मास्तु मे जननि वीरसत्क्रिया ॥ ३१ ॥
सुव्रतद्विजकुलाय सुव्रताः
गृष्टयोऽभिनववत्सदृष्टयः ।
साक्ष्यमुज्जगुरुदारदर्शना—
स्तस्य सूनुजननोद्भवश्रियः ॥ ३२ ॥
शूरपञ्चशतसंख्यकाग्रणी
गूढवर्मपदनिर्जितध्वनिः ।
सोऽर्धरात्रमवधानविग्रहः
श्रेयसेऽकलयदन्धशार्वरम् ॥ ३३ ॥
सम्पदाऽपि गुणकर्मणां तमो
द्रव्यजातिपदवीं न रोहति ।
नूनमन्यवशगो दयायते—
र्नानुपङ्क्तनियता पदार्थता ॥ ३४ ॥
नाम शेषमिव तेजसां कुलं
कर्तुमेव तमसामनीकिनी ।
अर्कमिन्दुमवजित्य सानलं
चाक्षुषं हरति धाम साम्प्रतम् ॥ ३५ ॥
सा नभस्यनवमेचकाम्बरे
निद्रिता स्फुटपयोधरच्छविः ।
मारुतश्वसितजीवलक्षणा
शर्वरी पिहिततारका बभौ ॥ ३६ ॥
श्वापदप्लवगविष्किरव्रजं
भूतजातमिव विभ्रदात्मनि ।
तत्त्वतोऽभिनयतीव सङ्क्षयं
शालमलिर्विधिरिवागमे निशः ॥ ३७ ॥
अन्धकारबहले दुरापदि
विघ्नपङ्कविषमे हि कापथे ।
लक्ष्यलुब्धनयनान् शुभायतिः
सत्वसंविदयना परीक्षते ॥ ३८ ॥
सा समर्थशतपञ्चसैनिका
पञ्चतामिव चमू द्विषत्कुले ।
सप्तुमुत्सुकविविक्तपद्धति—
र्दुर्गपृष्ठवनराजि-मैक्षत ॥ ३९ ॥
कल्पनोल्लसितशत्रुमानसं
वेपयन् दुरधिरोहभित्तिभिः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शार्वरस्य तमसोऽवधीरणां
कम्पितारितिमिरैः प्रमाणयन् ॥ ४० ॥
स्वापमूर्च्छितनिशेषु रक्षिषु
सत्वरक्षितविधिः स्वयं विभुः ।
केवलां सहभुवां परम्परां
पालयन् निशितशस्त्रशस्त्रिभिः ॥ ४१ ॥
शैलशीर्षरचितासनो दिवं
वीजयन्ननिशलोलकेतुभिः ।
ख्यापयन्निव सपत्नमोघतां
खेचरान् रचितवन्ध्यचापलाम् ॥ ४२ ॥
आहतारिजनकीर्तितौजसः
कौशलोद्यममपीष्टसिद्धिदम् ।
मावलेभटपतेः परीक्षितुं
दुर्गतातिशयमाश्रयन्निव ॥ ४३ ॥
सिंहदुर्ग इति दुर्गधूर्धरो
विश्रुतोऽक्षतशरण्यगौरवः ।
भूषणायितमहासिधारिणां
शस्त्रिणामुपहसन्निव श्रमम् ॥ ४४ ॥
झिल्लिकारवभरेण वर्जयन्
प्राकृतानतिमनुष्यकर्मणि ।
साहसोत्सुकभटैरदृश्यत
सानुमानिव धरावयस्स्थितिः ॥ ४५ ॥
सिंहदुर्गमवलोक्य तं वली
सिंहदुर्गमपथाऽब्धिपारगः ।
मावलेभटपतिश्चतुश्शतान्
सैनिकाननुजवर्तिनोऽकरोत् ॥ ४६ ॥
गोधिकां क्षणरहस्यवेदिनीं
पूर्वसिद्धगुणकीर्तिविग्रहाम् ।
दुर्गभित्तिविषमोच्छ्रितेः क्रमा—
ल्लाघवैर्विदधतीं तिरस्क्रियाम् ॥ ४७ ॥
तां परीक्ष्य विहिताचलस्थितिं
दुर्गदुर्गमशिरोऽवनौ जयी ।
दन्तलग्नरिपुकालसायकः
प्रोज्जगाम गुणरोपितक्रमः ॥ ४८ ॥
स्वैरमेव शतसैनिकोत्तमा
नायकादृतपथेन निर्भयम् ।
अन्वगुस्तमतिमानवोद्यमाः
सिंहदुर्गशिखरे हताधयः ॥ ४९ ॥
अन्तरायमिव वर्त्मवर्तिनं
दुर्गरक्षकमनायुषेऽर्पयन् ।
दैवविक्रमवतां हठाद् गणो
रक्षिपक्षिनिकरे समापतत् ॥ ५० ॥
कानने पशुशकुन्तधामनि
दाववह्निरिव भीषणो निशि ।
जिह्मगानशिववर्तिनो बलान्
मावलेऽसिरदहत् पराऽध्ववित् ॥ ५१ ॥
दीपके शलभसूतयो यथा
दीपितार्चिषि पतन्ति मोहिताः ।
प्रत्यनीकसुभटाः शिवानुगे
विस्मिताः सहठमापतन् तथा ॥ ५२ ॥
आत्मपक्षमपि पक्षिणो हठा-
च्छिन्दतः समवलोक्य चापलम् ।
तामसैकहृदयं तमादरात्
तामसी स्वतिमिरोदरे दधौ ॥ ५३ ॥
वर्धमानमयविक्लवा द्विषः
केवलैकशतसैनिकां चमूम् ।
आत्मनः परमरातिशङ्कया
मेनिरे शतगुणाधिकामिव ॥ ५४ ॥

(१२० पृष्ठे)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मिथ्या गर्वो न कर्तव्यः

श्री 'अङ्गारः'

समुद्रतटवर्तिनि एकस्मिन् नगरे निवसतः कस्यचन वैश्यस्य पुत्रैः एकः काकः परिपोषितः। स्वभुक्तशेषेण अन्नेन ते तं तर्पयन्तः आसन्। तेषाम् उच्छिष्टभोजी सः काकः स्वल्पैरेव अहोभिः स्वादिष्टपुष्टिकरभोजनेन कायेन, सहैव गर्वेणापि अतितरां परिपुष्टः अभवत्। स्वतः श्रेष्ठान् विहगान् तुच्छान् विगणयन् सः तान् अवमन्तुमपि प्रावर्तत।

एकस्मिन् दिने कतिपये हंसाः गगने उड्डयन्तः तस्मिन् समुद्रोपान्ते अवतीर्णाः। वैश्यसुताः शोभनान् तान् वीक्ष्य प्रशशंसुः। काकः इदं सोढुं न शशाक। सः हंसानां सविधे गत्वा तेषु सर्वश्रेष्ठं हंसं सम्बुद्ध्य प्रावोचत्—'त्वया सह स्पर्धितुम् उड्डयनं काङ्क्षे' इति।

हंसैः शतशः प्रबोधितः अनुनीतश्च सः— 'हंसाः किल दूरदूरतरम् उड्डयितुं प्रभवन्ति। अस्माकं वसतिरेव इतः सुदूरतरे मानससरसि वर्तते। हंसैः स्पर्धया केवलं कष्टमेव अनुभविष्यसि। तैः सह उड्डयने काकः कथं प्रभवेत्' इति।

गर्वाभिभूतः काकोऽब्रवीत्—'उड्डयनस्य शतं गतीः जानामि। प्रत्येकया शतयोजनम् उड्डयितुं शक्यते।' उड्डीना, अवडीना, प्रडीना, डीना एवमाद्याः नैकाः गतीः परिगणय्य वावदूकः काकोऽग्रे अवदत्—'कथय, एभ्यः कया गत्या उड्डयितुं वाञ्छसि ?'

श्रेष्ठहंसः प्रोवाच—'परं निपुणोऽसि बन्धो! अहं पुनः एकामेव गतिं जाने, या किल सर्वसाधारण विहगानां सुपरिचिता। तयैव उड्डयिष्यामि' इति।

अनेन निरवलिप्तवचनेन मूलतो गर्वितः काकस्ततोऽपि अधिकं गर्वं गतः। सः अवदत्—'तथाऽस्तु, याम् अवगच्छसि तयैव गत्या उड्डय' इति।

अत्रान्तरे कतिपये अन्यजातीया पक्षिणोऽपि तत्र समागताः। तेषां सर्वेषां पुरतो हंसः काकश्च सममेव समुद्रदिशि उड्डीनौ। समुद्रस्य उपरिष्टात् विशाले अन्तरिक्षे काको नैकाः गतिकृतीः प्रदर्शयन् उड्डीनः। तेन स हंसात् कियत् प्रगतश्च अभवत्। हंसस्तु स्वीयया सहजया मन्दगत्या एव उड्डयन् आसीत्। इदं दृष्ट्वा समवेताः काकाः परं मुमुदुः।

किन्तु कतिपयैरेव क्षणैः काकस्य पक्षाणि परिश्रान्तानि। स विश्रामाय इतस्ततः वृक्षयुक्तद्वीपान् अन्वेष्टुं प्रारब्धवान्। किन्तु अनन्तसागरात् अन्यत् न किमपि तस्य दृष्टिपथम् उपाययौ। अत्रान्तरे उड्डयन् हंसः काकात् सुबहु अग्रे ससार। काकस्य गतिः क्रमशो मन्दा मन्दतरा च अभवत्। अतितरां श्रान्तः सः उत्तालतरङ्गवतः भीषणजीवसङ्कुलस्य पाथोधेः वीच्युपकण्ठं पतितुं प्रावर्तत।

हंसेन दृष्टम्—काकः सुदूरप्रतिगतः, तत्रैव स्थितश्च आस्ते। सः तत्समीपं गत्वा पप्रच्छ—'काकबन्धो! कथं ते चञ्चुः पक्षाणि च पुनः-पुनः जले मज्जन्ति ? किन्नामधेया इयं ते गतिः ?'

हंसस्य साधिक्षेपवचनं श्रुत्वा काको महता दैन्येन अवदत्—'बन्धो, काकाः केवलं क्रूरतरं 'काव्-काव्'—ध्वनिमेव जानन्ति। ते सुदूरम् उड्डयनं कुतो ज्ञास्यन्ति ? स्वीयमौद्धत्यस्य पर्याप्तो दण्डः अधिगतो मया। कृपया इदानीं मे प्राणान् पाहि, इति।

जलेन सर्वतः क्लिन्नम्, अचेतनप्रायम्, अर्धमृतं काकं दयमानः श्रेष्ठहंसः पद्भ्यां तं समुत्थाप्य स्वपृष्ठे समारोप्य तत्प्रदेशं समागतो यतः उभौ उड्डयनं प्रारब्धवन्तौ आस्ताम्। हंसदयया सजीविते स्वावासं प्रत्यावर्तितः काकस्तदाप्रभृति स्तोकमपि गर्वं नाकरोत्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मानस-भारती : देवगिरा गुम्फितं मानसम्

—श्री जनार्दन गङ्गाधर रटाटे—

[बी० ए०, साहित्याचार्यः]

दासोऽहमीशो रामश्च नैष भावः प्रयातु मे।
ऋषेरिदं वचः श्रुत्वा हृष्टो रामोऽब्रवीन् मुनिम्।
उवाच रामो याचस्व वरं यच्छामि वाञ्छितम्॥
मुनिः प्राह न जाने तन्न चासद् वा कदाप्यहम्।
वरं न याचे देहि त्वं रुचितं दाससौख्यद॥
रामः प्राह दृढा भक्तिर्बोधः सन्तु च ते गुणाः।
मुनिः प्राह त्वया दत्तो वरो याचेऽधुनेप्सितम्॥

प्रभो धनुर्बाणकरान्वितस्त्वं,
प्रियानुजाभ्यां सहितः सदैव।
चित्ते मम व्योम्नि यथोडुराजः,
कुरुष्व देवेश निवासमाशु॥ ११॥

एवमस्त्विति तं प्रोच्य रामोऽगस्त्यं ययौ ततः।
चिराय मे गुरुर्दृष्टस्तस्माद् यामि त्वया सह॥
सुतीक्ष्णस्येदृशं वाक्यं श्रुत्वा दृष्ट्वा च चातुरीम्।
रामश्चकार सह तं हसितौ भ्रातरावुभौ॥
स्वभक्तिं वर्णयन् मार्गे रामोऽगस्त्याश्रमं ययौ।
गुरुं गत्वा सुतीक्ष्णस्तु प्रणम्येदं वचोऽब्रवीत्॥
कोशलेशसुतो रामो भ्रात्रा च प्रियया सह।
सम्प्राप्तो जगदाधारोऽनिशं स्मरसि यं प्रभो॥
श्रुत्वागस्त्यस्त्वितदं वाक्यमुत्थायाऽधावदातुरः।
दृष्ट्वा देवं मुनेर्नेत्रे जातेऽश्रुपरिपूरिते॥
स भ्रातरौ स्वपादाब्जपतितौ प्रीतिसंयुतः।
उत्थाप्य हृदि कृत्वा च पृष्ट्वा कुशलमादरात्॥
उपवेश्यासने पूजां नाना कृत्वाऽब्रवीत् ततः।
नास्ति ह्यद्य मया तुल्यो भाग्यवान् कोऽपि भूतले।
ये केऽपि मुनयो हृष्टाः सुखकन्दं विलोक्यते॥

सर्वान्मुखः संस्थितवान् प्रभुस्तु,
मध्येसमूहं मुनिपुङ्गवानाम्।
विलोकयन्नास्त चकोरकाणां,
भूनं शरत्पर्वविधुं समूहः॥ १२॥

रामः प्राह मुने त्वत्तो गोप्यं किञ्चिन्न विद्यते।
मत्सागतेर्वेत्सि हेतुं तस्मात् तात न वेदितम्॥
तं मन्त्रमधुना ब्रूहि यथा हन्मि मुनिद्विषः।
स्मिती प्राह मुनिर्नाथ किं ज्ञात्वा पृष्टवानसि॥
अहं त्वद्यारे भजनप्रभावाद् वेद्मि ते महिम्।
माया महौदुम्बरस्ते ब्रह्माण्डानि फलान्यपि॥
चराचरा जन्तुतुल्या विदन्त्यन्यन्न संस्थिताः।
तत्फलादः करालोऽपि कालो भीतोऽस्ति ते सदा॥
सर्वलोकपतिः संस्त्वं पृष्टवान् मां नरो यथा।
कृपावास श्रिया युक्तो भ्रात्रा च वस मे हृदि॥
अयमस्तु वरो गाढा भक्तिः सत्संगतिः सदा।
वैराग्यं तव पादाब्जे प्रेम च क्षयवर्जितम्॥
यद्यप्यखण्डं चानन्तं ब्रह्म सद्भिः सुसेवितम्।
स्वानुभूत्यैकवेद्यं यद् वेद्म्यहं वर्णयामि च॥
तथापि भूयः सगुणे मन्वे प्रेम रघूत्तम।
पृष्टवान् मां यतो दासमानदः सर्वदा भवान्॥
देव पञ्चवटी नाम विद्यते पावनं स्थलम्।
उग्रं हर मुनेः शापं पुनीतं दण्डकं कुरु॥
वस तत्र रघुश्रेष्ठ दयस्व मुनिषु प्रभो।
आज्ञां मुनेः प्राप्य रामः प्राप्तः पञ्चवटीं पुरः॥

जटायुषा गृध्रवरेण सार्कं,
सम्मेलनं प्रीतिविवर्द्धनञ्च।
गोदावरीं प्राप्य विधाय पर्ण-
गृहं निवासं प्रचकार रामः॥ १३॥

—क्रमशः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दर्शनपीयूषनिर्झरः

—काशीपीठाधीश्वराः श्रीविभूषित-जगद्गुरुशङ्कराचार्याः—

१. श्रीगणेशं नमस्कृत्य दुर्गां विश्वेश्वरं गुरुम् ।
लीलां काञ्चनकान्ताभां वरेण्यां वर्णयामहे ॥

२. त्वङ्गत्तरङ्गसुभगां गङ्गां काञ्चनमालिनीम् ।
सौभाग्यभाग्यसंभाव्यां सावये भव्यभावनाम् ॥

३. असन्दानन्दसन्दोहसुन्दरं नन्दनन्दनम् ।
वृन्दारुवृन्दमन्दारं वन्दे वृन्दाभिनन्दिनम् ॥

४. सिंहासनसमासीनं सहस्रांशुसमप्रभम् ।
साकेतवासस्मरसं संस्मरामि शिवं महः ॥

५. षट्सपत्नैरिव जितैः षट्शास्त्रैर्वशगैरिव ।
मुखैः षड्भिर्विभास्वन्तं स्वान्तं संस्तुमश्शोधये ॥

६. चञ्चच्चन्द्रिचूडालं चमत्कारचराचरम् ।
चतुर्भुजं चतुर्वक्त्रं चिन्तयेऽच्युतचर्चितम् ॥

७. महाकैलासनिलयं महाशक्तिविलासिनम् ।
महाहिवलयोल्लासं कलये कालिकाधवम् ॥

८. शृङ्गारमिव सोद्गारं साकारं करुणाकरम् ।
जटाञ्चलचलद्गङ्गं भवभङ्गं गतोऽस्मि तम् ॥

९. नानादृशां सुमनसां स्रजमावहन्ती
सम्प्रत्ननूतनसुभगश्रुतिभिर्विपञ्चीम् ।
सर्वेश्वराक्वणितकोणमियं रणन्ती
स्यान्नः प्रसन्नवरदा वचसामधीशा ॥

१०. आम्नायमौलिकलितातिरहस्यमाला
सौरभ्यभारभरमन्थरपावमानैः ।
आमोदिता वसुमती निखिलैव तस्मात्
किं वर्ण्यतां प्रमुदिता यदि भारतीयाः ॥

११. संस्फूर्तिदं सकलमञ्जुलमर्त्तिहारं
विश्रामधाम विपणाधिषणैकगम्यम् ।
चञ्चद्विचाररुचिरं करुणाभिराम-
मारामवाङ्मयमुपाध्वमहो ! रसज्ञाः ॥

१२. प्रक्रम्य साध्यमतिरूढमतीतदोषं
शोधं सहस्रकुधियामधिशय्यपोषम् ।
शब्दं समाद्य निगमान्तमनुस्यलीलाः
सर्वा दशो भरतभूकलकण्ठहाराः ॥

१३. धाराः शतं विसृमराः कुटिलाः स्वतन्त्राः
सद्धर्षसारसरसाः प्रवलाः परार्ध्याः ।
पृञ्चन्ति यत्र किल लोलविशालशैला-
स्तत्तत्त्वसेकमतुलं विनिभालनीयम् ॥

१४. निश्चप्रचानुभवसाक्षिकमद्वितीयं
कल्याणदं चिरपरीक्षितमात्महृद्यम् ।
वन्द्यं समस्तजगतां विबुधाभिनन्द्यं
तद्दर्शनाद्भुतसरोवरमाश्रयध्वम् ॥

१५. लोभाभिभूतमनसां तमसां निधीनां
सीमा कियत्युदयते परमप्रकृष्टेः ।
आमुष्मिकैहिकविवादमपास्य धीरै-
स्तद्दर्शनी दृगभिगम्य समर्हणीया ॥

१६. साम्राज्यमाज्यमधिगम्य समन्वयानां
सम्भावना सुचिरजीवनमिष्टपुष्टिम् ।
संसेव्य साधुचरितैरुचितैः समर्च्या
श्रीभारतीयभरभासुरभूमिभूतिः ॥

१७. ज्योत्स्ना इव प्रचुरिता इव शर्करा वा
द्राक्षारसाभिमिलिता इव दुग्धधाराः ।
स्फीता घृताप्लुततरा मधुमिश्रिता वा
विश्वादृशो जनमनस्सु समुल्लसन्ति ॥

१८. प्रामाण्यपूर्णनिकषेषु निघृष्य दृष्टै-
रुत्तोलितासु गुणगौरवगर्वितासु ।
दृक्ष्वेकया निजपरस्परया प्रसन्ना
अग्रे सरन्तु विबुधेन्द्रमणिप्रवर्ग्याः ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

१९. केचिद्रुजं प्रशमयन्ति तनूग्रदंष्ट्रां
मध्येक्षमेक इतरे मनसि प्रवीणाः।
किन्तु क्षणाय महसे न तु शाश्वताय
तेनाशु धावत दृशं खलु दार्शनीं नः॥

२०. श्रौतं समस्तमिह पूर्वदलप्रतिष्ठा-
मेकेऽपरे विदधते श्रुतिसिद्धमन्त्रम्।
धीरा विवृण्वत इमं परमार्थविज्ञाः
लोकोत्तरैः सुदृढतर्कशतैरभेद्यैः॥

२१. देहोऽसवः करणमानसबुद्धयोऽमी
स्वात्मेति युक्तिनिरताः प्रथयन्ति विज्ञाः।
श्रौतास्तदुत्तरमबाध्यचिदेकसारं
सर्वप्रकाशममलं सुखमद्वितीयम्॥

२२. सत्यं दमोऽर्थशुचिता विनयो नयेन
व्यायामसंविभजने निजदेशरक्षा।
सन्नागरीव्यवहृतिर्विविधाश्च विद्या
विज्ञानकौशलकलाः सकलैरुपास्यम्॥

२४. आराधना सुचरितस्य सुसेवितस्य
विद्वद्भिराद्ततरस्य विविक्तनिष्ठैः।
अन्तेवसद्भिरखिलैश्च मनीषिसङ्घैः
सम्पादिता भरतभूविजयाय भूयात्॥

२४. कल्याणमावहति वैभवमाबिभर्ति
सौभाग्यमेधयति वर्धयते च शक्तीः।
सर्वादृशो निदधते प्रसरत्प्रवाहाः
सन्मञ्जुसाधुचरितं किल भारतीयम्॥

२५. प्रत्यक्षमेव ननु मानमिदं न सम्यग्
मा भावबोधविधुरास्तमयिष्ट वाणी।
सम्भावनां न जनयेदविकम्पनीयां
लोकप्रवृत्तिमिति संविमृशन्तु धीराः॥

२६. संवर्धितोऽनुमितिमानविशेष एष
प्रोत्तोषणो न सुधियां दृढयुक्तिरिक्तः।
प्रामाण्यमेतदनुबन्धि यतः प्रसाध्यं
पर्यङ्कवत् तदिह साधनमुत्तरेषाम्॥

२७. सौरस्तथैन्दव इह प्रथितप्रकाश-
स्तद्वद् द्वयं प्रमितिसाधनमेषितव्यम्।
दैवोऽपरः प्रकटितः परमर्चनीय
इत्येत आस्तिकधियां खलु विस्तराः स्युः॥

२८. औपम्यमानपदमानविजृम्भणानि
वाञ्छन्त्यभावमतयेऽनुपलब्धिपुष्टिम्।
न व्याप्तिरत्र घटते न च सन्निकर्षः
पश्चाद्भवा ननु विशेष्यविशेषणश्रीः॥

२९. व्याप्तिः परत्र गमिता न परं विबोद्धुं
विम्बीभवेदनुपपत्तिरिह प्रमाणम्।
एष्टव्यमत्र सुदृशां खलु षट्प्रमाणी
जागर्त्ति वैदिकविचारकषाभिघृष्टा॥

३०. एतत्प्रमाणनिधिसूत्थितसद्विचारै-
र्मन्थाभ्रमैः पुलकिताम्बुधिशास्त्ररत्नैः।
हारावलीं विरचितां कलयन्ति धीरा
विज्ञास्त एव विरताभिनीवेशभूषाः॥

३१. शुद्धाद्वितीयपरमार्थपरप्रकाश-
कूटस्थनिर्वृति निरञ्जन निर्विकारः।
आत्मा विभुश्चरमकारणसर्वलोका-
धिष्ठानसाक्षिरससारशिवस्तुरीयः॥

३२. उद्गूर्णजाड्यगरिमा लघिनाममेनं
नेतुं न जातु विभवेद् बलशालिमाया।
आरोपितैरपि शतैः परमार्थवस्तु
प्रस्तूयते किमु तदन्यतयान्ययापि॥

३३. मान्या विदां प्रतिमुहूर्त्तमिदं विशीर्ण-
वस्थं गदाकुलमुदञ्चितकालिमानम्।
कायं कथं कथयितुं मनसाऽपि धीरः
सङ्कल्पयेत् स्वमिति तत्त्वधियां विमर्शः॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

३४ अद्यत्व एतदुदघोष्यत याति लेखं
वृत्तान्तपत्रनिवहेषु च यत्र तत्र ।
जन्मातरानुभविनः शिशवः प्रभूताः
सम्यक् परीक्षणविनिश्चितसत्यवाचः ॥

३५. नोपेक्ष्यमेतदनुसन्दधतां यदेते
शुद्धा मृतात्मविसरान् क्वचिदानयन्ति ।
आलिख्य तद्वचनतत्त्वमुदीरयन्ति
श्रुत्वा रदेऽङ्गुलिमुपाददते जनौघः ॥

३६. किञ्चेदमुच्चितचिराञ्चितचारुचर्यं
यन्मानसस्थनिधिसाधितसिद्धिभूमा ।
वार्त्तां करोति सुहृदा किल तादृशेन
देशे दवीयसि गतोऽपि विलक्षणश्रीः ॥

३७. तस्मात् सुनिश्चितमहो नहि देह आत्मा
नो शैशवं प्रवयसां स्मृतिमेतुमर्हम् ।
स्मर्त्तव्यतानुभवयोर्वत हेतुभावो
भिन्नाधृतिं समवलम्ब्य कथं प्रसिध्येत् ॥

३८. आतश्च पिण्डलपलाशचलो न आत्मे-
त्येषा मतिर्न नृपतिप्रियकापि साध्या ।
निष्पीडिता न विरमत्यधुनापि लुप्ते
रम्या विचारपदवीयमुपासनीया ॥

३९. विज्ञानमात्रमिदमस्ति दलं न सम्यग्
वित्तिर्न कापि विषयं न परामृशेद् या ।
स्वप्ने भ्रमेऽपि सविशेषतया विभान्ति
प्रत्यक्षमेतदिति सर्वजनानुभूतिः ॥

४०. हेतुर्न कोऽपि घटते य इदं विदध्यात्
चेन्निर्ममीत सकलानि परास्य शक्तिः ।
सिद्धा श्रुतिस्मृतिपुराणदृढानुमानै-
र्नो सङ्क्रमक्रम इहोद्भवितुं समर्थः ॥

४१. किं चेदमत्यनुचितं क्षणिकाः परत्र
स्वां वासनां निदधते मतयो विपन्नाः ।
विज्ञानयोरपि प्रसूसुतयोर्न दृष्टा
सा संस्कृतिस्तदिह वेदपथोऽर्चनीयः ॥

४२. कुर्वत्स्वरूपमिह धार्य्यते धरण्यां
बीजं निपातितमिदं न कुसूलसंस्थम् ।
यन्नाङ्कुरप्रजननं क्वचिदीक्ष्यमाणं
तस्माददोऽपि कथनं न विभाति साधु ॥

४३. संयोगतो धरणिनीरसहायहेत्वो-
र्नव्योद्भिदां प्रजनने नहि कापि हानिः ।
कार्यं निदाननिकरेण विजायमानं
संदृश्यते गुरुतया न परं प्रकल्प्यम् ॥

४४. शून्याद् विवर्तत इदं खलु बीजमुष्टि-
र्नष्टाङ्कुरान् प्रजनयत्यखिलानुभूतिः ।
तर्कोऽयमस्ति सुदृढः परमार्थ एको-
ऽभावः सुषुप्तिरिह याति निदर्शनत्वम् ॥

४५. एषाऽपि युक्तिरखिला विमला न भाति
प्रोद्भावयत्यवयुतिर्निखिलप्ररोहान् ।
सद् वस्तु साधकमसन्न भवेत् कदापि
कार्यानुरूपमिह कारणमीक्ष्यते यत् ॥

४६. सानन्द आसमिति मोहदृढः सुषुप्तः
सर्वः परामृशति तत्सुदृढं प्रमाणम् ।
जागर्ति दीप्तिरमलात्मपदाभिषिक्ता
सा शाश्वती तदिह सुप्ति कथा वृथार्था ॥

४७. शून्यं समस्तमिति साधनतोऽवसेय-
मप्यन्ततोऽनुभव एव पुरस्कृतः स्यात् ।
तत्स्वप्रकाश - परमार्थ - पदार्थसार्था-
धिष्ठानसत्यविदिह प्रथते रसात्मा ॥

४८. आत्मातनूपरिमितिः प्रकटप्रकाशो
वृद्धिक्षयो भजति देहदशानुरूपौ ।
नैकान्तवाद इति दिग्वसना ब्रुवन्ति
तन्नाद्रियेत विहतात्मनि नित्यता स्यात् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

४९. मध्यायतः परिमितिर्घटवच्चिदात्मा
नो नित्य इत्यनुमितिं जनयत्यदोषा ।
नैकान्तवाद इतरेतरवैरभावात्
सन्तिष्ठते क्वचिदपि प्रबलप्रभावात् ॥

५०. दार्वात्मना धरणिरूपतया घटादे—
र्नास्तित्वसत्यकथनं विरुधं विहन्तुम् ।
का नव्यतात्र सुधियः परिभावयन्तु
बाला अपीदमभितः पथि घोषयन्ति ॥

५१. भिन्नं विदो न जडता मलिना विजह्याद्
ज्ञानाश्रयो नहि भवेदनलः स आत्मा ।
ज्ञानं न नश्वरमुपैति तनूं तदीयां
नूनं तथा सति पुराणनवी नतेस्तः ॥

५२. खद्योतसन्निभतया परिनिश्चितोऽपि
कैश्चित् प्रबुद्धपुरुषैर्न ददीत मुक्तिम् ।
दिव्यावदातविदि नात्र परस्य कस्या-
प्यन्तःप्रवेश इति वेदविदो वदन्ति ॥

५३. साङ्कर्यमत्र जडिमा विदिमा विमर्द
माजीजनज्जनितदेहकृतार्थभागः ।
सच्चिद्घने परमपूर्णरसे प्रकाशे
काखण्ड एक परवस्तुनि काश्मलीभूः ॥

५४. आनन्दसान्द्रपरमप्रकटप्रकाशः
सैकः परः शिव उदित्वरसामरस्यः ।
इच्छाविमर्शवपुषा परया स्वशक्त्या
स्पन्दात्मना मधुरविस्फुरितोज्ज्वलश्रीः ॥

५५. चैतन्यमात्रमखिलं न ततो विभिन्ना
माया समस्ति शिवशक्तिदलद्वयं प्राक् ।
आलेख्य सङ्कचनविस्फुरणप्रकारा
सैका चितिर्विजयते परमस्वतन्त्रा ॥

५६. निर्व्याकुलं कपिलसम्मतमात्मतत्त्वं
योगेश्वरैरपि समर्थितमाममन्यम् ।
ते सद्वितीयमनयोऽत उपासनायां
बद्धादरैः प्रणमनादिभिरर्चनीयाः ॥

५७. शुद्धं विशिष्टमथ भेदमभेदभेदं
सत्सामरस्यरसदर्शनजाकुलीशाः ।
एका द्वितीयपरतत्त्वविपक्षपक्षाः
श्रीमातरं भगवतीं श्रुतिमुच्चुदन्ति ॥

५८. शुद्धाद्वितीयपरिणामि तथापि नित्यं
क्षुभ्यद्विरोधसमुदायसमन्वयं तत् ।
कल्पद्रुकामधुगिवार्थितसर्वसिद्धौ
नो विक्रियां भजति पुष्टिपथः स एषः ॥

५९. यद्वत्परागविसराः पवनोह्यमानाः
घ्राणं प्रयान्त्यपरतः परिपूर्तिभाजः ।
तद्वत् सुरद्रुरथकामगवी कृतार्थौ
भूयः प्रपुण्यवशतः खलु सम्भ्रियेते ॥

६०. कृन्तन्ति युद्धसमये किल कल्पवृक्षान्
दैत्या ग्रसन्ति कणशः क्षणशश्च तेऽपि ।
वज्रादिवत् सुचिरकालवशात् प्रयान्ति
नाशं यतः परिणतिर्नहि शुद्धये स्यात् ॥

६१. एवं विभावनवशाद् विविधप्रकारा
ये भावुकाः प्रकटयन्ति विभेदवादान् ।
ते स्थापयन्ति विहगद्वयनीडहद्यां
कक्ष्यां श्रुतिं निहितयुक्तिशतां प्रमाणम् ॥

६२. धन्याः कुशाग्रधिषणाः श्रुतयो यमर्थं
संसाधयन्ति किल कालपनिकः स सर्वः ।
एतावता भवति सङ्गतिरत्र यस्माद्
'नाना न किञ्चन', 'सदेव' समस्तिमानम् ॥

६३. प्रारम्भसंहृतिपुरःसरषट्प्रमाणी
तात्पर्यलिङ्गपरिनिष्ठपनात्मलाभा ।
ब्रह्माद्वयेऽनुभवमात्रतनावनन्ते
शेतेऽमतोद्भवकरी मथितभ्रमोहा ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

६४. दृश्यत्वधर्मीमितजडत्वविभिन्नबीजै-
र्मिथ्यात्वसाधनविशङ्कटकोटिरूढैः ।
स्वाभावभूमिनिज - भूमिपदार्थसार्थै-
रुच्छूनमेतदखिलं प्रतिभाति विश्वम ॥

६५. दृश्यत्वसिद्धमनृतत्वमिदं स्वरूपेऽ-
प्यास्ते तथा सति न तत्र कृतत्वधर्मीयात् ।
दृश्यत्वमेव तदवच्छिदिमाबिभर्ति
प्रोक्तिष्ठते तदिह युक्तिरियं बलिष्ठा ॥

६६. भ्रान्तोऽपि बोध उपपन्नयथार्थरूपः
श्रौतं त्रिवृत्करणमस्ति यतः प्रमाणम् ।
स्वप्नेऽपि सृष्टिमभिवर्णयते यतश्च
धीरा महाकलुषमापतितं भ्रमात् स्यात् ॥

६७. पञ्चीकृतिः किल विगर्जति मूलमाया
स्वाप्नं सृजत्यखिलमेकलमूलमाया ।
भ्रान्तं तथा न भजते व्यवहारसत्तां
तत्प्रातिभासिकमिहास्ति न पापलेशः ॥

६८. षड्लिङ्गनिर्णयमवाप्य वचोभिरुद्यत्
तात्पर्यगौरवबलिष्ठवरिष्ठनिष्ठैः ।
वाक्यैरतुल्यबलशालिभिराक्तितन्द्रै-
रन्यैरतत्परतरैर्नहि योद्धमर्हम् ॥

६९. ये नाकुलीशमतसाधनमाश्रयन्ते
पञ्चार्थविस्तरभरं प्रतिपादयन्ति ।
ईशोऽनपेक्ष इह हेतुरिति स्मृतो यै-
र्वैषम्यनिष्करुणते न परीक्षिते तैः ॥

७०. पाशः पशुः पशुपतिस्त्रितयं पदार्थो
व्याप्नोति सर्वजगतीं पतिरात्तहेतुः ।
निर्माणमावहति नात्र पुरोक्तदोषो-
ऽसौ सद्वितीय इति कुप्यति वेदवाणी ॥

७१. ये पारदं स्वतनुपुष्टिकरं भजन्तः
सिद्धिं परामभिलषन्ति रसेश्वरार्थाः ।
ते वन्दनीयमहिमान उपेत्य हर्षा-
न्धन्या भवन्तु यदि वैदिकमार्गनिष्ठाः ॥

७२. सर्वानुभूतमथ सर्वपुराणसिद्धं
वेदप्रसाक्षिकमनन्तसुधासमुद्रम् ।
शान्तं शिवं सकलभेदसमाधिहृद्यं
वन्द्यं परं श्रवणमङ्गलनामधेयम् ॥

७३. साधु प्रपद्य गुरुपादसरोरुहेभ्यः
श्रीबोधभानुविनिरस्ततमोघटेभ्यः ।
मत्वा भृशं मनसि नाशमुपागतेऽद्धा
निर्वासनाः परशिवं हृदये दधानाः ॥

७४. आद्य समाधिमतिलङ्घ्य विधूतमोहा
जीवन्विमुक्तिपदवीं दयितां वहन्तः ।
प्रारब्धशेषमवसाय्य समाप्तमाया
ब्रह्माद्वितीयममलं प्रविशन्ति धीराः ॥

७५. एवं समाधिमधिगम्य निजात्मदृष्टिं
तं स्वल्पतोऽपि रहितं कलुषाभियोगैः ।
प्राप्यामृताब्धिलहरीमनिवर्तनीयां
मानुष्यकं सफलतानयनीयमास्ते ॥

७६. विश्वा दृशोऽलघुलघुप्रपथ प्रयान्त्यः
संसाध्नुवन्ति रुचिरां व्यवहारसिद्धिम् ।
श्रीभारतार्थपरमार्थसमस्तयत्ना
धन्यां श्रियं समधिकां परिबृंहयन्ति ॥

७७. अग्रे भवन्तु यदि कश्चिदिदं विदित्वा
कः श्रेयसि प्रवितते ऽपि बिभर्ति तोषम् ।
कैवल्यमस्तु भवभावनया बुधानां
वैराग्यभाः शमयतात् कलिकालिमानम् ॥

७८. आसूत्रितं तदिह दार्शनिकं कवीन्द्रा-
स्तत्त्वं शुभं प्रभवतां भवतां पुरस्तात् ।
ज्ञायेत तोषकरमेव तथाग्रकार्यं
चर्चा चलाचलकृतेऽवसरं ददीत ॥

७९. आभिर्मदीयकृतिभिः परमेश्वरस्तु
प्रादुष्कृताभिरमलामलमालिकाभिः ।
मोदेत कीररवरञ्जनसक्षमाभिः
प्रायात् प्रयास इह तत्सफलः प्रकामम् ॥

——: o :——

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

पञ्जीकृतसंख्या एल० १८१७
Digitized by Arya Samaj Foundation Chennai and eGangotri

सूर्योदयस्य नियमाः

पत्र-संहिता

१. 'सूर्योदय'-मासिकपत्रस्य वार्षिकं शुल्कं रूप्यकपञ्चकं वर्तते। धनादेश (मनीआर्डर) द्वारा तत्प्रेषणीयम्। वी० पी० द्वारा प्रेषणे ५० पणाः पृथक् प्रदेयाः स्युः।

२. आवर्षं गम्भीरसाहित्यसमन्विताः १२ अङ्काः प्रकाश्यन्ते। नवीनग्राहकत्वं प्रथमाङ्कतः (जनवरी-अङ्कतः) एव स्वीक्रियते। माध्यमिकेन केनापि अङ्केन ग्राहकत्वं न स्वीक्रियेत।

३. आंग्लमासस्य २६ दिनाङ्के 'सूर्योदयः' प्रकाशितो भवति। वारद्वयं संशोध्य ग्राहकेभ्यः स प्रेष्यते। अतस्तदलाभे पूर्वं स्वकीय-पत्रालयतस्तदनागमनस्य निर्णयं कृत्वैव १० दिनाङ्कानन्तरं वयं सूचनीयाः।

४. लेख-कवितादीनां भाषा संयता, सरला, शुद्धा च भाव्या। प्रकाशनीय-लेखादीनां स्पष्टाक्षरैः कर्गजस्यैकपृष्ठे एव लेखनमावश्यकम्। अस्वीकृता लेखादयः पोस्टविभागीय-चिटिका (टिकट) प्राप्त्यनन्तरं परावर्तयितुं शक्ष्यन्ते।

५. सम्पादकीय-विषयसम्बद्धे पत्र-व्यवहारे 'सम्पादकः' इति, व्यवस्थाविभागीय-पत्रव्यवहारे च 'व्यवस्थापकः' इति च स्पष्टं लेखनीयम्। तेन उत्तरलाभे मुधा विलम्बो न भवेत्।

विज्ञापन-शुल्कम्

सूर्योदये सुरुचिपूर्णं विज्ञापनं प्रकाश्यते। एकवारं तस्य प्रकाशनस्य शुल्कक्रमश्च अधोलिखितोऽस्ति। सार्वकालिकस्य दीर्घकालिकस्य च विज्ञापनस्य कृते विशेष-सौविध्याय पत्र-व्यवहारः कार्यः।

साधारणस्य प्रतिपृष्ठस्य	१००) रु०	साधारणस्य प्रत्यर्धपृष्ठस्य	६०) रु०
साधारणस्य चतुर्थांशपृष्ठस्य	३५) रु०	आवरण-चतुर्थपृष्ठस्य	२००) रु०
आवरण-द्वितीय-तृतीयपृष्ठयोः	१५०) रु०	प्रथमावरणपृष्ठे विज्ञापनं न स्वीक्रियेत।	

—सङ्केतः—

'सूर्योदय'-कार्यालयः, भारतधर्म-महामण्डलम्, जगत्गंज, वाराणसी।

सम्पादकः, प्रकाशकः, मुद्रकश्च—गोविन्द नरहरि वैजापुरकरः,
श्रीभारतधर्ममहामण्डलम्, जगतगंज, वाराणसी कैण्ट।
मुद्रण-स्थलम्—आनन्दकानन प्रेस, सी० के० ३६/२०, वाराणसी।
CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सूर्योदयः

भारतधर्ममहामण्डलस्य

मासिकं मुखपत्रम्

वर्षम् ४४

अङ्कः ६

सम्पादकः

गो० न० वैजापुरकरः

जून

१९६८

वार्षिक-मूल्यम्

५) रूप्यकाणि

प्रत्यङ्क-मूल्यम्

अर्धरूप्यकम्

अर्थमनर्थं भावय नित्यम् !

यशो यशस्विनां शुद्धं श्लाघ्या ये गुणिनां गुणाः ।
लोभः स्वल्पोऽपि तान् हन्ति श्वित्रो रूपमिवेप्सितम् ॥ १ ॥
अर्थस्य साधने सिद्ध उत्कर्षे रक्षणे व्यये ।
नाशोपभोग आयासस्त्रासश्चिन्ता भ्रमो नृणाम् ॥ २ ॥
स्तेयं हिंसाऽनृतं दम्भः कामः क्रोध स्मयो मदाः ।
भेदो वैरमविश्वासः संस्पर्धा व्यसनानि च ॥ ३ ॥
एते पञ्चदशाऽनर्था ह्यर्थमूला मता नृणाम् ।
तस्मादनर्थमर्थाख्यं श्रेयोऽर्थी दूरतस्त्यजेत् ॥ ४ ॥

—श्रीमद्भागवत, ११.२३.१६-१९

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अनुक्रमः

प्रपानकः	पत्रपुटम्	परिवेषकः
मङ्गलम्	१२१	श्री स्व० नारायणशास्त्री खिस्ते
श्री महर्षि-ज्ञानानन्द-चरितम्	१२२	श्री विन्ध्येश्वरीप्रसाद शास्त्री
गोवधनिरोध-प्रश्नः, अस्माक कर्तव्यञ्च	१२३	सम्पादकीयम्
श्रेयस्कृते श्रीगुरुतेजसे नमः	१२७	श्री दुर्गादत्त उपाध्यायः
रस-स्वरूप-विमर्शः, भक्तिरसश्च	१२९	श्री पूज्य करपात्रस्वामिनः
(४३) क्षत्रपति-महाकाव्यम्	१३३	श्री उमाशंकरशर्मा त्रिपाठी
दधीचि-प्राण-संवादः	१३६	श्री विष्णुदेव पण्डितः
प्रवल्लिका-प्रमोदः	१३७	श्री प्रशस्यमित्र शास्त्री
नैनीतालः—अभिनवं खण्डकाव्यम्	१३८	श्री पट्टाभिराम शास्त्रिणः
गोवध-निरोधो मांसभक्षणञ्च	१४१	श्री श्रीकृष्ण शर्मा
नामापि न ज्ञायते	१४४	श्री बटुकनाथशास्त्री खिस्ते

○

अङ्कोऽयं ज्येष्ठाषाढ-संयुक्ताङ्करूपेण प्रकाशयितुं निर्ध्यातमासीत्। अत एव १२१ पृष्ठे मङ्गलान्तर्गतायां मासावतरणिकायाम् उभयोर्मासयोरवतरणं संगृहीतमस्माभिः। परमग्रे पृथक्-पृथक् ज्येष्ठाषाढाङ्कयोः प्रकाशन-निश्चयोऽभवत्। प्रकाशितोभयमासावतरमेतत् विवशतस्तथैव स्थापनीयमभवत्। एतदर्थं पाठकै क्षन्तव्यमिति।

—सम्पादकः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सूर्योदयः

श्री भारतधर्ममहामण्डलस्य मासिकं मुखपत्रम्

रागद्वेषनिशाटनं विधुरयन् मोहं तमो नाशयन्,
तामिस्रं जडवादकैरवकुलं ज्ञानत्विषा ग्लापयन्।
विद्वत्कोकमशोकयन् नयसुधारोलम्बमुन्मीलयन्,
सञ्जातः सुमनोमनो मधुरयन् सर्वत्र सूर्योदयः॥

४४ वर्षं] वाराणसी ज्येष्ठः २०२५ : जून १९६८ ई० [६ अङ्कः

मङ्गलम्

जयत्यखिलपुण्यभू-निकरमौलिमालायिता
चतुर्विध-पुमर्थदा जगति काशिका विश्रुता।
पतङ्ग-कृमि-कीटकानपि च मोचयन् संसृते-
र्गुरुर्विजयते सदा स च तदीश्वरः शङ्करः॥ १॥

लोलार्क-केशवकृतोभयकोटि - गङ्गामौर्वीयुतं शिवपुरं धनुरेव मन्ये।
धानुष्क एष भगवान् किल विश्वनाथो धर्मात्मना निजशरेण कलिं हिनस्ति॥ २॥

लोकत्रयीमनिशमष्टसु जाग्रतैव मासेषु सम्यगवता पुरुषोत्तमेन।
खेदापनोदविधये फणिराजतल्पे सुप्तं चिराय भवतां वितनोतु भव्यम्॥ ३॥

मासावतरणिका

मासेषु तापजनकेषु गुणैरनूनो मध्यन्दिनार्ककिरणैर्घटितो नु यत्नात्।
नीडान्तराल-निभृत-क्षुधितद्विजेन्द्रो ज्येष्ठोऽधुना स्वविभावं प्रकटीकरोति॥ ४॥

तापावसान - पिशुनाम्बरगर्जनेन नृत्यन्ति यत्र शिखिनः सह लोकचित्तैः।
सोऽयं रसालफल-सौरभसम्भृतश्री - राषाढ इत्यभिहितो जयतीह मासः॥ ५॥

—स्वर्गीयाः महामहोपाध्याय-खिस्ते-श्री नारायणशास्त्रिपादाः—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्री महर्षि-ज्ञानानन्द-चरितं महाकाव्यम्

—श्री विन्ध्येश्वरीप्रसादशास्त्री—

एतादृशां क्षत्रियपुङ्गवानां भटोद्भटानां बहुसङ्ख्यकानाम् ।
अश्चन्ति रोमाणि भृशं नराणां ग्रावाङ्कित - स्मारक - दर्शनेन ॥ ६१ ॥

६२. यद्वंशजाः श्रीजयमल्ल-कल्ला-
फत्तादयो - ऽनेक - सहस्रवीराः ।
शिरांसि हुत्वा समरा-ऽग्निवेद्यां
स्वतन्त्रतां जन्मभुवो ररक्षुः ॥

६३. यद्वंश-जाता रणरङ्ग-धीरा
वीराग्रगण्या युधि चैकरात्रौ ।
क्रमान् मृता द्वादश भूमिपाला
राजेन्द्र - सिंहासन - मध्यवात्सुः ॥

६४. किं ब्रूमहे हन्त महारणस्य
प्रतापवीरस्य च वीरतायाः ।
गाथां सदैतिह्यविदो विदन्ति
वदन्ति चाद्यापि किरातबालाः ॥

६५. अटाटचमानेषु वनान्तरेषु
क्षुद्व्याधिभिः कम्पितविग्रहेषु ।
अत्तुं प्रवृत्तेषु यदात्मजेषु
निन्युर्बिडाला - स्तृणरोटिकास्ताः ॥

३६. एतादृशीं कष्टदशामनेकां
प्रपद्यमानोऽपि मनाङ् मनस्वी ।
धैर्यं न तत्याज ररक्ष नैजां
स्वाधीनतां यत्कुलजः प्रतापः ॥

६७. कुलस्त्रियो यस्य नृपस्य सत्यः
सत्यं बभूवुः किल वीरपत्न्यः ।
मृतिं समाकर्ण्य च याः पतीनां
प्रतस्थिरे स्वर्ज्वलिताश्रितासु ॥

६८. यदीयभूमावपि वासशीला
भिल्ला अरण्येषु सदा चरन्तः ।
ते चेतकाद्याः पशवोऽपि वन्द्या
ये चक्रिरे वीरकृतीरनेकाः ॥

६९. निष्पक्षपाताङ्ग्लकविश्च टाडो
यत्पूर्वजानां विलिलेख गाथाम् ।
अधीत्य तां विस्मयमावहन्तो
वैदेशिकाश्चापि भवन्ति मुग्धाः ॥

एवंविधे वीरवरेन्द्र-वंशे गृहीतजन्मा दिननाथदीप्तिः ।
यशस्विनां यो धुरि कीर्तनीयो महारणो वीर फतेहसिंहः ॥ ७० ॥

[क्रमशः]

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादकीयम्

गोवधनिरोध-प्रश्नः, अस्माकं कर्तव्यञ्च

किमतः परं विधुरं यत्प्रत्यक्षं वधिकाः यावन्तं गोवधं न समाचरन्ति, ततोऽधिकं साम्प्रतिकै राजनीतिविदम्मन्यैः सत्तालिप्सुभिः स वितन्यते। भारतदेशेन समासादितस्य स्वराज्यस्य सकलं प्रयोजनमेव निश्शेषतां याति यदा किल भारतीया संस्कृतिरेव तदीयैः द्रुपदजा इव वसनापहारमवमन्यते। दौर्भाग्यमेतत्, प्रायो विंशतिवत्सरैः लब्धस्वातन्त्र्यैः सत्तालोलुपैः स्पर्धामूलक-राजनीतिवशंवदैः भारतीयैः एतदेव विश्वस्य पुरतः समुपस्थाप्यते। अस्माकं दलम्, तत्रापि च व्यक्तिशो वयं कथं नाम शासनेन त्रैकालिकं समाश्लिष्टा भवेमेति चिन्तयन्त एते भारतीयां संस्कृतिं निर्मम हन्तुं मनागपि न सङ्कुचन्ति। नो चेद् विगत-मईमासस्य नवमदिनाङ्के भारतीयलोकसभायां यद् वृत्तं तत्कथमपि न संभाव्येत।

तद्दिने तत्र सर्वश्री रामावतारशर्म-निहालसिंह-रामगोपाल शालवाले महोदयैः पृष्टं यत् 'अपि नाम शासनद्वारा नियुक्ताया गोरक्षासमितेः अन्यतमसदस्यैः जगद्गुरुशङ्कराचार्यैः पुरीपीठाधीश्वरैः श्री निरञ्जनदेव स्वामिपादैः एकस्मिन् भाषणे शासनं समाभर्त्सि यत् तेन हिन्दूनां भावनाः समुपेक्ष्य कठोरं लक्ष्यं समवलम्बितम् ? किं तैः पुनर्महाभियानप्रवर्तनस्य भयं प्रदर्शितम् ? उत समितौ गतिरोधः समुत्पन्नः ? यद्येतत् सत्यं तदा विषयेऽत्र शासनस्य कीदृशी प्रतिक्रियेति ?'

खाद्यमन्त्र्यालयस्य राज्यमन्त्रिभिः श्री शिन्दे महोदयैः समुत्तारितं यत् 'जगद्गुरु - शङ्कराचार्यैः किलाऽस्माभिः नैतद् वृत्तमधिगतम्, न वा समितौ कश्चिद् गतिरोधः समुत्पन्नो दृश्यते' इति।

पूरकप्रश्नानां सन्दर्भे यदा श्री सैयद अली महोदयेन पृष्टं यत् 'किं गोरक्षा-समितौ गोमांस-('बीफ') भक्षकजातीनां (यथा — यवनानाम्, ख्रिस्तीयानाम्, 'हरिजना'-परपर्यायाणां कतिपयानाम् अन्त्यजानां) प्रतिनिधयः सङ्गृहीताः ? नो चेत् कुतः ? आहोस्वित् शासनं समितावस्याम् एतादृशानां सङ्ग्रहं करिष्यति ?' इति, तदा सदने महान् कोलाहलमय आतङ्कः प्रसृतः।

श्री बी० एन० कुरील महोदयेन 'हरिजना गोमांसं भक्षयन्ती'त्यस्य दृढः प्रतिवादः कृतः। तदुपरि श्री सैयद महोदयो मौनमनाश्रित्य पुनः पृष्टवान्—'किं समितौ चर्मव्यवसायिनां प्रतिनिधयः सङ्कलिताः ? किञ्च मन्त्रिमहोदयाः जगद्गुरूणामस्मिन् वक्तव्येऽवहिता यत् 'कश्चिद्यदि वेदकाले गोमांसभक्षणवृत्तं साधारं साधयेत् तदा महाभियानमिदं सपद्येव उपसंहरिष्ये' इति। प्रश्नस्यास्य समकालमेव सदनस्य परिसरो महता रोषेण परिपूरितोऽभवत्।

अली महोदयस्य अपरं प्रश्नांशं समुत्तारयद्भिः केन्द्रीय-खाद्यमन्त्रिभिः श्री जगजीवनराम महोदयैः उक्तम्—"वैदिककाले गोमांसभक्षणविषये मतद्वयं प्रचलति। एकः पक्षो 'गोमांसं भक्ष्यते स्म' इति वदति; अपरस्य च पक्षस्य मतं 'गोमांसं न भक्ष्यते स्म' इति।"

श्री शालवाले महोदयेन वक्तव्यमिदं सर्वथा 'आपाद्यम्' संघुष्टम्। श्री देवगुण - महोदयेन च 'सर्वथा मृषा' व्यवस्थापितम्। तदुपरि कृषिमन्त्रिणः अङ्गारायिताः समभवन्। क्रोधाविष्टैस्तैः आम्रेडितम्—'भक्ष्यते स्म, भक्ष्यते स्म' इति।

CC-0. Prof. Satya Vrat Shastri Collection. Digitized by eGangotri Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तेन समकालमेव सदने महान् कोलाहलः प्रासरत्। जनसङ्घ-सदस्यैः श्री कँवरलाल महोदयैः खाद्यमन्त्रिणः प्रत्युक्ता यत् 'स्वीयं वचः प्रत्यावर्तनीयम्; नो चेत् खाद्यमन्त्रिपदं परित्याज्यम्' इति।

श्री शशिभूषण वाजपेयी-श्रीकान्तन नामकाभ्यां संसत्सदस्याभ्यामपि एवमेव गोमांसभक्षणसमर्थने भाषितम्। तत्प्रतिवदद्भिः जनसङ्घीयसदस्यैः श्री बलराज मधोक - महोदयैः कथनमिदं सप्रमाणं साधयितुं तेभ्यः सर्वेभ्यः स्फुटमाह्वानं प्रदत्तम्। अनेनापि प्रसङ्गेन सदने महान् रोषः परिपूरितोऽभवत्। अध्यक्षेण कृषिमन्त्रिण उत्तरेण सहैव प्रश्नोऽयं समापितः।

कामं श्री शालवाले महोदयानां मूलभूतः प्रश्नः खाद्योपमन्त्रिभिः श्री शिन्दे - महोदयैस्तिरोहितः, तथापि तस्य वास्तविकमुत्तरं तु अनयैव घटनया सुस्पष्टं समुद्घाटितम्।

कृषिप्रधानोऽस्माकं देशः। कृषिश्च सविशेषं गोवंशं समाश्रित्यैव तिष्ठति। अतो गोवंशरक्षणं राष्ट्रस्य परमं कर्तव्यमिति हि सर्वतन्त्रसिद्धान्तः। सत्येवं भारतराष्ट्रस्य कृषिमन्त्री साग्रहमाम्रेडति 'वैदिककाले गोमांसं भक्ष्यते स्म, भक्ष्यते स्मे'ति चेत कियदेतत शोभनं कृषिमन्त्रिपदानुरूपं चेति साधारणबुद्धिरपि अवगन्तु शक्नुयात्। एतदवगत्यापि सर्वथा राष्ट्रपद-विप्रतीपभूतस्य वचनस्य आम्रेडनं कृषिमन्त्रिणः सत्तालोलुपतामेव अभिव्यनक्ति।

साम्प्रतिकेषु केन्द्रीय-शासनसञ्चालकेषु नैके महत्त्वशालिनो जना हृदा गोवधनिरोधं न समीहन्ते इति तु गोरक्षामहाभियान - समित्या १९६७ मितेशवीयाऽगस्त-सप्तमदिनाङ्कितः प्रारब्धस्य महाभियानस्य निर्ममविशसनेनैव सुस्पष्टम्। यदि नाम जगजीवनराम - सदृशाः पदलोलुपा राजनयिकाः गोवधनिरोध-विषयकस्य व्यापकजनमतस्य पक्षपातिनः स्युस्तदा तेषां दशा भूतपूर्व-केन्द्रीय - गृहमन्त्रिणां श्री गुलजारीलाल नन्दा-महोदयानां सदृशी एव स्यात्। परं श्री नन्दा - महादयेषु यादृशं धैर्यं यादृशी च तत्त्वपक्षपातिता विलसति, सा नामतो जगजीवनेन कर्मतश्च जगन्मारकेण कथन्नाम समासाद्येत ? तद्विषये तेभ्यः 'शूरोऽसि कृतविद्योऽसि' इत्येव वक्तव्यं भवेत्।

वस्तुतः सत्तामोहः सर्वथाऽनावरणीयो जायते। कृषिमन्त्रिपदतः प्रधानमन्त्रि - पदासीनतायाः स्वप्नानि प्रपश्यद्भिः श्री जगजीवनराम - महाभागैः गोवधनिरोध - विप्रतीपतायां वर्तमानप्रधानमन्त्रिणमपि स्पर्धयितुम् एतादृशं वचनं समुच्चार्य गोवधसमर्थकानामनेकेषां शासकानां स्वस्मिन् आनुकूल्यसम्पादनायैवायं क्रमः प्रसृत इति वयं तर्कयामः। तेषां सहायकास्तादृग् प्रयतन्ते इत्यपि नातिरोहितमस्माकम्। किन्तु वयं सर्वोच्चपदाय स्पर्धमानेभ्यस्तत्र प्रतिष्ठितेभ्यश्च सप्रश्रयं निवेदयामो यत् यदि भवन्तस्तत्पदं वाञ्छन्ति, तच्च सुरक्षितं विधातुं वा कामयन्ते, तदा व्यापकजनमतं समादृत्य शीघ्रातिशीघ्रं गोवधनिरोधो यथा स्यात्तथा प्रयतनीयम्। तैरिदं सुस्पष्टं ध्येयं यद् गोवधनिरोधे विप्रतीपीभूयैव कांग्रेससङ्गठनेन विगतचतुर्थनिर्वाचने स्वीयमद्यावधिकं सर्वथाऽक्षुण्णं शासकत्वमपहारितम्। मध्यावधिनिर्वाचने यादृशं साफल्यं तेन बलादात्मायत्तीकृतं क्रियते वा, न तस्य तादृक् मूल्यं विवेचकानाम्। अन्ततो जनमतसमाराधनमेव कस्यापि शासकस्य स्थायितायाः प्राणपदं नीतिविद्भिर्निर्धारितम्। तमनादृत्य न

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कोऽपि शासको जातुचिदपि सुस्थो भवितुं शक्नुयात्।

अन्यच्च, गोवधनिरोधस्य एतादृशं निम्नतमं विरोधं समाचरद्भिः कांग्रेसदलीयशासकैः विचारणीयं यत् तेषां परमश्रद्धास्पदै राष्ट्रपितृभिः महात्मगान्धिमहोदयैः विषयेऽत्र यदा-तदा यल्लिखितम्, यच्च समुच्चारितं तं प्रत्यक्षतो विरुणद्धि तेषामेतद्विषयकः साम्प्रतिको विचार आचारश्च। १५-२-'४२ दिनाङ्के 'हरिजन' - पत्रे तेषामाराध्या महात्मगान्धिन लिखन्ति—'यदि गौरितः समाप्येत तदा वयमपि नूनं समाप्ता भवेम।' तत्रैव अलाभकर-पशुविषये तैर्लिखितं यत् 'कामं वयं हिंसका भूत्वा अलाभकरपशून् व्यापादयेम; तदा तु यूरोपदेशवत् अत्रापि दुग्धस्य मांसस्यैव वा कृते पशुः पालनीयो भवेत्। किन्त्वस्माकं सभ्यता मूलतो भिन्नैव।...यदि वयं स्वात्मानं परिष्कर्तुं पारयेम तदैवास्माकम् अस्मत्पशूनाञ्च उभयो रक्षणं भवेत्। अन्यथा उभावपि गर्ते निमज्जेताम्।' नैतदेव, गान्धिमहोदयाः गां मातृत्वेन स्वीकुर्वन्ति स्म। 'हरिजन'-पत्रस्य १५-६-'४० दिनाङ्काङ्के तैर्लिखितं यद् 'गोमाता नैकेषु विषयेषु जन्मदात्रीमतिशेते।... गोमाता यावज्जीवं नः सेवते।' इतोऽपि विंशतिवर्षेभ्यः पूर्वं 'यंग इण्डिया'-पत्रे १८-५-'२१ दिनाङ्के तैर्लिखितं यत् 'गोविषयकः प्रश्नो नूनं महत्तमः। ...यावत् हिन्दुः गोरक्षणसामर्थ्यं स्वात्मनि नादधाति तावत् सः स्वकर्तव्यमञ्जसा न पालयति।' अत एव कांग्रेससंस्थया तत्कालीनेषु स्वीयघोषणापत्रेषु गोरक्षणमङ्गत्वेन स्वीकृत्य पणः कृतो यत् 'स्वातन्त्र्योत्तरं गोवधो नियमतो निरुद्ध्येत।' कांग्रेससंस्था सपदि तं पणं विस्मरति।

वस्तुतः कस्या अपि स्वात्मनिष्ठायाः संस्थायाः कर्तव्यमिदं भवति यत्पूर्वनिर्णीतविषयेषु अचला भूत्वा यावज्जीवं स्वयं तद्विपरीतं नाचरेदेव। स्वानुयायिनोऽपि कथमपि तद्विपरीता नाचरेयुरित्यपि सावहितं निरीक्ष्येत। परं या हि संस्था स्वोद्घोषणप्रतिकूलं मातृशरीरभञ्जनसदृशं कार्यमपि अवसरवाद-ग्राहग्रहिलतया सत्तालोलुपतया च कर्तुं मनाग् न सङ्कुचति, तस्यास्तत्र विषये अनुयायितावरणं कस्यापि तत्त्वतो राष्ट्रियपुरुषस्य कृते स्वत्वहानिकल्पमेव। अतो राष्ट्र-तदीयसंस्कृति-सभ्यता-पक्षपातिना केनापि राष्ट्रियजननेन तादृशे विषये तत्संस्थानुशासन-परित्याग एव परश्रेयसे भवेत्।

भारतराष्ट्रस्य विगत इतिहास एव गोवधनिषेधसिद्धान्तस्य दृढः परिपोषकः। न केवलं हिन्दूशासकैरेव गोवधो नियमतो निरोधितः। अमुं देशं शासयन्तो वैदेशिका विधर्मीया अपि शासकाः गोवधनिरोधं नियमतः स्वीचक्रुः। गोवधकारिणं च दण्डयितुं तैर्न कदापि प्रमदितम्। अद्यापि न केवलं प्रतिवेशि-हिन्दुराष्ट्रेण नयपालेन स्वराष्ट्रे गोवधो निरोधितः, नैकैर्विधर्मीयै राष्ट्रैरपि स्वेषु राष्ट्रेषु गोवधनिरोधः कृतः। सर्वमेतद् विविच्यापि कश्चिद् गोवधनिरोधं तथाकथित-साम्प्रदायिकं वक्तुं दुःसहेत तदा तदीयां मतिं ब्रह्माऽपि रञ्जयितुं न प्रभवेत्।

'प्राचीनकाले, वेदकाले गोमांसं भक्ष्यते स्म' इति यदुच्यते, तदपि सर्वथा भ्रान्तिमूलकमेव। वेदवाचस्पतिभिः श्री सातवलेकर-महाभागैः 'किं वेदे गोमांसभक्षणं विहितम् ?' इति शीर्षके लेखे नैकैः सुपुष्टैः प्रमाणैः साधितमस्ति यद् वेदे कुत्रापि गोमांसभक्षणस्य अवसर एव नास्ति। यज्ञस्य अपरेनाम्नः 'अध्वर'शब्दस्य निरुक्तिं प्रदर्शयता निरुक्तकारेण स्पष्टमेवोक्तम्—अध्वर इति यज्ञ-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नाम। ध्वरति हिंसा-कर्म, तत्प्रतिषेध अध्वरः (२.७)। यज्ञस्य अध्वरकथनं हिंसायाश्च तत्र प्रसरः किल वदतो व्याघात एव भवेत्। पशुं पुरस्कृत्य **'ओषधे त्रायस्व ; स्वधिते मैनं हिंसीः** इति वेदमन्त्रं वदन् याज्ञिकः कथं नाम पशुं स्वयं हिंस्यादिति तु साधारणबुद्धिरपि ज्ञातुं शक्नोति। ये किल अश्वमेध - नरमेधादिवत् गोमेधमपि दृष्टान्तीकृत्य वेदे गोवधं साधयितुं वाञ्छन्ति, ते देवानां प्रियाः दयनीयाः। तत्र अश्वादिपदानि पारिभाषिकाणि वेदेन समाम्नातानि। 'अजैर्जुहोती'त्यत्र यथा 'अज'-शब्दः त्रैवार्षिकस्य अङ्कुरजननशक्ति-रहितस्य अन्नस्य वाचकः, तथैव शतपथानुसारं **राष्ट्रं वा अश्वमेधः, वीर्यं वा अश्वः** इति सर्वथा अजाश्वमेधादिशब्दा अपि पारिभाषिका एव। नरमेधे पुनः नरस्य विसर्जनमात्रं स्पष्टतो यज्ञविधौ निर्दिष्टम्। आलम्भन - शब्दस्य 'हिंसा'रूपोऽर्थो यौगिकीं शक्तिं कथमपि नानुरुध्यते। यज्ञं सर्वथा हिंसादिदोषरहितं कर्तुं निर्दिशता वेदनारायणेन गोवधस्य अभ्यनुज्ञा दीयते इति को नाम हतबुद्धिर्वक्तुं पारयेत् ?

गोविषये पुनः स्पष्टमेव वेद आह—

यः पौरुषेयेण क्रविषा संयुक्ते
यो अश्व्येन पशुना यातुधानः।
यो अघ्न्याया भरति क्षीरमग्ने
तेषां शीर्षाणि हरसापि वृश्च॥
(ऋ० १०.८७.१६)

मन्त्रेऽस्मिन् स्पष्टमेव अग्निनारायणः प्रार्थितो यत् यो गां भक्षयति, बलाद्वा गोदुग्धमपहरति, स नूनं राक्षसः। अन्यच्च—

माता रुद्राणां दुहिता वसूनां
स्वसादित्यानाममृतस्य नाभिः।
प्र नु वोचं चिकितुषे जनाय
मा गामनागामदितिं वधिष्ट॥
(ऋ० ८.१५७.१५)

इत्यादयो मन्त्राः सर्वेषु वेदेषु स्पष्टमेव गोवधं निषेधन्ति। यजुर्वेदे स्पष्टमेवोक्तम्—**अन्तकाय गोघातकम्** (३५.१७)। अर्थात् ऋषिः प्रार्थयति यद् गोघातको यमराजाय समर्पणीय इति। 'अघ्न्या' इति गोनाम तु वेदे नैकवारमागतमिति गोवधस्यावसर एव वेदे नास्ति, कुतो गोमांसभक्षणचर्चा तत्रेति सुधिभिर्विभावनीयम्।

कतिपये वेदकाले गोमांसभक्षणनिषेधस्य प्रकारान्तरेणापि समर्थनं कुर्वन्ति। विचार-स्वातन्त्र्य-दृष्ट्या तेषामभिमतम् अस्मिन्नेवाङ्के अन्यत्र प्रकाश्यते। परं वस्तुतोऽस्माकं दृढं मतं यद्वेदे अश्वमेध-गोमेध-नरमेधादीनाम् अजाहोमादीनां सुरापानादीनां वा यत्र यत्र ब्राह्मणग्रन्थेषु समुल्लेखो दृश्यते, सर्वस्य तात्पर्यमन्यदेव, न तु प्राकृताऽश्वगवादिकं तदर्थः। वेदस्य शैली एव परोक्षात्मिका। **परोक्षप्रिया हि देवाः** इत्यनुशासनात्। सर्वेषां तेषां पदार्थानामाध्यात्मिक एवार्थस्तत्र तत्र गृहीतश्चेत् स एवैकान्तिकश्रेयसे कल्प्येत। अन्यथा पूर्वोक्तरीत्या अध्वरादि - शब्दानामेव असङ्गतिः स्यात्। इत्थं समासतो विचार्यमाणे वेदकाले गोवध एव न सिद्ध्यति, तदा गोमांसभक्षणस्य कथा दूरायितैव। सत्येवं तमेव भ्रान्तं साधनमस्त्रीकृत्य गोवधनिषेधप्रश्नस्य व्यापकजनानुगृहीतस्य कर्तनं कस्यापि प्रत्नस्य भारतीय-राजनयिकस्य कृते सर्वथा अशोभनीयमेव।

जगद्गुरु-शङ्कराचार्याणां पुरीपीठाधीश्वराणां श्री निरञ्जनदेव तीर्थपादानां सन्तश्री प्रभुदत्त ब्रह्मचारिणश्च भृतानां दीर्घकालिकानशनेन संभाव्य-

CC-0. Prof. Satya Vrat Shastri Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रेयस्कृते श्रीगुरुतेजसे नमः

चेतो मिलन्मोहमयीनिशाकृते,
प्रज्ञानकञ्जं विकचं प्रकुर्वते ।
यशस्कृते चापि सदाऽयशस्कृते,
श्रेयस्कृते श्रीगुरुतेजसे नमः ॥ १ ॥
करालिका मण्डितमुण्डमालिका,
कपालिका दुष्टविनाशशालिका ।
श्रीकालिका सिद्धयति यद्दयोदयात्,
सुसिद्धिमूलं प्रणमामि तं गुरुम् ॥ २ ॥
संसारभोगस्य निधानरूपिणी,
वैकुण्ठकण्ठार्पित-बाहुबन्धना ।
प्रसादमायाति मनोरमा रमा,
यस्य प्रसादात् प्रणमामि तं गुरुम् ॥ ३ ॥
सुवर्णगात्री रसभावपूरिता,
दिव्या सलीला तरुणी सरस्वती ।
कण्ठे समालिङ्गति यत्प्रसादत-
स्तस्मै परस्मै गुरवे नमो नमः ॥ ४ ॥
सर्ग - स्थिति - प्रत्यवहारहेतवः,
सरोजसञ्जात - हरि स्मरारयः ।
देवा दयन्ते खलु यत्प्रसादत-
स्तं श्रीगुरुं नौमि गुणाकरं परम् ॥ ५ ॥
पीयूषनीरा सुमनस्तरङ्गिणी,
गोदावरी भानुसुता सरस्वती ।
नो तारयन्तीह च यद्धरं विना,
महत्तमः सैव गुरुः प्रणम्यते ॥ ६ ॥
साहित्य - वेदान्त - पदादिषु क्रिया-
शीलत्वमायाति च यत्प्रसादतः ।
तं सर्वदं सर्वविदं च सर्वदा,
गुरुं भजेऽहं मनसा परात्परम् ॥ ७ ॥
अर्थस्य धर्मस्य च काममोक्षयो-
र्नरा लभन्ते न फलानि कुत्रचित् ।
यस्य प्रसादेन विना महीतले,
सर्वस्वमूलं प्रणमामि तं गुरुम् ॥ ८ ॥

श्री दुर्गादत्त उपाध्यायः, साहित्याचार्यः

मान राष्ट्रव्यापिविप्लवं परिहर्तुं तदा प्रमुखराष्ट्र-हितचिन्तकैः शासनं प्रणुन्नमासीत् । फलस्वरूपतया शासनेनापि तदा शासकीयाशासकीय - सदस्यानां गोरक्षा-समितिं निर्माय प्रश्नोऽयं तस्यै निर्णयाय प्रहितः । अत एव तदा महाभियानं स्थगितम्, महाभियानसमित्याऽपि तत्रामन्त्रितं स्वीयं प्रातिनिध्यं महता औदार्येण प्रदत्तम् । परं दीर्घकालं यावत् विचार्याऽपि तया समित्या गोवधनिरोध-पोषकं किमपि प्रतिवेदनं न प्रकाशितम् । प्रत्युत तत्र प्रश्नस्यास्य समुपेक्षणम्, अन्ततश्च विरोधात्मक एवाभिप्रायः प्राकट्यमभजत् । सर्वमेतद् दृष्ट्वा जगद्गुरुभिः यो रोषः प्रकटितस्तदुत्तररूपेण लोक-सभाया अनुपदं समीक्षितं वृत्तं आकाश्यतां गतम् । फलत अचिरादेव महाभियानसमित्या शासनसङ्ग-ठितसमितितः स्वस्य प्रातिनिध्यं प्रत्यावर्तितम् । न केवलं प्रत्यावर्तितम्, जगद्गुरुभिः एकस्मिन् वक्तव्ये इदमपि घोषितं यत्पुनः प्रश्नममुं समाधातुं महाभियानं प्रारम्येत ।

दौर्भाग्यमेतद् अस्माकं देशस्य यदस्माकं साम्प्र-तिकाः शासकाः, येषां देशोऽयं पूर्णयाऽहिंसया स्वतन्त्रो-ऽभवत् अहिंसकां भाषां नावगच्छन्ति । हिंसाया भाषैव तेषां सुपरिचिता भाषा । किमप्यभियानं यावद

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हिंसकं तिष्ठति, तावदस्माकं शासकास्तं सर्वथा समुपेक्षन्ते। यदा तत्र हिंसायाः प्रसरो जायते, तदाऽनुपदमेव तत्समाधातुं सक्रिया भवन्ति। भाषावारप्रान्तरचनादयो नैके विषया अस्य निदर्शनरूपेण समुपस्थापयितुं शक्यन्ते। गोवधनिरोधस्यापि इयमेव स्थितिर्दृष्टपूर्वाऽस्माभिः। सत्येवं प्रश्नः परिस्फुरति—अस्माभिः पुनर्भाव्यमानं महाभियानं कथं परिचालनीयं येन तत्सफलतामेव वृणुयात्? स्पष्टमेतद् यद् गोवधनिरोध-प्रश्नः सर्वथा सांस्कृतिकः, राष्ट्रियमानबिन्दोः पुनः स्वपदप्रतिष्ठापनात्मकः सर्वथा शासित-शासकोभयवर्गस्य ऐकान्त-श्रेयोवहः। अतोऽस्य परमपावनस्य साध्यस्य साधनेनापि सर्वथा तथैव परिशुद्धेन भाव्यम्। शुद्धसाध्यस्य अशुद्धसाधनेन साधनं साध्यस्य तेजस्वितां ह्रासयति। अन्यच्च, कार्यस्यास्य नेतारोऽपि जगद्गुरु-सदृशाः समाराध्या नैतिकशिक्षादानाय परम्परया गृहीतव्रता एव। तेषां नेतृत्वं जातुचिदपि अशुद्धसाधनानुगृहीतं न भवेत्, नापि च भाव्यम्। ततः किं पूर्वोपयुक्त-साधनान्येव समादाय विफलप्रायं महाभियानं पुनरारम्भणीयं नाम? तत्तु जलताडनवत् निष्फलं सत् निषिद्धकोटिकमेव भवेत्।

वयं त्वेवं चिन्तयामो यत् पूर्णतो गोवधनिरोधाय देशस्य कोणे कोणे प्रतिष्ठितेषु वधालयेषु गत्वा गोवधं निरोधितुं सामूहिकः सत्याग्रहो विधेयः। मांसविक्रयिणामापणेषु गत्वा तेषु गोमांसं कदापि न विक्रेतुं नैतिकी विवशता समापादनीया। गोपालानां समवाये गत्वा तेभ्यो वधार्थं कथमपि गां न विक्रेतुं प्रतिज्ञापत्रं पूरणीयम्। दुग्धविरहिनां वृद्धां रुग्णां च गां पालयितुमक्षमेभ्यस्तास्ताः समादाय गोसदने स्थापनीयाः। श्रीमतां मठ-मन्दिर-व्यवस्थापकानां द्रव्यसाहाय्येन गोसदनान्येतानि भूयशस्तत्र तत्र सङ्घट्टनीयानि। इदमत्रावधेयं यद् वधालय-विक्रयकेन्द्रेषु प्रदर्शन-सत्याग्रहौ सर्वथा क्षोभरहितौ भाव्यौ। नूनं तेषामनेन उग्रतमा प्रतिक्रिया संभाव्येत। परं महता धैर्येण शान्त्या च सा सोढव्या। वस्तुतः स एवास्माकं गोवधनिरोध-प्रणयादिनां परो निकषः। इत्थमेकतो गोरक्षणम्, अपरतश्च शासनं गोवधनिरोधनियमं पारयितुं प्रदर्शन-सत्याग्रहादिना विवशं करणीयम्।

तृतीयः प्रकारो नाम गोवधनिरोधं कामयमानैरास्तिकैः स्वयं सामूहिकोपासनानुष्ठानानि दक्षिणानिरपेक्षं समाचरणीयानि। एवं त्रिविधमार्गेण महाभियानमिदं राष्ट्रव्यापि यथा जायेत, तथा प्रयतनीयम्।

एवं समासतोऽस्य विषयस्य, समग्रविषयस्य उपसंहारे वयं पुनरपि भारतशासनं प्रार्थयामो यदद्यापि तद् राष्ट्रमानबिन्दुभूतं पूर्णतो गोवधनिरोधरूपं पावनं कार्यं मूर्ततां परिणमय्य कोटिकोटि-भारतीयानां चेतांसि समावर्जयेत्। भारतीया जनताऽपि प्रार्थ्यन्ते यत् सुदृढं समवेता भवत्यः सर्वथा भारतीय-परम्परानुसारम् अहिंसा-सत्याधिष्ठिताः पूर्वविवेचितक्रमानुसारं भाविनि महाभियाने भारतावनौ पूर्णतो गोवधनियमनं कारयित्वैव स्वास्थ्यं भजन्तु। अघटितघटनापटीयान् भगवान् सर्वेभ्यो भारतीयेभ्यो बुद्धया संयुनक्तु, गोपालबालस्य वृन्दावने भारते पुनर्गाः सर्वथा निर्भयं मोदेरन्नित्येवाद्य कामयामहे।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रस-स्वरूप-विमर्शः भक्तिरसश्च

—पूज्य श्री करपात्रस्वामिनः—

एतेन—'दुष्यन्तादिनिष्ठस्य रत्यादेरनास्वाद्यत्वान्न रसत्वम्। स्वनिष्ठस्य तु तरय शकुन्तलादिभिरतत्सम्बन्धिभिः कथमभिव्यक्तिः ? स्वस्मिन् दुष्यन्ताद्यभेदबुद्धिस्तु बाधबुद्धि-पराहता' इत्यादिकमपास्तम्।

अन्यमतरीत्याऽपि—काव्येन शकुन्तलादिशब्दैः शकुन्तलात्वादिप्रकारक-बोधजनकैः प्रतिपाद्यमानेषु शकुन्तलादिषु दोषकल्पनं विना विभावादीनां साधारणीकरणं नोपपद्यते। एवमवश्यकल्प्येन तेनैव दोषविशेषेण स्वात्मनि दुष्यन्ताद्यभेदबुद्धिरप्युपपद्यते।

ननु रतेर्दुष्यन्त इव सहृदयेऽपि सुखविशेषजनकत्वे करुणरसादिषु स्थायिनः शोकादेर्नायक इव सहृदयेऽपि दुःखजनकत्वमस्त्विति चेन्न। तत्र केवलाह्लादस्य सहृदयहृदयप्रमाणकत्वेन लोकोत्तरकाव्यव्यापारस्यैव आह्लादजनकत्ववद् दुःखप्रतिबन्धकत्वस्यापि कल्पनेन तददोषात्।

अन्यैस्तु—व्यञ्जनाव्यापारस्य अनिर्वचनीयख्यातेश्चानुपगमेऽपि प्रागुक्तदोषमहिम्ना स्वात्मनि दुष्यन्तादितादात्म्यावगाही शकुन्तलादिविषयकरतिमदभेदबोधो मानसः काव्यार्थभावनाजन्मा विलक्षणविषयताशाली रसोऽभ्युपेयते।

ननु चैवं स्वस्मिन्नविद्यमानस्य रत्यादेः कथमनुभव इति चेन्न। लौकिकसाक्षात्कार एव विषयसद्भावस्यावश्यकत्वेन भ्रमरूपे स्वात्मनिष्ठे रत्यादिसाक्षात्कारे तदनपेक्षणात्।

आचार्याभिनवगुप्तरीत्या तु स्थायिनां विभावादिभिः समं व्यङ्ग्यव्यञ्जकभावरूपात् सम्बन्धात् विभावादीनामेव वा परस्परं संयोगान्मिलनाद् रसनिष्पत्तिरिति सूत्रार्थः। तथा हि—लोके प्रमदादिभिः कारणादिभिः स्थायिनो रत्यादेरनुमानेऽभ्यासेन यत्पाटवं झटिति प्रवृत्तिस्तद्वतां सभ्यानां सूक्ष्मतयाऽन्तःस्थितो रत्यादिः स्थायी काव्ये नाट्ये च गुणाऽलङ्कारयोगात् कायिक-वाचिका-ऽऽहार्य-सात्त्विक-चतुर्विधाभिनयेन च यथोक्तविभावनादिव्यापारवत्त्वाद् अलौकिक-विभावादिशब्दव्यपदेश्ययोग्यदशाविशेषविशिष्टैस्तैरेव कारणादिभिर्व्यज्यते। येषां तु पूर्वं रत्यादिर्नोत्पन्नस्तेषां तद्वासनाविरहिणां रसाभिव्यक्तिर्नास्त्येव। तेन शृङ्गारिणामेव शृङ्गारस्य निर्विण्णस्वभावानामेव च शान्तस्याभिव्यक्तिरित्यनुभूयते। तत्रापि सहृदयतारूपा स्वाभाविकी वासनापि सहकारिणी यां विना शृङ्गारिणामिव मीमांसक-वैयाकरणादीनां न रसाभिव्यक्तिः। तदुक्तम्—

'वासना चेन्न हेतुः स्यात् स स्यान्मीमांसकादिषु।'

ननु—अन्यनिष्ठैर्विभावादिभिः कथमन्यनिष्ठस्य स्थायिनोऽभिव्यक्तिरिति चेन्न। 'ममैवैते, शत्रोरेवैते, तटस्थस्यैवैते, न ममैवैते, न शत्रोरेवैते, न तटस्थस्यैवैते' इति सम्बन्धविशेषस्वीकार-परिहारनियमानध्यवसायात् साधारणीकरणाभ्युपगमात्। तथा च साधारण्येन प्रतीतैस्तैरभिव्यक्तः सामाजिकानां वासनात्मतया स्थितः स्थायी रत्यादिको नियतप्रमातृगतत्वेन स्थितोऽपि साधारणोपायबलात् तत्कालविगलित-परिमितप्रमातृभाववशोन्मिषितवेद्यान्तरसम्पर्कशून्यापरिमितभावेन प्रमात्रा सकलहृदयसंवादभाजा साधारण्येन स्वाकार इवाभिन्नोऽपि गोचरीक्रियमाणश्चर्व्यमाणतैकप्राणो विभावादिजीवितावधिः पानकरसन्यायेन चर्व्यमाणः पुर

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इव परिस्फुरन् हृदयमिव प्रविशन् सर्वाङ्गीणमिवालिङ्गन्, अन्यत्सर्वमिव तिरोदधद् ब्रह्मानन्दास्वादमिवानुभावयन्, अलौकिकचमत्कारकारी शृङ्गारादिको रसः। तदुक्तं पण्डितराज-जगन्नाथेनापि स्वीये 'रसङ्गाधरा'ख्ये ग्रन्थे—

"समुचितललितसन्निवेशचारुणा काव्येन समर्पितैः सहृदयहृदयं प्रविष्टैस्तदीयसहृदयतासहकृतेन भावनाविशेषमहिम्ना विगलित-दुष्यन्तरमणीत्वादिभिः अलौकिक-विभावानुभावव्यभिचारिशब्दव्यपदेश्यैः शकुन्तलादिभिरालम्बनकारणैः चन्द्रिकादिभिरुद्दीपनकारणैरश्रुपादिभिः कार्यैः चिन्तादिभिः सहकारिभिश्च संभूय प्रादुर्भावितेन अलौकिकेन व्यापारेण तत्कालनिवर्तिता-ऽऽनन्दांशावरणाज्ञानेन, अत एव प्रमुष्टपरिमितप्रमातृत्वादिनिजधर्मेण प्रमात्रा स्वप्रकाशतया वास्तवेन निजस्वरूपानन्देन सह गोचरीक्रियमाणः प्राग्विनिविष्टवासनारूपो रत्यादिरेव रसः स्मृत' इति। व्यक्तो व्यक्तिविषयीकृतः। व्यक्तिश्च भग्नावरणा चित्। यथा शरावादिना पिहितो दीपस्तन्निवृतौ सन्निहितान् पदार्थान् प्रकाशयति स्वयञ्च प्रकाशते, एवमात्मचैतन्यं विभावादिसंवलितान् रत्यादीन् प्रकाशयन् स्वयञ्च प्रकाशते" इति।

अन्तःकरणधर्माणां साक्षिभास्यत्वाभ्युपगमात् स्वप्नतुरगादिवत् रज्जुरजतादिवद् वा विभावादीनामपि साक्षिभास्यत्वमेव। व्यञ्जकविभावादिचर्वणाया आवरणभङ्गस्य वा उत्पत्ति-विनाशाभ्यां रसे उत्पत्ति-विनाशौ उपचर्येते। विभावादिचर्वणावधित्वाद् आवरणभङ्गस्य निवृत्तायां तस्यां प्रकाशस्याऽऽवृतत्वाद् विद्यमानोऽपि स्थायी न प्रकाशते।

यद्वा—विभावादिचर्वणामहिम्ना सहृदयस्य तत्सहृदयतोन्मिषितेन तत्तत्स्थाय्युपहित-स्वरूपानन्दाकारा योगिनः समाधाविव काव्यव्यञ्जनामूला आनन्दविषयतया तत्प्रचुरचित्तवृत्तिरुपजायते। वृत्तेः आनन्दलीनप्रायत्वात् पूर्वोक्तरीत्या विगलित-परिमित - प्रमातृत्वादिधर्मत्वाच्च अस्यानन्दस्य अन्तःकरणवृत्त्यनवच्छिन्न - शुद्धचैतन्यरूपत्वेन वृत्त्यवच्छिन्नचैतन्यरूपेभ्यः सुखेभ्यो वैलक्षण्यम्। तथा च भग्नावरणचिद्विशिष्टो रत्यादिः स्थायिभावो रसः, रसो वै सः इति श्रुत्यनुरोधेन रत्याद्यवच्छिन्ना भग्नावरणा चिदेव वा रस इत्याहुः। विशिष्टात्मनस्तस्य विशेषणं वा चिदंशमादाय नित्यत्वं स्वप्रकाशत्वञ्च सिद्ध्यति। रत्याद्यंशमादाय अनित्यत्वमपि। सा च शब्दव्यापारभाव्यत्वात् शाब्दी, अपरोक्षसुखालम्बनत्वाच्च अपरोक्षात्मिका। चर्वणाऽपि चास्य चिद्गतावरणभङ्ग एव, प्रागुक्ता तदाकारा वृत्तिर्वा। तादृशस्य रसस्य विभावादिविषयसंवलित - चिदानन्दालम्बनत्वेन परब्रह्मास्वादात् समाधेर्विलक्षणत्वेन ब्रह्मानन्दसहोदरत्वोक्तिः।

तथा च विभावादीनां साधारणीकरणरूप-व्यापारेण फलबलकल्पेन विशेषणांशस्य सर्वथा प्रमोषात् सामाजिकेषु स्थायी व्यज्यमानो रसः 'दशमस्त्वमसि' इतिरीत्या शाब्दापरोक्षाभ्युपगमेन नापरोक्ष्यानुपपत्तिरपि। ईदृशालौकिकव्यापारमाहात्म्येन करुणरसे दुःखजनकतया कल्पितेभ्योऽपि सुखोत्पत्तेः सुरतेऽधरदशनादाविव अनुभविकत्वात् अन्तःकरणवृत्तित्वात् कार्यत्व-ज्ञाप्यत्वाभावाद् भूत-वर्तमान-भविष्यत्वराहित्यात् सविकल्प-निर्विकल्पवेद्यत्वाभावाच्च रसस्य अलौकिकत्व-नित्यत्वा-ऽऽनन्द-रूपत्व-स्वप्रकाशत्वादिकं सिद्धम्। चर्वणानिबन्धनश्च उत्पादविनाशित्व - कादाचित्कत्वादि - व्यवहारोऽपि तत्र सङ्गच्छते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अत्रेयं समीक्षा—रत्यादिस्थायीभावस्य आलम्बन-विभावं (कारणं) दृष्ट्वा श्रुत्वा च तत्र रामादि-चरिते सत्यभिनये सीतादिकमालम्बनं दृष्ट्वा रामादेरनुकार्यस्य रत्याद्युदयो न नटस्य न वा सामाजिकस्य, नटस्य सीतादौ विभावबुद्धेरनुदयात्। न च सीताद्यभिनेत्र्यां विभावादिबुद्धिसम्भवः; तथात्वे स्वभावाभिनयप्रसङ्गापातेन रामादिरत्यभि-नयस्य पर्याकुलीभावात्। तस्यास्तादस्थ्ये नायिका-भूमिकायां पुरुषेऽभिनेतरि च सर्वथा विभावबुद्धे-रसम्भव एव। सामाजिकानामपि सीतादौ मातृबुद्ध्या विभावादिधियोऽनुदयात् पररहस्यदर्शनेन व्रीडा-ऽऽतङ्कादिसम्भावनया नानया रसानुभूतिसम्भवः। कथञ्चित् तत्र सम्भवेऽपि करुणादौ पुत्रवियोगातुरस्य मृत्युदृश्ये कस्य सामाजिकस्य स्वपितृमरणबुद्धि-रुदेति ? अनुकार्यगतोऽपि न स्थायी; तदानीं तदनु-पस्थितेः। रूपके कथञ्चित्सम्भवेऽपि श्रव्ये तदसम्भव एव। तथा हि—श्रव्ये कविः वर्ण्यः, श्रोता चेति पक्षत्रयम्। तत्र न कवौ ; रामादेरिव सीतादिं प्रति रत्याद्यनुदयात्। नापि वर्ण्ये ; तदनुपस्थितेः। नापि श्रोतरि ; सीतादिं प्रति तस्यापि रत्यसम्भवात्। नापि स श्रोता कविगतं वर्ण्यगतं वा स्थायिभाव-माश्रयेत; तयोर्भावैक्यासम्भवात्। पतिव्रतायां पत्न्यां कवेः श्रोतुर्वा न भावोदयः सम्भवति। कुमारसम्भवे रघुवंशादौ च गौर्यादौ शिवस्येव कवेः पाठकस्य वा न रत्युदयः सम्भवति, देवयोनिभूतायां मानुष-रतेरसम्भवात्।

तत्र भट्टलोल्लटादिरीत्या अनुकार्ये अनुकर्तरि चासन्नपि रसोऽनुसन्धानबलात् सामाजिकेषु प्रती-यते। शङ्कुकरीत्या तु विभावैरनुभावैर्व्यभिचारि-भिश्च प्रयत्नावर्जिततया कृत्रिमैरपि तथानभिमन्य-मानैः अनुकर्तृस्थत्वेन लिङ्गबलेन प्रतीयमानः स्थायिभावो मुख्यरामादिगत-स्थाय्यनुकरणरूपो रसः सामाजिकैरनुमीयते। तत्रापि कथमनु-कार्येऽसन्तं स्थायिनमनुमिमीते ? कुमारसम्भवादौ कवेः शिव-पार्वतीविषया रतिस्तयोश्च अन्योन्य-विषयेति भिन्नाश्रयोऽयं व्यवहारः। कविस्तयो रतिं वर्णयतीति स्वीक्रियते चेत्, तर्हि तस्य रतेरपलापः। न च कविः सर्वथाऽरतिकः सम्भवति। श्रोता च तदुभयविहीनः कथं रसमनुभवेत् ? उभयविधामपि रतिं स्वदते चेत्, कतरस्यास्तत्र रसरूपेण परिणतिः ? इत्युभयतः पाशारज्जुः।

भट्टनायकरीत्या अभिधया काव्यार्थे बोधिते भावकत्वव्यापारसंज्ञेन विभावादिसाधारणीकरण-व्यापारेण श्रव्यादौ निर्दोषकाव्येन नाट्ये चतुर्भि-रभिनयरूपेण रसो भाव्यते। तत्र किमसामान्यस्य लोकोत्तरस्य विभावादेः सामान्यीकरणम्, लौकिकी-करणमेव साधारणीकरणम्, किं वा व्यक्तिविशेष-गतस्य आश्रयनिर्विशेषभावापादनेन, सर्वगतत्वा-पादनं वा ? प्रथमे पक्षे तु कविदृशा विभावादीना-मलौकिकत्वमेव मम्मटादिभिरुपवर्णितम्। तस्य लौकिकत्वापादनं दूषणमेवेति असाधारणस्य व्यक्ति-विशेषनिष्ठस्य साधारणीकरणम्। विशेषगतत्वा-कारक - भेदराहित्यापादनमेव तदाशयो मन्तव्यः। तत्रापि विभावादिसंवलितो यदि स्थायी न सामा-जिकगतः, तर्हि कथं तस्य अन्यस्थायिना रसानु-भूतिः ? यदि वर्तते तदाऽनुकार्यस्य सामाजिकस्य च रूढ्याऽऽलम्बनादिभेदे कथं द्वयोः सामान्यी-करणम् ?

तत्र अभिनवगुप्तरीत्या विमलप्रतिभः सहृदयो 'ग्रीवाभङ्गाभिरामम्, उमापि नीलालकं' इत्यादि-वाक्येभ्यो वाक्यार्थं प्रतिपद्य वाक्योपात्तदेशकालादि-विभागराहित्येन वस्तुतो मानससाक्षात्कारात्मिकां

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रतीतिमधिगच्छति। सत्याञ्च तस्यां मृगपोतकादि-भीतिवर्णने वैशिष्ट्यावगाहिज्ञानराहित्येन केवलं भीत इति ज्ञानम्, भयकारणस्य वस्तुनः तदानीमसत्त्वेन देशकालादिविशेषज्ञानविरहितस्य भयस्यैव प्रतिपत्तिः। ततश्च 'भीतोऽहम् भीतो मम शत्रुर्मित्रं तटस्थो वा' इति ज्ञानेभ्यो दुःखसुखादिमूलबुद्ध्यन्तरोदयनियमवत्तया विघ्नबहुलेभ्यो ज्ञानेभ्यो विलक्षणं निर्बाधप्रतीतिविषयं साक्षादिव स्वहृदयवर्तिनमिव भयानकं रसं स्वदते। तथाविधे स्वादे 'किं गतं किं मूलं भयम्' इति विशेषस्य ज्ञानमेव नोदेति। तदेव भयाश्रयेण मृगपोतादिना सह सामाजिकस्य साधारणीकरणम्।

यद्यपि च विभावादिसहितरसप्रतीतौ कथं विभावादिनापि साधारण्यम्? अपारमार्थिकत्वेऽपि काव्यार्थपरिशीलनवशात् विभावादिप्रतिपत्तिर्भवत्येव। सत्याञ्च तस्यां तत एव आलम्बनाद्ध्यादेरनुदय एव प्रसज्येत। न च केवलेन विशुद्धेन स्थायिना रसः प्रतीयते; तथापि यथा पानकरसे काश्मीरोशीर - मरीच्यादि - विविधरसानुभूतावपि विशिष्य आकारेण न तेषां ग्रहणम्। यथा वा माणवकाध्ययनध्वनिषु पुत्राध्ययनध्वनिप्रतीतावपि न विशिष्याकारेण प्रतीतिः, तथैव आलम्बनविभावादिप्रतीतावपि साधारणीकरणव्यापारेण विशिष्टप्रतीतिर्न भवतीति न काचिदनुपपत्तिः।

यदुक्तम्—'सीताद्याः कथं स्त्रीमात्रपर्यवसायिन्यः, पुत्र्यां भगिन्यां वा रत्यादिं कथं न जनयेयुः' इति। तदपि तुच्छम्; भगिन्यादिबुद्धीनां तत्प्रतिबन्धकत्वकल्पनेन दोषाभावात्। नाट्यदर्पणरीत्याऽपि रसो नियतानियतविषयो विशेषसामान्यकारोभयविधो भवति, सामाजिकानां रसास्वादः स्त्रीसामान्यविषयो भवति। तद्रीत्या आत्मगत-संस्कारोपहितः सुखात्मा रसः काव्यार्थभावनोद्बुद्धोऽनुभवविषयतां याति।

यदुक्तम्—"यदि काव्यगतैर्विभावादिभिः प्रतिपत्तृगतः स्थाय्यादिरुद्बोध्यते, तर्हि रामादिगतस्थायिना सह सामाजिकरतेः न कोऽपि सम्बन्धः सिद्ध्यति। स्याच्चेत् किमुखः किमाकारकश्चेति।" तदपि न; काव्यार्थभावनाहेतुत्वेन रामादिस्थायिनोऽपि तदुपयोगेन दोषाभावात्। यदि सामाजिकैः स्थायिसंस्कारो रसानुभूतौ नोपयुज्येत, तदा सहृदयानामेव रसास्वादनियमो न स्यात्। साहित्यदर्पणे साधारणीकरणप्रभावेण हनुमदादिगतं समुद्रलङ्घनोत्साहं प्रतिपद्यते। तदसामर्थ्येऽपि 'देवाभिन्नोऽहमि'त्येवंविधायां बुद्धौ जातायां तादृशसामर्थ्यानुभवोऽपि। क्वचिद्वाराणस्यां हनुमद्भावापन्नेन मनुष्येण तादृगुत्साहेनैव वरुणा उल्लङ्घिता।

केषाञ्चिद्रीत्या भावनादोषेण शुक्तिकाशकले रजतबुद्धिरिव आत्मन्यपि रामाद्यभेदबुद्धिः। विभावादीनामपि तेनैव भावनादोषेण साधारण्यं जायते। तेनैव शकुन्तलादिषु स्वस्मिन् दुष्यन्ताद्यभेदबुद्धिमुत्पाद्य गम्यत्वबुद्धिरपि समुद्भाव्यते। योगवासिष्ठादिषु काव्यादिकथार्थस्य प्रातिभासिकत्वमङ्गीकृतमपि, काव्यादीनामेव तादृग्भावनोद्भावकत्वात्।

कैश्चित्तु—भावप्रवणस्य कवयितुः स्वकल्पनासक्तया वर्ण्यप्रतिबिम्बोपस्थित्या काव्यनाटकादिनिर्मितिः, तच्छ्रोतुर्द्रष्टुश्च काव्यप्रभावेण कवयितुर्भावेन तादात्म्यं साधारणीकरणम्।

अन्यैस्तु—पाठकादेर्भावस्य कवेर्भावेन तादात्म्यस्थापनं साधारणीकरणम्।

परैस्तु—काव्यादिद्वारेण कविस्तांस्तान् भावान् प्रस्तुवन् सहृदयानां सुप्तं भावलोकं क्षोभयति।

(शेषांशः १३५ पृष्ठे)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्षत्रपति-महाकाव्यम्

—श्री उमाशङ्करशर्मा त्रिपाठी—

[आंग्लभाषा-प्राध्यापकः—काशी-विद्यापीठस्य, वाराणसी]

दस्युजात ! विरमाऽसि-लाघवाद्
वीक्षसे न किमु पाप मामिह ।
शस्त्रिणां विततमुज्ज्वलं यशो
दूषयन्निव न लज्जसे कथम् ॥ ५९ ॥
विस्तृतेऽपि शठ ! सङ्गराङ्गणे
श्लाघ्यमृत्युमपहाय कातरः ।
सारमेय ! शयनालसोरसि
दंशनैः स्वचरितं विकत्थसे ॥ ६० ॥
सत्ववृत्तिरपि नागकुम्भभित्
केसरी न शयितान् जिघांसति ।
ब्रूहि कोऽसि मनुजाभिधाऽधम !
कौर्यनिर्जित - निशाचरप्रथः ॥ ६१ ॥
धर्मराज ! विरमाऽऽत्मगौरवात्
कौतुकं त्वमपि वेत्सि पद्धतिम् ।
आत्मनाऽपि चरितं त्वयास्ति किं
मत्कृते यदभिधीयते गुरो ॥ ६२ ॥
अन्यगेव किमु धर्मकल्पना
त्वं जितत्रिगुणवृत्तिरेव वा ।
जिह्मभृत्य ! नहि वाचि केवलं
किन्तु तिष्ठति विधौ सदर्थता ॥ ६३ ॥
राजपुत्ररुधिरं विरुन्धता
यत्त्वया - ऽरिपदपांसुचुम्बिना ।
पातितास्तमसि देशवासिन-
स्तद्वही रुधिरमेष्यति ध्रुवम् ॥ ६४ ॥
म्लेच्छदास ! यवनास्तवेश्वरा
येन धर्ममहितेन [illegible]

दुर्बलानपि दहन्त्यकारणं
विस्मृतः कथमसौ सदाग्रहः ॥ ६५ ॥
त्वादृशां जनन-मृत्युकण्टकं
नित्यमेव शठ निन्दितायुषाम् ।
जन्मिनस्तु सकृदेव मादृशा
अर्चितस्वविधयः श्रयन्ति तत् ॥ ६६ ॥
दुर्जनाः वयममी च सज्जनाः
याऽभिवक्ति रसना तवेत्वरी ।
साऽद्य नूनमसिधारमज्जिता
मौनमेतु गलितायुषस्तव ॥ ६७ ॥
शिक्षयन् निगमशंसितानि नो
मातृभूमि - परतन्त्रताच्छिदः ।
तांश्च जालमचरितान् प्रमाणयन्
किं द्विजिह्व न विलज्जसे स्वयम् ॥ ६८ ॥
तद्वनेचरनिभा वयं मृगान्
त्वादृशां मृगयितुं धृतव्रताः ।
यूथमेव दधतः पुरो दृशां
नूनमद्य विधयः सदक्षिणाः ॥ ६९ ॥
वीक्ष्य मालसुरमेवमुद्धतं
रोद्धुमेव रिपुखड्ग-पन्नगी ।
ह्रादिनीव नयनांशु - मोहिनी
तर्पतप्त-हृदयेव तत्वरे ॥ ७० ॥
लक्ष्यबद्धमनसोः स्थिराक्षयोः
सिद्धहस्तयशसोः रणोद्यमः ।
विग्रहश्रिय - मरालदर्शिनी-
मुत्सुकामुभयरागिणीं व्यधात् ॥ ७१ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यामिनीघनघटेव हुङ्कृतिः
शौर्यजा स्तनितमम्बुदेरितम् ।
ह्रादिनीव करवाल-वल्लरिः
संप्लवं विदधिरे रणाङ्गणे ॥ ७२ ॥

अङ्कितुं मृगपतौ स्वविक्रमं
न क्षणं परमवाप यूथपः ।
कुम्भिकुम्भदलने महौजसा
रक्षितैव विदितात्म - पद्धतिः ॥ ७३ ॥

कालरात्रिरपि विस्मितेव सा
कालिमच्छद - घनावगुण्ठना ।
सम्पतन्निशितहेति - दीप्तिमद्
विह्वलेक्षणमचालयन् मुहुः ॥ ७४ ॥

प्राणिभीरपि विभीतवैभवो
विस्मयाग्रविधिना-ऽसिपाणिना ।
सोत्सुकाह्वय - समादृतोऽप्यसा-
वन्तकोऽक्षमत नान्तिकस्थितिम् ॥ ७५ ॥

हेतिहूतिशतमार्गणा - ऽध्वना
चेतसा कविरिवाऽऽर्यविक्रमः ।
सोत्सहं प्रयतते स्म विग्रहे
शत्रुजीवितपदार्थ - लब्धये ॥ ७६ ॥

तत्क्षणं श्रमजलाक्तलोचनं
वीक्ष्य मालसूर - मुद्यतद्विषः ।
उत्सुकेन हृदये महासिना
लेखितो - ऽसुगमनक्षणागमः ॥ ७४ ॥

पूर्वमेव सवनानलः शमात्
सोऽन्त्यहव्यमिव शत्रुमाहरन् ।
आनयज्जगति शत्रुघातिनीं
श्रेयसामुपचिता - ऽनघायतिम् ॥ ७८ ॥

सूर्यमण्डल - विभेदकीर्तये
गच्छताऽपि शिवराजबन्धुना ।
रक्षितो वृतपणो धरामृते
कोण्डना - विजयकेतुलक्षणः ॥ ७९ ॥

विस्मयान्तरित - शोकवारिधौ
यावदाविशति शत्रुवाहिनी ।
तावदेव समरोत्सुकः क्षणः
सूरजेन स हठं नवीकृतः ॥ ८० ॥

शौर्यरागबहलैः शिवस्तवै
रज्जयन्निव मरुत्पथं ततः ।
आशुशुक्षणि - रुदर्चिरावभौ
मन्दुरोदर - तृणाशभासुरः ॥ ८१ ॥

तत्प्रतीपबल - मस्तयूथपं
नागयूथमिव केसरिक्रमे ।
कांदिशीक - मभजज्जहच्छ्रियं
कोशदुर्गसहितां शिवौजसे ॥ ८२ ॥

प्रातरिन्द्रदिशि रक्तिमच्छवौ
रक्तखड्गरुचिराः शिवानुगाः ।
गैरिकध्वज - धुताऽनिलाम्बरां
भानवे नवमुदं न्यवेदयन् ॥ ८३ ॥

शक्रसख्यमुपलब्धु - मक्षतं
स्वर्गतं सपदि मावले-पतौ ।
कीर्तिभारशिथिलां तदाकृतिं
वीक्ष्य भूरि विललाप भूपतिः ॥ ८४ ॥

सिंहतामपहरन् कथं विधे !
दुर्गमर्पयसि केवलं मम ।
स्वीकुरुष्व शतदुर्गमद्य मे
तं मदेकसुहृदं परं त्यज ॥ ८५ ॥

मुञ्च मुञ्च कृतकाक्षिमीलनं
सोऽहमस्मि वद किन्न वीक्षसे ।
मातरं विजययागवर्णितैः
किं विनोदयसि नाऽद्य विक्लवाम् ॥ ८६ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

त्वामवेक्ष्य परलोकवर्त्मनि
मामनाश्रय - मपूर्ववान्धव ।
साऽनवाप्तशरणाऽपि शोकधू-
र्हन्ति निर्दयमुपेक्षते कथम् ॥ ८७ ॥

इत्थमक्ष्य - पदौकसं नृपो
बालबन्धु - मनिमेष-तारकैः ।
लोचनैरिव निधातुमात्मनि
दूरवर्त्मपथिकं व्यलोकयत् ॥ ८८ ॥

सा स्नुषा श्वसुरमात्मजो गुरुं
बान्धवाः प्रियजनं शिवकृतौ ।
प्रापुरेव परमार्थ - रक्षितु-
र्दृष्टिरेकसुहृदे सुधाऽतपत् ॥ ८९ ॥

मात्रे राजा प्रथितमहसे सोऽर्पयन् सिंहदुर्गं
जन्माऽवन्ध्यं हृदयमिव तं सिंहमित्रञ्च दत्त्वा ।
आर्तो गत्वा प्रियसखिगृहं तज्जनान्त्वानुतोष्य
वत्सोद्वाहे जनकपरमोऽरञ्जयत्तत्कुटुम्बम् ॥ ९० ॥

॥ इति क्षत्रपति-महाकाव्ये षोडशः सर्गः ॥

रस-स्वरूप-विमर्शः, भक्तिरसश्च—(१३२ पृष्ठस्य शेषांशः)

उद्बुद्धेषु भावेषु श्रोतारोऽपहायेमं लोकं शुद्धचैतन्यात्मके भावजगति वर्तमानाः कविवर्णितैर्भावैः सह साधारणीकरणाख्यम् ऐक्यमनुभवन्ति इत्युच्यते । विभावादीनां स्थूलोपकरणानान्तु तत्तद्भावजागरण एवोपयोगः । यथाग्नेः क्षोभणाय प्रादुर्भावाय आग्नेय-पदार्थानामुपयोगः । प्रादुर्भूते च तस्मिन् केवलस्य वह्नेरनुभवः । लौकिक्यां स्थितौ प्रेमादिनां व्यक्ति-विशेषसम्बन्धः स्फुरति । तावत्येव तत्परिमिति-श्चायाति । अभिव्यक्ते भावे व्यक्तिविशेषसम्बन्ध-तिरोधानेन तदपरिच्छित्तिरेव अनुभूयते । तथा च कवेर्भावेन विभावादीनाञ्च भावेन ऐक्यमापन्नः सामाजिकभावो विगलितप्रमातृ-प्रमेयादिभेदसाधा-रण्यमुपयाति ।

भक्तिरसे तु भगवान् परमानन्दस्वभावः सर्वदा विद्यमान एव आलम्बनविभावः, तस्य नित्यत्वात् सर्वगतत्वाच्च । श्रवणादिना सगुण - साकाररूपेणापि रसिकानां हृत्सरोजे तत्प्रादुर्भावस्मरणात् । तदुक्तम्-

'त्वं भावयोगपरिभावितहृत्सरोजे
आस्से श्रुतोऽसि···ननु नाथ पुंसाम् ।
यद्यद्धियाऽत उरुगाय विभावयन्ति
तत्तद्वपुः प्रणयसे सदनुग्रहाय ॥'

'प्रविष्टः कर्णरन्ध्रेण स्वानां भावसरोरुहे ।' इति । अतो भगवद्रसानुभवः सुन्दर उक्तः ।

'कोऽतिप्रयासोऽसुरबालका हरे
रुपासने स्वे-हृदि छिद्र वत् सतः ।'

रसिकानां हृदये भगवद्गुणवर्णनश्रवणा-दिभिः भावराज्यस्याऽऽविर्भावो भवति । यत्र भावमयः सोपकरणो भगवान् व्यज्यते, यथायोग्यं विभावाद्यभेदबुद्धिरपि तत्र जायते । भावना-बलादेव विभावादीनां साधारण्यादिकम् ।

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दधीचि-प्राण-संवादः

—श्री विष्णुदेव पण्डितः एस. ए., वेदान्तशास्त्री—

आसीत् मुनिर्दधीचिर्नामा। स तपस्तेपे। तेन तपसा आहारे संयमः कृतो विहारे च। आहारे विहारे च जीवनरक्षा। आहारे विहारे च प्राण-प्रतिष्ठा। आहारे विहारे च रोधिते कुतो जीवनं कुतो वा प्राण-प्रतिष्ठा? अन्नत्यागे मनो विकलं भवति। अन्नत्यागे प्राणा व्याकुलीभवन्ति। अन्नत्यागे तु मरणमेव असन्दिग्धम्। एष सामान्यः सर्वभूतानाम् अनुभवः।

परं दधीचेर्विलक्षण एवानुभवः। तपसा तस्य शरीरं क्षीणमपि प्राणा न विकलतां गताः। शरीरे क्षीणे प्राणाः शरीरधातुषु प्रविष्टाः, अस्थि-मज्जासु प्रविष्टाः। न तु बहिर्गताः, नापि संक्षुब्धाः। मुनेस्तपश्चरणं विलक्षणं सञ्जातम्। तेन सन्तुष्टा प्राणदेवता तस्य नयनातिथिः बभूव। तां दृष्ट्वा स्तुत्वा च विनिवेदयत् मुनिः—

'अहो नु रे प्राणदेवताः! अन्नं त्यक्तम्। विहारो गतः। शरीरं क्षीणतां यातम्। कथन्नु मां न त्यजन्ति भवन्तः?'

'शोभनं रे तव चरितं मुने! साधो, सरलस्ते स्वभावः। ऋज्वी ते जीवनसरणिः। न भयम्, न च क्षोभः। कथं त्वां प्राणाः त्यक्ष्यन्ति? पश्य रे प्राणिनां जीवनम्। क्षणे क्षणे भयम्। प्रत्यहं शोकसंवेदनम्। ऋतुम् ऋतुं प्रति व्याधिवयोहानम्। आहारे विहारे च प्राणक्षोभः। 'प्राणा गमिष्यन्ति, मृत्युर्निकटवर्ती' इति प्रतिक्षणं शोचन्ति प्राणिनः। प्राणा अपि शरीरतो गमनं वाञ्छन्ति, परं ते शरीरं त्यक्तुं न वाञ्छन्ति।'

प्राणदेवस्य प्रेमाणं दृष्ट्वा मुनिः प्रसन्नतां गतः। तेन तपश्चरणे बलं समासादितम्। सन्तोषश्च प्रदर्शितः। स्तुता च प्राणदेवना। मनसि च जिज्ञासा सञ्जाता तस्य। प्रश्नश्च कृतवान् सः—

'कामं नु रे प्राणदेवता शरीरे संरक्षिता भव। को नाम प्राणान् त्यजेत्। प्राणास्तु सर्वेभ्यः प्रियाः। पृच्छामि रे किञ्चित् जिसास्यम्। को नाम देवः शरीरे वसिष्ठो वरिष्ठश्च? कस्य दैवस्य संस्थितिरत्र? कथन्नु धार्यते शरीरम्? यदि नाम प्रियस्ते, पूरय मम जिज्ञासाम्।'

'वरीयानेष ते प्रश्नो, मुनिवर! जिज्ञासां पूरयितुं श्रावयामि ते पुरातनीं गाथाम्—

'अत्र शरीरे निवसन्ति कतिचन देवाः। मनसि मनः, 'प्राणे प्राणः, वाचि वाक्, श्रोत्रे श्रोत्रम्। इन्द्रियाणि च स्थानानि। इन्द्रियं साम्राज्यम्, इन्द्रियं च स्वाराज्यन्। तेषां सर्वेषां देवा इन्द्रस्वाधीनाः सानुकूलाश्च।

'एकदा विहरणं कर्तुं शरीरं विहाय कुत्रचिद् गतो देवराज इन्द्रः। इन्द्रे च गते देवाः स्वतन्त्राः स्वच्छन्दाश्च संवृत्ताः। आहरणं विहरणं च स्वच्छन्दतां गतम्। न कश्चित् रक्षयति शरीरम्, न कश्चित् विचारयति निकेतनम्,। न च कश्चित् पश्यसि परस्परानुभावम्।

'तथा यमेषु नियमेषु च गतेषु शिथिलतां प्राप्ताः शरीरस्था देवाः। ते च निर्बलतां गताः। परस्परं विवादं कृतवन्तः—को नु वरः, को नु वशी, को वरिष्ठः, को वा वसिष्ठः? इति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'ते च सर्वे देवाः प्रजापतिं गत्वा पृष्ठवन्तः। स च प्रजापतिर्विचक्षणः सर्ववित्। तेन कथितम्—कश्चं नु रे विवदन्तो देवाः! प्रत्यक्षं कुर्वन्तु, यस्य गमनेन सह शरीरं विनश्यति, स वरः, स च वशी। स एव वरिष्ठो वसिष्ठश्च।

'तथाविधं करणीयमिति संभाव्य देवाः स्वे स्वे स्थाने समासीनाः। प्रथमं नेत्रस्य देवः सूर्यो निर्गतो वर्ष यावत्। पुनरागते तु शरीरं तिष्ठति। कथन्नु स्थितमिति पृष्ठे, यथा अन्धस्तथेति श्रुत्वा सूर्यः स्वस्थाने स्थितः। तदनु वाग्-देवता मुखतो निष्क्रान्ता। पुनरागतायां तु वर्षान्ते शरीरं तिष्ठति, तद् यथा मुनिर्वा मूको वा। तदनु श्रोत्रदेवतायां गतायां पुनरागतायां च वर्षान्ते शरीरं रक्षति बधिरवत्। तदनु मनसि गते पुनरागते च तिष्ठति शरीरं विना मनोभावम्, संकल्परहितं समाधि-स्थित-योगीव।

'अथ प्राणदेवतायाः क्रमः समागतः। सर्वा देवताः शरीरं त्यक्त्वा गता इति प्राणदेवताया अपि गमनं वरम्। तथेति प्राणदेवता गन्तुं समुद्यता। प्राणदेवता संक्षुब्धा इति देवा अपि संक्षुब्धाः, इन्द्रियाणि च संक्षुब्धानि, शरीरं च विकम्पितम्। प्राणा गच्छन्ति वा गन्तुमुद्यता वा इति विचार एव असह्यः संवृत्तः। सर्वाः देवताः सहसैव समागतास्तत्र—वाक् च मनश्च, श्रोत्रं च चक्षुश्च। ते प्रार्थयन्ते—अहो रे प्राणदेवते! नहि गन्तव्यं शरीरतः। वयं सर्वे शरीरे वराः, वरिष्ठश्च प्राणः। वयं सर्वे वशिनः शरीरे, वसिष्ठश्च प्राणः। त्वयि प्रतिष्ठितं मनः, त्वयि संस्थितं शरीरम्। त्वयि रे सर्वा इन्द्रियवृत्तयः।

'प्रिय रे मुने! श्रावितां मया पुरा गाथा। प्रिया वै प्राणदेवता। त्वया तु तपश्चरणं कृत्वा त एव प्राणाः पुनः स्थापिताः शरीरे। नूतनं ते जीवनं सञ्जातम्। कायाकल्पस्त्वया कृतः। प्राणायाम-बलं त्वया रक्षितम्। त्वयि प्राणाः प्रतिष्ठिता इति सर्वाणि मनो-वाक्-चक्षुः-श्रोत्राणि पुनः प्रतिष्ठितानि। दीर्घं ते जीवनं भविष्यति। सुचिरं ते चरितं दृष्ट्वा सर्वे देवा मोदिष्यन्ति। भवतु ते प्रसन्नः!'

प्रतल्लिका-प्रमोदः

विवर्धते तु सततं व्ययेनैव शनैः शनैः।
द्यामाप्नुवन्ति सततं प्राप्य यत्तत् हि किं स्मृतम् ॥ १ ॥

सर्वेष्वथ तपःस्वेव किं तपः सुविशिष्यते।
त्यद् ब्रूहि येन तपसा तपस्वी वै नरो भवेत् ॥ २ ॥

मान्यः सत्त्वेषु को रूढो जगत्यां सर्वतोऽधिकः।
तालाङ्कस्य यशोदा का बभूव वद सत्वरम् ॥ ३ ॥

भीत्या रिपुः कस्य गदाप्रहारतः,
महाबलस्याथ पलायते रणात्।
सेनापतिघ्नश्च बभूव को युधि,
नरश्च दुर्योधन-भ्रातृ-नाशकः ॥ ४ ॥

दिनस्य स्रष्टा भुवि कः प्रसिद्धो
वाप्यां च पद्मस्य विकासकः कः।
करैश्च तिग्मैरिह युक्तवान् को
रतश्च को वा तमसां विदारणे ॥ ५ ॥

शत्रुञ्जयोऽस्त्रेण च केन चाऽर्जुनो
रामोऽपि लङ्काधिपतिं जिगाय वा।
सत्यं समाख्याहि किमस्त्रमुत्तमं,
नभःस्थितं चाप्यरिमाहते सदा ॥ ६ ॥

—श्री प्रशस्यमित्र शास्त्री—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नैनीतालः — अभिनवं खण्डकाव्यम्

—श्री पट्टाभिरामशास्त्रिणः—

[साहित्यविभागाध्यक्षः—वाराणसेय-संस्कृत-विश्वविद्यालयस्य]

[*कर्ममीमांसा-पारदृश्वानोऽपि साहित्य-सरसि जलकेलिकला-कुशलाः शास्त्रिपादाः ऐषमे ग्रीष्मावकाशे उत्तरप्रदेशस्य परमरम्ये पार्वते नैनीतालक्षेत्रे समागताः। तत्र परामुन्मुक्तां नृत्यन्तीं प्रकृतिनटीं वीक्ष्य बलादाबर्जिता तेषां लेखनी विविधालङ्कारालङ्कृतं दर्शनदृष्टिपरिवेषितं खण्डकाव्यमिदं प्रासूत यच्च नूनं रससारसर्वस्वान् सहृदयान् आप्यायितान् विधास्यतीति अस्माकं द्रढीयान् विश्वासः। शास्त्रिपादानामस्या निरुपधिकृपायाः कृते 'सूर्योदयः' अतितरां कृतज्ञतामभिव्यनक्ति।* —सम्पादकः]

अत्युच्चशृङ्गै - र्विविधै - र्मनोहरै - रनोकहै - र्वारिधरैश्च संवृता।
आगन्तुकानां मनसो विधायिका सन्तुष्टिमेषा खलु कानन-स्थली ॥ १ ॥
अध्यात्मशक्तेः परिवर्धनाय देशा इमे प्राक्तन-कालसिद्धाः।
देवेन नित्यं कृतसन्निधाना मनोरथानां परिपूरकाश्च ॥ २ ॥
मध्ये गिरीणां तरुभिः समुच्छ्रितैः सम्भूषितानां जलदैः समावृतैः।
नीरेण शीतेन युतो मनोहरः प्रेम्णा तडागस्तु निरीक्ष्यते जनैः ॥ ३ ॥
पुराणसिद्धो ननु नैनितालो यत्रा-ऽत्रि - कुत्सादि - महर्षिसङ्घैः।
स्नातं पुरा 'मानस'-संज्ञिते-ऽस्मिन् सरोवरे पूतजले विशेषतः ॥ ४ ॥
सरोवरं तं परितो महान्तो महीधराः काननशोभिगर्भाः।
महर्षि - सञ्चार - विशेषपूता अभ्रंस्पृशो भान्ति विशालकायाः ॥ ५ ॥
नैनीताल - महीधरेषु जलदा आच्छादयन्तस्तरून्
खेलन्तः परितो गजा-ऽश्व - गवय - व्याघ्रादि-रूपाण्यहो।
धृत्वा मानव-मानसेषु नियतेः सृष्टौ रुचेर्न्यूनतां
कुर्वन्त्याशु च वारिणा वनभुवं संक्षाल्य संयान्ति हि ॥ ६ ॥
महर्षिसङ्घस्य तपःप्रभावात् सत्वेषु सत्वं मनुजेषु शान्तिः।
लतासु वृक्षेषु सुमादिसम्प - च्चासन् विशेषेण वनप्रदेशे ॥ ७ ॥
गन्धर्वकन्या वनदेवताश्च स्वैरं विचेरुः परिहृष्टचित्ताः।
स्वर्गाच्च देवा अवतीर्य पूतान्यकारयन् साधु-वनस्थलानि ॥ ८ ॥
नैनीतालेऽतिरम्ये विलसति शुभदा वीक्षमाणा जलौघं
नानादेशादसह्यं दिनकर - करजं धर्मसन्ताप-वेगम्।
सापत्यान् प्रेयसीभिः प्रशिशमयिषया नैकरूपान् समेतान्
नानादेवी-कटाक्षैः करुण-रसभरैः शामयन्ती नितान्तम् ॥ ९ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गुप्तेश्वरः पर्वतराजि-राजिमध्ये तथा मारुत-तुल्य - वेगः ।
पातालशृङ्गाग्र - विराजमाना - वाकर्षतः पान्थजनान् सहर्षम् ॥ १० ॥
गुप्तेश्वरं पर्वतराज एषः सदाभिषिञ्चञ्जलबिन्दुभिः खे ।
संवीजयन् मारुतिमेव लोकान् पूजाविधिं शिक्षयतीव नित्यम् ॥ ११ ॥
गुप्तेश्वरो जयति पर्वतराजराजि - पातालगह्वर-गुहागृह-सन्निविष्टः ।
शैलेन्द्रराजतनया वरधूप-दीपै-र्नानाभिधा-ऽर्चयति तं वरदं महान्तम् ॥ १२ ॥
सव्येन नीरनिवहस्य तटे निषण्णं सिन्दूरचिक्कण-विलेपनशोभिताङ्गम् ।
ध्यानेन निश्चलतया समवस्थितं तं पश्यन्ति भीमवपुषं पथिकाः कपीन्द्रम् ॥१३॥
हृत्पद्मकोशस्थित - जानकीपतिं विचिन्तयन् सन्ततमेव नित्यशः ।
शक्तिं तथा शक्तिमतेव योजने देवीं पुरीं ध्यायति लोकमातरम् ॥ १४ ॥
तटाक - तीरस्थित - मन्दिरे शुभे पद्मासनावस्थित - भीमविग्रहः ।
विराजते वालधिवेष्टितोदरो गदासहायः कपिसत्तमो महान् ॥ १५ ॥
वामेन मारुतसुतस्य गिरेरधस्तात् संवेष्टितं वनज - वृक्ष-लताप्रकर्षैः ।
पाताल-संज्ञक-महेश्वरमन्दिरं तद् विद्योतते परमया सुषमा-समृद्ध्या ॥ १६ ॥
रथ्यासु कान्ताः परितस्तडागं विचित्रवेषाः खलु कम्बुकण्ठ्यः ।
करान् प्रियाणां परिगृह्य यन्त्यो विभान्ति गन्धर्वकुलाभिजाताः ॥ १७ ॥
क्रीडाङ्गणे कन्दुक-खेलने रतान् नौका - समारोहण - तत्परान् बहून् ।
मार्गेषु सञ्चाररताननेकान् नानाभिधा पश्यति हृष्टमानसा ॥ १८ ॥
काश्चित् प्रिया उच्चकचा विभान्ति विभान्ति काश्चिद् गललम्बिकेशाः ।
काश्चित् प्रिया उन्नतचूचुकाग्रै - र्विध्यन्ति यूनां हृदयं प्रियाणाम् ॥ १९ ॥

नैनीताल - विशालनीर - निवहे नौका-विहार-क्षमे
नौकारोहण-साध्वसाः प्रियतमा दृष्ट्वा च तासां करान् ।
धृत्वा रोपयितुं स्थितेषु पतिषूरोजस्थितं छादनं
स्रंसद्वीक्ष्य निरीक्षकै - र्मुहुरहो सानन्दमुद्वीक्षिताः ॥ २० ॥

अतीत्य कामं वयसः क्रमं ताः सत्योऽपि काचेन तथा कचानाम् ।
बन्धेन लेपेन सितेन भान्ति श्यामा इवैता नवयौवनेन ॥ २१ ॥
शोणाधरत्वं खलु सुन्दरीणां काव्येषु गीतं कविभिः पुराणैः ।
ओष्ठद्वयं रञ्जितमत्र तासां विलोक्य चित्रं प्रतिभाति नूनम् ॥ २२ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तुरङ्गमारोहण - कौतुकान्निजान् बालान् समारोप्य कुरङ्गदृष्टयः ।
कूले विहर्तुं रमणैश्च नीरधेः संयान्ति तेषां करपल्लवग्रहाः ॥ २३ ॥
विलोलकर्णाभरणाश्च दारिका वक्षोज - लोलायित - दीर्घवेणयः ।
करान्त - पादान्तविशेष - कञ्चुकाः कर्षन्ति यूनां हृदयानि भूरिशः ॥ २४ ॥
बाहूवन्त - कञ्चुकधरा अपराश्च नार्यो वक्षोजलम्बि-तनुदीर्घतरोत्तरीयाः ।
शीतेन वातहतकेन तदुत्तरीये नीतेऽपि निश्चलहृदः परितो भ्रमन्ति ॥ २५ ॥
अंसान्तकेशाश्च गलान्तकेशाः कन्या विकेशा बहुशश्चरन्ति ।
प्रकारभेदं कचबन्धनस्य समुद्वहन्त्यः किल भान्ति नार्यः ॥ २६ ॥
अंसान्तकञ्चुकधरा निटिलायताक्ष्यो दार्वासनानि पतिभिः सह भूषयन्त्यः ।
अंसस्थलेषु विनिवेश्य मुखानि भर्तुः शातं हि दुर्लभतरं समवाप्नुवन्ति ॥ २७ ॥
लौहानि चक्राणि दृढानि पादयोः प्रबध्य वै चिक्कण - दारुनिर्मिते ।
देशे युवानो युवतीभिराश्रिता नृत्यन्ति कूर्दन्ति विशेषकेलिभिः ॥ २८ ॥
अत्युच्चशृङ्गाणि समारुरुक्षवः कान्ताः पुरो यान्ति शनैः समुत्सुकाः ।
तां चानुयान्तोषु रमासु काचित् पृष्ठातिभाराद् गतिमान्द्यमाप्नुयात् ॥ २९ ॥
उच्छ्वास-निःश्वासचलत्परोधराः प्रस्विन्नगात्राः समवेक्ष्य वल्लभाः ।
आश्लिष्य दोर्भ्यां वदनेषु सङ्गतान् प्रोञ्छन्ति तासां श्रमजातविप्रुषः ॥ ३० ॥
अभ्रंलिहं पर्वतराजशृङ्गं कृच्छ्रेण कान्तैः परिगृह्य नीताः ।
शिलामयीं वेदिमधिश्रयन्त्यो रम्यां प्रपश्यन्त्यचलस्य शोभाम् ॥ ३१ ॥
अधश्च दृष्टिं प्रविसारयन्त्यो भीताः प्रकामं भ्रमितोत्तमाङ्गाः ।
पार्श्वे स्थितान् कान्तजनान् दृढेन समाश्लिषन् बिम्बफलाधरोष्ठ्यः ॥ ३२ ॥
इत्थं समीक्ष्य जनतादृत - भोगलीलां सम्प्रेषितो भगवतेव जितेन्द्रियः सः ।
वातात्मजो हि विविधं परिगृह्य रूपं तिष्ठत्यजस्रमिह लोकनियन्त्रणाय ॥ ३३ ॥
सांसारिकेषु विषयेषु सदा निविष्टं चेतो निवारयत हे प्रविनश्वरास्ते ।
सम्बोधयन्निति हि मारुतिरेष तीरे मौनेन लोकमुपदेष्टुमिवोपविष्टः ॥ ३४ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गोवध-निरोधो मांस-भक्षणञ्च

—श्री श्रीकृष्णशर्मा—

साम्प्रतिकानां कतिपयानां तथाकथित-शिष्टानामयं सहजः स्वभाव इव लक्ष्यते यद् गोवधनिरोध-प्रस्तावसमकालमेव अविवेकतस्तदाक्षेपो नाम। परं नोचितमेतत्। प्रश्नोऽयं गोवधस्य। गोवधोऽन्यो विषयो मांसभक्षणं चान्यत्। अद्यापि कतिपये स्वयं मृतायाः गवो मांसं भक्षयन्ति। किमेतावता स गोवध उच्येत? गोदुग्धमपि मांसमिव सात्त्विकोऽन्यतमो गोविकारो यं च सर्वे पिबन्त्येव। किमेतावता स गोवधो जातः? किं मातुः स्तन्यपायी बालो मातुर्वधं समाचरति?

विषयसाङ्कर्यं सर्वथाऽनुचितम्

गोवधनिरोधस्य नायमाशयो यत् जीवितावस्थायां गोवंशतः संभाव्या उपकारा न समादेयाः, अन्तं यावत् गोमयादिकं मरणोत्तरञ्च मांस-चर्मादिकं 'खादा'दिपदार्थनिर्मितौ नोपादेयमिति वा। प्रश्नस्तु एतावानेव यत्तस्या वधो न करणीयः, जीवितादृष्टक्षयेनैव सा म्रियेतेति। गोवधकारी दण्ड्यो भवेत्। सात्त्विक-दिव्यजीवनस्यायं साधन-मार्गो यश्च 'बाह्यानां सिद्धिकारणम्' अर्थात् राष्ट्रस्य आध्यात्मिकताया नैतिकतायाश्च संवर्धनमास्ते। राष्ट्रहितविरोधी व्यक्तिस्वातन्त्र्यं कथमपि समर्थनीयं न भवेत्।

युगान्तरीय-समुल्लेख - विषयकाणि विभिन्नानि मतान्यादाय गोवधनिरोधस्य विरोधः प्रकृतविषयतः सर्वथा असङ्गतः। साम्प्रतमिव अवैधं गोवधं कृत्वा तन्मांसभक्षणं भारते कदापि सम्मतं नासीत्। एतादृश-गोवधकर्ता सदैव दण्ड्यः प्रायश्चित्ती चैव मतः पुराकाले। विषयेऽत्र न कस्यापि मतभेदः। साम्प्रतिकोऽपि सर्वविधो गोवधः सर्वथा अवैध एव। अतस्तस्य सर्वथा निरोधः परमावश्यकः, एतावानेव प्राकृतिको विषयः।

विषयेऽत्र महाभागवतैः श्री चैतन्यमहाप्रभुभिः परम्परासिद्धो निर्णय एवमुक्तः—

प्रभु कहे वेदे कहे गोवध-निषेधे।
अतएव हिन्दूमात्र न करें गोवध॥
जियाइते पारे यदि तव मारे प्राणी।
वेद-पुरान एछे आछे आज्ञावाणी॥
अतएव जरद्गव मारे मुनिगण।
वेदमन्त्रे शीघ्र करे ताहारा जीवन॥
जरगद्गव हञायुवा हय आर बार।
ताते तार वध नहे हय उपकार॥
कलिकाले तैछे शक्ति नाहिक ब्रह्मणे।
अतएव गोवध केहोना करे एखने॥
(चैतन्यचरितामृते)

अर्थात् भगवता वेदेन गोवधो निषिद्धत्वेन उक्तः। अतो हिन्दुमात्रेण गोवधो न करणीयः। वेदे पुराणेषु च यत्र कुत्रचन गोवधस्य अनुज्ञा प्रदत्ता,[1] सापि हतस्य पशोः पुनर्जीविताधानसामर्थ्ये

---

१. अस्यायमाशयः—त्रेतादियुगेषु अस्थिगताः प्राणा आसन्। शोणित-मांसादीनामुपचयेन स्वकार्यसम्पादनाय असमर्थाः गवादय आगत्य ऋषीणां पुरतः स्वीयं भारमपनेतुं प्रार्थयन्ते स्म। दयालवश्च ऋषयः शस्त्रं स्तासां शोणित-मांसादिभरं दूरीकृत्य तेषु उपकारमेव कुर्वन्ति स्म। तासां प्राणविशसनाभावेन प्राणहिंसनरूपो वधो न जायते स्म। कलौ पुनः 'अन्नाद्भवन्ति भूतानि' इति कृत्वा तादृक्प्रयोगोऽसम्भवी।

CC-0. Prof. Satya Vrat Shastri Collection. Digitized by eGangotri. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सत्येव । अत एव मुनिगणा जरद्गवं हत्वा पुनर्वेद-मन्त्रैस्तान् जीवितानपि कुर्वन्ति स्म ; अत एव पूर्वं जरद्गवस्य हननं जायते स्म । नहि तेन तद्वधः, अपितु उपकार एव मन्यते स्म । किन्तु साम्प्रतिके कलौ युगे ब्राह्मणेषु तादृशी शक्तिर्न विद्यते । अतः साम्प्रतं केनापि गोवधो न करणीय इति ।

'ताते तार वध नहे' इदं सर्वप्रश्नस्य प्राचीनं समाधानम् । इत्थं युगान्तरीणं समुल्लिखित-सामर्थ्यं ब्राह्मणेषु न स्वीक्रियेत चेद् युगान्तरीयो गोवधोऽपि मन्तुं न शक्यः । कथमनुमन्येत इय-मर्धजरतीः । अतो युगान्तरोल्लेखः सर्वथा प्रकृतानु-पयोगी ।

प्राचीनभारते समनुष्ठितानां विभिन्नप्रयोगाणां वैज्ञानिकदृष्ट्या परीक्षणमन्तरा तद्रहस्यं कथमपि बुद्धौ समारोढुं न शक्नुयात् । प्राचीनास्ते प्रयोगाः तादृशप्रयोगैर्जायमानानां सर्वविधानिष्टानाम् (हिंसा-दोष-पारलौकिकाऽऽध्यात्मिकादिदुष्परिणामानाम्) वर्जनलक्ष्यं पुरस्कृत्यैव कृताः, राष्ट्रोन्नयने तेषा-माकूल्यमाधातुं तत्प्रयोगकाले प्राच्येरवहिताम् । दीर्घकालं यावत् स्वीयविविधसामर्थ्यैः प्रमाणानु-गृहीताः परिष्कृतास्तत्कालं साफल्याधायकाश्च ते प्रयोगा आसन् । तथापि अन्ततस्तैर्निर्ध्यातं यद् गोवधदुष्परिणामैः राष्ट्रं संरक्षितुं कोऽपि सार्वदि-गुपायो न सिद्धचति । अत एव युगत्रयान्ते तैः एकमात्र-गोवधनिरोध एव राष्ट्रहिताय निर्धारितः । अस्यैव क्षेत्रं नाम 'कलिवर्ज्यम्' । संस्कृतवाङ्मयगतानाम् अशेषाणां गोवधसमुल्लेखानाम् अयमेव चरमो निष्कर्षः ।

विज्ञान-चिकित्सा-राजनीत्यादिक्षेत्रेष्वपि आधु-निकैः अनेका प्रयोगाः क्रियन्ते । किन्तु यदा ते कथमपि हितकराः साफल्याधायकाश्च न सिद्धचन्ति, तदा तैस्ते निर्ममं त्यज्यन्ते एव । इयमपि समस्या तादृशी एव । एवञ्च संस्कृतवाङ्मये तादृशाः किय-न्तोऽपि प्रयोगाः कामं समुल्लिखिता स्युः, ते सर्वे प्रयोगा एवासन् । चरमनिष्कर्ष-स्थिरीकरणपूर्व-कालीनास्ते तत्कालीन - सामर्थ्यविशेषानुप्राणिता आसन् । सम्प्रति ते त्याज्या अनुष्ठानानुपयोगिन एवेति प्रयोगाणां तेषां चरमो निष्कर्षः ।

पुराणेतिहासेषु प्रसिद्धं यद् दीर्घकालं यावत् प्रयोगानुष्ठानैर्निर्णीय दैत्यगुरोः शुक्राचार्यस्य काले अन्यूनं बुद्धिव्यवसायिनां कृते मद्यनिषेधोऽनिवार्यतया स्थिरीकृतोऽभवत् । अत एवाद्य भारते अन्यदेशा-पेक्षया परम्परासिद्धो मद्यनिषेधः प्रचलति । अत्र यदि मद्यनिषेध-विरोधिनो मद्यनिषेध-स्थिरीकरण-पूर्वकालीनान् प्रयोगान् प्रदर्श्य मद्यपानस्य समर्थनं कुर्युश्चेत् किं तत्स्वीकरणीयं भवेत् ? प्रकृतेऽपि तथैव स्थितिः । अन्तरमेतावन्मात्रमेव यत् मद्य-निषेधो वैयक्तिको विषयः, अयं पुना राष्ट्रस्य जीवन-मरण-प्रश्नः ।

एतेनापि स्थिरीकरण-पूर्वकालीनाः प्रयोगाः गोवधनिषेधनिर्णये शासकान् न प्रतिबध्नन्ति । यतो हि—वेदशास्त्र - पुराणेतिहास - सूत्रोक्ताः समाजे रूढाश्च नैकाः प्रवृत्तयः शासनेन नियमान् विधाय निषेधिताः सन्ति । सत्येवम् एतादृश-प्राचीनप्रयोगचर्चानुयुक्त्या विचारयितुमक्षमाणां बलात् प्रतिपक्षिणो मुखमुद्रणमिव भवेत् ।

एतेनापि गोवधनिरोधो राष्ट्रस्य कृतेऽनिवार्यः । यतो हि—गौः, सतीः, सत्यवादी, अलुब्धः (भ्रष्टा-चारविहीनः), दानशीलः, वेदः, विप्रश्चेति सप्त राष्ट्रस्य सात्त्विकदिव्यजीवनसमुन्नायकाः । अत एव आध्यात्मिक - नैतिकदृष्ट्या राष्ट्रस्य सुस्थितौ

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रयोजकाः शिष्टैः समाम्नाताः। एभिरेव महीधृतिः आचार्यैरुक्ता—

गोभिर्वेदैश्च विप्रैश्च सतीभिः सत्यवादिभिः।
अलुब्धैर्दानशूरैश्च सप्तभिर्धार्यते मही॥

एतेष्वपि गवः सर्वप्राथम्यम्। आध्यात्मिक-नैतिकदृष्टचा राष्ट्रस्य सुस्थितिः समुन्नतिश्च प्राथम्येन गोवंशाधीना। अत एव गोवधकर्तृषु देशेषु आध्यात्मिक - नैतिकदृष्टचा भारतदेशवत् समुन्नतिर्नाभवदिति सुस्पष्टतरम्। अत एवोक्तम्—

नाविदितो दुश्चरितात् नाशान्तो नासमाहितः।
नाशान्तमनसो वापि प्रज्ञानेनैनमाप्नुयात्॥

एतादृश दुश्चरितेभ्यो निवृत्तिमन्तरा सात्त्विक-समुन्नतिः अशक्यतरेति। उपर्युक्तसप्ततत्त्वेषु इतरेषां तु सम्प्रति काचिद् विकृतावस्था दरीदृश्यते। किन्तु गोवंशस्तु अद्यापि स्वीयपूर्वरूपेणैव राष्ट्रहितं समाचरन् प्रतिष्ठित इत्यपि तद्वधनिरोधस्य प्रबलतरमुपोद्बलकं जागर्ति।

भारतीयाध्यात्मिकतयाः प्रतिष्ठेयं श्री स्वामि-विवेकानन्दादिभिः महात्मभिः बहुशः प्रस्थापिता। भारतस्य जगति प्रतिष्ठा प्रधानतया आध्यात्मिकताकृतैव। अत एव भारतीयाः सर्वे साम्प्रदायिका आध्यात्मिकताया गौरवं वहन्ति। सर्वेषु सम्प्रदायेष्वस्यां प्रेम्णोऽभिवृद्धिः इत एवावश्यकी। गोवध-निरोधविषयोऽत्र अतितरां समुपयुक्तः। कस्मिन्नपि सम्प्रदाये गोवधो नानिवार्यः। अतः सर्वसम्प्रदायेषु भारतीयाध्यात्मिकताया सात्त्विकदिव्यजीवनस्य समुन्नायको गोवधनिरोधविषयोऽयं सर्वथा राष्ट्रैक्य-धायको राष्ट्रहितकरश्च सिध्यति।

आध्यात्मिकता विश्वोपयोगिनी

आध्यात्मिकतयाः प्रतिष्ठा न केवलं भारतदेशस्य कृते, अपि तु विश्वस्यापि स्थितये परमावश्यकी। सम्प्रति जडविज्ञान - समुद्भावितास्यो विपद्भ्य-स्त्राणाय सर्वतो दृष्टिः आध्यात्मिकतायामेव विवशतः केन्द्रिता जायते सर्वेषां विवेकिनाम्। अद्यतनीयो जाज्वलमानः प्रश्नोऽयं यद् विज्ञानमिदं कथङ्कारम् आध्यात्मिकतया नैतिकतया च नियन्त्रणीयमिति। सस्पृहं विश्वं भारतदेशत एवैतद् आशास्ते।

भारतीयैर्महद्वैज्ञानिकैः डा० जगदीशचन्द्र बोस महाभागैर्यदा वैज्ञानिकैः प्रमाणैः वृक्षेषु जीवगति-साधिता, तदा श्रूयते डॉ० एनी बेसेन्ट महोदयाभि-रुक्तमासीत् यत् 'कामं विश्वस्मिन् महत्तरा गवेषका वैज्ञानिकाः स्युः। केवलमयं भारतीय वैज्ञानिक आध्यात्मिकता-नियन्त्रितस्य विज्ञानस्य अनुसन्धाने सफलोऽभवत्, नान्यः कश्चन। यतो हि अयं भारतीयाध्यात्मिक-संस्कारिणो हिन्दूकुटुम्बस्य सदस्य आसीत्' इति।

अतोऽद्य परमावश्यकं यदखिलं विश्वमेव आध्यात्मिक-दिव्यजीवनस्य सुसंस्कारान् आत्मनि निदध्यात्। अन्यूनं भारतीयानां सर्वेषां साम्प्रदायिकानां तु इदमत्यावश्यकं कार्यं यदाध्यात्मिक-सांस्कृतिक - संस्कारान् स्वात्मनि संवर्ध्य विज्ञानम् आध्यात्मिकतया नियमितं विधाय विश्वस्य सुस्थितौ सहयोगं दद्युः।

इत्थं सर्वभारतीयेभ्य अनुपेक्षयाया आध्यात्मिकताया अभिवृद्धये गोवधनिरोधः किल निरापदः प्रशस्तश्चोपक्रमः। विदेशेषु भिन्नसाम्प्रदायिकाना-मपि भारतीयाध्यात्मिकताविषये जिज्ञासा वर्धमाना दरीदृश्यते। अस्माकं देशेऽपि मध्यकाले कबीर-रहीम-रसखानादिमहात्मभिः अकब्बरादि-सम्राड्भिरपि विषयेऽत्र आत्मनः प्रियता प्रख्यापिता; या किलास्माकं सर्वेषां कृते अतितरां मार्ग-दर्शिका। तत्रापि रसखान-महाभागेन तु गोर्नाम-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नामापि न ज्ञायते

आबाल्याद् गुरुसन्निधानवशतः प्रोन्मीलितप्रातिभा-
ऽऽलोका लोकसमादृताः सदसतोर्भेदावगाहक्षमाः ।
विद्वांसोऽपि कलौ खलीकृतधियो मज्जन्त्यसज्जल्पने
तेनैवाद्य विवेकवासितहृदां नामापि न ज्ञायते ॥१॥

कालिन्दीकमनीयकूलविलसत् - कादम्बवाटीनटद्
गोपीलोचनकैरवामृतकरे कारुण्यधाराधरे ।
लग्नं यस्य मनो मनाङ्मतिमतो धन्यस्य तस्यान्तिके
कालस्यास्य कलेः कलेवरपुषो नामापि न ज्ञायते ॥२॥

श्रीमद्भारतभूमि-दास्यदलने सन्धानुबन्धाच्चिरं
बन्धात्तां विरहय्य कीर्तिविशदास्तुङ्गं पदं लोभिरे ।
ये तुच्छीकृतकीर्तयो निजतनुच्छेदेऽपि मौनं श्रिता-
स्तेषां हन्त ! महात्मनां जनमुखे नामापि न ज्ञायते॥३॥

वामा यत्र चरन्ति पूरितपुराऽऽरामा निशासङ्गमे
सामाद्या न गिरः स्फुरन्ति परितः कामार्थमात्रोद्यमे ।
दामान्यत्र नवे युगे न च पुनर्धामानि धर्मात्मनां
'मामा'-वादवशाद् विशुद्धमनसां नामापि न ज्ञायते॥४॥

--श्री वटुकनाथशास्त्री खिस्ते--
[प्राध्यापकः--वाराणसेय-संस्कृत-विश्वविद्यालयस्य]

ग्राहं स्वात्मन अध्यात्मप्रियता परं समभिव्यञ्जिता । यथा--

जौ पसु हौं तो कहां बस मेरो,
चरौ नित नन्द कि धेनु मझारन ।

अर्थात् 'यद्यहं पशुयोनौ जन्म गृह्णीयाम्, तदा नित्यं व्रजराजस्य नन्दगोपस्य व्रजेषु चरेयम्' इति ।

वयमितिवृत्तेषु पठामो यत् सम्राज्ञः अकब्बरस्य अशोकस्य च साम्राज्ये सर्वथा गोवधनिरोधः कृत आसीत् । नैकैश्चक्रवर्तिभिः हिन्दूमहाराजैः, गीतायाः अध्यात्मगुरुभिः भगवद्भिः श्रीकृष्णैश्च आध्यात्मिकता-प्रेम्णा स्वात्मैव गोसेवकत्वेन कल्पितः । अतो विषयोऽयं सर्वेषां सज्जनानां निर्विशेषमैकमत्येन अभ्यर्हित इति पृथक् वक्तुं नावशिष्यते । प्रतिवेशि - नयपालराष्ट्रे पुनरद्यापि गोवधनिरोधो विराजते ।

अतः इत्थं गोवर्धनिरोधद्वारा सर्वसम्प्रदायेषु अध्यात्मप्रियतासंवर्धनमुखेन विज्ञानमध्यात्मनिय-न्त्रितं विधाय तत् शङ्करं कर्तुं सर्वैरग्रेसर्तव्यम् । जनतायाः कर्तव्यमेतद् यदत्र विषये समुचितकार्य-सम्पादनाय शासनाय सहयोगो देय इति ।

अनेन राष्ट्रस्य आर्थिकक्षतेः या आपत्तिराक्षिप्यते, तदर्थमपि उपाय - योजना नाशक्या । श्री सतीशचन्द्रदास गुप्तेन 'दि काउ इन इण्डिया' नामके भागद्वयात्मके ग्रन्थे सर्वस्मिन्नस्मिन् विषये सविस्तरं विचारितं यत्र च महात्मगान्धिनाम् 'आमुख'-मप्यास्ते । एवंस्थितौ कतिपयापातरमणीयानि कारणानि प्रस्तुत्य गोवधनिरोधन औदासीन्यं न कदापि न्यायसङ्गतम् । गोवधनिरोधादन्यः को नाम विषयो यो भारतीयाध्यात्मिकतायाः साधको भवेत् ? अत्र भारतभूमौ जातेषु अत्रैव संवर्धितेषु मनुजेषु ऐकात्म्यभावं जनयेत् । भारतीयैकात्म्यभावाभिवर्धनाय अहरहः प्रयतमानेन भारतीयशासनेनैव विषयेऽत्र अग्रक्रमो निक्षेप्तव्य इत्येव तस्य कृते शोभनं भवेत् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्री भारतधर्म-महामण्डल-शास्त्रप्रकाश-विभागद्वारा प्रकाशितानि पुस्तकानि

१.	धर्म-कल्पद्रुम प्रथम खण्ड	२.००
२.	,, द्वितीय खण्ड	१.५०
३.	,, तृतीय खण्ड	२.००
४.	,, चतुर्थ खण्ड	२.००
५.	,, पंचम खण्ड	२.००
६.	,, षष्ठ खण्ड	३.५०
७.	,, सप्तम खण्ड	२.००
८.	,, अष्टम खण्ड	३.५०
९.	धर्म-कल्पद्रुम द्वितीयखण्डसहित राजकीय संस्करण	५.००
१०.	प्रवीण दृष्टि में नवीन भारत १-२ खण्ड	२.००
११.	नवीन दृष्टि में प्रवीण भारत	१.००
१२.	साधन-चन्द्रिका	१.७५
१३.	शास्त्र-चन्द्रिका	१.५०
१४.	धर्म-चन्द्रिका	१.२५
१५.	आर्य-गौरव	०.५०
१६.	नीति-चन्द्रिका	०.५०
१७.	धर्म-प्रश्नोत्तरी	०.२५
१८.	चतुर्दश-लोकरहस्य	०.२५
१९.	गीतार्थ-चन्द्रिका सजिल्द	३.००
२०.	,, ,, अजिल्द	२.५०
२१.	सनातनधर्म-दीपिका	०.७५
२२.	धर्म-विज्ञान प्रथम खण्ड	५.००
२३.	,, द्वितीय खण्ड	४.००
२४.	,, तृतीय खण्ड	४.००
२५.	सतीचरित्र-चन्द्रिका	२.००
२६.	नित्यकर्म-चन्द्रिका	०.२५
२७.	धर्म-सोपान	०.२५
२८.	धर्मकर्म-दीपिका	०.२५
२९.	सदाचार-सोपान	०.०६
३०.	कन्याशिक्षा-सोपान	०.०६
३१.	ब्रह्मचर्य-सोपान	०.२५
३२.	साधन-सोपान	०.५०
३३.	शास्त्र-सोपान	०.२५
३४.	उपदेश-पारिजात	०.५०
३५.	कल्कि-पुराण	१.५०
३६.	पातञ्जल-योगदर्शन	३.००
३७.	महामण्डल-रहस्य	१.५०
३८.	मन्त्रयोग-संहिता	१.००
३९.	हठयोग-संहिता	०.५०
४०.	तत्त्वबोध	०.१३
४१.	स्तोत्र-कुसुमाञ्जलि	०.२५
४२.	भगवद्गीता प्रथम खण्ड	१.००
४३.	विष्णु-गीता	१.००
४४.	सूर्य-गीता	०.५०
४५.	शक्ति-गीता	१.००
४६.	बीज गीता	०.७५
४७.	शंभु-गीता	१.००
४८.	संन्यास-गीता	१.००
४९.	गुरुगीता	०.२५
५०.	कर्ममीमांसा-दर्शन प्रथम खण्ड	१.५०
५१.	,, द्वितीय खण्ड	२.००
५२.	,, तृतीय खण्ड	५.००
५३.	कर्ममीमांसा-दर्शनम् (संस्कृत)	२.००
५४.	राम-गीता	२.५०
५५.	कहावत-रत्नाकर साधारण रायल	१.००
५६.	रामायण तुलसीकृत	१.५०
५७.	दैवीमीमांसा-दर्शन प्रथम भाग	३.५०
५८.	,, द्वितीय भाग	५.००
५९.	त्रिवेदी सन्ध्या	०.३७
६०.	गोव्रत-तीर्थमहिमा	०.५०
६१.	मार्कण्डेय-पुराण प्रथम खण्ड	१.००
६२.	,, द्वितीय खण्ड	१.००
६३.	,, तृतीय खण्ड	१.००
६४.	ऋजु-पाणिनीयम्	०.७५
६५.	संगीत-सुधाकर	२.५०
६.	पुराण-रहस्य	१.५०६
६६७.	संन्यासधर्म-पद्धति	१.५०
८.	पातञ्जलयोग-दर्शनम् (संस्कृत)	४.००

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

पञ्जीकृतसंख्या एल० १८९७

Digitized by Arya Samaj Foundation Chennai and eGangotri

सूर्योदयस्य नियमाः

पत्र-संहिता

१. 'सूर्योदय'-मासिकपत्रस्य वार्षिकं शुल्कं रूप्यकपञ्चकं वर्तते। धनादेश (मनीआर्डर) द्वारा तत्प्रेषणीयम्। वी० पी० द्वारा प्रेषणे ५० पणाः पृथक् प्रदेयाः स्युः।

२. आवर्षं गम्भीरसाहित्यसमन्विताः १२ अङ्काः प्रकाश्यन्ते। नवीनग्राहकत्वं प्रथमाङ्कतः (जनवरी-अङ्कतः) एव स्वीक्रियते। माध्यमिकेन केनापि अङ्केन ग्राहकत्वं न स्वीक्रियेत।

३. आंग्लमासस्य २६ दिनाङ्के 'सूर्योदयः' प्रकाशितो भवति। वारद्वयं संशोध्य ग्राहकेभ्यः प्रेष्यते। अतस्तदलाभे पूर्वं स्वकीय-पत्रालयतस्तदनागमनस्य निर्णयं कृत्वैव १० दिनाङ्कानन्तरं वयं सूचनीयाः।

४. लेख-कवितादीनां भाषा संयता, सरला, शुद्धा च भाव्या। प्रकाशनीय-लेखादीनां स्पष्टाक्षरैः कर्गजस्यैकपृष्ठे एव लेखनमावश्यकम्। अस्वीकृता लेखादयः पोस्टविभागीय-चिटिका (टिकट) प्राप्त्यनन्तरं परावर्तयितुं शक्यन्ते।

५. सम्पादकीय-विषयसम्बद्धे पत्र-व्यवहारे 'सम्पादकः' इति, व्यवस्थाविभागीय-पत्रव्यवहारे च 'व्यवस्थापकः' इति च स्पष्टं लेखनीयम्। तेन उत्तरलाभे मुधा विलम्बो न भवेत्।

विज्ञापन-शुल्कम्

सूर्योदये सुरुचिपूर्णं विज्ञापनं प्रकाश्यते। एकवारं तस्य प्रकाशनस्य शुल्कक्रमश्च अधोलिखितोऽस्ति। सार्वकालिकस्य दीर्घकालिकस्य च विज्ञापनस्य कृते विशेष-सौविध्याय पत्र-व्यवहारः कार्यः।

साधारणस्य प्रतिपृष्ठस्य	१००) रु०	साधारणस्य प्रत्यर्धपृष्ठस्य	६०) रु०
साधारणस्य चतुर्थांशपृष्ठस्य	३५) रु०	आवरण-चतुर्थपृष्ठस्य	२००) रु०
आवरण-द्वितीय-तृतीयपृष्ठयोः	१५०) रु०	प्रथमावरणपृष्ठे विज्ञापनं न स्वीक्रियेत।	

—सङ्केतः—

'सूर्योदय'-कार्यालयः, भारतधर्म-महामण्डलम्, जगत्गंज, वाराणसी।

सम्पादकः, प्रकाशकः, मुद्रकश्च—गोविन्द नरहरि वैजापुरकरः,
श्रीभारतधर्ममहामण्डलम्, जगतगंज, वाराणसी कैण्ट।
मुद्रण-स्थलम्—आनन्दकानन प्रेस, सी० के० ३६/२०, वाराणसी।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सूर्योदयः

भारतधर्ममहामण्डलस्य

मासिकं मुखपत्रम्

❀

वर्षम् ४४

❀

अङ्कः ७

❀

सम्पादकः

गो० न० वैजापुरकरः

❀

जुलाई

१९६८

❀

वार्षिक-मूल्यम्

५) रूप्यकाणि

❀

प्रत्यङ्क-मूल्यम्

अर्धरूप्यकम्

❀

आचारः परमो धर्मः

●

आचाराल्लभते ह्यायुराचाराल्लभते श्रियम् ।
आचारात् कीर्तिमाप्नोति पुरुषः प्रेत्य चेह च ॥
दुराचारो हि पुरुषो नेहायुर्विन्दते महत् ।
त्रसन्ति यस्माद् भूतानि तथा परिभवन्ति च ॥
तस्मात् कुर्यादिहाचारं यदीच्छेद् भूतिमात्मनः ।
अपि पापशरीरस्य आचारो हन्त्यलक्षणम् ॥
आचारलक्षणो धर्मः सन्तश्चारित्र्यलक्षणाः ।
साधूनां च यथावृत्तमेतदाचारलक्षणम् ॥

—महाभारते, अनु० १०४ ६-९

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अनुक्रमः

प्रपानकः	पत्रपुटम्	परिवेषकः
श्रीहरिस्तोत्रम्	१४५	श्री स्वामी लक्ष्मणशास्त्री
श्री महर्षि-ज्ञानानन्द-चरितम्	१४६	श्री विन्ध्येश्वरीप्रसाद शास्त्री
साम्प्रदायिकता-निरोधो भारतीय-संस्कृतिश्च	१४७	सम्पादकीयम्
(१) श्रीसूक्ति-लहरी	१५१	श्री अमृतवाग्भवाचार्यः
रस-स्वरूप-विमर्शः, भक्तिरसश्च	१५३	श्री पूज्य करपात्रस्वामिनः
मानस-भारती	१५४	श्री जनार्दन गङ्गाधर रटाटे
मङ्गलं स्तोत्रञ्च : समीक्षणम्	१५५	श्री डा० हरिदत्त पालीवालः
(३) अद्वितीयस्य ब्रह्मणो लक्षणाभावः	१६१	श्री जगन्नाथ श्रीधरशास्त्री पदे
परीक्षा-फलम् : १९६८ वर्षीयम्	१६५	श्री परीक्षामन्त्री

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सूर्योदयः

रागद्वेषनिशाटनं विधुरयन् मोहं तमो नाशयन्,
तामिस्रं जडवादकैरवकुलं ज्ञानत्विषा ग्लापयन् ।
विद्वत्कोकमशोकयन् नयसुधीरोलम्बुमुन्मीलयन्,
सञ्जातः सुमनोमनो मधुरयन् सर्वत्र सूर्योदयः ॥

४४ वर्षे] वाराणसी, आषाढः २०२५ : जुलाई १९६८ ई० [७ अङ्कः

श्रीहरिस्तोत्रम्

स्वश्वादिवृन्दारकवृन्दवन्दितः सर्वत्र सत्त्वं घटयंस्तिङीव लट् ।
पाण्यन्तरोत्क्षिप्त-सुदर्शनायुधो मलं प्रणुद्यात् स न आदिपूरुषः ॥ १ ॥
अदादि-भूमध्यडुतान्तशक्तिकं स्वभक्तचेतोमधुलिट् श्रिताश्रयम् ।
शेषासनं तत्त्वमयं चिरन्तनं त्रिमूर्तितो मध्यमपूरुषं भजे ॥ २ ॥
भौमासुरा ह्वादि-विदारिणारिणा तद्रक्तपङ्काङ्कविलुट् स्वराश्रिणा ।
यङन्तदीपा-ख्यविशेषणत्विषा पाल्या जना उत्तमपूरुष त्वया ॥ ३ ॥
लीनेषु कल्पै त्रिदिवादि-धामसु चकास्ति ज्ञेयोऽस्य वपुर्यथैव लट् ।
विश्वं लुगन्त-प्रकृतीयते यतो नमोऽस्तु तस्मै रवि-कोटिवर्चसे ॥ ४ ॥
स्वादिष्ट-पीयूषममुष्य तेजसा सुरव्रजोऽलेट् परिभूय दानवान् ।
को नामधातुर्जगतां ततोऽपरः पूज्यः क्षितौ चन्द्रकलाधरार्चितात् ॥ ५ ॥
विधुन्तुरादादि-त्रिदशद्विषां य उ विरूपकोऽभूदिव लोट्-स्वरूपिणाम् ।
कण्ड्वादिरुग् गन्धकलेपनाद् यथा ह्यमङ्गलं नश्यति तस्य नामभिः ॥ ६ ॥
वक्षोरुधा दिव्यमणिश्रियाश्रिते पीतांशुकालङ्कृत-नील-विग्रहे ।
हरौ रतिर्मोक्षपद-व्यवस्थितिं दद्यात् किलैवं बुधपुङ्गवैर्जगे ॥ ७ ॥
वर्षाम्बुमुग्गर्जितनादिशङ्खधृत् पद्मालया - लिङ्गितपादपङ्कजः ।
स्वभावकर्म-प्रतिबद्धबन्धनं जगद्गुरुर्मोचयताज्जिजं जनम् ॥ ८ ॥
शाक्त्यादिकेष्वप्यपकारकारिषु सदा दयालुङ्कलये हृदम्बुजे ।
समर्चनीयं शुभकर्मकर्तृभिस्तं शुक्र - शिष्यान्वयनाशिनं हरिम् ॥ ९ ॥
लेभे यतः श्रीः प्रचुरादितेः सुतैर् लङ्तः क्रियासिद्धिरिवेह धातुभिः ।
विमूलकारार्थमशेषपाप्मनां भजे सदा तं कलुषद्रुमाशनिम् ॥१०॥

—श्री स्वामि - लक्ष्मणशास्त्रिणः, नागौरनिवासिनः —

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्री महर्षि-ज्ञानानन्द-चरितं महाकाव्यम्

— श्री विन्ध्येश्वरीप्रसादशास्त्री —

प्रकृष्ट-पाण्डित्यमनन्तबोधं योगाङ्ग-विज्ञाननिधिं महर्षिम् ।
अलौकिक - ज्ञानवरं यतीन्द्रमध्यात्ममार्गैकगुरुं प्रसिद्धम् ॥ ७१ ॥

७२. सुधीन्द्रसेव्यं प्रखरत् - प्रभाव-
मानेतुकामा निजराजधानीम् ।
परं प्रसन्नः परमादरेण
प्रस्थापयामास विशिष्टलोकान् ॥

७३. विप्रर्षिवर्योऽय - मनन्तकीर्ते
राजर्षिवर्यस्य निमन्त्रणं तत् ।
विनीत - तत्प्रेषित - पौरमुख्य-
मुखोद्गतं स्वीकृतवान् प्रसद्य ॥

७४. तस्योदयाख्यस्य पुरस्य शाह-
पुरं शुभं सन्निकटे चकास्ति ।
आनन्दसंवर्धन - रम्ययान-
मारुह्य संयातुमिमेष योगी ॥

७५. प्रस्थानकाले मुनिपुङ्गवस्य
सपौरमुख्यः सह पुत्रदारैः ।
राजा च सर्वे रुरुदुः सशोका-
स्ते प्राणिनः स्थावर-जङ्गमाश्च ॥

७६. आशीर्भिरभ्यर्च्य समस्तलोकान्
कृत्वा विशोकान्प्रणतान् सशोकान् ।
पुनः पुनः स्वागत-वार्तया तान्
प्रातिष्ठताऽयं ह्युदयाख्य-पुर्याम् ॥

७७. प्रतापवीरस्य पितोदयाख्यः
सिंहो ह्यभूत् तस्य समाह्वयेन ।
निवासितं तत्पुरमित्यदोऽस्ति
नाम्नोदयाख्यं पुरमृद्धिशालि ॥

७८. पुरं तदासादितवान् महर्षि-
र्यदा तदैवास्य निवासहेतोः ।
निकेतनं सर्वसुखैः सुजुष्ट-
मभून्निदिष्टं हि महारणेन ॥

७९. तत्र स्थितोऽनेकविधाभिरेष
सेवा - सपर्याभिरहर्निशं हि ।
समर्चितः सेवनविद्-वरेण्यै-
र्मोमुद्यमानो न्यवसद् यतीन्द्रः ॥

अथैकदा श्रील-महारणोऽसौ फतेहसिंहो नृपमण्डलेशः ।
मुनीन्द्र-सन्दर्शनलालसः सस्तं राजसौधं निजमाजुहाव ॥ ८० ॥

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

साम्प्रदायिकता-निरोधो भारतीय-संस्कृतिश्च

विगतेषु दिवसेषु अस्माकं देशे वर्धमानाया स्तथाकथित-साम्प्रदायिकतायाः निरोधपुरस्सरं राष्ट्रियैक्यस्थापनार्थं राष्ट्रियस्तरेण यत्नः समभूत्। कश्मीरप्रदेशे समायोजितं राष्ट्रियैकता - सम्मेलनं किल तस्य समुल्लेख्यं मूर्तं रूपं यत्र भारतशासनेन आमयस्यास्य निवारणाय कतिपये कार्यक्रमा निर्धारिताः। सम्प्रति ते नियमरूपेण परिणमय्य कार्यान्वयीकरिष्यन्ते।

वस्तुतो विषयोऽयं पूर्वाग्रहगहिलतां दूरे संस्थाप्य ऐतिह्य - संस्कृति - देश - काल - परम्परा-समन्वय-पुरस्सरं परमेण तात्स्थ्येन विवेचनीयो निर्धारणीयश्चास्ते। दलविशेषीय-मान्यता-प्रभावितेन चेतसा विषयस्यास्य विवेचनं 'विनायकं प्रकुर्वाणो रचयामास वानरम्' इमामेव सूक्तिं चरितार्थयिष्यति। सप्रश्रयं सूच्यते यद् दौर्भाग्यदत्र देशे अद्यावधि एतादृशमेव जातम्, जायते च। यदि भारतशासकास्तत्त्वतो देशादस्मात् मूलकृन्तनीं तथाकथितां साम्प्रदायिकतां व्ययनेतुं वाञ्छन्ति, तदा तेषां देशभक्तिस्तान् आह्वयति यत्सर्वं पूर्वग्रहमेतद्विषयकं दूरे संस्थाप्य ततो राष्ट्रोत्थानोपायश्चिन्तनीयः। आस्तां तावत् शब्दजाल-वितानितया भूमिकया। प्रकृतमनुसरामः।

प्रथमतः 'साम्प्रयिकता' शब्द एव विषयस्यास्य कृते भारतीय-प्राचीन-वाङ्मये कुत्रापि सङ्केतितो नास्ति। 'सम्प्रदायः' किलास्माकं परमं विश्रामस्थानं यतोऽयं 'साम्प्रदायिकता'-शब्दो निष्पन्नः। विश्वस्मिन् भारतीय-संस्कृतेः सर्वादिम-स्थितिसाधकोऽयं सम्प्रदायः पूजनीयां प्राचीन-गुरु-शिष्य-परम्परायां सङ्केतितो भाषातत्त्वविद्भिः। सम्प्रदायाविच्छेदेनैव वेदानामनादित्वमपौरुषेयत्वं साध्यते मीमांसकैः। एतादृश-गुरु-शिष्याणां पितृ-पुत्राणाञ्च सुनिर्धारित-प्राचीन-ज्ञानविज्ञाना-ऽऽचारप्रभृतीनाम् अविच्छिन्नं गाङ्गकल्पं प्रवाहं सम्प्रदायं रागद्वेषेर्ष्याहिंसादि-कलुषिते असहिष्णुतारूपेऽर्थे सङ्केतयन्तो वयं कथन्नाम न विभेम इत्येव महदाश्चर्यम्। स्वमातरं 'रूपाजीवा'-शब्देन सङ्केतकस्य कुलदीपकस्येव(?) अस्माकमयं व्यवहार इति महत्ता कष्टेन वक्तव्यं भवति। नूनमनेन कर्मणा विश्वस्य पुरतोऽस्माकं मर्यादाभञ्जक-प्रेष्ठत्वमभिव्यज्यते।

इदानीं दौर्भाग्यात् तमेव रूढमर्थं गृहीत्वा साम्प्रदायिकतां विश्लेषयन्तु। तत्रेदमवधेयं यद् भारतमतितरां प्राचीनो देशः। अस्य संस्कृतिः प्रागैतिहासिक-कालतोऽद्यापि अक्षुण्णा प्रसरति। अस्य कारणमिदमेव यदियं मानवमात्रम् अमृतस्य परमात्मनः पुत्रं मनुते। तेन च तेषां परस्परमकृत्रिमो बन्धुभावः प्रतिफलति। किं बहुना, प्राणिमात्रं सा सदयेन कटाक्षेन विलोकयति। पिपीलिकामपि पोषयितुं शर्करादानमनुशास्ति। रन्तिदेवसदृशा राजानो जीमूतवाहनसदृशाश्च महाप्राणा आत्मबलिमपि उपायनीकृत्य परान् रक्षन्ति अस्यां संस्कृतौ। अस्याः पण्डिताः शुनि श्वपाके च वसन्तमेकमात्मानं समं पश्यन्ति। अत्र भोगात् त्यागो ज्यायान् गण्यते। सत्यनिष्ठायां महाराजो हरिश्चन्द्रो मृतं पुत्रमपि न दयते। सूत्रे मणिगणा इव सर्वान् धर्मानुयायिन एकतासूत्रे मालाकारेण संग्रथ्य, जगन्नाटकसूत्रधारस्य वक्षसि तामाबद्ध्य नः कृतार्थयति इयमस्माकं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भारतीया संस्कृतिः। एतादृश्यां संस्कृतौ कुतः सङ्कुचितताया अवसरः? को वा साम्प्रतिको भोगकीटस्तां परिष्कर्तुमात्मनि किञ्चिदपि सत्वं धारयेत्? अनधिकृतवर्तने तु किमपि वक्तव्यं नावशिष्यते।

सत्यप्येवं पूर्णोदार्यं शारीरिक-मानसिक-प्राकृतिकस्तरानुरूप एव प्रत्येकस्य आचारोऽनुमन्यतेऽनया संस्कृत्या। उत्प्लुत्य चन्द्रशालारोहणं कदापि श्रेयसे न जायते। सोपानपद्धत्या यथाक्रममारोहणमेव अन्ततस्तस्य ऐकान्तिकात्यन्तिकं हितं साधयति। अत एवात्र वर्णाश्रमव्यवस्था प्रचलिता। उच्चस्तरं गतस्य उच्चता-संगोपनपुरस्सरं ततोऽप्युच्चतरस्तर-लाभाय रक्तादिसङ्करो निषेधितोऽनया संस्कृत्या। सर्वस्य परमहितादन्यः कोऽपि दूषितो भावो नासीदस्या एतादृश-व्यवस्थानिर्धारणे। सत्येवं यदि नाम केषाञ्चन अनुष्ठायिनां सीमिताशयभावेन किमपि अनपेक्षितं तत्त्वं दृश्येत तदां ते परिष्करणीयाः, न पुनः सा चिरन्तना संस्कृतिः।

इत्थं भारतीय-संस्कृतेः सर्वसमन्वयित्वमालक्ष्य स्वतन्त्रभारतस्य शासकानां कर्तव्यं भवति यत् यथेयं स्वीयविशुद्धरूपेण परिरक्षिता भवेत्, तथा प्राणपणेन यतनीयम्। भारतीयसंस्कृतेः परमं सूत्रं 'सरल-निराडम्बरं जीवनमुच्चविचारश्च' वर्तते। स्वतन्त्रभारतस्य उत्कर्षः 'पेरिस'-संस्कृतेरनुकरणेन तत्र कीर्तिमान-प्रस्थापनेन न सम्भवी। अत्रस्थो महामन्त्री चाणक्यः क्षणं ध्येयः। कियती आधुनिकी कथितसम्पन्नता तस्मिन्नासीत्? तथापि किं तेन गुप्त-साम्राज्यं लोकोत्तरराजनीतिपाटवेन न परिचालितम्? अतः स्पष्टमेतत् यदस्माभिः भारतीयैः सरलजीवनैर्भाव्यम्। भारतीय-स्वातन्त्र्यमहाभियानकाले अस्मासु स्वदेशीव्यवहारस्य महानुत्साह आसीत्। स्वावलम्बनञ्च सर्वक्षेत्रेषु व्रतमिव मन्यते स्म तदाऽस्माभिः। किन्त्विदानीं सर्वोच्च-वैदेशिक-वस्तुव्यवहृतिमेव आत्मनः परमां सांस्कृतिकतां मन्यामहे। स्वावलम्बनञ्च दारिद्र्यप्रतीकम्, अपमानास्पदं स्वप्रतिष्ठा-प्रतिकूलं मन्यते। अनेनैव उत्तरोत्तरं वर्धमानेन कर्मणा भारतराष्ट्रमद्य नैकेषु दैनिकजीवनावश्यकेषु वस्तुषु विदेशपरतन्त्रं जातम्, अहरह जायते च। विज्ञा विवेचयन्तु यद्विषयविशेषे परराष्ट्र-मुखप्रेक्षकं किन्नाम राष्ट्रमात्मनः स्वातन्त्र्यं कियदवधि रक्षयितुं प्रभवेत्? स्पष्टमेतत्, यथा यथा वयं प्रत्येकविषये पररराष्ट्रमुखप्रेक्षका भविष्यामस्तथा तथा अस्माकं समधिगतं स्वातन्त्र्यं क्रमशोट्टसत् एकस्मिन् दिने वयं पूर्वतोऽप्यधिकाः परतन्त्रा भविष्यामः। एतादृश-परतन्त्रतापादनस्य च महत्पापस्य उत्तरदायिनः, कारकाश्च वयमेव भाविनी इतिहासे परिगणिता भवेम।

अद्यास्माकं शरीरधारका-ऽन्नरूपविषयादारभ्य सौन्दर्यप्रसाधन-शिक्षा-दीक्षा-राजनीति-संरक्षणादिविषयजातं भारतेतर-राष्ट्रमुखापेक्षणेनैव जायते। परमपावनी सर्वदा शासनानियन्त्रिता शिक्षाऽपि शासनेन स्वायत्तीकृत्य परमुखापेक्षणेन परिचाल्यते, तदा 'उत्पत्स्यते कोऽपि समानधर्मा' इत्यस्यापि आशाततिः कृन्तिता स्यायते। वस्तुतो यादृशं स्वचक्रीयं सङ्कटमस्माकं देशे प्रसरति, तदपेक्षया महतोऽपि महत्तरं परचक्र-सङ्कटमल्पीय एव। न कोऽप्यस्माकं त्राता कुत्रचन परिदृश्यते। स्यादपि तादृशीं शक्तिं न बिभर्ति, यया सर्वान् एतानपायान् व्युदस्य राष्ट्रमुद्धृतं भवेत्। अद्यास्माकं स्पष्टमेतदेव सङ्कल्पकरणे कर्तव्यं यद् भारत-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भूमिप्रसूतेनैव क्षुद्रेण महता वा वस्तुना वयं जीवनं धारमिष्यामः, भारतीयेनैव विचारेण बुद्धेस्तोषणं करिष्यामः, अस्माकं सर्वस्वं भारतदेश एव, भारतीया संस्कृतिरेव। काममनेन कियत्कालमस्माकं राष्ट्रं तथाकथित-प्रतिगामि भवेत्। परमस्या आत्मघातक-प्रगत्याः स्वातन्त्र्यादि-गुणगणानशेषकारिणः उत्कर्षात् सा स्थितिः स्पृहणीयैव। अद्य तु प्रगतिमोहेन वयमुत्तरोत्तरं देशस्य खण्डं खण्डं कृत्वा अन्ततोऽर्थान्तिरेण तमखण्डं कर्तुं यथा प्रवृत्तास्तत् तटस्था भाविन ऐतिहासिकाः कथमपि न क्षमापयिष्यन्तीति सुनिश्चयम्।

विवेचनीयायाः तथाकथित - साम्प्रदायिकतायाः अपि मूलमत्रैव निहितम्। अतोऽद्यावधिकमस्माकं विवेचनं कथमपि अप्रासङ्गिकं नानुमन्तव्यम्। वस्तुतः कथित साम्प्रदायिकता-नाम्नी वस्तु नास्माकं संस्कृतौ कदापि आसीत्, न वा भविष्यति। अतोऽद्य या सा दृश्यते, सोऽपि भ्रम एव। स च वैदेशिकराष्ट्रैः परिकल्पितः। आंग्लशासकैः समुत्पाद्य परिपोषितः, अन्यैश्च परराष्ट्रैः स्वार्थभावनया परिगृह्य प्रसारितः। भारतमेकमखण्डं राष्ट्रम्। तदीया संस्कृतिरपि एकैव। अत्र निवसतां सर्वेषां सा समाना संस्कृतिः। ततोऽन्या संस्कृतिर्नात्र पदमाधातुमधिकृता। यस्तादृग् प्रयतते, स स्पष्टं भारतराष्ट्रद्रोही। अस्यां संस्कृतौ प्रत्येकधर्मानुयायिनः स्व-स्वधर्मपालने स्वतन्त्राः। धर्माश्चैते तेषां तेषां धार्मिकाणामाचार्याणां मान्यतानुसारं पारलौकिकजीवनसाधकाः निराबाधं प्रवर्तन्ताम्। कामं व्यक्तिगताचारविचारेषु ते स्व-स्वधर्ममशेषतः पालयन्तु। तथा प्रवर्तते न तेषां भारतीयसंस्कृत्या कश्चन विरोधो भवितुं शक्नोति। परं यदि ते व्यवहारे विशेषतो राष्ट्रियव्यवहारे स्व - स्व-वैभिन्नमापाद्य भारतीयसंस्कृतेरेकरसतां व्यपनेतुं भारतीयसंस्कृतिं खण्डयितुं वा वाञ्छन्ति, तदा तु कथमपि नानुग्राह्याः। यतो हि भारतीया संस्कृतिरविशेषं विश्वस्य परमं श्रेयः कामयते, तदर्थं यथाशक्ति प्रयतते च। विशाले विश्वस्मिन् तस्या एकमात्रं भारतमेव केन्द्रम्। तदपि द्विराष्ट्रसिद्धान्तमहासिना अस्माकं शासकैः कर्तितं सदतितरां सूक्ष्माकारतां गतम्। इत्थं विचार्यमाणे वस्तुतः अल्पसंख्यकाः किल भारतीय-संस्कृति-प्रणयिन एव। तेषां संरक्षणम् अल्पसंख्यक - संरक्षणघोषमुद्घोषयतां महत्प्रगतानां सर्वेषां राष्ट्राणां नैतिकं कर्तव्यम्। पुनश्च संस्कृतिरियं चिरानुभूतं विश्वकल्याणप्रयोगं समाचरति, यश्च विश्वस्य कृते हितायैव वर्तते। अतोऽप्यस्याः स्वीयविशुद्धरूपस्य परिरक्षणं विश्वस्य कर्तव्यम्।

विश्वराजनीतिज्ञा अस्माभिः प्रार्थ्यन्ते यद् भवन्तो यदि विश्वस्मिन् शान्ति-सुव्यवस्थे कामयन्ते, तदा भारतीया संस्कृतिः स्वीये विशुद्धे रूपे परिरक्षणीया। नात्र कोऽपि सङ्कुचितताया प्रसरः, सर्वोच्चलक्ष्य-निर्धारणेनैव सर्वासां सङ्कुचितानामत्र विलयनात्। किन्तु प्रार्थनमप्यनादृत्य यदि कश्चिद् बलादेनां विकृतां खण्डितां वा कर्तुं प्रयतेत, तदा तत्प्रतीकारायाऽपि अस्माभिर्दृढं बद्धपरिकरैर्भाव्यम्। तस्यैव समुचित उपायो नाम सर्वथा स्वदेशीय-वस्तुजात-व्यवहारः, सर्वथा स्वावलम्बनम्, विशुद्ध - भारतीय - सांस्कृतिक-विचारेण बुद्धेः परितोषणञ्च। अस्माकं दृढीयान् विश्वासो यद् वयं सर्वे भारतीया यदि एतानुपायान् प्रामाणिकतया प्राणपणेन पालयामस्तदा विश्वस्य काऽपि शक्तिरस्मद्राष्ट्रं खण्डयितुं विकलयितुं वा न प्रभवेत्। अन्यथा यदि वयं वैदेशिकानां सर्व-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मानवस्ये ईश्वराधीनत्त्वम्

अयं चन्द्रलोकं व्रजेद् दर्पलीनः,
परं मानवो हे विभो त्वय्यधीनः !!
निजोत्सङ्ग - माराप्य परिवर्तनानि,
युगानि प्रकामं हि खेलन्तु नित्यम् ।
निसर्गातिरेकं लभन्तां तथापि,
तवैवेङ्गितैकाश्रयाणीति सत्यम् ॥
कदाचित् पलायेत गगनेऽपि मीनः,
परं जीवितः किं भवेद् वारिहीनः !
समाश्रित्य विज्ञानवादं विवादम्,
मिथोऽशेषदेशा विदध्युः प्रमादम् ।
प्रकुर्वंतु केचित् प्रमोदस्य नादम्,
लभन्तां तथाऽन्यै विशेषं विषादम् ॥
क्षिपेत् क्षेपणास्त्राणि परिणामहीनः,
विपाके हरेऽनुग्रह - स्तावकीनः !

—श्री ओङ्कारप्रसाद त्रिपाठी—

[प्राचार्यः—म० सं० महाविद्यालयस्य, अतर्रा-बाँदा]

विषये मुखापेक्षिणः स्युस्तदा भारतीयसंस्कृति-भारतराष्ट्र-घातिनीषु तेषां कूटनीतिष्वपि बलादाबद्धा भविष्यामः ।

साम्प्रतं पुनरेतदेव दृश्यते । स्वभावतः सर्वविध-प्राकृतिकसाधन-बुद्धिवैभव-कर्मशक्तिसम्पन्नं स्वतन्त्रं भारतराष्ट्रं यदि निराबाधं समुचितयोजनेन प्रगतिपथे अग्रेसरति, तदा कतिपयैरेवाहोभिः विश्वस्य महत्तम-शक्तिद्वये तृतीयाऽस्य शक्तिर्बलवती समुद्भवेत्, यस्याः पुरतः पूर्वतनं शक्तिद्वयमपि यथावकाशं हतप्रभं भवितुं शक्नुयात् । अस्माकमेतद् विधानं सर्वथा नामूलम्, न वा शशविषाणकल्पम् । अद्य सर्वविधाऽसुविधासम्पृक्तेऽपि काले नैकेषु अन्ताराष्ट्रियविषयेषु भारतदेशेन स्वतेजसा विश्वं चाकचिक्यतां नीतमस्ति । फलतो विश्वशक्तिद्वयेन कथमपि भारतशक्तेः समुदयो न समीह्यते । तदर्थमेव तद् यथावकाशं भारतराष्ट्र-विरोधिनां बलदानेन अस्माकं शक्तिसन्तुलनं कर्तुं ते प्रवर्तन्ते । अमेरिका-रूसदेशानां जर्मनीप्रभृतीनाञ्च पाकिस्तानाय शस्त्रास्त्रप्रदानस्य इदमेव तत्त्वम् । सुमहति सामरिकमहिमशालिनि भूमण्डलस्य नन्दन-वने काश्मीरदेशे समैव सर्वेषां भारतेतरराष्ट्राणां लुब्धदृष्टिः । भ्रातृता-मृगमरीचिकया अस्माभिः ग्रासीकारितस्त्रिविष्टपस्तु तैर्निगीर्ण एव, प्रतिवेशिनं नयपालमपि तेऽस्मत्तो वियोजयितुं सततं प्रयतन्ते ।

इत्थं भारतविपरीते खड्गहस्ते विश्वे तथाकथितं साम्प्रदायिकता-पिशाचं पुनरुज्जीवयित्वा तस्मै बलिरूपेण अस्मच्छासकैः यद्यत् समर्प्यते तेन स पिशाचो दूरे न सर्पेत्, अपि तु अस्माकं शिरस्येव दत्तपदो भवेत् । राष्ट्रभाषां हिन्दीं विहाय उर्दू-भाषया शपथग्रहणाग्रहस्य, राज्यपालद्वारा तादृशाग्रह-सफलीकरणस्य, 'मुसलिम - मजलिस' संस्थाया गतिविधिनाञ्च, काश्मीर-शृगालस्य शेख-अब्दुल्ला - हतकस्य प्रलपन - सङ्घटनादीनाञ्च कः सङ्केतः ? कश्च तत्र प्रेरक इत्यस्य उपेक्षणमात्मघाताय भवेत् । भारतस्थिताः सर्वे भारतीयाः, भारतीय-संस्कृतिपालनाय गृहीतव्रताः अविशेषेण स्वीयां तादृशीमेव समुन्नतिं कर्तुमधिकृता यथा भारतीया संस्कृतिः परिरक्षिता भवेत् । गतायां भारतीय-संस्कृतौ जडीभूतस्य भूभागस्य न किमपि मूल्यम् । किमस्माकं शासकाः एतादृशे प्रकाशे तथाकथित-साम्प्रदायिकता-निरोधोपायमाचरिष्यन्ति ?

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्री सूक्ति - ल ह री

—सर्वतन्त्रस्वतन्त्राः श्री अमृतवाग्भवाचार्याः—

[आचार्यपादानां 'सूर्योदय'-पत्रोपरि महाननुग्रहः किल। अत एव समये समये स्वीयसारस्वतोपासना-ऽमृतफलाय-मानानि नैकानि काव्यानि तैरस्मभ्यं प्रकाशनाय प्रसादीकृतानि। तेष्वेव इयमपि अन्यतमा। कियद्वर्षेभ्यः पूर्वं रचिताऽपि पुनः संस्कृत्य नव्येव विधाय सहृदयानां विविधच्छन्दोविचिति-प्रणयिनाञ्च तोषाय उपायनीकृता तेषामियं कृतिः पाठकेभ्यो नूनं मोदाय कल्पेत इति दृढं विश्वसिमः। —सम्पादकः]

— १ —

आदर्शो महिलानां
प्रशस्तविद्यालयो देवी।
मुग्धस्निग्धमितस्मित-वन्दित-
वदना सरस्वती जयतु ॥ १ ॥

भवभीति - भञ्जनपरं
भरणीयाभोगभारभरणचणम्।
भवतु भविकाय भवतां
भवसौभाग्यं भवोद्भासि ॥ २ ॥

कामाद्वा रोषाद्वा
लोभादथवा भयाच्च मोहाद्वा।
पीयूष - ह्रद - पतितं
किं वा कुर्यान्मृतिर्वशगम् ॥ ३ ॥

शिवचरणं भजमाना
यथा तथा वाऽपि सर्वथा रक्ष्याः।
करुणार्णवेन सततं
शिवेन ते तथ्यमेतद्वै ॥ ४ ॥

राधार्या - गाथाया
लावण्यच्छाययैव धृतकान्तिः।
जयति पतङ्गविहारी
पद्मोल्लासेन गगनतलम् ॥ ५ ॥

स्वाभाविकी सुखेच्छा
स्वतन्त्रताया ऋते न सुखलब्धिः।
स्वातन्त्र्यस्य प्राप्तिः
स्वत्वज्ञानं विना नैव ॥ ६ ॥

व्यवहरतु जनः कथमपि
नार्यो न्याय्यं जहाति पन्थानम्।
अपि मृदितं मालत्याः
कुसुमं पाणिं सुवासयति ॥ ७ ॥

मिथ्याव्रतोऽपि सत्य-
व्रतनामा क्षत्रियापसदः।
मृदुमति महिलामस्तक-
मुण्डनमतिमान् मनो हरति ॥ ८ ॥

नाऽऽचरति मित्रवृन्दे
मित्रेण समं न रिपुषु रिपुवद्यः।
पशुरेव स मन्तव्यः
पशुपतिरथवा स लोकेऽस्ति ॥ ९ ॥

ऐन्द्रीं भूतिं नित्यां
दत्त्वा शौक्लीं कीर्तिं विस्तार्येषा।
शक्तिं सौरीं पूर्तिं
नीत्वा राष्ट्रं गौरीदृङ् नः पायात् ॥ १० ॥

कान्तः कुसुमवेलाया वसन्तोऽद्यापि नागतः।
मन्येऽधन्यो निगडितोऽपरदिग्-गणिकाङ्गणे ॥ ११ ॥

अनावृत-नवद्वारे पञ्जरे पवनः खगः।
स्वाभाविके निःसरणे वसतीत्येव विस्मयः ॥ १२ ॥

तिमिरेऽपगते क्षणदाया-
स्तरणावुदिते - ऽरुणरम्ये।
अयते तरला कलरावा
कमलात् कमलाद् भ्रमरालिः ॥ १३ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वातन्त्र्याप्तिः साधनामन्तरा नो
स्वातन्त्र्याप्तौ साधना शक्तिपूजा ।
कल्याणानि प्राणिनां सैव सूते
तस्मात्कार्या सा सदा साऽनुभावैः ॥ १४ ॥

राधाया हरिसङ्गमोत्सुकाया
यामिन्यां यमुनातटे निशीथे ।
भिन्दानस्तिमिराणि मार्गदीपो
जातो यः स सुखं ददातु सोमः ॥ १५ ॥

मनुजा निजधर्म - कर्मशीलाः
सुखसाधन - राष्ट्रनीतिविज्ञाः ।
मतसैकमता भवन्ति यस्यां
वसुधा सुरराजधाम सा स्यात् ॥ १६ ॥

विभिद्य मर्माणि दुरुक्तिबाणैः
प्रियं जनं तोषयितुं यतन्ते ।
को वा भवेऽभाग्यवतो जनाँस्तान्
भवं विना बोधयितुं समर्थः ॥ १७ ॥

स्वसूक्ति - पीयूषरस - प्रवाहैः,
ये तोषयन्ते स्वजनं समस्तम् ।
निर्माय कल्याणपथं भवे ते
सन्तोषमन्तः सततं वहन्ते ॥ १८ ॥

स्थानानि सर्वाण्यपि सिद्धिमन्ति
भवन्ति सद्विप्र - निषेवितानि ।
सद्भावमायान्ति शमेन विप्रा
यथा यथाऽन्तर्मुखतां भजन्ते ॥ १९ ॥

किमत्र चित्रं यदि दुष्टलोको
जहाति नो कुत्सिततां स्वकीयाम् ।
वराहभावं समुपाश्रितेभ्यो
न रोचते किं स पुरीषपुञ्जः ॥ २० ॥

नीवीं गतः प्रस्तरवर्य ! विज्ञा
जानन्ति तेऽलं महिमानमुच्चैः ।
अस्माऽयमुच्चैः कलशे स्थितः सन्
नो वेत्ति चेच्छिन्नमलेन किं स्यात् ॥ २१ ॥

राष्ट्रमुन्नतिमिमे नराः परां
नेतुमिन्द्रियसुखानि भुञ्जते ।
ख्यापयन्ति च परोपकारिता-
मेतदस्ति कलिकाल - चेष्टितम् ॥ २२ ॥

प्रावृट्काले प्रोषितकान्ता तरुणीयं
हस्तन्यस्ताऽऽरक्तकपोला च्युतधैर्या ।
दत्ते शापं वेधस आमीलितनेत्रा
दर्शं दर्शं मत्तमयूरं मदनार्ता ॥ २३ ॥

धीराणां गिरिकुहरेषु योगभाजां
तृप्तानां निजहृदयेषु सर्वदैव ।
कस्मिंश्चित्सुकृतिनि मानवे शरीरे
दग्धन्या पतति मनःप्रहर्षिणी सा ॥ २४ ॥

जाने चिरायुरसि धातरहं मनुष्य-
स्त्वं लोमशं मुनिवरं प्रतिपृच्छ विद्वन् ।
निर्णेष्यते सुललितां चिरजीवितां ते
प्राज्ञो मुनिः स निजलोमविनाशकाले ॥ २५ ॥

धन्याः स्वमेव सकलेषु चराचरेषु
व्याप्तं प्रकाममनुभूय सुधाकलाढ्यम् ।
कल्याणधाम्नि रसयन्ति हि सावधाना
शैवाऽवनौ शिवपदध्वनिमध्वनीनाः ॥ २६ ॥

कर्माणि दुष्टफलदानि मया कृतानि
भस्मीभवन्तु सफलानि भवत्प्रसादात् ।
मित्राणि सन्तु रिपवोऽपि विनष्टवैराः
शम्भो प्रसीदतु भवान्मम चान्तरात्मा ॥ २७ ॥

जीर्णा तरिः सरिदतीव गभीरनीरा
दाशोऽपि गोपशिशुरल्पकरोऽरुणोऽर्कः ।
बालाऽबला कुलवधूरहमद्वितीया
पारे परं शिव ! पुरं कथमभ्युपैमि ॥ २८ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रस-स्वरूप-विमर्शः, भक्तिरसश्च

— पूज्यश्री करपात्रस्वामिनः —

यद्यपि भक्तिः आह्लादिनीशक्तिरूपा नित्या विभ्वी च; तथापि सारश्रवणजनितद्रुतचित्तजनित-वृत्तावेव अभिव्यज्यते इति तदर्थं वृत्तिरपेक्षिता।

सविकल्पकं ज्ञानं चाक्षुषादिभेदेन बुद्धिवृत्त्या जन्यत इति वृत्तिर्विचार्यते। तत्र नेत्रनिमीलने कृते बहिर्दृष्टपदार्थस्येव कश्चिदाकारो नेत्रान्तर्भासते। स आकारो न बाह्यवस्तुनः आश्रयमतिहाय, तत्र तस्याशक्यवचनत्वात्। अतः स आन्तरस्यैव कस्य न भवितुमर्हतीति तदाश्रयत्वेन साङ्ख्यैः आहङ्कारिकं तत्त्वान्तरं वृत्ति-नामकं कल्प्यते। तथा हि, प्रवचनसूत्रद्वयम्—

प्रमार्थप्रकाशलिङ्गाद् वृत्तिसिद्धिः।

भागगुणाभ्यां तत्त्वान्तरं वृत्तिरिति।

अर्थस्तु-प्रमा पूर्वोक्तरीतिकमाकारज्ञानम्। तत्सहितो योऽर्थप्रकाशो विषयज्ञानम्। एवमुभयविधात् लिङ्गाद् वृत्तिसत्तानिश्चयः। यदि वृत्तिर्न स्यादुक्त आकारो न प्रतीयेत। अतैजसत्वादचलं चक्षुर्विप्रकृष्टं विषयमप्राप्नुवत् तत्प्रकाशनं न कुर्यात्। जायते च तदुभयम्, अतः साऽस्तीति निश्चयः। एवं भागो विभागः, अहङ्काराद्विभज्य विषयाद देशावधिगमनं गुणः उक्ताकारः। ताभ्यां कृत्वा आहङ्कारिकं तत्त्वान्तरं वृत्तिरिति। अभियुक्तोक्तिश्च—

वृत्तयः प्रसरद्रूपाः स्फारिताक्षस्य पञ्च च।

अदृष्टानुग्रहात् तत्तत्सम्बन्धार्थावबोधिकाः॥ इति।

अमूर्तायास्तस्या कथं क्रियेत्यतस्तृतीयं सूत्रम्—

न द्रव्यनियमस्तद्योगादिति।

अनियतत्वात् पदार्थानां न द्रव्य एव क्रियानियमः। किन्तु यत्र यत् प्रमाणतः सिद्ध्यति तत्र तदनु साऽपि क्रियावतीत्यर्थ इति।

एवं मायावादिनोऽपि अन्तःकरणविशिष्टस्य चैतन्यस्य प्रमातृत्वमङ्गीकृत्य तस्मिन् ज्ञानसूक्ष्मावस्थारूपं विषयसंस्कारमाधातुं विषयेन्द्रियसन्निकर्षसामर्थ्यजन्याम् अन्तःकरणपरिमाणरूपां वृत्तिमङ्गीकुर्वन्ति।

नैयायिकादयस्तु—नयन-किरणानां निर्गमनेन विषयसन्निकर्षात् ज्ञानम्। तेन च भावना-संस्काराख्यं गुणान्तरं चरमस्मृतिनाश्यमात्मनि अङ्गीकुर्वन्तो वृत्तिपदार्थमेव नेच्छन्ति। तत्तु नेत्रान्तरनुभवस्य सार्वजनीनत्वादप्रयोजकमिति वृत्तिः सर्वथाऽभ्युपेयैव।

शुद्धाद्वैतरीत्याऽपि—बुद्धि-वृत्तिः संस्काराधानाद्यर्थं जन्यते। सा वृत्तिर्बुद्धेर्न तत्त्वान्तरम्, नाप्यन्तःकरणपरिणामान्तरम्। किन्तु बुद्धितत्त्वस्य कालक्षुब्धसत्त्वादिगुणकृतः अवस्थाविशेष एव। न च तस्यावस्थाविशेषत्वे निर्गमनाभावेन विषयासंसर्गात् तदाकारकत्वं वृत्तेर्दुर्घटमिति शङ्क्यम्; मायागुणस्य रजसश्चञ्चलत्वेन विक्षेपकत्वेन च दर्पणे मुखस्येव नेत्रगोलकेऽपि बाह्यविषयाकारसमर्पणे तदाकारस्य सुघटत्वात् स एव मायिकाकारो नयनकिरणेषु नेत्रमुद्रणे प्रत्यावृत्तेषु गोलकान्तरानुभूयते। एवमेवेन्द्रियान्तरेऽपि वृत्तिर्ज्ञातव्या। यद्यपि सा नानुभूयते; तथापि तादृशसंस्काराधानात् निश्चीयते।

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मानस-भारती : देवगिरा गुम्फितं मानसम्

—श्री जनार्दन गङ्गाधर रटाटे, एम. ए., साहित्याचार्यः—

यदारभ्यावसद् रामो निर्भीका मुनयस्ततः।
सरो - वना-ऽद्रिसरितः प्रत्यहं बहुशोभिनः ॥
हृष्टाः खगा मृगा भृङ्गा गुञ्जन्तः शोभिताः पुनः।
यत्र रामः स्थितस्तस्य शेषोऽपीशो न वर्णने ॥
तमेकदा सुखासीनं निश्छलं लक्ष्मणोऽब्रवीत्।
चराचर - नृदेवेश पृच्छे स्वेशमिव प्रभो ॥
तथा संशाधि मां सर्वं हित्वाङ्घ्र्यब्जं भजे यथा।
ज्ञानं विरागं मायां च मां प्रति ब्रूहि तत्त्वतः।
यथा कृपां करोषि त्वं तां भक्तिमपि वर्णय ॥
जीवेशभेदं सकलं विविच्य
निरूपय त्वं सचराचरेश।
स्याद् येन तेऽङ्घ्र्यो रतिराशु शोको
मोहभ्रमौ चैव लयं व्रजेयुः ॥ १४ ॥
ततः प्राहानुजं रामो दक्ष्यऽहं सर्वमल्पतः।
शृणुष्वैकमनास्तात स्थिरचित्तः प्रसन्नधीः ॥
सर्वमेतद् विद्धि मायामहं मे त्वं तवेति च।
अनया सकलो जीवनिकायोऽस्ति वशीकृतः ॥
इन्द्रियार्थान् मनो यावन् मायैव सकलं तु तत्।
एकाऽविद्या परा विद्या तद्भेदाविति तौ शृणु ॥
एका दुष्टाऽतिदुःखा च भवकूपे यया वशाः।
अन्या गुणा वशे यस्या या च सृष्टिविधायिनी ॥
सा प्रेरितास्ति प्रभुणा नास्ति तस्या बलं स्वकम्।
यज्ज्ञानं यत्र गर्वो न ब्रह्मेक्षा च समा यतः।
तृणेन गुणसिद्धीनां त्यागो वैराग्यवान् परः ॥
न वेत्ति मायां स्वमथेश्वरं वा
स एव जीवोऽभिहितो महद्भिः।
मायेश्वरो बन्धनमोक्षदो यः
ख्यातः शिवः सर्वपरः स एव ॥ १५ ॥
धर्माद् विरागो योगात् तु बोधो मुक्तिश्च बोधतः।
एत एभ्यो भवन्तीति श्रुतिभिः प्रतिपादितम् ॥
मन्मोदा दासुखदा सा मे भक्तिः प्रकीर्तिता।
तद्वशे ज्ञान-विज्ञाने स्वतन्त्रा सा निराश्रया।
यदाऽनुकूलाः स्युः सन्तो लभ्यते सा सुखप्रदा ॥
साधनान्यधुना भक्तेर्वर्णयिष्यामि विस्तरात्।
मार्गोऽयं सुगमो येन जीवाः सम्प्राप्नुवन्ति माम् ॥
विप्रेष्वति-प्रेमनिष्ठाऽनुश्रुतिः स्व-स्व-कर्मसु।
फलमस्य तु वैराग्यं मम धर्मे रतिस्ततः ॥
दृढता नवधाभक्तौ मल्लीलातिरुचिस्ततः।
सत्तां पादाब्जयोर्यस्य गाढं प्रेम प्रवर्तते ॥
मनोवाक्कर्मभिः सेवानियमो दृढतां गतः।
गुरु - मातृ - पितृ - भ्रातृ - पतिदेवाद्यहं मतः ॥
सेवायां मे सदा निष्ठः पुलकी मम गायने।
वाग् गद्गदाश्रुणी नेत्रे मद-दम्भादयश्च न।
अकामस्य वशे तस्य सदाऽहं तात निश्चितम् ॥
येषां गतिर्वाक्कृतिमानसैस्तु
सदाऽहमेवास्मि न कश्चिदन्यः।
निष्कामभावेन भजन्ति ये च
वसामि तेषां सततं हृदब्जे ॥ १६ ॥

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मङ्गलम्, स्तोत्रञ्च : एकं समीक्षणम्

—डॉ० हरिदत्त पालीवालः—

यस्य स्मृतेर्दुरितराशिलयः प्रसह्य,
सद्यः स्फुरन्ति पुरतः सुसमीहितानि।
वाच्यंश्च वाक्पतिपदं लभते तमीशं
श्रीमद्गजाननमहं शिरसा नमामि॥

अथेदं प्रस्तूयते मङ्गलविवेचनम्। तत्र मङ्गलपदेन मङ्गलाचरणम्, स्तुतिः (स्तवनम्, स्तवः, स्तोत्रम्) संस्तुतिश्चेति सङ्गृह्य निरूप्यन्ते।

मङ्गलाचरणमिदं वेदेषु, स्मृतिषु, पुराणादिषु, लोके, तत्तद्ग्रन्थेषु, कर्मसु च दृश्यते। तत्र मङ्गलाचरणस्य किं स्वरूपम्, कति भेदाः, प्रयोजनञ्च किमिति जिज्ञासायामुच्यते—तत्र मङ्गलं नाम श्रेयोवाक्। यया वाचा प्रस्तुतया अभीष्टं साध्यते, कल्याणं भवति, निर्विघ्नता संपद्यते सा। निर्विघ्नं ग्रन्थचिकीर्षुणा हीदं ग्रन्थारम्भे क्रियते।

मङ्गलस्य कर्तव्यत्वे प्रमाणम्

मङ्गलस्य कर्तव्यता-प्रमापकोऽनुमानश्चेत्थम्—'मङ्गलं वेदबोधितकर्तव्यताकम् अविगीतशिष्टाचारविषयत्वात् दर्शपौर्णमासादिवत्' इति। अयमर्थः—यथा दर्श-पौर्णमासादयो यज्ञविधयः कर्तव्यतया वेदैः बोधिताः अविगीतशिष्टपुरुषैराचर्यन्ते तथा मङ्गलमपि कर्तव्यतया वेदैर्बोधितम्, अविगीतशिष्टपुरुषैश्च आचर्यते। अविगीतत्वं नाम वेद-शास्त्रानुमतार्थसदाचरणपरत्वेन अनिन्दितत्वम्। शिष्टत्वं च फलसाधनतांशे भ्रान्तिरहितत्वम्।

न्यायशास्त्रोक्तं मङ्गल-लक्षणं तु 'विघ्नभिन्नत्वे सति, विघ्नध्वंस-प्रतिबन्धकाऽभावभिन्नत्वे सति च प्रारीप्सित-(ग्रन्थ)-विघ्नध्वंसासाधारणकारणत्वमि'ति। एतल्लक्षणं ग्रन्थारम्भे क्रियमाणमङ्गलपरत्वेन सम्मतमेकदेशीयमेव। अत्र स्वध्वंसासाधारणकारणं विघ्नोऽपीति अतिव्याप्ति-वारणाय 'विघ्नभिन्नत्वे सति' इति। विघ्नध्वंसप्रतिबन्धकाभावोऽपि विघ्नध्वंसासाधारणकारणं भवतीत्यतः 'विघ्नध्वंसप्रतिबन्धकाभावभिन्नत्वे सति' इति।

मङ्गलस्य कर्तव्यतायां पाणिनीय-व्याकरण-महाभाष्ये भगवान् पतञ्जलिः अष्टाध्याय्यादिसूत्रे आदितः प्रयुक्तं वृद्धि-शब्दं मङ्गलार्थं मनुते। स हि ग्रन्थारम्भ-मध्या-ऽवसानेषु मङ्गलस्योपादेयतां चैवं प्रशंसति—

मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि च शास्त्राणि प्रथन्ते वीरपुरुषकाणि आयुष्मत्पुरुषकाणि अध्येतारश्च प्रवक्तारो यथा स्युः। इति।

मङ्गलस्य त्रैविध्यम्

मङ्गलमिदं त्रिविधम्—आशीर्वादः, नमस्कारः, वस्तुनिर्देशश्च। तथा चोक्तम्—

आशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखम्। इति।

१. **नमस्कारात्मकम्**—तत्र नमस्कारात्मकस्य स्वेष्टदेवता-स्मरण-वन्दनादिरूपस्य उदाहरणानि—

यतः सर्वाणि भूतानि प्रतिभान्ति स्थितानि च।
यत्रैवोपशमं यान्ति तस्मै सत्यात्मने नमः॥
—योगवाशिष्ठे।

नमः श्रीशङ्करानन्द-गुरुपादाम्बु-जन्मने।
सविलास-महामोह-ग्राहग्रासैक-कर्मणे॥
—वेदान्तपञ्चदशी।

इदं नमस्कारात्मकम्। 'विजयते' इत्यादिक्रियाभिरपि नमस्कारो व्यज्यते। यथा—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रौत्रार्हन्तीचणैगुण्यैर्महर्षिभिरहर्दिनम्।
तोष्टूय्यमानोऽप्यगुणो विभुर्विजयतेतराम्॥

—वै० सि० कौ० आख्यातारम्भे।

अत्र विजयत इति सर्वोत्कर्षेण वर्तमानः स नमस्क्रियते इति व्यङ्ग्यार्थः।

२. वस्तुनिर्देशात्मकम्—यत्र नमस्कारादिना कर्तव्यं वस्तु निर्दिश्यते, तद् वस्तुनिर्देशात्मकम्। यथा—

मुनित्रयं नमस्कृत्य तदुक्तीः परिभाव्य च।
वैयाकरण - सिद्धान्तकौमुदीयं विरच्यते॥

अत्र इयमित्यङ्गुल्या निर्दिश्यमानो हृद्गतोऽयं ग्रन्थो विरच्यते प्रकाश्यत इत्यर्थः।

३. आशीर्वचनम्—आशीर्मङ्गलं यथा सिद्धान्त-कौमुद्या अन्ते—

भट्टोजि - दीक्षितकृतिः सैषा सिद्धान्तकौमुदी।
प्रीत्यै भूयाद् भगवतोर्भवानी - विश्वनाथयोः॥

त्रिविधं मङ्गलमिदमादिमध्यावसानेषु शिष्टैः क्रियते, शिष्यशिक्षार्थं ग्रन्थे निबध्यते च।

वेद-स्मृति-पुराणेषु मङ्गलम्

वेदानामनादित्वादपौरुषेयत्वाद् ईश्वरोक्तत्वाच्च तत्समाप्तिकामनाया विघ्नसंभावनायाश्च प्रश्न एव नोदति। एवं तदारम्भ - मध्या-ऽवसानानामपि निर्देश्यानर्हत्वात् नमस्कार्याद्यभावाच्च मङ्गलाचरण-चर्चा नोचिता। किन्तु आनुष्ठानिकेषु सर्वत्रादौ अनुष्ठायिनां सर्वान्तराय-शमनाय कर्तव्यतया ईश्वर-निर्दिष्टं स्वस्तिवाचनं पुण्याहवाचनादिकं मङ्गलाचरणमेव। यथा—

आ नो भद्राः०, स्वस्ति न इन्द्रो वृद्धश्रवाः०
एतत् सर्वकर्मस्वनुष्ठीयते, शन्नो मित्रः इत्यादि च।

स्मृतिषु मङ्गलाचरणं यथा—

योगीश्वरं याज्ञवल्क्यं सम्पूज्य मुनयोऽब्रुवन्।
वर्णाश्रमेतराणां नो ब्रूहि धर्मानशेषतः॥

अत्र मुनिकर्तृकं गुरुसम्पूजनात्मकं शिष्यविशेषोपक्रमं ग्रन्थारम्भप्रयोजनकं मङ्गलाचरणम्। एवमन्यत्राप्यध्यवसेयम्।

पुराणेषु मङ्गलाचरणं यथा—

जन्माद्यस्य यतोऽन्वयादितरत-
श्चार्थेष्वभिज्ञः स्वराट्
तेने ब्रह्म हृदा य आदिकवये
मुह्यन्ति यत्सूरयः।
तेजोवारिमृदां यथा विनिमयो
यत्र त्रिसर्गो मृषा
धाम्ना स्वेन सदा निरस्तकुहकं
सत्यं परं धीमहि॥

इति श्रीमद्भागवते। श्रीरामः शरणं समस्तजगताम् इत्यादि श्रीरामायणमाहात्म्यादौ स्कान्दे। एवम्—

वक्रतुण्ड महाकाय कोटिसूर्यसम प्रभो।
निर्विघ्नं कुरु मे देव सर्वकार्येषु सर्वदा॥

गणनाथ - सरस्वती - रवि - शुक्र - बृहस्पतिः।
पञ्चैतान् संस्मरेन्नित्यं वेदवाणी प्रवर्तते॥

गुरुर्ब्रह्मा गुरुर्विष्णुः गुरुर्देवो महेश्वरः।
गुरुः साक्षात् परब्रह्म तस्मै श्रीगुरवे नमः॥

इति च मङ्गलाचरणस्य नित्यशिष्यकर्तव्यतोपदेश ऋषीणां महाभारतादिभ्यो ज्ञातव्यः।

मङ्गलवाचकाः वर्णाः शब्दाश्च

'व' (अमृतबीजम्), 'अ' (वासुदेवात्मकः), 'ई' (लक्ष्मीः) 'उ' (शम्भुः), इत्यादयो वर्णाः काव्याद्यारम्भे प्रयुज्यमाना मङ्गलार्था भवन्ति। अत्र एकाक्षरीकोषो वर्ण-बीज-प्रकाशादयो ग्रन्थाश्च प्रमाणम्। एतादृशान् वर्णान् ग्रन्थाद्यारम्भे प्रयो-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सन्ति। झ, घ, ख, इत्यादींश्च हेयत्वेन शंसन्ति गुरवः।

वागर्थाविव संपृक्तौ, कश्चित् कान्ताविरह०

इत्यादिषु आद्यवर्णानामपि मङ्गलव्यञ्जकत्वम्।

अथ, अथो, श्रीः इत्यादिशब्दानामपि विघ्न-विहन्तृत्वेन मङ्गलजनकत्वमुक्तम्।

अथो = 'अथेति मङ्गलानन्तरारम्भ-प्रश्न-कात्स्न्यधिकार-प्रतिज्ञा-समुच्चयेषु' इति अव्ययार्थप्रकरणे।

उदस्य कुम्भीरथ शातकुम्भजा-
श्चतुष्कचारुत्विषि वेदिकान्तरे।
यथाकुलाचार - मथावनीन्द्रजां
पुरन्ध्रिवर्गः स्नपयाम्बभूव ताम्॥

अत्र महाकवि-हर्षोक्तौ प्रथमोऽथशब्दः आनन्तर्यार्थे, द्वितीयश्च मङ्गलार्थे। अथ स्नपयाम्बभूव इत्यस्य मङ्गलस्नपनं चकार इत्यर्थः। अथेति निपातः।

'निपातस्तु स्वरूपेणैव मङ्गलार्थः मृदङ्गध्वनिवत्' इति तत्रैवोक्तमव्ययार्थे।

अथातो ब्रह्मजिज्ञासा इत्यादिषु अथशब्दो यत्राधिकारप्रतिज्ञाद्यर्थस्तत्र तस्य स्वरूपत एव मङ्गलार्थत्वमपि तन्त्रेण अवगन्तव्यम्।

श्रियः कुरुणामधिपस्य पालनीम्।
अभून्नृपो विबुधसखः परन्तपः।

इत्यत्र श्रीशब्दस्य श्रवर्णस्य चादिप्रयोगो गणादि-दोषविघातफलको मङ्गलार्थ एव मन्यते। यथा—

देवतावाचकाः शब्दा ये च भद्रादिवाचकाः।
ते सर्वे नैव निन्द्याः स्युर्लिपितो गणतोऽपि वा॥

अत्र भट्टि-भारवि-माघकाव्येषु प्रारम्भप्रयुक्त-जगणदोषो विपुलरुक्फलकोऽपि अदोषतां गतः। देवतावाचकत्वेन प्रयुक्तः शब्दो वर्णश्च गुणत्वेन सम्पन्नः।

कर्मसु मङ्गलम्

सर्वत्र श्रौत-स्मार्तेषु नित्य-नैमित्तिक - काम्येषु कर्मसु मङ्गलमाचरन्ति अविगीत-शिष्टाचार-परम्परया। सङ्कल्पादौ यथा—हरिः**ॐ तत्सत् ॐ विष्णुः ३** इति। ततश्च श्रौतैर्मन्त्रैः—**ॐ स्वस्ति न इन्द्रो वृद्धश्रवाः०** इति। ततश्च स्मार्तैर्मन्त्रैः—**सुमुखश्चैकदन्तश्च०** इत्यादि। ततश्च नमोऽन्तैर्मन्त्रैः—**ॐ भूर्भुवः स्वः। श्रीमन्महागणपतये नमः। श्रीलक्ष्मीनारायणभ्यां नमः** इत्यादि। मङ्गलत्वेन स्तोत्रादीन्यपि पठ्यन्ते। **अपवित्रः पवित्रो वा०** इत्यादिनित्य-नैमित्तिकादिषु मार्जनमपि कर्मत्वेनारब्धे पापापहं सन्मङ्गलार्थम्।

प्रभाते जागरणान्ते मङ्गलं यथा—

ब्रह्मा मुरारिस्त्रिपुरान्तकारी
भानुः शशी भूमिसुतो बुधश्च।
गुरुश्च शुक्रः शनिराहुकेतवः
कुर्वन्तु सर्वे मम सुप्रभातम्॥

एवमादिभिः स्मार्तैः मन्त्रैः मङ्गलमाचरन्ति सन्तः।

एवं निशायां शयनादावपि। सर्वत्र यात्रारम्भे मङ्गलपाठ आचर्यते। उक्तञ्च गाणपत्ये—

विद्यारम्भे विवाहे च प्रवेशे निर्गमे तथा।
सङ्ग्रामे सङ्कटे चैव विघ्नस्तस्य न जायते॥ इति।

एतेन विघ्नात्यन्तनिवृत्तिः समाप्तिश्च मङ्गलाचरणस्य प्रयोजनमिति सिद्धम्। पुण्यनाम-स्मरण-पठन-स्वेष्टदेवता-स्मरण-नमस्करण - स्तोत्र-पठन - देवताध्यान - परमेश्वरस्मरण-ध्यान-स्तवन-नमस्करणानि पापमोचनानि धर्मार्थकाममोक्षफल-प्रदानि भवन्तीति नित्य-नैमित्तिकादिषु मङ्गलमिति मत्वा क्रियन्ते सद्भिः। मङ्गलाचरणम् सदाचार इति परम्परया सनातनी कृतिः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विदेशेष्वपि मङ्गलाचरणं दृश्यते। आङ्ग्लज-पारसीक-प्रभृतिभिरपि ईश्वरप्रार्थना मङ्गलत्वेन ग्रन्थारम्भे कर्मारम्भ च क्रियत इत्येष भारतीय-मङ्गलाचरणप्रभावो विशेषतोऽवगन्तव्यः।

स्तोत्र-मङ्गलयोरन्तरम्

मङ्गलाचरणमपि प्रायशः स्तुत्यात्मकं दृश्यते; श्रीमल्लिनाथस्य यथा—

दन्ताङ्कुरेण धरणीतलमुन्नमय्य
पातालकेलिषु धृतादिवराहलीलम्।
उल्लाघनोत्फण-फणाधर - गीयमान-
क्रीडावदानमिभराजमुखं नमामः॥

किन्तु तत्र लक्ष्यं भवति निर्विघ्नं ग्रन्थसमाप्तिः कार्यसमाप्तिरेव वा।

प्रायशोऽभीप्सितार्थं - पूर्तिकामनाऽपि मङ्गलाचरणे निर्दिश्यते। यथा शृङ्गारामृतलहर्याम्—

सिन्धुसुता - कुच - कुङ्कुम-
पाटल - वक्षस्थलं किमपि।
उपवीणितं च निगमैः
सदा जटालं महः कलये॥

अत्र श्रीविष्णोः शृङ्गारित्व-भावनया तद्वक्षोवर्णनमुखेन विष्णुदैवत-शृङ्गाररसप्रधान - प्रस्तुत-ग्रन्थस्य निर्विघ्नसमाप्तिकामना 'कलये' इति क्रियया हृदयगता ध्वनिता। ततश्च तेनैव प्रतिज्ञायते—

नरहरि - बिन्दुपुरन्दर-
जनुषा विदुषाऽथ सामराजेन।
शृङ्गारामृत - लहरी
विरच्यते रसिक - जीवातुः॥ इति।

अन्यच्च न्यायसिद्धान्तमञ्जर्याम्—

प्रणम्य परमात्मानं जानकीनाथशर्मणा।
क्रियते युक्तियुक्ताभिर्न्यायसिद्धान्तमञ्जरी॥

अत्र एकस्मिन्नेव पद्ये परमात्म-प्रणामपूर्वकं प्रारीप्सितं वस्तु प्रतिज्ञातम्। तत्र प्रणम्येति पूर्वकालक्रियोत्तरकाल-प्रारभ्यमाणे कार्ये विघ्नविध्वंसं तत्समाप्तिं प्रति च कारणीभूतेति कार्यकारणयोरेकवाक्यतया मङ्गलाचरणम्।

क्वचिच्च—रसो वै सः इति भावनाप्रवणेन कविना प्रतिपाद्येन अभेदाध्यवसायेन मङ्गलाचरणं कृतं विघ्नविघाताय प्रभविष्णु जातम्।

रसिकरञ्जने यथा—

शारीरिणां शरीराणि पवित्राणि यथासुभिः।
पवित्रता तथास्तूनां येन तत्प्रेम संस्तुनः॥

अत्रोपमयाऽसुभिः शरीरपावित्र्यं प्रदर्श्य प्रेम्णाऽसुपवित्रता संस्तुता। ततश्च तत्प्रेम्णः संस्तुतिः कृता। प्रेम्णो रसरूपत्वम् शृङ्गाररसस्य च प्रेमरूपत्वम्, रसस्य च ब्रह्मरूपत्वमिति ब्रह्मणाऽऽराध्येन प्रतिपाद्यशृङ्गारस्यात्मैक्यतया विघ्नशङ्कैवापासिता।

स्तोत्रणामपि यद्यपि मङ्गलत्वमस्त्येव, तथापि फलभेदाद् उद्देश्यभेदाच्च तेषां स्तोत्र-स्तवादिशब्दैरेव व्यपदेशः। देवताप्रीत्यर्थं परमेश्वरप्रीत्यर्थं वा सकामानामकामानां च कृता तत्स्तुतिः स्तोत्रशब्दभाग् भवति। मङ्गलाचरणमभिमतपूर्त्यर्थं ग्रन्थाद्यारम्भमध्यावसानप्रयोज्यमिति विमृष्टम्।

सुवासिनीभिर्विवाहादिषु गीतानि गीतान्यपि मङ्गलमित्येव कथ्यन्ते, समानोद्देश्यकत्वात्। तादृशकर्मसु वेश्यागीतिरपि मङ्गलम्। तूर्य-नादा अपि मङ्गलम्।

सुखश्रवा मङ्गलतूर्यनिःस्वनाः
प्रमोदनृत्यैः सह वारयोषिताम्।
न केवलं सद्मनि मागधीपतेः
पथि व्यजृम्भन्त दिवौकसामपि॥ रघुवंशे

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कोष-व्याकरणाभ्यां मङ्गलार्थः

'कुशल'-शब्दवत् मङ्गल-शब्दोऽपि रूढार्थ एव। तथापि व्याकरणरसिकानां कृते तद्-व्युत्पत्तिरुच्यते। गत्यर्थे मगि धातोर्घञि 'मङ्ग' इति रूपम्। मनोरथानां गत्यर्थवत्त्वमभिप्रेत्य तं मङ्गं मनोरथं लाति उपस्थापयतीति मङ्गलम्। धातूनामनेकार्थत्वाच्छब्दस्य च नानार्थस्पर्शित्वान्न काऽपि क्षतिः।

श्वः श्रेयसं शुभं भद्रं कल्याणं मङ्गलं शुभम् (कालवर्गेऽमरः), स्तवः स्तोत्रं स्तुतिर्नुतिः इति च (शब्दवर्गे) कोशादपि भेदोऽनयोर्ज्ञातव्यः। 'स्तोत्रं, स्तवः, स्तुतिः' इति कोशप्रमाणेन त्रयोऽप्येते शब्दाः समानार्थाः।

अथ व्याकरणरीत्या व्युत्पत्तिरेषामुच्यते—

स्तोत्रम्—'दाम्नीशसयुयुजस्तुतुदसिसिचमिहपतदशनहः करणे' इति सूत्रेण करणेऽर्थे वाच्ये ष्ट्रन् प्रत्यये स्तौति प्रशंसत्यनेनेति स्तोत्रं प्रशस्तिवचनमित्यर्थः। गणपति-स्तोत्रम्—गणपतिर्येन वाक्यप्रबन्धेन स्तूयते तद् गणपतिस्तोत्रम्। सिद्धस्तोत्रपदे तेन सह कर्मषष्ठ्यन्त-गणपतिपदस्य समासः। एवम् आदित्य-स्तोत्रम्। आदित्यहृदयस्तोत्रम्—हृदयमिव प्रियतरमित्युपचारात् हृदयम्। आदित्यस्य दृश्यमिव प्रियतरं गूढरहस्यभूतं वा। तच्च तत् स्तोत्रमिति आदित्यहृदयस्तोत्रम। एवमन्यत्रापि अनुसन्धेयम्।

स्तवः—'स्तवः'-शब्दे तु 'भावे', 'अकर्तरि च कारके संज्ञायाम्' इति सूत्रद्वयात् 'भावे' 'अकर्तरि च कारके' इत्येतद्द्वयेऽनुवर्तमाने 'ऋदोरप्' इति सूत्रेण अप्-प्रत्ययः। स च भावे करणे च विविक्षितः, तथैव प्रयोगदर्शनात्। स्तूयते इति स्तवः। सकर्मकस्यापि स्तुधातोः भावार्थके प्रत्यये कर्तव्ये कर्मणोऽविवक्षयाऽकर्मकत्वम्। सिद्धावस्थापन्ने धारणार्थे वाच्ये भावे 'पाक'इतिवद् अप्प्रत्ययः। ततश्च 'शिव-स्तव' इत्यादौ सत्यां कर्मापेक्षायां शिवादिकर्मपदानां कृद्-योगे षष्ठ्यन्तानां समासः। स्तवनं स्तवः। शिवस्य कर्मकारकीभूतस्य स्तवः शिवस्तवः। कर्मणोऽत्यन्तनिरपेक्षत्वे वा सम्बन्धमात्रे षष्ठ्यन्तशिवपदस्य समासः। भावे स्तवशब्दस्य प्रशंसार्थः। स्तौत्यनेनेति स्तवः, करणे वाऽप्। स्तोत्रशब्दवत् करणार्थः।

अथात्र आशङ्क्यते—श्रीदीक्षितचरणैः 'अकर्तरि च कारके संज्ञायाम्' इति सूत्रप्रस्तावे 'इत उत्तरम् भावे अकर्तरि कारके इति कृत्यल्युटो बहुलमिति यावद् द्वयमप्यनुवर्तते' इत्युक्तम्। एवं च कर्तृभिन्ने कारके कर्मणि सम्प्रदानेऽधिकरणेऽपि वा स्तुधातोरप्प्रत्ययः स्यात्? तत्र कर्मणि प्रत्यये सति स्तूयमानपदार्थोऽपि स्तवशब्दवाच्यः स्यात्? यथा शिवः स्तवः, गणपतिः स्तवः। किन्तु नैतादृशः प्रयोगः क्वचिदपि दृश्यते। सम्प्रदानेऽपि स्तूयतेऽस्मै इत्यर्थे, स्तौति यस्मिन् प्रदेशे काले पात्रे वेत्यधिकरणे वा स्तवपद-शक्तिर्नानुसन्धीयते?

अत्र समाधीयते—'कृत्यल्युटो बहुलम्' इति सूत्रे श्रीदीक्षितपादैरुक्तम्, 'कृत्यल्युटो इत्येव सूत्रमस्तु। यत्र विहिताः (कृत्यल्युटः) ततोऽन्यत्रापि स्युरित्यर्थव्यभिचारार्थम्' इति। इत्येवं बहुलग्रहणेन अत्रापि भावकरणयोरेव अप्-प्रत्ययोऽपेक्ष्यते।

स्तुतिः—स्तुरिति 'स्त्रियां क्तिन्' अयमपि करणयोरेवेष्यते। देवी-स्तुतिरित्यस्य देव्याः प्रशंसेत्यर्थः। अध्यायपरकत्वे तु 'देवी स्तूयते प्रशंस्यते यया यया सा देवीस्तुतिः श्लोककदम्बात्मकोऽध्याय' इत्यर्थः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्तवनम्—स्तवनमिति, 'ल्युट् च' इति भावार्थे ल्युट्। प्रशंसेत्यर्थः। 'करणाधिकारयोश्च' इति करणे वा ल्युट्। 'अयनम्, वर्तनम्' इत्यत्रैव अत्राप्यधिकरणे ल्युट् स्यात्? तन्न; 'अयनम्, इत्यत्र करणेऽधिकरणेऽपि ल्युट् भवति। 'वर्तनम्' इत्यत्र चाधिकरणे ल्युट्। अयनम्' इत्यस्य पर्यायः पन्थाः। अनेन पथा गच्छन्ति इत्युक्त्या करणकारकार्थः। अस्मिन् मार्गे गच्छन्ति इत्युक्त्या चाधिकरणार्थः। एवमयान्ति अयन्ते अनेनास्मिन् वा तदयनम्। भावे त्वस्यार्थान्तरम्। वर्तनम् इत्यस्य देशपर्यायत्वेऽधिकरणे, पथि-पर्यायत्वे करणाधिकरणोः, गमनपर्यायत्वे तु भावे ल्युट्। एवं विवक्षाविशेषेणैव सर्वत्र कारकादिविशेषे प्रत्ययाः प्रयोक्तव्याः। तेन 'स्तवनम्' इत्यत्रापि विवक्षामाश्रित्यैव भावे करणे वा ल्युट् कर्तव्यः। 'कोशे स्तवः स्तोत्रं स्तुतिर्नुतिः' इति पर्यायसाम्ये सत्यपि प्रत्ययानां भावाद्यर्थवत्ता विद्वद्भिर्यथास्वमभ्युपगन्तव्या।

स्तोत्र-भेदाः

स्तोत्राणि चरित्र - शोभा-गुण-प्रभावादिवर्णनपरत्वेन गुण-नामोद्देश्यपरत्वेन च नानारूपाणि भवन्ति। पुराणादिषु ऋषिभिः दर्शितानि स्वकृतानि देवनृपादिभिः कृतानि वा सर्वाण्यार्षाणि। ऋषिभिः निबद्धवाचि तेषां दर्शनात्।

श्रीपुष्पदन्ताचार्य - शङ्कराचार्य - पण्डितराज-जगन्नाथप्रभृतिभिः कृतानि लौकिकानि। श्रीमद्भागवतादिषु वाराह-भगवत्स्तुतिः, गर्भस्तुतिः, देवीस्तुतिः, शिवमहिम्नः स्तोत्रम्, गङ्गालहरी इत्यादीनि चरित्रादिवर्णनस्तोत्राणि। विष्णुसहस्रनाम, शिवसहस्रनाम इत्यादीनि गुणनामोद्देशस्तोत्राणि भवन्ति। सर्वेषामपि स्तोत्राणां फलश्रुतयस्तत्र प्रदर्शिताः।

पुनश्च—आनुष्ठानिकानि अनानुष्ठानिकानि उभयानि चेति तानि त्रिधा भवन्ति। हनुमत्कवचम्, बटुकभैरवस्तोत्रम् इत्यादीनि आनुष्ठानिकानि, शिवमहिम्नः स्तोत्रम्, गङ्गालहरीत्यादीनि अनानुष्ठानिकानि। विष्णुसहस्रनामादीनि चोभयविधानि।

संस्तुतिः प्रस्तुतिश्च

'संस्तवः स्यात् परिचयः' इति कोशात् संस्तुतिः परिचय इति पर्यायौ। सम्यक् स्तुतिः सम्यक् स्तवः इति व्युत्पत्त्या समुपसर्गेण समित्यव्यये वा योगसमासौ न व्युत्पत्तिकृतार्थपरिचायकौ, शब्दश्रुत्या तदर्थोपस्थितिबाधात् तादृशव्युत्पत्त्यनर्हणीयत्वम्।

'प्रस्तुतिः प्रस्ताव' इत्येतावपि पर्यायौ न प्रकृष्टस्तुत्यर्थबोधकौ भवतः, प्रख्यातार्थेन बाधात्। 'उपसर्गेण धात्वर्थो बलादन्यत्र नीयते, प्रहारा-हार-संहार-विहार-परिहारवत्' इति न्यायात्।

यद्यपि विषयोऽयमेतादृशो व्यापको यत् एतादृशा नैके निबन्धा अपि एतदर्थमपर्याप्ता भवेयुः। तथापि अत्र मङ्गलस्य समासतः व्यापकस्वरूपप्रदर्शनम्, स्तोत्रस्य च तेन सहान्तरं संक्षेपतः समुद्दिष्टं यच्च मन्ये, एतावता सिद्धं भवति। गवेषणाप्रियेरस्य विस्तारोऽपि कर्तुं शक्यते। तदर्थमयं निबन्धः प्रेरको भवेत्तदा आत्मनो यत्नोऽनेन सफलो मन्येतेति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अद्वितीयस्य ब्रह्मणो लक्षणाभावः

—श्री जगन्नाथ श्रीधर पदे शास्त्रिणः—

[अध्यक्षः—स्नातकोत्तरदर्शन-विभागस्यः गायकवाड-विश्वविद्यालयः, बडोदा]

[समादरणीय-शास्त्रिपादैः 'सूर्योदस्यय' कृते विशेषरूपेण उपायनीकृतोऽयं सर्वदर्शनदृष्टिपात्रीकृतो मीमांसामृतेन समन्वितो धर्मतत्त्व-ज्योतिष्मान् महावृत्तः विगतेऽङ्कद्वये (फरवरी-मार्चमासीयैषमाङ्कयोः) तत्त्वजिज्ञासातापतप्तेभ्यः कामपि सच्छायां वितरितवानिति विज्ञानां नातिरोहितम् । तेषां कार्यव्यस्ततया अग्रिमांशोऽयमस्माभिरद्य लब्धः पाठकेभ्यः प्रस्तूयते । शास्त्रिपादानामस्याः सस्नेहकृपायाः कृते 'सूर्योदयः' तेषामधमर्ण इति सप्रश्रयं सूच्यते । —सम्पादकेन]

वैदिकं दर्शनमनुसृत्य समुद्दिष्टो धर्मी । उद्देशो लक्षणं परीक्षा चेति त्रिविधा शास्त्रस्य प्रवृत्तिरिति क्रमेण उद्देशानन्तरं धर्मिणो ब्रह्मणो लक्षणं वक्तव्यम् । ननूक्तमेव लक्षणम्—'स्वयंज्योतिःस्वरूपं ब्रह्म' इति ? बाढमुक्तम्; तथापि न तल्लक्षणप्रतिपादनार्थम् । किं तर्हि ? उद्देशार्थमेव । 'विराडग्निरि'ति नामधेयान्तरेण ब्रह्मणः सङ्कीर्तनार्थम् । किं प्रयोजनम् ? उच्यते ।

अत्र केचिद् विवदन्ते—उपनिषत्स्वेव 'एकमेवाद्वितीयं ब्रह्म' श्रूयते । नहि वेदान्ता नाम समग्रा वेदाः । वैदिकैस्तावदुपनयनादारभ्य—

सूर्य आत्मा जगतस्तस्थुषश्च ।

(मा० सं० १३.४६)

योऽसावादित्ये पुरुषः सोऽसावहम् ।

(मा० ई० उ० १७)

स यश्चायं पुरुषे यश्चासावादित्ये स एकः ।

(तै० उ० २.७)

य एष एतस्मिन् मण्डले पुरुषः सोऽग्निस्तानि यजूंषि स यजुषां लोकः ।

(श० ब्रा० १०. ५. २.१)

इत्यादि - श्रुतिप्रतिपादितस्य सवितृमण्डलस्थस्य विराडग्नेः सायंप्रातर्विविक्ते सन्धिकाले प्रत्यहमात्मकत्वप्रतिपत्त्यर्थमुपासनं विधीयते । व्रतबन्धादारभ्य समावर्तनपर्यन्तं सायं-प्रातः परिचर्यते स एवाऽग्निः । गृहस्थाश्रममारभ्य यावज्जीवं च हूयते सायं-प्रातरग्निहोत्रम् । पञ्चमहायज्ञैः सप्तपाकसंस्थाभिः सप्तहविःसंस्थाभिः सप्तसोमसंस्थाभिश्च अजस्रं सन्तर्प्यते विराडग्निः । तस्मादग्निरेव वैदिकानां धर्मि, न ब्रह्मेति ।

तेषां भ्रमं वारयितुं वैदिकैरुपास्यमानो विराडग्निरेव ब्रह्मशब्देन उपनिषत्सु श्रूयते, ब्रह्मणो विराडग्नेश्चाभेद इति च प्रस्थापयितुं ब्रह्मणः स्वयंज्योतिःस्वरूपमुक्तम्, न लक्षणप्रतिपादनार्थम् ।

वस्तुतस्तु एकमेवाद्वितीयं ब्रह्म धर्मीति मीमांसितम् । अस्यामवस्थायां लक्षणकर्तुरन्यस्याभावाद् ब्रह्मणो लक्षणमशक्यप्रायमेव । वैदिकैरभेदोपचाराद् ब्रह्मशब्देनैव व्यपदिश्यमाना विज्ञानघना वेदमयी परब्रह्मणः पट्टमहिषी चितिशक्तिः श्रुतिरप्यद्वितीयस्य ब्रह्मणो लक्षणं पृष्टा लज्जावनतमुखी नववधूरिव मौनमेवास्थितवती । पुनः पुनः सनिबन्धं पृष्टा प्रतिप्रश्नं पृष्टं धर्ममुत्तमाङ्गविधूननेनैव केवलेन प्रतिषेधन्तो करुणाप्लावितहृदया केवलैर्दृगन्तपातैरेव अन्ते परं ब्रह्म प्रबोधितवतीति महदाश्चर्यम् । तथा च श्रुतयः—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नैनमूर्ध्वं न तिर्यञ्चं न मध्ये परिजग्रभत् ।

(मा. सं. ३२.२)

योऽस्याध्यक्षः परमे व्योमन् ।

(तं. ब्रा. २.८.९)

स होवाच । एतद्वै तदक्षरं गार्गि ब्राह्मणा अभिवदन्ति । अस्थूलम् । अनणु । अह्रस्वम् । अदीर्घम् । अलोहितम् । अस्नेहम् । अच्छायम् । अतमः । अवायु । अनाकाशम् । असङ्गम् । अस्पर्शम् । अगन्धम् । अरसम् । अचक्षुष्कम् । अश्रोत्रम् । अवाक् । अमनः । अतेजस्कम् । अप्राणम् । अमुखम् । अनाम । अगोत्रम् । अजरम् । अमरम् । अभयम् । अमृतम् । अरजः । अशब्दम् । अविवृतम् । असंवृतम् । अपूर्वम् । अनपरम् । अनन्तरम् । अबाह्यम् । न तदश्नोति कञ्चन । न तदश्नोति कञ्चन । (मा.बृ.३.८.८)

तद्वा एतदक्षरं गार्गि अदृष्टं द्रष्टृ अश्रुतं श्रोतृ अमतं मन्तृ अविज्ञातं विज्ञातृ । नान्यदस्ति द्रष्टृ । नान्यदस्ति श्रोतृ । नान्यदस्ति मन्तृ । नान्यदस्ति विज्ञातृ । एतद्वै तदक्षरं गार्गि यस्मिन्नाकाश ओतश्च प्रोतश्चेति । (मा०बृ० ३.८.११)

स एव नेति नेत्यात्मा । अगृह्यो नहि गृह्यते । अशीर्यो नहि शीर्यते । असङ्गो ऽसितो न सृज्यते न व्यथते ।

(मा०बृ० ३.९.२८ ; ३.११.६ ; ४.२.२७)

यतो वाचो निवर्तन्ते
अप्राप्य मनसा सह ।
आनन्दं ब्रह्मणो विद्वान्
न बिभेति कदाचनेति ॥

(तै० ब्र० २. ८.)

यस्यामतं तस्य मतं
मतं यस्य न वेद सः ।
अविज्ञातं विजानतां
विज्ञात - मविजानताम् ॥

(केन-उ० २.३)

अन्यदेव तद्विदितादथो अविदितादधि ।

(केन-उ० १.३)

स्मृतिश्च—

अनादिमत्परं ब्रह्म न सत् तन्नासदुच्यते ।

(गीता० १३.१२)

ब्रह्मण एकत्वादद्वितीयत्वाद् ब्रह्मव्यतिरिक्तस्य वस्त्वन्तरस्याभावाच्च ब्रह्म अस्तीत्यपि वक्तुं न शक्यते, नास्तीत्यपि वक्तुं न शक्यते । विषयिणो वक्तुः द्वितीयस्याभावात् । दूरे पुनर्लक्षणता ।

इयमवरोहक्रमेण श्रौती प्रथमा भूमिका । आरोहक्रमेण अन्तिमा । नात्र धर्मिणो ब्रह्मणो धर्मग्लानिर्भवति । अनुच्छित्तिधर्मत्वाद् ब्रह्मणः । अधर्मस्य वा धर्मिण्यभ्युत्थानं भवति । अविनाशित्वात्, अत एव धर्माभावात् । विनाशधर्मसु हि पदार्थेषु अधर्मोऽवतिष्ठते, नाविनाशिषु । अत एव धर्मप्रतिष्ठापनस्यात्र प्रसङ्ग एव नास्ति । सुप्रतिष्ठितो ह्यत्र धर्मः । तथा हि श्रुतयः—

अविनाशी वा अरे अयमात्मा अनुच्छित्तिधर्मा
मात्रासंसर्गस्त्वस्य भवति ।

(मा. बृ. ४.३.१५)

अजो नित्यः शाश्वतोऽयं पुराणः । (कठ. २.१८)

स भगवः कस्मिन् प्रतिष्ठित इति स्वे महिम्नि ।

(छा. ७.२४.१) इति ।

स्मृतिश्च—

अविनाशी तु तद्विद्धि येन सर्वमिदं ततम् ।
विनाशमव्ययस्यास्य न कश्चित् कर्तुमर्हति ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वेदाविनाशिनं नित्यं य एनमजमव्ययम्।
नित्यः सर्वगतः स्थाणुरचलोऽयं सनातनः॥
अव्यक्तोऽयमचिन्त्योऽयमविकार्यो ऽयमुच्यते।
—(गीता २.१७,२१,२४,२५) इति।

देहपातानन्तरमेव भूमिकेयं विदुषा सम्प्राप्यते। भूमिकायामस्याम् एकत्वमद्वितीयत्वं चेति ब्रह्मधर्माः प्राप्यन्ते। विदुषो ब्रह्मभावापत्तिर्भवति। तथा च श्रुतिः—

न तस्य प्राणा उत्क्रामन्ति ब्रह्मैव सन् ब्रह्माप्येति।
(बृ. ४.४.६)

विद्यमाने देहे शरीरोपाधिपरिच्छिन्न आत्मा निरुपाधिकेन ब्रह्मणा भिद्यत इति सम्पूर्णा ब्रह्मभावापत्तिर्विदुषोऽपि न भवति।

वस्तुतस्तु ब्रह्मणोऽविकृतस्यैव जीवात्मनाऽवस्थानं ब्रह्मात्मना चेति। उपाध्युत्पत्त्या जीवस्योत्पत्तिः, उपाधिप्रलयेन प्रलयः। लक्षणभेदोऽप्यनयोरुपाधिनिमित्त एव। विद्यमाने देहोपाधौ यद्यप्यात्मैकत्वविद्यया ब्रह्मणा साकमात्मनः सदंशेन चिदंशेन आनन्दांशेन चैक्यं सम्पद्यते, तथापि न पूर्णम्। देहोपाधेर्द्वैतापादकस्य अधर्मस्य विद्यमानत्वात्। तस्यात्मनि समुत्थितस्य देहोपाधिरूपस्य अधर्मस्य प्रलयेनैव द्वैतप्रलयोऽद्वैतभावापत्तिश्च।

नित्यशुद्धबुद्धमुक्तस्वभावं ब्रह्म, शारीरश्चात्मा। देहश्च अनित्योऽशुद्धो जडो बद्धश्च। स्वयंज्योतिःस्वरूप आत्मा। तमःस्वभावो देहः। विरुद्धधर्मावेतौ पदार्थौ। न तत्र धर्मधर्मिसम्बन्ध आस्थातुं शक्यः। तेन देहो नात्मधर्मो भवति, प्रत्युत विरुद्धधर्मत्वाद् अधर्म एव। तस्मादात्मनो देहोपाधिर्नाम आत्मनि अधर्माभ्युत्थानमेव।

पाञ्चभौतिको हि देहः। तत्र पृथिवीतत्त्वस्य आकाशतत्त्वस्य च जडेऽपि विद्यमानत्वात् जलतत्त्वमग्नितत्त्वं वायुतत्त्वं चेति महाभूतत्रयमस्य असाधारणो धर्मः। एतदेव पदार्थत्रयं कफः, पित्तं वायुश्चेति समामनन्ति भिषजः। सत्त्वं रजस्तम इति साङ्ख्याः। एतत् त्रैगुण्यमेव साम्यावस्थं प्रकृतिशब्देन साङ्ख्यैर्व्यपदिश्यते। रागद्वेषमोहाः सुखदुःखमोहा वा प्रकृतेर्धर्माः। एवं प्रकृतिरेवास्य शरीरस्य असाधारणो धर्मः।

निस्त्रैगुण्य आत्मा त्रैगुण्येन विरुद्धधर्मेण अत एव अधर्मेण शरीरेण परिच्छिन्न इति स शरीरी देही चेति अविद्याविद्भिरुच्यते। शरीरी देही चेत्यादिप्रयोगेषु शरीरं देहो वा शरीरिणो देहिनो वाऽऽत्मनोऽधर्मः सन्नपि संमूढैर्धर्म इत्युपचर्यते। शरीरं चात्मधर्मो भवति। शरीरधर्माश्च अविद्ययाऽऽत्मनि अध्यस्यन्ते। एवमत्राऽऽत्मधर्माणां ग्लानिर्भवति। शरीरधर्माणामात्माऽधर्माणामभ्युत्थानं भवति। एवमत्र अधर्मो विपर्ययेण धर्म इत्युपचर्यते।

अयमधर्म एव धर्मिभूतो नीतिरिति व्यपदिश्यते। अविद्यादिभिः पञ्चविपर्ययैरत्र नयनं सम्पाद्यते। अविद्ययाऽधर्मो धर्मत्वेन उपचर्यते, धर्मत्वं च नीयते। विपर्ययेणधर्मत्वं नीतोऽधर्म एव नीतिरिति च व्यपदिश्यते। नीतिश्च धर्मशब्दपर्याय इत्यास्थीयते।

वस्तुतो धर्मो नीतिश्चेति भिन्नौ पदार्थौ, प्रकृतिभेदादर्थभेदाच्च। अस्यामविद्यावस्थायां धर्मधर्मिणोः संयोगः सम्बन्धः, न समवायो न वाऽभेदः। संयोगसम्बन्धेन विद्यमानो धर्मो धर्मिणा यथाकाममुपादातुं परित्यक्तुं च शक्यत इत्यत्र धर्मधर्मिसम्बन्धोऽशास्त्रीयः, अनित्योऽज्ञानमूलकश्च।

नात्र धर्मनाशे धर्मिनाशः। देहिन आत्मनो धर्मो देह इति देहीशब्देन प्रतीतिरविद्ययैव। अत एवोक्तमीश्वरगीतासु—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अधर्मं धर्ममिति या मन्यते तमसाऽऽवृता।
सर्वार्थान् विपरीतांश्च बुद्धिः सा पार्थ तामसी ॥
(गीता १८.३२)

तस्माद् अविद्यया विपर्ययेण च शरीरं विरुद्धधर्ममपि आत्मधर्मत्वेनोपचर्यते। आत्मानात्मविवेकिनो विदुषस्तु देहोऽधर्म तव। सोऽधर्म आत्मधर्मैरुदारैरध्यस्तः शान्तस्तिष्ठति। यावदयमधर्मो न परित्यज्यते तावद् विदुषोऽपि सम्पूर्णा ब्रह्मभावापत्तिर्न भवति। यदा देहावच्छेदरूपोऽधर्मः परित्यज्यते, तदा सर्वधर्माधर्मपरित्यागेन परेण ब्रह्मणा पूर्णमैक्यं सम्पद्यते। तथा चोक्तं गीताशास्त्रे—

सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज।
(१८.६६) इति।

सर्वे च ते धर्माश्च सर्वधर्मास्तान् सर्वधर्मान्। 'धर्मशब्देनात्र अधर्मोऽपि गृह्यते।' (शां.भा.१८.६६) इति सर्वाधर्मानपि। विनाशिषु पदार्थेषु धर्मेण साकमधर्मोऽपि विद्यते। केवलं धर्म एव नास्ति। स चाधर्मोऽभ्युत्थितो धर्ममभिभूय पदार्थं नाशयति। धर्मश्च अभ्युत्थितोऽधर्ममभिभूय धर्मिणं प्रतिष्ठापयति। एवं विनाशिपदार्थेषु धर्माधर्मयोर्द्वन्द्वं नित्यं वर्तते। तस्मात् **सर्वधर्मान् परित्यज्य** इत्यत्र धर्मशब्देन अधर्मोऽप्याकृष्यत इति धर्मशब्देन अधर्मस्यापि ग्रहणम्।

सर्वधर्मा नाम विषयधर्मा देहधर्मा इन्द्रियधर्मा बुद्धिधर्माः प्रकृतिधर्मा आत्मधर्माश्चेति। सर्वाऽधर्मा नाम विषयाधर्मा देहाधर्मा इन्द्रियाधर्मा मनोऽधर्मा बुद्ध्यधर्माः प्रकृत्यधर्मा आत्माधर्माश्चेति।

परित्यज्य त्यक्त्वा। मां परं ब्रह्म। एकमद्वितीयम्। शरणमेकत्वेनाद्वितीयत्वेन च। व्रज गच्छ। एवं सर्वांशेन चिदंशेन आनन्दांशेन चैकत्वं गतोऽपि विद्वान् देहोपाधिरूपं द्वैतापादकमधम त्यक्त्वाऽद्वितीयत्वं गच्छति। यथा घटाकाशस्य महाकाशादनन्यत्वम्, तथापि घटे विद्यमाने तत्र विद्यमानस्य महाकाशस्य घटाकाशत्वं नापैति, घटावच्छेदस्य विद्यमानत्वात्। यथा घटे घटाकाशस्य प्रतीतिर्भवति तथा तत्रैव घटे घटाकाशे अनन्यत्वेन विद्यमानस्य महाकाशस्यापि प्रतीतिर्भवति। परन्तु घटे नष्टे उपाधेर्नाशाद् घटाकाशा महाकाश एव सम्पद्यते। आकाशस्य घटावच्छेदो नश्यति। एवं विदुष आत्मनो देहावच्छेदे नष्टे तस्य ब्रह्मभावापत्तिर्भवति। विद्यमाने देहे देहावच्छेदरूपेण विद्यमानं द्वैतं देहपाते निवर्तते। एकमद्वितीयं च ब्रह्म सम्पद्यते। ब्रह्मैव सन् ब्रह्माप्येति इति। (बृ० ४.४.९)

अवसितः प्रथमभूमिका-विचारः। इदानीं द्वितीयभूमिका-विचार उपक्रम्यते—**द्विरूपं ब्रह्म विकारावर्ति, विकारवर्ति च।** अस्य परब्रह्मणो द्विरूपमवस्थानं श्रूयते-विकारावर्ति विकारवर्ति च। विस्तरेणतत् मीमांसितमुत्तरमीमांसायाम्। तथा हि, द्विरूपं हि ब्रह्मावगम्यते नाम-रूप-विकारभेदोपाधिविशिष्टं तद्विपरीतञ्च सर्वोपाधिविवर्जितम्।

यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति।
यत्र त्वस्य सर्वमात्मैवाभूत् तत्केन कं पश्येत्॥
(बृ० ४.५.१५)

यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमा। अथ यत्रान्यत् पश्यत्यन्यच्छृणोत्यन्यद्विजानाति तदल्पम्। यो वै भूमा तदमृतम्। अथ यदल्पं तन्मर्त्यम्। (छा० ७.२४.१)

सर्वाणि रूपाणि विचिन्त्य धीरो
नामानि कृत्वाऽभिवदन् यदास्ते।
(तै० आ० ३.१२)

निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम्।
अमृतस्य परं सेतुं दग्धेन्धनमिवाऽनलम्॥
(श्वेता० ६.१९)

नेति नेति (बृ० २.३.६)। अस्थूलमनणु (बृ० ३.८.८)।

न्यूनमन्यत् स्थानं सम्पूर्णमन्यत्। इति चैवं सहस्रशो विद्याविद्याविषयभेदेन ब्रह्मणो द्विरूपतां दर्शयन्ति।' (शां० भा० १.१.२४)

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अखिल-भारतीय-धार्मिकाध्यात्मिक-संस्कृतविद्यापीठस्य परीक्षा-फलम् : १९६८ वर्षस्य

श्रीभारतधर्म-महामण्डलद्वारा सञ्चालितस्य अखिल-भारतीय-धार्मिकाध्यात्मिक-संस्कृतविद्यापीठस्य १९६८ ईशवीयवत्सरस्य परीक्षाफलं तदीयपरीक्षामन्त्रिणा प्रेषितं निम्नलिखितं वर्तते ।

प्रथमा परीक्षा

क्रमाङ्कः नाम

व्याकरणम्

प्रथमश्रेणी

४ मकरध्वज दूबे

द्वितीय श्रेणी

३ सन्तोषकुमार वाजपेयी
७ राधेश्याम शर्मा
८ सुरेन्द्रकुमार तिनगुरिया
१३ सच्चिदानन्दः
१४ पारेश्वरप्रसादः

कर्मकाण्डम्

द्वितीय श्रेणी

३१ टेकचन्द शर्मा

साहित्यम्

प्रथम श्रेणी

६२ जगन्नाथ उपाध्यायः

द्वितीय श्रेणी

४२ पद्मसिंह राजपूतः
५३ षडानन्दगिरिः
५७ लक्ष्मणप्रसाद द्विवेदी
५९ विजयनारायण दीक्षितः
६० भगनप्रसाद द्विवेदी
६१ लालताप्रसाद द्विवेदी

क्रमाङ्कः नाम

तृतीय श्रेणी

४३ बेनीमाधव मिश्रः
४४ नीला कुमारी
४५ चन्द्रकान्ता देवी
४६ अर्जुनप्रसादसिंहः
४९ उमेश मिश्रः
५० जीतेन्द्रकुमार मिश्रः
५४ कौशलकिशोर पाठकः
५५ किशोरी पाण्डेयः
५६ पुरुषोत्तम पाण्डेयः

हिन्दी

प्रथम श्रेणी

९८ सुलोचना मोजिका
१०० विजयकुमार छावछरिया
१०२ विजयकुमार चितापतः
१०४ पुष्पाञ्जली नाट्टा
१०५ शकुन्तला सुरेका

द्वितीय श्रेणी

७९ वशिष्ठनारायण पाण्डेयः
८० बाबूलाल सिंहः
८१ रामशृंगार भक्तः
८२ सुरेशकुमार रस्तोगी

क्रमाङ्कः नाम

८३ रामाशंकर साहः
८४ विजयकुमार मिश्रः
८५ मनोजकुमार मिश्रः
८६ जनार्दन श्रीवास्तवः
८८ दीनानाथ साहः
८९ लालबाबू सिंहः
९४ दिगम्बर मिश्रः
९७ गीताञ्जली नाट्टा
९९ रानी कुमारी
१०६ शान्तिप्रसाद शर्मा
१०७ चन्द्रशेखर सिंहः
१०८ शिवप्रसाद सहरिया
१११ धार्मसिंह विष्टः
११४ विजयेन्द्र सिंहः
११५ मुरली सिंहः
११६ टेकसिंहः
११७ प्रेमसिंहः
११९ चन्द्रमोहनसिंहः
१२० विक्रमसिंहः

तृतीयश्रेणी

९३ मोहनानन्द मिश्रः
१०९ कुमारी उमा श्रीवास्तवा
११० कुमारी सावित्री श्रीवास्तवा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मध्यमा परीक्षा

क्रमाङ्क	नाम

व्याकरणम्

प्रथम श्रेणी

१२८ चक्रधर ध्यानी
१३० जयराम पाण्डेयः

द्वितीय श्रेणी

१२९ हरिहरप्रसाद पाण्डेयः

तृतीय श्रेणी

१३४ हृदयानन्द पाण्डेयः

वेदः

द्वितीय श्रेणी

१३५ हरमित्रः
३६२ श्यामधर द्विवेदी

ज्योतिषम्

द्वितीय श्रेणी

१३८ रघुवीरसिंह सिनहा
३६० राजेश्वर द्विवेदी
३६१ विद्याधर उपाध्यायः

तृतीय श्रेणी

१३७ विन्देश्वर झा

साहित्यम्

प्रथम श्रेणी

१४० ब्रह्मानन्द सरस्वती
१४९ मनमोहनदास बागड़ी
१५० कुमारी शीला ललवानी

द्वितीय श्रेणी

१४२ हरिगोविन्द पाण्डेयः
१४३ विन्देश्वरी कुमारी
१४४ रामनारायणः
१४५ चन्द्रावती देवी
१४६ जगदीशप्रसाद शर्मा
१४७ शंकरदयाल वर्मा
१४८ खोरेन्द्रकुमार श्रीवास्तवः
१५१ कुमारी अरुणा बागड़ी
१५२ कुमारी चन्द्रा वर्मा
१५३ श्रीमती इन्द्रादेवी वर्मा
१५४ कुमारी सुधा मोहोणकर
१५५ कुमारी पुष्पा बागड़ो
१५६ दत्तात्रेय शंकर मोहोणकरः
१६३ गीतादेवी शर्मा
१६४ ओम्नारायण शर्मा
१६५ भगवानदीन सूर्यवंशी
१६६ कैलाशनारायण शर्मा
१६७ सुरेशप्रसाद भार्गव
१६८ वेदव्रत मेहता
१६९ सुरेन्द्रनारायण दूबे
१७१ मुन्नीलाल आर्यः
१७५ महेशकुमार श्रीवास्तवः
१७९ जानकीप्रसाद शर्मा
१८१ माताप्रसाद शर्मा
१८२ जगदीशप्रसाद शर्मा
१८३ भोलानाथ उपाध्यायः
१८४ रामप्रसाद शुक्लः
१८५ अशोककुमार त्रिपाठी

तृतीय श्रेणी

१७४ रामप्रकाश श्रीवास्तवः
१७६ रामनिवास श्रीवास्तवः
१८६ गोवर्धन पाठकः

हिन्दी

प्रथम श्रेणी

२०१ गंगाराम वर्मा
२०२ जयवीर सिंहः

द्वितीय श्रेणी

१९२ प्रयागदत्त खंतवालः
१९४ उमानन्द शर्मा
१९५ श्यामलालः
१९७ चन्द्रिकाप्रसाद मिश्रः
२०० हरिराम वर्मा
२०३ विनोदानन्द मिश्रः
२०६ नरेन्द्रसिंह रावतः
२१० राधेश्याम जायसवालः
२११ भानुप्रताप सिंहः
२१२ इन्दिरा देवी

तृतीय श्रेणी

१९८ रामावतार यादवः
२१३ काशीनाथः
२१४ रामचन्दर यादवः

शास्त्री परीक्षा

ज्यौतिषम्

द्वितीय श्रेणी

२३४ रामचन्द्र मिश्रः
२३५ भगवतीप्रसाद द्विवेदी

तृतीय श्रेणी

२३२ गिरिजाशंकर मिश्रः

कर्मकाण्डम्

प्रथम श्रेणी

२३९ दिनेशप्रसाद पाठकः

द्वितीय श्रेणी

२३८ सुरेशप्रसाद पाठकः

द्वितीय श्रेणी

२३६ उमाशंकर मिश्रः

साहित्यम्

प्रथम श्रेणी

२६४ विष्णुप्रसाद पाखेलः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्रमाङ्क	नाम
	द्वितीय श्रेणी
२३९	नवनीतलाल जोशी
२४१	मदनमोहन शर्मा
२४५	रामदुलारी देवी
२४६	गोपाल पाण्डेयः
२४७	बाबूराम दीक्षितः
२४८	कृष्णदत्त शर्मा
२४९	रामनारायण शुक्लः
२६०	कैलाश मिश्रः
२६१	अक्षयवट मिश्रः
२६२	श्यामसुन्दर सिंहः
२६३	अभिमन्यु द्विवेदी
३७८	भेषराज अर्ज्यालिः
३७९	रामप्रसाद उपाध्यायः
३८०	नारायणप्रसाद शर्मा
३८१	देवीप्रसाद अधिकारी
	तृतीय श्रेणी
२४०	गिरिजाशंकर अवस्थी
२५०	राजेन्द्र मिश्रः
	हिन्दी
	प्रथम श्रेणी
२७०	राधाकृष्ण वर्मा
२७४	पारसनन्द मिश्रः
२७५	बलिराम चौधरी
२७६	रूपनारायण सिंहः
	द्वितीय श्रेणी
२६८	रामलखन सिंहः
२६९	रामपुकार सिंहः
२७८	प्रेमनारायण शर्मा
२७९	श्रीकान्त मिश्रः
२८०	जनार्दन पाण्डेयः

आचार्य परीक्षा

पुराणम्

प्रथम श्रेणी

३२५ सूर्यप्रसाद मिश्रः
३२६ राधेश्याम मिश्रः

द्वितीय श्रेणी

३२३ हीराप्रसाद उपाध्यायः

तृतीय श्रेणी

३२४ ऋतुराज उपाध्यायः

धर्मशास्त्रम्

प्रथम श्रेणी

३२७ चन्द्रिकाप्रसाद पाठकः

ज्यौतिषम्

द्वितीय श्रेणी

३२८ सूर्यभानु त्रिपाठी

साहित्यम्

प्रथम श्रेणी

३३० रामसजीवन मिश्रः
(सर्वप्रथम)
३३१ गयाप्रसाद पाण्डेयः
३५७ बाबूलाल दासः
३७७ राजेन्द्रप्रसाद शर्मोपाध्यायः

द्वितीय श्रेणी

३२९ गयाप्रसाद त्रिपाठी
३६७ सर्वजीत पाण्डेयः
३७६ खेमराज उपाध्यायः

हिन्दी

प्रथम श्रेणी

३३४ रामकुमार शर्मा
३३७ पशुपति साहः
३८२ संकठाप्रसाद शर्मा

द्वितीय श्रेणी

३३२ रजनीकान्त पाठकः
३३५ सुरेन्द्र घिल्डियालः
३३६ नगेन्द्रप्रसाद घिल्डियालः

१९६८ वर्षीयम् आयुर्वेदविषयस्य परीक्षाफलम्

प्रथमा परीक्षा

द्वितीय श्रेणी

१२२ जटाशंकर सिंहः
१२३ गोवर्धनप्रसाद नवनी
१२४ सोहनलाल भट्टः
१२६ सदानन्द शर्मा
१२७ दर्शनलाल भट्टः

मध्यमा परीक्षा

द्वितीय श्रेणी

२२१ जगन्नारायण मिश्रः
२२९ जनार्दन पाण्डेयः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शास्त्री परीक्षा

क्रमाङ्क	नाम
	द्वितीय श्रेणी
२८१	राजकुमार शुक्लः
२८२	जगदीशनारायण द्विवेदी
२८३	गयादीनः
२८५	रामनारायण तिवारी
२८६	मधुकर होनवडकर
२८७	रामदुलारे गुप्तः
२८८	सुनीलकुमारः
२९०	हुकुमसिंह यादवः
२९२	महेन्द्रनाथ सरकारः
२९३	योगेश्वरप्रसाद पोखरियाल
२९६	प्रतापनारायण पाठकः

क्रमाङ्क	नाम
२९८	कपिलराय भट्टः
३०२	महीपत रायः
३०३	प्रवीणचन्द्रः
३०४	पद्मकान्तः
३०५	मूलशंकरः
३०६	शोभितलालः
३०७	हमीरजी
३०८	दिनकर रायः
३०९	ओम्प्रकाश सिंहः
३११	जगदीश सिंहः
३१९	गेहराज सुवेदी
३५८	चन्द्रकान्तप्रसादः

क्रमाङ्क	नाम
३६८	रामदीनः
३६९	सुरेन्द्रकुमार श्रीवास्तवः
३७०	राधेश्याम शुक्लः
३७५	नवनिधि गौतमः
३८३	रसलदार सिंहः
३८४	रनवीरसिंह चौहानः
३८६	श्यामसुन्दरलाल शर्मा
३८७	पुरुषोत्तम शरणः
३८८	अमरसिंहः
	तृतीय श्रेणी
३१०	विजेन्द्रपाल सिंहः

आचार्य परीक्षा

क्रमाङ्क	नाम
	द्वितीय श्रेणी
३४०	लल्लूप्रसाद सचानः
३४४	श्यामसुन्दर पाण्डेयः
३४६	रघुराज उमरावः

क्रमाङ्क	नाम
३४९	जेठालालः
३५२	गिरधारीलाल मिश्रः
३५४	स्वामी गोविन्दानन्दः
३७१	सुखलाल शर्मा

क्रमाङ्क	नाम
३९०	प्रेमनारायण श्रीवास्तवः
	तृतीय श्रेणी
३५०	शिशुवरनलाल शाक्यः

विविधपरीक्षासु समुत्तीर्णानां छात्राणां नामावली

हिन्दी आचार्य	आयुर्वेद शास्त्री	आयुर्वेदाचार्य
३३३ गदाधरप्रसादः	३८५ देवेन्द्रपाल सिंहः	३४१ ओमप्रकाश मिश्रः
	३१६ रामवृक्ष तिवारी	३५० शिववरनलाल शाक्या
	३८९ राजनारायण द्विवेदी	

—रमाकान्त पाण्डेयः
परीक्षामन्त्री
अखिल-भारतीय-धार्मिकाध्यात्मिक-संस्कृत-विद्यापीठस्य,
महामण्डल-भवनम्, जगतगंज, वाराणसी

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्री भारतधर्म-महामण्डल-शास्त्रप्रकाश-विभागद्वारा प्रकाशितानि पुस्तकानि

१.	धर्म-कल्पद्रुम प्रथम खण्ड	२.००	
२.	,, द्वितीय खण्ड	१.५०	
३.	,, तृतीय खण्ड	२.००	
४.	,, चतुर्थ खण्ड	२.००	
५.	,, पंचम खण्ड	२.००	
६.	,, षष्ठ खण्ड	३.५०	
७.	,, सप्तम खण्ड	२.००	
८.	,, अष्टम खण्ड	३.५०	
९.	धर्म-कल्पद्रुम द्वितीयखण्डसहित राजकीय संस्करण	५.००	
१०.	प्रवीण दृष्टि में नवीन भारत १-२ खण्ड	२.००	
११.	नवीन दृष्टि में प्रवीण भारत	१.००	
१२.	साधन-चन्द्रिका	१.७५	
१३.	शास्त्र-चन्द्रिका	१.५०	
१४.	धर्म-चन्द्रिका	१.२५	
१५.	आर्य-गौरव	०.५०	
१६.	नीति-चन्द्रिका	०.५०	
१७.	धर्म-प्रश्नोत्तरी	०.२५	
१८.	चतुर्दश-लोकरहस्य	०.२५	
१९.	गीतार्थ-चन्द्रिका सजिल्द	३.००	
२०.	,, ,, अजिल्द	२.५०	
२१.	सनातनधर्म-दीपिका	०.७५	
२२.	धर्म-विज्ञान प्रथम खण्ड	५.००	
२३.	,, द्वितीय खण्ड	४.००	
२४.	,, तृतीय खण्ड	४.००	
२५.	सतीचरित्र-चन्द्रिका	२.००	
२६.	नित्यकर्म-चन्द्रिका	०.२५	
२७.	धर्म-सोपान	०.२५	
२८.	धर्मकर्म-दीपिका	०.२५	
२९.	सदाचार-सोपान	०.०६	
३०.	कन्याशिक्षा-सोपान	०.०६	
३१.	ब्रह्मचर्य-सोपान	०.२५	
३२.	साधन-सोपान	०.५०	
३३.	शास्त्र-सोपान	०.२५	
३४.	उपदेश-पारिजात	०.५०	
३५.	कल्कि-पुराण	१.५०	
३६.	पातञ्जल-योगदर्शन	३.००	
३७.	महामण्डल-रहस्य	१.५०	
३८.	मन्त्रयोग-संहिता	१.००	
३९.	हठयोग-संहिता	०.५०	
४०.	तत्त्वबोध	०.१३	
४१.	स्तोत्र-कुसुमाञ्जलि	०.२५	
४२.	भगवद्गीता प्रथम खण्ड	१.००	
४३.	विष्णु-गीता	१.००	
४४.	सूर्य-गीता	०.५०	
४५.	शक्ति-गीता	१.००	
४६.	धीश गीता	०.७५	
४७.	शंभु-गीता	१.००	
४८.	संन्यास-गीता	१.००	
४९.	गुरुगीता	०.२५	
५०.	कर्ममीमांसा-दर्शन प्रथम खण्ड	१.५०	
५१.	,, द्वितीय खण्ड	२.००	
५२.	,, तृतीय खण्ड	५.००	
५३.	कर्ममीमांसा-दर्शनम् (संस्कृत)	२.००	
५४.	राम-गीता	२.५०	
५५.	कहावत-रत्नाकर साधारण रायल	१.००	
५६.	रामायण तुलसीकृत	१.५०	
५७.	दैवीमीमांसा-दर्शन प्रथम भाग	३.५०	
५८.	,, द्वितीय भाग	५.००	
५९.	त्रिवेदी सन्ध्या	०.३७	
६०.	गोव्रत-तीर्थमहिमा	०.५०	
६१.	मार्कण्डेय-पुराण प्रथम खण्ड	१.००	
६२.	,, द्वितीय खण्ड	१.००	
६३.	,, तृतीय खण्ड	१.००	
६४.	ऋजु-पाणिनीयम्	०.७५	
६५.	संगीत-सुधाकर	२.५०	
६६.	पुराण-रहस्य	[illegible]	
६७.	संन्यासधर्म-पद्धति	१.५०	
६८.	पातञ्जलीय-योगदर्शनम् संस्कृत)	४.००	

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पञ्जीकृतसंख्या एल० १८१७

सूर्योदयस्य नियमाः

सूर्योदयस्य नियमाः
सूर्योदयस्य नियमाः

पत्र-संहिता

१. 'सूर्योदय'-मासिकपत्रस्य वार्षिकं शुल्कं रूप्यकपञ्चकं वर्तते। धनादेश (मनीआर्डर) द्वारा तत्प्रेषणीयम्। वी० पी० द्वारा प्रेषणे ५० पणाः पृथक् प्रदेयाः स्युः।

२. आवर्षं गम्भीरसाहित्यसमन्विताः १२ अङ्काः प्रकाश्यन्ते। नवीनग्राहकत्वं प्रथमाङ्कतः (जनवरी-अङ्कतः) एव स्वीक्रियते। माध्यमिकेन केनापि अङ्केन ग्राहकत्वं न स्वीक्रियेत।

३. आंग्लमासस्य २६ दिनाङ्के 'सूर्योदयः' प्रकाशितो भवति। वारद्वयं संशोध्य ग्राहकेभ्यः स प्रेष्यते। अतस्तदलाभे पूर्वं स्वकीय-पत्रालयतस्तदनागमनस्य निर्णयं कृत्वैव १० दिनाङ्कानन्तरं वयं सूचनीयाः।

४. लेख-कवितादीनां भाषा संयता, सरला, शुद्धा च भाव्या। प्रकाशनीय-लेखादीनां स्पष्टाक्षरैः कर्गजस्यैकपृष्ठे एव लेखनमावश्यकम्। अस्वीकृता लेखादयः पोस्टविभागीय-चिटिका (टिकट) प्राप्त्यनन्तरं परावर्तयितुं शक्यन्ते।

५. सम्पादकीय-विषयसम्बद्धे पत्र-व्यवहारे 'सम्पादकः' इति, व्यवस्थाविभागीय-पत्रव्यवहारे च 'व्यवस्थापकः' इति च स्पष्टं लेखनीयम्। तेन उत्तरलाभे मुधा विलम्बो न भवेत्।

विज्ञापन-शुल्कम्

सूर्योदये सुरुचिपूर्णं विज्ञापनं प्रकाश्यते। एकवारं तस्य प्रकाशनस्य शुल्कक्रमश्च अधोलिखितोऽस्ति। सार्वकालिकस्य दीर्घकालिकस्य च विज्ञापनस्य कृते विशेष-सौविध्याय पत्र-व्यवहारः कार्यः।

साधारणस्य प्रतिपृष्ठस्य	१००) रु०	साधारणस्य प्रत्यर्धपृष्ठस्य	६०) रु०
साधारणस्य चतुर्थांशपृष्ठस्य	३५) रु०	आवरण-चतुर्थपृष्ठस्य	२००) रु०
आवरण-द्वितीय-तृतीयपृष्ठयोः	१५०) रु०	प्रथमावरणपृष्ठे विज्ञापनं न स्वीक्रियेत।	

—सङ्केतः—

'सूर्योदय'-कार्यालयः, भारतधर्म-महामण्डलम्, जगत्गंज, वाराणसी।

सम्पादकः, प्रकाशकः, मुद्रकश्च—गोविन्द नरहरि वजापुरकरः,
श्रीभारतधर्ममहामण्डलम्, जगतगंज, वाराणसी कैण्ट।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सूर्योदयः

भारतधर्ममहामण्डलस्य

मासिकं मुखपत्रम्

वर्षम् ४४

अङ्कः ८

सम्पादकः

गो० न० वैजापुरकरः

अगस्त

१९६८

वार्षिक-मूल्यम्

५) रूप्यकाणि

प्रत्यङ्क-मूल्यम्

अर्धरूप्यकम्

निवृत्तरागस्य गृहं तपोवनम्

दमो दानं यमो यस्तु प्रोक्तस्तत्त्वार्थदर्शिभिः ।
ब्राह्मणानां विशेषेण दमो धर्मः सनातनः ॥
दमस्तेजो वर्धयति पवित्रो दम उत्तमः ।
विपाप्मा तेन तेजस्वी पुरुषो दमतो भवेत् ॥
ये केचिन्नियमा लोके ये च धर्माः शुभक्रियाः ।
सर्वयज्ञफलं वापि दमस्तेभ्यो विशिष्यते ॥
न दानस्य क्रियाशुद्धिर्यथावदुपलभ्यते ।
ततो यज्ञस्ततो दानं दमादेव प्रवर्तते ॥
वनेऽपि दोषाः प्रभवन्ति रागिणां
गृहेऽपि पञ्चेन्द्रियनिग्रहस्तपः ।
अकुत्सिते कर्मणि यः प्रवर्तते
निवृत्तरागस्य गृहं तपोवनम् ॥

—पद्मपुराणे

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अनुक्रमः

प्रपानकः	पत्रपुटम्	परिवेषकः
कृष्णात्परं किमपि तत्त्वमहं न जाने	१८५	सङ्कलितम्
श्रीमहर्षि-ज्ञानानन्द-चरितम्	१८६	श्री विन्ध्येश्वरीप्रसाद शास्त्री
यौन-शिक्षाप्रस्तावो भारतीयसंस्कृतेः कृते श्वित्रम्	१८७	सम्पादकीयम् (अग्रलेखः)
वेदमूर्तिभ्यः श्रद्धाञ्जलिः	१८९	सम्पादकीया टिप्पणी
स्वर्गीयाः श्रीबालशास्त्रि हरिदासाः	१९०	,, ,,
चिरं जीवन्तु श्री हरिरामशास्त्रि शुक्लाः	१९०	,, ,,
श्री गणपति-लीलावतार-मञ्जरी	१९१	स्व० गङ्गाधर रामकृष्ण वरकले
बोधिवृक्षः—स्वातन्त्र्यबोधः	१९४	श्रीस्वामी रामतीर्थपादाः
रस-स्वरूप-विमर्शः भक्तिरसश्च	१९५	श्री करपात्रस्वामिनः
श्रीसूक्ति-मञ्जरी	१९७	श्री अमृतवाग्भवाचार्याः
(४) अद्वैतस्य ब्रह्मणो लक्षणाभावः	१९९	श्री जगन्नाथ श्रीधरशास्त्री पदे
(१) कर्मणो गहना गतिः	२०१	श्री रामदास कौण्डिन्यः
मानस-भारती	२०५	श्री जनार्दन गङ्गाधर रटाटे
क्षत्रपति-महाकाव्यम्	२०६	श्री उमाशंकर शर्मा त्रिपाठी

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सूर्योदयः

रागद्वेषनिशाटनं विधुरयन् मोहं तमो नाशयन्,
तामिस्रं जडवादकैरवकुलं ज्ञानत्विषा ग्लापयन् ।
विद्वत्कोकमशोकयन् नयसुधीरोलम्बुमुन्मीलयन्,
सञ्जातः सुमनोमनो मधुरयन् सर्वत्र सूर्योदयः ॥

४४ वर्षं] वाराणसी, श्रावणः २०२५ : अगस्त १९६८ ई० [८ अङ्कः

कृष्णात्परं किमपि तत्त्वमहं न जाने !

यावन्निरञ्जनमजं पुरुषं जरन्तं संचिन्तयामि सकले जगति स्फुरन्तम् ।
तावद्बलात् स्फुरति हन्त हृदन्तरे मे गोपस्य कोऽपि शिशुरञ्जनपुञ्जमञ्जुः ॥ १ ॥

क्लेशे क्रमात् पञ्चविधे क्षयं गते यद् ब्रह्मसौख्यं स्वयमस्फुरत् परम् ।
तद् व्यर्थयन् कः पुरतो नराकृतिः श्यामोऽयमामोदभरः प्रकाशते ॥ २ ॥

वंशीविभूषितकरान्नवनीरदाभात् पीताम्बरादरुणबिम्बफलाधरोष्ठात् ।
पूर्णेन्दुसुन्दरमुखादरविन्दनेत्रात् कृष्णात्परं किमपि तत्त्वमहं न जाने ॥ ३ ॥

ध्यानाभ्यासवशीकृतेन मनसा तन्निर्गुणं निष्क्रियं
ज्योतिः किञ्चन योगिनो यदि परं पश्यन्ति पश्यन्तु ते ।
अस्माकं तु तदेव लोचनचमत्काराय भूयाच्चिरं
कालिन्दीपुलिनेषु यत्किमपि तन्नीलं महो धावति ॥ ४ ॥

अद्वैतवीथीपथिकैरुपास्याः स्वाराज्यसिंहासनलब्धदीक्षाः ।
शठेन केनापि वयं हठेन दासीकृता गोपवधूविटेन ॥ ५ ॥

(सङ्कलितम्)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्री महर्षि-ज्ञानानन्द-चरितं महाकाव्यम्

— श्री विन्ध्येश्वरीप्रसादशास्त्री —

आरुह्य रम्यां शिविकां मुनीन्द्रः सुसज्जमासादितवान् प्रकोष्ठम् ।
शुभासनं माण्डलिकैः सदस्यैः सङ्ग्राहितोऽभूत् स महारणस्य ॥ ८१ ॥

८२. प्रपच्छ नैनं स्वकुलाभिमानी
सदस्यमेकं निजमित्यवोचत् ।
त्वं पृच्छ साधो क्व तवास्ति धाम
तदाज्ञयाऽसावकरोत् तथैव ॥

८३. नृपस्य यस्य व्यवहारमेतं
दृष्ट्वा यतीन्द्रः प्रससाद नान्तः ।
उत्थाय नैजासनतस्तदैव
प्राह स्म तेजस्विवरो नृपालम् ॥

८४. दृष्टो भवांस्ते परिषच्च दृष्टा
स्वं धाम गच्छामि महारणाऽद्य ।
उक्त्वेति वाचं नृवरं महर्षि-
र्निवर्तितोऽभून् निजवाससद्म ॥

८५. तेजस्वितां चाप्यतिनिःस्पृहत्वं
तद्देशिकेन्द्रस्य निरीक्ष्य भूपः ।
प्रभावितः सन् परितापमाप्त-
स्तद्दर्शनार्थी प्रबभूव भूयः ॥

८६. प्रस्थातुमिच्छुं निजराजधान्या
यतीन्द्रमेनं हि महारणोऽसौ ।
संप्रेष्य तूर्णं स्ववरान् सदस्यान्
न्यवारयत्तं सुविनीतभावः ॥

८७. अन्येद्युरेतस्य यतीश्वरस्य
संदर्शनेच्छु - र्जनताधिनाथः ।
पुनस्तथैनं शिविकाधिरूढं
समाह्वयत् तत्र निजप्रकोष्ठे ॥

८८. एकाकिनं तं विनयान्वितं च
सन्तापिनं पूर्वकृतापराधे ।
आशीर्भिरानर्च यतिः क्षितीन्द्रं
भवन्ति सन्तो हि दयार्द्रचित्ताः ॥

८९. महारणस्यास्य महाग्रहेण
सभक्ति - पूर्ण - व्यवहारकेण ।
मासा अनेके त्वरया महर्षे
र्व्यरंसिषुः संवसतश्च तत्र ॥

स हिन्दुसूर्योऽनुदितं महोन्द्रो यतीन्द्रपादाम्बुज - भृङ्गराजः ।
अभूत् प्रसन्नः परलोककर्तृ - योगादि - विज्ञानरसं निपीय ॥ ९० ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

(क्रमशः)

Digitized by Arya Samaj Foundation Chennai and eGangotri

यौन-शिक्षा-प्रस्तावो भारतीयसंस्कृतेः कृते शिवम्

वयमद्य जीवनस्यतं विषमयं विषयं परीक्षितुमत्र प्रस्तुताः स्मो यः प्राणिजाते अविशेषेण नैकै रूपैः संक्रमितो विलसति। को नाम जन्तुर्जगति कर्तुमकर्तुम् अन्यथा च कर्तुं समर्थेन मनसा परिचितो न स्यात्? शास्त्रकृद्भिस्तु श्लोकार्धेनैव तस्य निरतिशयं सामर्थ्यं समर्थितं मन एव मनुष्याणां कारणं बन्ध-मोक्षयोः इति वदद्भिः। बन्धं मोक्षञ्च विहाय जगतः किं नाम-रूपं यन्निरूपणपदवीमादधीत? सकलोऽपि वाग्विसर्गं उभाभ्यामेव समनुविद्धः। सहजत एव चपलतमस्य प्रमाथिनो बलवतो दृढतरस्य वायोरिव सुदुष्कर-निग्रहस्य मनस एतदप्रतिहतं सामर्थ्यं तज्जनुषाऽनङ्गेन न केवलं साङ्गं संरक्षितम्, प्रत्युत शतं सहस्रीकुर्वन् अक्षुण्णतामपि नीतम्। आसृष्टेरनुस्यूतस्य पाथ इव निम्ने पथि प्रसरणशीलस्य मनसोऽखण्डितं साम्राज्यं यदि केनापि सुप्रतिष्ठापितं चेत् स महामनस्वी मनोजनिरेवायं यो हि अपूरितः सन् क्रोधादि-कामरूपाणि बिभर्ति, यञ्च गीतागायको भगवान् एभिरक्षरैः स्मरति—

काम एषः क्रोध एष रजोगुणसमुद्भवः।
महाशनो महापाप्मा विद्ध्येनमिह वैरिणम्॥ इति।

यतोऽयं सहजो वैरी, अत एवाभियुक्तैराचार्यैः सर्वथाऽस्य निरोधाय नियन्त्रणाय तत्र तत्र नीतिधर्मशास्त्रादिषु बहु चर्चितम्। साग्रहञ्च सूचितं यदेतेन सर्वथा सावध नैर्भाव्यम्। अत एव आश्रम-बन्धनेन अस्य जनक एव सुबद्धः शास्त्रकृद्भिः, येन तत्कुलनन्दनः परं नियन्त्रितः स्यात्। विदुषां कृते वक्तव्यं नावशिष्यते यदस्य जनकोऽयं निमित्तोपादानात्मा। उपादाने च नियन्त्रिते तज्जनेर्नियन्त्रणस्य आवश्यकत्वात्। ब्रह्मचर्याश्रमे तु स्मरणादीनि अष्टौ द्वाराणि निरुध्य जनकोऽयं सुदृढं बद्ध्यते। ततः परतरे आश्रमे मनाग् उन्मोचितोऽपि कियत्कालमेव तया तिष्ठति। ततः परं वनेऽसौ प्रस्थाप्यते। उन्मोचनकालेऽपि परिवेषतो बहिस्तन्निर्गमनं सर्वथा निषिद्धमेव भवति। शास्त्रैः धर्मजमात्मजं जनयित्वा ततो विरतिः समुपदिश्यते, द्वितीयादिसन्ततिं 'कामजे'ति निरूपयद्भिश्च ततस्तस्य मतिः परावर्त्यते। तृतीये आश्रमे चिरभुक्तायां स्वप्रेयस्यामपि व्रतमित्रबुद्धिः पुनरसाधारणस्य धैर्यस्य पदम्। ततः परतराश्रमे तु सर्वकर्मन्यासं प्रतिपाद्य आशीविषस्य तस्य सर्वे एव दन्ता भञ्जिताः क्रियन्ते।

न केवलमयम् आश्रमकारासु बद्ध्यते। नैर्कर्यमनियमादि-साधनकशाघातैर्मुहुस्ताड्यतेऽपि। अन्ततश्च उन्मनीभावं नीयते। तदेव आत्मनश्चतुरशीतिलक्षयोनिषु पुनःपुनर्भ्रमणात्मको बन्धो निरुद्ध्यते, मोक्षद्वारञ्च अपावृतं भवति। तत्र च मोक्षलक्ष्मीमुपभुञ्जान आत्मारामः स्वे महिम्नि प्रतितिष्ठति।

साम्प्रतं वृत्तपत्रेषु बहुशश्चर्च्यत इदं यत् पूर्वोत्तर-माध्यमिकविद्यालयेषु बालक-बालिकाभ्यो यौनशिक्षणमावश्यकं न वा? धारेयम् प्रमेरिका-पश्चिमजर्मना-ब्रिटेनादि-देशेभ्यः प्रादुर्भूय भारतावनावपि प्रवहितुं प्रस्तुता। तत्र नैकैः पाश्चात्त्यपण्डितैर्विषयस्यास्य समर्थने विविधानि वैज्ञानिकानि मनोवैज्ञानिकानि च कारणानि प्रस्तावितानि। तेषामन्धश्रद्धैर्भारतीयैरपि सम्प्रति भूयसा वादोऽयमनुगृह्यते नैका आपदो हानयश्च पुरस्कृत्य। काशिके 'नयी तालीमा'-ख्ये मासिके पत्रेऽपि श्री तलत निसार अख्तरस्य एतद्विषयक एको लेखः प्रकाशितो यत्र लेखकेन

CC-0. Prof. Satya Vrat Shastri Collection. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भङ्ग्यन्तरेण यौनशिक्षणस्य समर्थनं कृतम्। एतद्विपरीतम् विगत-जुलाई-मासीयैकविंशति-दिनाङ्के 'आज'-पत्रस्य साप्ताहिके संस्करणे महामनीषिणां श्री चक्रवर्ति राजगोपालाचार्याणामेको लेखः प्रकाशितोऽस्ति। ते लेखस्य तस्य उपसंहारे लिखन्ति यत् 'सहशिक्षा, चलचित्राणि, आसनचित्राणि, चलचित्राणां सचित्रं समीक्षणम् (रिव्यू), सम्प्रति सुचर्चितो 'लूपः', अन्ये च गर्भनिरोधकाः कार्यक्रमाः (यत्र शासनेन बहुतरो व्ययः क्रियते) एवमादीनि मिलित्वा अस्माकं युवक-युवतीनां नैतिकादर्शं विलोपयितुमलम्। सर्वण्येतानि व्यर्थमेव यौनोत्कण्ठां समुज्जृम्भयन्ते। यतः सा स्वयमेव तत्र समर्था न साहाय्यान्तरमपेक्षते। अतोऽहं मन्ये यद् यौनशिक्षा-कार्यक्रमो न जातु समुद्भावित-स्वोद्देश्यपूर्तौ, प्रत्युत दुर्बलप्रवृत्तीनां समुद्दीपने एव सहायको भवेत्, याः किलाद्य सापेक्षमल्पपरिमाणा दृश्यन्ते, इति। विषयस्यास्य परीक्षणायैव अनुपदमुपक्रमेऽस्माभिस्तात्त्विकी भारतीय-जीवन-दृष्टिः समुपन्यस्ता।

दृशाऽनया विचार्यमाणे यौन-शिक्षण-चर्चैव मन्दाक्षमन्थरा कुतोऽपि तिरोदधति। यतो हि अस्माकं जीवने कामस्य न जातु अनुग्राहकताऽभिमता। प्रत्युत स वैरी यथाकथमपि निरोद्धव्य एवानुशिष्ट आचार्यैः। तं सर्वथाऽनुशासितुमेव गृहस्थाश्रमस्य प्रसरोऽस्माकं संस्कृतौ। नास्माभिर्भोगेन तत्तर्पणं कदाप्यभिमन्यते—

न जातु कामः कामानामुपभोगेन शाम्यति।
हविषा कृष्णवर्त्मेव भूय एवाभिवर्धते॥

इति स्मरणात्।

अन्यच्च — शिक्षणं तावद् विधिः। विधिश्च अज्ञातज्ञापकत्वरूपः। यौनज्ञानमिदं रागतः प्राप्तो विषय इति तदर्थं शिक्षणानपेक्षणात्। श्री राजगोपालाचार्याणां कथमनुसारे सम्प्रति शासनेन प्रचालितैः समनुगृहीतैर्वा पूर्वोक्ततत्तद्विषयैः यौनशिक्षायाः सहजत एव पूरणात् पृथक् विद्यालयेषु तच्छिक्षाया वैयर्थ्यात्।

किञ्च—पूर्वोत्तर-माध्यमिकविद्यालयेषु बालक-बालिकाभ्यो यौनशिक्षणमिदं दीयेत चेत्, नीरसं शाब्दिकं तत् कार्यकारि न भवेत्। प्रायोगिकतच्छिक्षादानाय तु कस्यापि शिक्षाविदः साहसं न भवेत्। दौर्भाग्यात् सति तादृशे साहसे प्रच्छन्नव्यभिचारगृहापरपर्यायेभ्यः शिक्षालयेभ्यस्तेभ्यः चिरमवताद् भारतं परमेश्वर, इत्येव वक्तव्यं भवेत्। यौनशास्त्रशिक्षणच्छद्मना निम्नतमस्य वाङ्मयस्य पूरः समापतितः स्यात्, यच्च तत्र तत्रान्विष्य शासनेन दण्डेन अहरहो नियम्यते। शाब्दिक-शिक्षादीक्षितेभ्यः प्रायोगिकज्ञानाय समुत्कण्ठाऽपि सर्वतोमुखी वितता भूत्वा नारकीयतायां नग्नताण्डवं विधास्यति। एवमादीनि नैकानि अनर्थजातानि प्रस्तावेनानेन प्रादुर्भविष्यन्ति। अतः प्रस्तावोऽयं मूलत एव कृन्तनमपेक्षते, इत्यस्माकं दृढा मतिः।

दृढमवधेयं यद् भारतेतराणां पाश्चात्यादिदेशानामन्या संस्कृतिः। अस्माकं पुनः संस्कृतिस्ततोऽतितरां भिन्ना। ते हि भोगप्रधानं जीवनं यापयन्ति। अस्माकं किल त्याग एव जीवनस्य परमो रसः। तेषामाचाराणां 'संस्कृति' - पदेन व्याहारोऽपि दुस्साहसमेव अस्माकं दृष्ट्या। सत्येवं श्रद्धाजडेनैव तेषां साध्वासाध्वाचाराणामनुकरणस्य आग्रहोऽस्माकं सर्वस्वनाशायैव कल्पेतेति कदापि न विस्मर्तव्यम्।

अथ शिक्षाया अस्या पक्षपातिनः प्रत्यवतिष्ठन्ते यत् यौनशिक्षाया अभावे कोमलमतीनां बालक-बालिकानां महती विनष्टिर्जायते। बाल्ये तेषु सहजत एव तत्तद्विषयस्य, जिज्ञासा, आविर्भवति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यौनविषयकजिज्ञासाविशेषाः (यथा—कुतोऽहं कथं समुत्पन्नः ? इत्याद्याः) मातुः पितुर्वा पुरतः समुपस्थापिताश्चेत् ते बालकान् ताडयन्ति समुपेक्षन्ते वा। फलतो भयात् सङ्कोचेन वाऽसमाहितानां तासां जिज्ञासानां समाधानं तैः स्ववयस्यैः कार्यते। तेषामपि अल्पस्वल्पज्ञानेन समाधानं तु दूरे तिष्ठति, अनपेक्षितानि व्यसनानि तेषु समाक्रामन्ति येन तेषां जीवनं विनष्टं भवति। अतो विद्यालयेषु यौन-शिक्षणमावश्यकमि'ति।

अत्रोच्यते—आपातरमणीयोऽप्ययं युक्तिविन्यासो न क्षोदक्षमः। 'यावत्यो वैधा अवैधा वा जिज्ञासाः, सर्वास्तथ्यप्रकटनेन प्रायोगिक-तज्ज्ञानाधानेन वा समाधेयाः' इत्यस्य आग्रहस्य अव्यावहारिकत्वात्, व्यभिचरितत्वाच्च। चौर्यं कथं करणीयम्, वधश्च कथमाचरणीयः ? इत्याद्याः बालकानां जिज्ञासाः केनापि न जातु समाधीयन्ते। तादृशी एवैतादृश्या जिज्ञासाया अपि स्थितिः। अन्यच्च, प्रकारान्तरेण प्रतिभया तत्रैव तत्समाधानं भवितुं शक्नोति। तदर्थं विषपरीक्षणात्मकोऽयमुपक्रमः कथमपि समर्थनीयतां न भजते। किञ्च—अस्माकं विपुलतरं पुराण-काव्यादिसाहित्यं वर्तते, यच्च तेभ्यः पाठ्यते। जैविकविज्ञानेन चिकित्साशास्त्रेण पुनर्ज्ञानमिदं तत्तद्विषयाध्येतृभिरासाद्यत एव। तत्र विषयानुरोधेन तस्यापवादत्वात्। एतादृश्यो जिज्ञासास्तैरेव सहजतः समाधीयन्ते। तदर्थं यौन-शिक्षणयत्नोऽयं—

अङ्के चेन्मधु विन्देत किमर्थं पर्वतं व्रजेत्।
इष्टस्यार्थस्य संसिद्धौ को विद्वान् यत्नमाचरेत्॥

इत्याभाणकस्यैव विषयः स्यात्। सत्येवं जिज्ञासाया अस्या असमाहित्या यदि चेत् ते कुपथगामिनो भवेयुस्तदा मातृपितृभ्यामभिभावकेन वा नूनं दण्ड्याः, न जात्वनुग्राह्या नाम। तदर्थं चेत्तो ऽनिवार्यतो यौन-शिक्षणं तादृशमेव भवेत् यादृशं देशविभाजनेन पाकिस्तानतोषणं त्रिविष्टप-दानेन चीनतोषणं वाऽस्माभिरद्यानुभूयते।

वस्तुतः प्रश्नोऽयं मूले प्रविदय विलोकनीयः। ये प्रस्तावममुं प्रस्तुवन्ति, ते आधुनिकपाश्चात्यमानसशास्त्रग्रहग्रहिलाः। तच्च मानसशास्त्रं मूलतो भारतीयसंस्कृतेर्विप्रतीपं गच्छति। भारतीयसंस्कृतिर्हि मनसो निरोधं नैकैः साधनैः कर्तुमुपदिशति चेत् पाश्चात्यमनोविज्ञानं मनसः साधारणेनापि नियहेण (तदभीष्टवस्तुनोऽनुपलब्धेः) मानसिक-ग्रन्थेरुद्भवं प्रतिपादयति, यच्च तदीयजीवनस्य कृते तद्दृष्टया महदभिशापायितं जायते। अस्यां स्थितौ पाश्चात्यमानसविज्ञानग्रहग्रहिलानां भ्रान्तबुद्धौ विषयविवेचनमिदं कथं पदं कुर्यात् ? तथापि भारतीयसंस्कृतिप्रणयिभिः एतादृशो हास्यास्पदः आत्मघाती च प्रस्तावः कथमपि न समर्थनीयः। वस्तुतोऽव्यावहारिकोऽयं प्रस्तावः कदापि मूर्तरूपतां यास्यतीत्येव संशयास्पदम्। कथञ्चन हठात् तादृशी दौर्भाग्यपूर्णस्थितिरागता चेद् भारतीयसंस्कृति-पक्षपातिभिः प्राणपणेन तस्य निवारणाय प्रयतनीयम्। यतो हि सा स्थितिर्लोकोत्तरस्य भारतीयदर्शनस्य संस्कृतेश्च कृते श्वित्रायितैव भवेदित्यस्माकं दृढं मतम्।

वेदमूर्तिभ्यः श्रद्धाञ्जलिः

जुलाईमासस्य अन्तिमे दिनाङ्के तत्त्वतो वेदमूर्तयः साहित्यवाचस्पतयः श्री श्रीपाद दामोदर सातवलेकर महाभागाः एकोत्तरशतवर्षवयसि नो विहाय त्रिदिवं गताः। मूलतश्चित्रकलाप्राध्यापकास्ते स्वीयेनालौकिकेन अध्यवसायेन वैदिकशिरोमणिषु मूर्धन्यतमतां गताः। आधुनिककाले वैदिक क्षेत्रे तेषां दायो नूनमनन्यसाधारणः। तेषां सदृशास्त एव। दीर्घतमस्य आयुषस्तैस्तत्त्वतः सार्थक्यं कृतम्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वैदिक-सम्प्रदायविशेषे दृढनिष्ठैरपि तैः समस्त-वैदिक-सम्प्रदायेषु असाधारणं सहिष्णुत्वं माध्यस्थं सामञ्जस्यं च स्वीयेन आदर्शव्यवहारेण प्रकटीकृतम्। वेदस्य कर्मयोगस्तेषु मूर्तिमानभवत्। वैदिक-वाङ्मयस्य अक्षरशस्ते समुद्धारकाः। नंके वेदाः सस्वराः शुद्धाश्च प्रकाशितास्तैः। प्रकाशितेषु वाङ्मयेषु दैवत-संहिता-प्रकाशन सर्वतोऽतिशेते यच्च अद्यापि समग्रतां न गतमित्यवगम्यते। आशास्यते च तेषां सहयोगिनः प्रदर्शितपथा तां पूरयिष्यन्ति। इत्थमविरतं नवनव-वाङ्मयप्रदानेन शतवर्षंजीविनामपि तेषामायुः वैदकीं विंशात्तारशतात्मिकां सीमां नासादितवतीति विचिन्त्य दूयतेऽस्माक चेतः। तेषां स्थानस्य पूर्तिर्नितरामसम्भविनी। वयं सश्रद्धं तेषां चरणयोः श्रद्धासुमाञ्जलिं समर्पयामः।

स्वर्गीयाः श्री बालशास्त्रि हरदासाः

मध्यप्रदेशे सुख्याताः नागपुराभिजनाः महामहोपाध्याय श्री बालशास्त्रि हरदास साहित्याचार्य महोदयाः स्वल्पतमे पञ्चाशद्वर्षवयसि मधुमेहरोगेण ग्रस्ता विगते ११ अगस्तदिनाङ्के अकस्मात् स्वर्गताः। तेषां कीर्तनं प्रवचनञ्च अतीव प्रभावशाली अभवत्। पाण्डित्यं सर्वतोमुखीनमासीत्। हिन्दूसंस्कृति-समुन्नायकेषु तेषां प्रमुखं स्थानमासीत्। सहैव तेषां जनप्रियता सर्वतोऽद्भुता आसीत्। सङ्घटनचातुरी अपि तथैव तेषु दृष्टा। एतादृशस्य धर्म-संस्कृतिसमुन्नायकस्य सुदृढस्तम्भस्य आकस्मिकं निधनं सर्वथा दुर्भाग्यपूर्णमस्माकं भारतीयसंस्कृतिप्रणयिनां कृते। ऋषिकल्पैः सनातनधर्माधारस्तम्भभूतैः स्वर्गीयैः श्री 'अप्रबुद्ध' महाभागैः बाल्यत एव विद्यया, आचरणेन नीत्या च शिक्षिता एते तेषां पदस्य समुल्लेख्यां पूर्तिं कर्तुं समर्थाः सक्षमाश्चासन्। एतादृशाणामयमाकस्मिको विरहः परं दौर्भाग्यम्। भगवन्तं प्रार्थयामो यत्तेषां परलोकगतस्यात्मनः शाश्वतिकीं शान्तिं दद्यात्, पारिवारिकेभ्यश्च कष्टसहनधैर्यं वितरत्विति।

चिरं जीवन्तु श्री हरिराम शुक्लाः

जुलाईमासस्य १७ दिनाङ्के वाराणसेये साङ्गवेद-विद्यालये वाराणसेय-संस्कृत-विश्वविद्यालयोपकुलपतीनां डाक्टर श्री गौरीनाथ शास्त्रिणामाध्यक्षे न्यायसार्वभौमानां श्री हरिरामशास्त्रि शुक्ल महाभागानां षष्ठ्यब्दपूर्तिमहोत्सवो महता पेशलया भावनया समायोजिताऽभवत्। एतादृशाः समारोहाहास्तु बहवो जायन्ते। भौतिकैश्वर्यादिदृष्ट्या इतोऽपि महान्त उत्सवा भवन्ति। तथापि उत्सवेऽस्मिन् सर्वथा हार्दिकता पदे पदे दृष्टि गता। सर्वैः समुपस्थितैस्तेषां समकक्षीयैः विद्वद्भिः गुरुकोटिगतैश्च मनीषिभिः श्री शुक्लमहोदयानां सर्वतोमुखीनबंधुत्यस्य विरलदृष्ट-सारल्यस्य च स्वानुभूतिसमलङ्कृतं यावद् वर्णनं कृतम्, तत्र लेशतोऽप्यतिशयोक्तिर्नासीत्। संस्कृतपण्डितसमाजः पद्मभूषण-पण्डितराज-श्री राजेश्वरशास्त्रि द्राविडपादानां सर्वथा अधमर्णो यैरेतादृशं शिष्यरत्नं समाजालङ्कारणाय उपायनीकृतम्। सर्वशास्त्रेषु ग्रन्थग्रन्थिविभेदनस्य सुशिक्षितैः शास्त्रार्थाटवीविहरण-पञ्चाननाः सन्तोऽप्येते परमसरलाः असाधारणगुरुभक्ताः शुक्लपादा नूनमस्माकं विद्वत्समाजस्य शिरोभूषणम्। 'सूर्योदयोऽपि शुभावसरेऽस्मिन् तेषामभिनन्दनं कुर्वन् भगवन्तं तेषामारोग्यम् चिरायुष्ट्वं च कामयते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्री गणपति-लीलावतार-मञ्जरी

— श्री गङ्गाधर रामकृष्ण वरकले शास्त्रिणः —

पञ्चत्रिंशदुत्तरद्विशत (२३५) संवत्सरेभ्यः पूर्वं काशिकेन अद्वैतसिद्धान्त-भक्तिप्रसृतसंसृति-विभक्तस्य श्रीमद्भगवत्कथासंकथन - सुधारसपानपरिपूतचित्तस्य समस्तपुराणशास्त्रान्तर्गत-सदसदर्थज्ञानवित्तस्य वरकलोपाह्व श्रीमद् रामकृष्णशास्त्रिणो ज्येष्ठतनयेन श्री गङ्गाधरशास्त्रिणा संग्रथितेयं श्रीगणपति-लीलावतार-मञ्जरी १९२६ मिते वैक्रमे वत्सरे वटोदर पत्तनीय-विद्वद्भूषणाख्ये लीथोमुद्रणालये प्रकाशिता संप्रति सर्वथा सुदुर्लभा। मञ्जर्या अस्या मोदमदकरः परिमलो नूनं सहृदयानां 'सूर्योदय'-पाठकानामाप्यायनाय प्रभवेदिति दृढमाशास्महे। 'गणेशोत्सवा'ख्य-राष्ट्रियमहोत्सवप्रसङ्गेन मञ्जर्याऽनया एतादृशानामेव सुदुर्लभतराणां साहित्यसर्वस्वायमानानां रत्नानां प्रकाशनोपक्रमः पाठकैर्नूनं समर्थनीयो भवेदि इति विश्वसिमः।—सम्पादकः।

श्रीमन्तं मूर्तिमन्तं त्रिभिरसुखवरै-
रक्षरैर्धार्यमाणं
त्रैविध्यं नैकविध्यं विविधशुभददच्-
छौण्डया शुण्डया च।
शङ्के शूर्पाकृतिभ्यां नयनविधियुतं
सन्दधन्तं श्रुतिभ्या-
मोङ्कारं ब्रह्मदीक्षागुरुमिह परमं
प्रापयन्तं नमामि ॥ १ ॥

व्योम-क्ष्माऽऽधारभूतं चलमपि लपनं
लम्बमानं किरीट-
व्याजेना-ऽऽमौल्यरत्नग्रह-रचितनभः-
कान्ततां तां विधत्ते।
यत् त्रैलोक्ये सदाऽऽसेचनकमिति जनैः
सादरं दृश्यमानं
मानं दानं विगृह्णच्छशिशकल-लसद्-
भालमर्धं करोतु ॥ २ ॥

श्रीमद्भिर्बाहुभिः स्वैश्चतसृषु वनिता
सारभूतासु दिक्षु
स्मारक्रीडां वितन्वन्निजमनसि सदा
सिद्धिबुद्धी विदित्वा।
जाते ते केलिकाले विनिमयमनिशं
वामरो-ल्लासयन्त्यौ
हर्षामर्षौ वमन्त्यौ विजयति विमृशन्
षड्भुजैः किं स्पृशंस्ते ॥ ३ ॥

विश्वात्मा नामधेयं घटत इह यथा-
ऽन्यत्र नैतद् यथार्थं
व्यासः स्वार्थार्थिसर्वस्तुतिनिचयपरा-
धीनचित्तः सदा स्यात्।
यस्माल्लम्बोदरीयं सकलमुनिवरै-
र्भण्यते सत्यमेतन्
मन्यन्तां सर्ववर्या बृहदुदरतया
निश्रितं विश्वमस्मिन् ॥ ४ ॥

बाल्ये बालार्क-शीतद्युति-रुचिरुचौ
चन्द्रभृत्-कार्तिकेयौ
कान्तौ लीलासहिष्णू शतधिगिति
मिथो भर्त्सयन्तौ बलेन।
कृत्वा तं जामदग्न्यं प्रतिभुवमु धनु-
र्वेद-तत्त्वार्थ-लिप्सु
ग्लाह्यं सम्पादयन्तौ भुजगभुजि वृके
मे वस त्वं वसामि ॥ ५ ॥

एवं कौटिल्यमिश्रं श्रवणकटुपटु-
भ्रातृ-सम्भाषितं तत्
साकतं सोऽधिगम्य स्वकटिगतमहा-
खड्गमाबद्धं नियम्य।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आनाभेः कण्ठदेशे नवगुणितलसद्-
ब्रह्मसूत्रं मयूरो
मामादायैव गच्छेद् गगनग-गतिगो-
मन्यते मान्यजन्यः ॥ ६ ॥

चञ्चच्चञ्चद्वग्र-लग्नावलित-गलमिल-
द्वर्तुलाकारमुक्ता-
मालाजाल-छलेन प्रकटसमशची-
कान्तचापं मयूरम् ।
आरोहत्याखुवाहे सतत-रितमसत्
पक्षतिभ्यां जवेनो-
पातेप्सुं भालचन्द्रः किमु वृहदुदरो
दुर्बलं तं चकार ॥ ७ ॥

स्वच्छैश्चीनांशुकैस्तैः सुकृत-परिकरः
कार्तिकेयोऽपि कोपी
यावद् वर्षान्ति-मेघच्छवि-रुचिररुचिं
मूषकं गम्यमानः ।
तस्मिन्कैलासगुम्फं विशति सति
महासेनमालोच्य लोलं
लोलम्बव्याप्तगण्डो गणपतिरहसत्
तेन लम्बोदरः किम् ॥ ८ ॥

जानेऽहं सिद्धिजाने तदमलचरणं
शोणपद्मैकशोभा-
जिच्चिह्नानीति मीनाङ्कुशकुलिश-
मुखान्यत्र धन्यानि भान्ति ।
सेवासन्धानसङ्ख्या-ननुभवितुमतो-
ऽर्हाणि जातानि तानि
श्रेयोमुक्तावलीनां पदकमिव सतां
हृत्सरोजेऽस्तु हंसः ॥ ९ ॥

लावण्यस्तोम-सोमं सुषमसुमसमै-
रङ्गकै-र्भर्त्सयन्त्यौ
नेत्राश्यामायताभ्यां मलयचलमरुन्-
मन्दचाञ्चल्यमाञ्जि ।
नील-व्जानां दलानां निषधपतिरति-
प्रीतिकान्ता-दृगब्ज-
श्रोणीश्रीमत्कुलानि स्वपतिमवदतां
देहिनौ मन्त्रमद्य ॥ १० ॥

एवं श्रीसिद्धिबुद्धी मनुपरमनसौ
ज्ञातवान् वामवक्त्रो-
वक्रोक्त्या प्रेमवाचा प्रियतममवदत्-
सिद्धवाचां निधानः ।
मां मन्त्रेणैव जेतुं मन इति युवयो-
रिच्छति व्यक्तमेतन्-
मेने तेनैव ते तत् पटुतमवचसा
स्वीकृतं ज्ञातवत्यौ ॥ ११ ॥

साङ्गं गाङ्गं कबन्धं मसृणघुसृणयुग्-
लेपनीयं ललाटे
गन्धाढ्यं रक्तगन्धं मृगमदमदितं
गौरदूर्वाङ्कुराश्च ।
एतैर्द्रव्यैर्नवैः षड्भवनवकुसुमैः
पूर्ण-सौवर्ण-पात्रं
नानारत्नप्ररोहैः खचितमिव किम-
प्यंशुमद् बिम्बमेतत् ॥ १२ ॥

एते पुष्पापदेशात् सवितृविधुमुखाः
किं ग्रहाः साग्रहास्तत्
पात्रं सम्प्राप्तवन्तश्चरणसरसिजे-
स्वर्पितुं मूर्तिमद्य ।
अन्यत्प्रेमातिमात्रैः स्वकरकृतमहा-
पूपमुख्यो-पहारै-
रन्यैरन्नैश्चतुर्भि - विविधिरसभरैः
श्चूतमुख्यैः फलैश्च ॥ १३ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एभिः सम्भारवारैरपि च विधिमुखै-
र्देवमुख्यै - रनेकै-
र्गन्धवै - र्गानसप्तस्वर - रवचतुरै -
श्चारुरूपाभिराभिः ।
नृत्यन्तीभिः समस्ताभिमुखमनुपमं
लोल - नेत्रान्तपातैः
कर्षन्तीभिः सुराणां हृदयशतदला-
न्यप्सरोभिः सभाभिः ॥१४॥

एवं स्वस्थैः सुपूर्णा तुहिनकरशिला-
चारु - शाकल्य-चित्र-
प्रायप्रासादगुर्वी सकलशिवरवा-
पूर्णमुर्वी बभूव ।
दिङ्मध्यं तेन तूर्णं किमु चपलकरं
किञ्च चाञ्चल्यकर्णं
शङ्के दिग्दन्तिवृन्दं दशशतवदनो
निम्नभोगो बभूव ॥१५॥

तत्काले सन्मुहूर्ते पतिपरिचरणं
कर्तु-मेकाग्रचित्ते
श्रीमत्यौ सिद्धिबुद्धी समुचितविधिना-
ऽऽरभ्यमाणे विधाने ।
भूषाभूता भुजङ्गाः करवलयमिषात्
संमिलन्तो विचित्रा
अन्योन्यं दर्शयन्त्यः स्वगुणमिव मणि
किं जिगीषामिषेण ॥१६॥

तस्मिन्नर्चाविधाने प्रभुचरणसरो-
जार्चना-ऽसक्तचित्ते
जाते लोके च लोकोत्तरपरपुरुषा-
काररूपाय तुभ्यम् ।
किं देयं किं न देयं सकलमिह परा-
धीनमस्तीत्युभे ते
देवं सम्प्रार्थ्य भक्तिं परमदृढतरां
दक्षिणां कल्पयन्त्यौ ॥१७॥

यद्भक्तिर्मानवानां कलिकलुषकला-
लेशशेषं निहन्त्री
पारावारेन्दु - लोकाखिल - परमसुखा-
ऽऽभोगभोगान् प्रदात्री ।
शान्ते जीवे प्रशान्तं महदपि सुतनु
ब्रह्म तत्प्रापयित्री
याचे वाचालवाचा भवविषयवतां
देहि तां देवदेव ॥१८॥

जाते पूजावसाने सकलजनमन-
श्चिन्तितार्थं - प्रदाता
श्रीमत्योरर्चनेन स्वमनसि नितरां
भक्तिभावेन मत्तः ।
कर्णे कल्याणकाले ददति सति मनुं
प्रोचतुः स्त्रीस्वभावाद्
देवं देवेन्द्रदेवं वितरतु तरसा
मा भवान् मन्त्रमादौ ॥१९॥

श्रुत्वा तद्वाक्यमीशः शिवलवसमयः
किं गमिष्यत्यतस्तद्-
भक्तिप्रेमाशयेन द्विवदन इति किं
प्रावीरासीद् गणेशः ।
तत्काले देववर्या अपि समसमयं
कर्णयो - र्मन्त्रवर्णं
प्रादादानन्दपूर्णं जय - जयमुदयं
शब्दमेते प्रकुर्युः ॥२१॥

नानाकारस्वरूपं वयममितकृतिं
निष्कृतिं सत्कृतिं ते
स्रष्टारं सत्त्वभावैर्जगदिति रजसा —
पालयन्तं तमोभिः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बोधिवृक्षः---स्वातन्त्र्यबोधः

अहमेव भारतं वर्षम्। अहमेव हिन्दुस्थानम्। भारतभूमिरियं मे शरीरम्। कुमारी-अन्तरीपं मे चरणौ। हिमगिरिकिरीटश्च मे शिरः। ममैव शिरःस्थितान् जटजूटात् गङ्गायाः पावनी धारा प्रवहति। तस्यैव शिरोभागतो ब्रह्मपुत्रनदी सिन्धुनदी च उच्छ्वसतः। विन्ध्याचलस्य विस्तृता मेखला मे किङ्किणी। ममैकः पादः गारो-पर्वतमण्डल-तटम्, अपरश्च मलाबारः। अहमेव सकलं भारतवर्षम्। तस्य पूर्व-पश्चिमश्रेण्य एव मे भुजाः, याश्च प्रसार्य अहं समस्तां मानवजातिं दृढमालिङ्गितुं समुत्कण्ठितः। मम प्रेमा विश्वव्यापी। अहो, कियदद्भुतं मे शरीरम्। तद्धि निर्निमेषम् अनन्तं पश्यन् तिष्ठति। किन्तु ततोऽपि अद्भुततेयं यत् तस्मिन् विराजमान आत्मा चराचरस्याऽऽत्मा। अत एव यदाऽहं प्रचलामि, अनुभवामि यद् भारतमेव प्रचलति। यदाऽहं वच्मि, अनुभवामि भारतस्यैव वाणी गुञ्जतीति। यदाऽहं श्वसिमि, ज्ञायते नूनं भारतमातैव श्वसिति। अहमेव भारतम्। अहमेव शङ्करः। अहमेव शिवः। इयमेव राष्ट्रभक्तेः सर्वोच्चतमा भूमिका। अयमेव चास्ति व्यावहारिको वेदान्तः।

—श्री स्वामी रामतीर्थपादाः

हर्तारं निर्विकारं सकलजनमनो
वागवाच्यं निरीहं
स्वेच्छाचारं कथं त्वां निगदितुमधुना
प्रत्यभिज्ञा भवामः ॥२२॥
एवं केवलमब्जभू - प्रभृतयो
भक्त्यैव भृत्या इव
स्तोतुं त्वामसमर्थमानमतयः
सर्वे समर्थाः सुराः।
ईशस्तत्कथमग्रिमो जडधिया
मध्ये यमात्मानमा-
ब्रह्मस्तम्ब - चराचरात्मक-विभुं
स्यामज्ञमज्ञो जनः ॥२३॥

सोऽपि त्वां शरणं समस्तभरणं-
कारुण्य - रत्नाकरं
भक्ताभीष्टकरं करैः सृणिसरो-
जापूपपाशान् धरम्।
यं वेदैः सशरीरकैरविदितं
भक्त्यैव दृग्गोचरं
देवं देववरं परं ततकरं
वव्रे वरं किङ्करः ॥२४॥
पुनः पुनरिदं त्विदं बत शरीरमेतादृशं
विशत्कलुषनीरधिं विषयरत्नमासादितुम्।
अतः सकलवासना-प्रचुरमेव-मेतन्मनो
मनोज्ञपदपङ्कजे व्रजतु जातु मा भूत् प्रभो ॥२५॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रस-स्वरूप-विमर्शः, भक्तिरसश्च

—पूज्य श्री करपात्रस्वामिनः—

शुद्धाद्वैतरीत्याऽपि—बुद्धिवृत्तिः संस्काराधानाद्यर्थं जन्यते। सा वृत्तिः बुद्धेर्न तत्त्वान्तरम्। नाप्यन्तःकरणपरिणामान्तरम्। किन्तु बुद्धितत्त्वस्य काल-क्षुब्धसत्त्वादिगुणकृतः अवस्थाविशेष एव। न च तस्य अवस्थाविशेषत्वे निर्गमाभावेन विषयासंसर्गात् तदाकारकत्वं वृत्तेर्दुर्घटमिति शङ्क्यम्; मायागुणस्य रजसश्चञ्चलत्वेन विक्षेपकत्वेन च दर्पणे मुखस्येव नेत्रगोलकेऽपि बाह्यविषयाकारसमर्पणे तदाकारस्य सुघटत्वात् स एव मायिकाकारो नयनकिरणेषु नेत्रमुद्रणे प्रत्यावृत्तेषु गोलकान्तरादनुभूयते। एवमिन्द्रियान्तरेऽपि वृत्तिर्ज्ञातव्या। यद्यपि सा नानुभूयते; तथापि तादृशसंस्काराधानात् निश्चीयते।

एकादशाऽऽसन् मनसो हि वृत्तय
आकूतयः पञ्च धियोऽभिमानः।
मात्राणि कर्माणि पुरं च तासां
वदन्ति हैकादश वीर भूमिः॥

इति जडभरत-वचनाच्च। भूमिषु पञ्चानां ज्ञेयत्वेन विषयत्वम्। ततः पञ्चानां कार्यत्वेन पुरस्य स्वीकार्यत्वेन ज्ञेयम्। संस्कारस्तु जातस्य ज्ञानस्य सूक्ष्मावस्थेत्युक्तम्। बुद्धिश्च कर्मज्ञानेन्द्रियानुग्राहिका। सा च वृत्तिद्वारैव अनुगृह्णातीति इन्द्रियजन्यस्य विशिष्टज्ञानस्य नानाभेदाः। अतो बुद्धेः अवस्थाविशेष एव वृत्तिरिति निश्चयः।

ननु इन्द्रियार्थसम्प्रयोगानन्तरं सम्प्रयुक्तार्थाकारसमानो बुद्धौ आकारो जायत इति प्रमा भवतु। भ्रमादिकं तु न भविष्यति, शुक्त्यादौ तद्विरुद्धस्य रजताद्याकारस्य अभावेन बुद्धौ मायाकृततत्समर्पणायोगात् अन्यथाख्यातिप्रभृतीनां चानङ्गीकारादिति चेन्न। स्वभावगुणानुग्रहादेव तस्यापि सिद्धेः। पूर्वोत्पन्नस्य रजताद्याकारक-संस्कारस्य रजसा बहिःक्षेपे सम्प्रयुक्तार्थाकारस्य तमसावरणे च भ्रमस्य सुखेन वक्तुं शक्यत्वात्।

एवं नानविधाद् गुणक्षोभज-वृत्तिभेदादेव अन्येऽपि ज्ञानभेदा उन्नेयाः। यदा विषयेन्द्रियसंयोगात् निर्विकल्पकं तदेन्द्रियदेशे बुद्धेर्वृत्तिः। तया इन्द्रियानुग्रहे सविकल्पकम्, अननुग्रहे तु न। वृत्त्यन्तरेण पूर्ववृत्तेर्नाशे सविकल्पकस्य संस्काररूपेणाऽवस्थानम्। तस्योद्बोधकैः उद्बोधे मायोपस्थापितमायिकार्थसहकृता स्मृतिः, राजसै रागादिभिः संस्कारप्राबल्ये मायया विषयाकारावरणपूर्वकं मायिकपदार्थसहितस्य ज्ञापनस्य गोलकाग्रभागे क्षेपे भ्रमः। किञ्चिदावरणे संशयः। सत्त्वेन सर्वथाऽऽवरणभङ्गे विक्षेपस्यापि निवृत्तौ विशेषदर्शनमित्यादिवृत्तिविषया तु वृत्तिर्न भवतीत्यनुभवानुसारेणैव निश्चीयते।

न च वृत्तीनां गुणजन्यत्वे मानाभावः शङ्क्यः;

जाग्रत् स्वप्नः सुषुप्तञ्च गुणतो बुद्धिवृत्तयः।
तासां विलक्षणो जीवः साक्षित्वेन विनिश्चितः॥

इत्येकादशे हंसवाक्यात् संशयादिप्रवृत्तीनां तदवान्तरभेदत्वेन तदनतिरेकात्।

यत्तु—"जाग्रद् भोगप्रद-कर्मोद्बोधे जागरणं तदुपरमे निद्रया स्वप्नसुषुप्ती" इति मतम्; तत्रापि कर्मोद्बोधोपरमहेतोः अवश्यवाच्यत्वेन लाघवात् ईश्वरेच्छानुगृहीतानां परस्परोपमर्दकारिस्वभावानां गुणानामेव अवस्थाहेतुत्वे साधीयः। तस्माद् बुद्धि-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गुणजन्या तदवस्था वृत्तिः। सा यदा अनुगृह्णाति तदा वक्ष्यमाणप्रक्रियया सविकल्पकं ज्ञानं जन्यते। तथा हि—

अधिष्ठानं तथा कर्ता करणञ्च पृथग्विधम्।
विविधाश्च पृथक्चेष्टा दैवं चैवात्र पञ्चमम्॥
शरीरवाङ्मनोभिर्यत् कर्म प्रारभते नरः।
न्याय्यं वा विपरीतं वा पञ्चैते तस्य हेतवः॥

इति गीतायां कार्यमात्रं प्रति पञ्च हेतव उक्ताः। तत्र अधिष्ठानं शरीरम्, कर्ता जीवः, करणं बाह्याभ्यन्तरम्, चेष्टाः प्राणादिवायुकर्माणि, दैवं कालकर्म भगवदिच्छादिश्च।

ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति।
भ्रामयन् सर्वभूतानि यन्त्रारूढानि मायया॥

इति वाक्यादन्तर्यामी वा दैवपदवाच्यः। देवानां समूहो दैवमिति तत्तदिन्द्रियाधिष्ठातारो वा। एवं सति ज्ञानजनकमनःसंयोगादि-हेतुभूतक्रियायामपि एतान्येव कारणानि।

तत्रायं क्रमः—दैवानुकूल्येन अन्तर्यामिणा मनस्तत्तत्कार्यार्थं प्रेर्यते। तच्च इन्द्रियप्रेरणाय तत्तदिन्द्रियेण संसृज्यते। तत्र तत्तदिन्द्रिय-देवतानुकूल्ये विषयसंसृष्टैरिन्द्रियैः स्वावच्छिन्ने मनसि पूर्वं निर्विकल्पकमुत्पाद्यते। तदिन्द्रियदेशे बुद्धेर्वृत्तिः। ततो बुद्ध्याऽपि वृत्तिद्वारा तदनुग्रहे सविकल्पकं भवति। चाक्षुषे तु नयनकिरणा विषयपर्यन्तं गच्छन्ति। इन्द्रियान्तरे तु किरणाभावात् इन्द्रियेण सह विषयं मनः प्राप्नोति। तदा क्रमेण सहैव वा निर्विकल्पकं सविकल्पकञ्च तत्तदिन्द्रियसंसृष्टे मनसि उत्पद्यते। ज्ञानद्वयेऽपि विषयेन्द्रियस्पर्शादिकं व्यापारः। तत्र सविकल्पकं प्रमेयानन्त्यादनन्तविधं भवति। तत्रापि कारणान्तरसमवधानेन संशय-विपर्यास-निश्चय-स्मृतिभेदा जायन्ति भवन्ति। यथासम्भवं स्वप्नेऽपि ते सविकल्पकजन्य.हानोपादानबुद्धेस्तु विशेषः।

इन्द्रियैर्विषयाकृष्टैराक्षिप्तं ध्यायतां मनः।
चेतनां हरते बुद्धेः स्तम्भस्तोयमिव ह्रदम्॥

इति वाक्याद् विषयैरिन्द्रियाकर्षः, ततस्तैर्मनसः। तच्च अशुद्धमिति तत्र कामोत्पत्तौ उपादानबुद्धिः। तादृशे मनसि द्वेषोत्पत्तौ तु हानबुद्धिः।

न चेदमप्रयोजकम्; कामिनी-कुचकुम्भदर्शनादौ चक्षुषः, शीतादिकालेषु ऊष्मादिना त्वचः, रागादियुक्तगीतेन श्रवणस्य, चन्दनादिगन्धेन घ्राणस्य भक्षितस्यापि दध्यादेः पुनरास्वादनेन रसनायाः, तैश्च मनस आकर्षणस्य अनुभवसिद्धत्वात्। मनसश्च रूपद्वयं बाह्यमान्तरं चेति तृतीयस्कन्धे तत्त्वस्तुतौ 'परहृतान्तर्मनसः' इत्यस्य सुबोधिन्यां स्थितम्। तत्र आन्तरं येन विषयेण इन्द्रियद्वाराऽऽकृष्यते तद्विषयिणी हानोपादानबुद्धिर्भवति। येन तु नाकृष्यते, तद्विषयिणी उपेक्षाबुद्धिरिति युगपन्नानाबुद्धिसत्त्वम्। न च तत्र वेगाद्यौगपद्याभिमान एवेति वाच्यम्; एकाग्रदशायां पुस्तकदर्शने युगपन्नानाक्षरापेक्षास्थले वेगाङ्गीकारस्य अनुभवविरुद्धत्वात्। अतो रूपद्वयमेव युक्तमिति। यदा मनसोऽनाकर्षः, तदा उपेक्षाबुद्धिः। अत एव तस्या न स्थिरत्वम्, अभ्यासाद्यभावात्। इदञ्च सर्वं ज्ञानमन्तःकरणाद्यध्यासात् जीवात्मा स्वस्मिन्नभिमन्यते।

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्री सूक्ति-मञ्जरी

—सर्वतन्त्रस्वतन्त्राः श्री अमृतवाग्भवाचार्यपादाः—

गताङ्केऽस्या आदिमो भागः प्रकाशितः । पश्चिमश्चायं भाग उपायनीक्रियते सहृदयपाठकेभ्यः । सं०

— २ —

पानीय-बुद्बुद इवैव चिरायुरेष
धाताऽपि लोमशमुनेः पुरतो विभाति ।
प्रत्येकलोम-विलयावसरे मुनेस्तु
धाताऽन्य एव भवतीति पुराणगाथा ॥ २९ ॥

वीरावली हृदयसारस-जागरायै
मार्तण्डभैरवपु-र्जगति प्रसिद्धा ।
सम्प्रेरयेदखिल-राष्ट्रजनाऽवनाय
सम्पादनाय विजयादशमी जनस्य ॥ ३० ॥

राकाशशाङ्क-शरदङ्क-मृगाङ्कमेत्य
स्वाध्यायमातनुत मा कुरुत प्रमादम् ।
ज्योत्स्नोत्सवोऽस्य रचयेत् कमपि प्रकाशं
श्रीराष्ट्रजीवनपथं जनजागरायै ॥ ३१ ॥

दीनावनीय - दयनीयदशा - दिशाना-
मालोचनाय कमनीयदृशं दिशन्ती ।
श्रीपूजनाय निजराष्ट्र-समृद्धिवृद्ध्यै
दीपावली दिशतु शाश्वतिकं प्रकाशम् ॥ ३२ ॥

वेदान्तशान्तमतयो यतयो वनान्ते
सेवन्त एव भगवन्तमनन्तवीर्यम् ।
हेमन्ततान्तमनसां गृहिणामथोऽद्य
हेमन्त हन्त भविताऽसि कृतोपकारः ॥ ३३ ॥

जगति वरकलानां धीविकासोज्ज्वलानां
महति जनिमितानामन्ववाये कवीनाम् ।
सुकृतिपदमवाप्तुं भावयन् भाललिप्तां
नमति चरणधूलिं श्रीगुरुणां सुतोऽयम् ॥३४॥

कलितकलिकलानां कल्पिताङ्कं खलानां
कलयत कविलोकाः कौतुकं कीदृगेतत् ।
कविकुलकलिताभिः कीर्तनीयां कलाभिः
कटु कथयति काकः काकलीं कोकिलानाम् ॥३५॥

सरलसरलान्पारं यातुं जनास्तरणिं श्रिताँ-
स्तरललहरेः सिन्धोर्मध्ये सुधीवर एव तान् ।
प्रथितविनयो विघ्नव्यूहोऽसौ निमज्जयते यदा
जगति लभतां को वाऽकीर्तिं वदन्तु बुधास्तदा ॥३६॥

पिबन्तो धूम्रौघान्सुखकरतमालावलिभवान्
हसन्तः सन्तोषाद् युवतिगणगोष्ठीषु चतुराः ।
भजन्ते केदारोद्गत - मतुलमाकण्ठममृतं
सदा सन्तो यस्यां जगति वसतिः सा विजयताम्॥३७

यया ऽऽगर्भाद्गुप्तः सकलपरिपोषं समगमः
कुवाणीं तां काकीं तृणमिव वराकीं त्वमजहाः ।
इदानीं किं ब्रूमः परमचतुरं त्वां परभृतः
स्ववाणीं निन्दन्तं विशदवकवागात्तहृदयम् ॥३८॥

तरिर्जीर्णोऽत्यन्तं सरिदपि गभीरा भ्रमवती
शिशुर्दाशो गोपः कतिपयकराढ्यो दिनकरः ।
घनश्यामा रात्रिर्युवतिरसहाया कुलवधू-
रहं पारे नद्याः शिव शिव कथं यामि शरणम् ।३९।

यदि स्वात्मानन्दाऽभिनवरमणीया कृतिरियं
बुधाभासं लोकं न रमयति तच्चित्रमिह किम् ।
यथा चेतो यूनां कलितललिताऽऽकल्पललना
समाहर्तुं तद्वत्प्रभवति शिशूनामपि किमु ॥ ४०॥

शिव ब्रह्मन्नात्मन्सकलमपि विश्वं स्वकलया
जनुःसन्ताऽपायान्हृदि महति नित्यं प्रणयते ।
प्रसन्न! स्वच्छन्द! स्वरमणकलाकोविद! गुरो
नमो मह्यं कस्मैचन हृदयनाथाय भवते ॥ ४१ ॥

निजां पितृपरम्परापरिचितां सतीं संस्कृतिं
नरा वलितबुद्धयो दुरवहेलयोत्सार्य ये ।
विदन्ति महतीं समुन्नतिमहो स्वकं ते शिरो
निकृत्य ननु मन्वतां प्रचुरमायुरासादितम् ॥४२॥

CC-0. Prof. Satya Vrat Shastri Collection. Digitized by eGangotri. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सुतोऽपि भजते मुदा पतिपदं स्वमातुर्यदा
सगौरवमलं मदात्स्वमवगत्य विश्वं सदा ।
भवेद्यदि वदावदा नयनदीयमालम्बदा
वदन्तु ऋतमापदापततु किं न राष्ट्रे तदा ॥४३॥

पदं समुपलभ्य ये जगति मानवं दानवीं
श्रयन्ति पदवीं नरा निजहृषीकवेगोद्धताः ।
शिवाय विभवाय वा भवति किन्नु तेषां नयो
वदन्तु सकला जनाः स्वशपथेन पृथ्वीं श्रिताः॥४४॥

आपादान्तं पतिविरहजं पाण्डिमानं दधानां
कान्ते पत्यौ मतिमति गते राजहंसि प्रवासम् ।
चञ्चूं शोणां चरणयुगलं चाऽपि शोणं वहन्ती
सन्देहं त्वं हर सखि कथं शंसितुं शक्नुया माम् ४५

तन्वी श्वेताऽधरकरपदा पाण्डुविच्छायवर्णा
कान्ता काचित्पतिविरहिणी राजहंसीं ब्रवीति ।
चञ्चूं शुक्लां चरणयुगलं चापि कृत्वाथ शुक्लं
सन्देशं मे नय पतिमये दैवविश्लेषितायाः ॥४६॥

ये स्निह्यन्ति मयि प्रसन्नहृदया
वन्द्यास्तु सन्त्येव ते
नो स्मिह्यन्त्यथ येऽपि कारणवशा-
त्तेभ्योऽपि सद्भ्यो नमः ।
लाभालाभ - जयाऽजय - प्रभृतिषु
द्वन्द्वेषु साम्यं गतं
स्वात्मानन्द - महार्णवे मम मनो
मग्नं यतस्तिष्ठति ॥ ४७ ॥

रोमाञ्चं तनुषेऽधरं व्रणयसे
गात्रेषु कम्पं करो-
ष्याश्लेषाय मतिं ददासि ननु सीत्-
कारस्य शिक्षां तथा ।
कान्तं रोचयसे नितान्तमधुना
शान्तं निशान्तं मम
स्वान्तं प्रोषितभर्तृकामपि न मां
जानासि हेमन्त किम् ॥ ४८ ॥

शिष्टाऽनुग्रह-दुष्टनिग्रहमिषात्
कल्याण - मातन्वती
विश्वस्य क्रमविक्रमाऽक्रममयी
धर्मस्वरूपा शिवा ।
आनन्दामृतवर्षिणी शिवमहा-
सत्ता चिदम्भोनिधि-
र्देवी क्रान्तिरुदारधीर्विजयता-
मार्या परा भैरवी ॥ ४९ ॥

संसारोऽयमनन्तलोकभरितः
सर्वोऽस्ति यस्योदरे
स त्वं मद्धृदये निरन्तरमहो
सर्वात्मना वर्तसे ।
आलोक्याऽपि परस्परं सुशरणं
प्रीणावहे नाथ हे
त्वं ब्रह्माऽस्यहमस्मि या तदिति किं
निर्णेतु - मत्रेष्यते ॥ ५० ॥

देवानां परिपालनाय यजते
क्षेमाय योगाय यो
भव्याय प्रतिवासरं त्रिजगतां
यज्ञेन यज्ञं स नः ।
सर्वेषां यजमान एष जठरे
जाज्वल्यमानः प्रभु-
र्भुञ्जानः प्रतिवस्तुघस्मरशिवो
वैश्वानरः प्रीयताम् ॥ ५१ ॥

शङ्कातङ्क-कलङ्कपङ्किल - महीं
संशोषयन्ती द्रुतं
संयोगाज्जगदम्बरं घनमलं
संशोधयन्ती मनाक् ।
उद्रिक्तां बकमण्डलीं कुवलयात्
संवारयन्ती जगत्-
कल्याणाय शरत्प्रभा विजयतां
संपादयन्ती शिवम् ॥ ५२ ॥

(शेषांशः २०२ पृष्ठे)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अद्वितीयस्य ब्रह्मणो लक्षणाभावः

— श्री जगन्नाथ श्रीधर शास्त्री पदे —

[अध्यक्षाः—स्नातकोत्तर-दर्शनविभागस्य, गायकवाड़-विश्वविद्यालयः, बड़ोदा]

सर्वगतस्यापि ब्रह्मण उपासनार्थः प्रदेशविशेषपरिग्रहो न विरुद्ध्यते। ननूक्तं निष्प्रदेशस्य ब्रह्मणः प्रदेशविशेषकल्पना नोपपद्यत इति? नायं दोषः, निष्प्रदेशस्यापि ब्रह्मण उपाधिविशेषसम्बन्धात् प्रदेशविशेषकल्पनोपपत्तेः। तथा हि—आदित्ये चक्षुषि हृदय इति प्रदेशविशेषसम्बन्धीनि ब्रह्मण उपासनानि श्रूयन्ते। (शां. भा. १. १. २४)

यथैव हि ब्रह्मणो जगदुत्पत्तिः श्रूयत एवं विकारव्यतिरेकेणापि ब्रह्मणोऽवस्थानं श्रूयते। प्रकृतिविकारयोर्भेदेन व्यपदेशात्।

सेयं देवतैक्षत हन्ताऽहमिमास्तिस्रो देवता अनेन जीवेनात्मनाऽनु प्रविश्य नामरूपे व्याकरवाणि। इति (छा. ६.३.२)

तावानस्य महिमा ततो ज्यायांश्च पूरुषः। पादोऽस्य सर्वाभूतानि त्रिपादस्यामृतं दिवि॥ (छा. ३. १२. ६)

इति चैवंजातीयकात् तथा हृदयायतनत्ववचनात् सत्सम्पत्तिवचनाच्च। यदि च कृत्स्नं ब्रह्म कार्यभावेन उपयुक्तं स्यात्।

सतः सोम्य तदा सम्पन्नो भवति। (छा. ६. ८. १)

इति सुषुप्तिगतं विशेषणमनुपपन्नं स्यात्। विकृतेन ब्रह्मणा नित्यसम्पन्नत्वादविकृतस्य च ब्रह्मणोऽभावात्। तथा इन्द्रियगोचरत्व-प्रतिषेधाद् ब्रह्मणो विकारस्य चेन्द्रियगोचरत्वोपपत्तेः। तस्माद् अस्त्यविकृतं ब्रह्म। (शां. भा. २. १. २७)

विकारावर्ति च तथा हि स्थितिमाह। (ब्र. सू. ४. ४. १९)

विकारावर्त्यपि च नित्यमुक्तं पारमेश्वरं रूपं न केवलं विकारमात्रगोचरं सवितृमण्डलाद्यधिष्ठानम्। तथा ह्यस्य द्विरूपां स्थितिमाह आम्नायः—

तावानस्य महिमा ततो ज्यायांश्च पूरुषः। पादोऽस्य सर्वा भूतानि त्रिपादस्यामृतं दिवि॥ (छा. ३. १२. ६)

इत्येवमादिः। (शां. भा. ४. ४. १९)

दर्शयतश्चैवं प्रत्यक्षानुमाने। (ब्र. सू. ४. ४. २०)

दर्शयतश्च विकारावर्तित्वं परस्य ज्योतिषः श्रुतिस्मृती। न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽयमग्निः (कठ. ५. १५, श्वेता. ६. १४, मुण्ड. २. २. १०) इति। न तद् भासयते सूर्यो न शशाङ्को न पावकः (गी. १५. ६) इति च। तदेवं विकारावर्तित्वं परस्य ज्योतिषः प्रसिद्धमित्यभिप्रायः। (शां. भा. ४. ४. २०)

गीताशास्त्रेऽपि परस्य ज्योतिषो द्विरूपमवस्थानं स्मर्यते। तथा हि—

ज्ञेयं यत् तत् प्रवक्ष्यामि यज्ज्ञात्वाऽमृतमश्नुते। अनादिमत् परं ब्रह्म न सत् तन्नासदुच्यते॥ (गी. १३. १२)

इति विकारावर्तित्वं परब्रह्मणो दर्शितम्।

सर्वतः पाणिपादं तत् सर्वतोऽक्षिशिरोमुखम्। सर्वतः श्रुतिमल्लोके सर्वमावृत्य तिष्ठति॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सर्वेन्द्रियगुणाभासं सर्वेन्द्रियविवर्जितम्।
असक्तं सर्वभृच्चैव निर्गुणं गुणभोक्तृ च॥
बहिरन्तश्च भूतानामचरं चरमेव च।
सूक्ष्मत्वात् तदविज्ञेयं दूरस्थं चान्तिके च तत्॥
अविभक्तं च भूतेषु विभक्तमिव च स्थितम्॥
भूतभर्तृ च तज्ज्ञेयं ग्रसिष्णु प्रभविष्णु च।
ज्योतिषामपि तज्ज्योतिस्तमसः परमुच्यते॥
ज्ञानं ज्ञेयं ज्ञानगम्यं हृदि सर्वस्य विष्ठितम्॥
(गीत १३. १३—१७)

इति विकारवर्तित्वं ब्रह्मणः प्रतिपादितम्।

अथवा बहुनैतेन किं ज्ञातेन तवार्जुन।
विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत्॥
(गी.१०.३२)

इत्यत्र विकारवर्ति विकारावर्ति चेति द्विरूपमवस्थानं ब्रह्मणः स्मृतम्। स हि भगवान् महानात्मा वैश्वानररूपेणेदं कृत्स्नं विष्टभ्य स्थितः। तथा हि—

अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः।
प्राणापानसमायुक्तः पचाम्यन्नं चतुर्विधम्॥
(गी.१५.१४)

इति परस्य ब्रह्मणो ज्योतिःस्वरूपेणैव विकारवर्तित्वमुक्तम्।

इत्थमविकृतं विकृतं चेति द्वेधा व्यवतिष्ठते परं ब्रह्म। तत्र विकारावर्तिनो ब्रह्मणोऽप्रमेयत्वात् न तत्र लक्षणप्रवृत्तिर्भवतीति मीमांसितम्। द्वितीयमिदानीं परब्रह्मणो विकारगोचरं स्वरूपं विचार्यते।

विश्वानि भूतान्येकेन अंशेनाभिव्याप्य व्यवतिष्ठते परं ब्रह्म। प्रमेयाणि विश्वानि भूतानि। प्रमेयत्वान् सर्वैर्दार्शनिकैः प्रत्यक्षादिप्रमाणैर्गृह्यन्ते। तेन सर्वेषां दार्शनिकानामयं विषयः प्रमेयो भवति। तत्र दार्शनिकानां प्रमाणविषयभूतानि विश्वान्येतानि भूतानि ब्रह्मेति प्रतिज्ञायते वेदान्तैः। एवमत्र परस्परविरुद्धदर्शनद्वयसम्पातः। ब्रह्मप्रतिज्ञापकं श्रौतम्। इदं सर्वमिति प्रमाणयदश्रौतम्। तत्रैता विकारवर्तिब्रह्मप्रतिपादका श्रुतयो भवन्ति —

पुरुष एवेदं सर्वम्। (मा. सं. ३१. २)
आत्मैवेदं सर्वम्। (छा. ७. २५. २)
ब्रह्मैवेदं सर्वम्। (छा.७.२५.२ मुण्ड.२.२.११)
ब्रह्मैवेदममृतं पुरस्तात्। (मुण्ड. २. २. ११)
इदं सर्वं यदयमात्मा। (बृ. २. ४. ६.)
सर्वं खल्विदं ब्रह्म। (छा. ३. १४. १)

इति। स्मृतिश्च भवति —

वासुदेवः सर्वम्। इति (गी. ७. १९)

सर्वास्वासु श्रुतिषु स्मृतौ च सर्वमिदं विषयीभूतं दृश्यं जगत् पुरुष इति आत्मेति ब्रह्मेति वासुदेव इति च प्रबोधितम्। सर्वत्र एकवचननिर्देशात् एकमेवाद्वितीयं ब्रह्म इदं सर्वं दृश्यं जगत्। नात्र प्रतिभूतमुपाधिकृत आत्मभेदो न वा विकारावर्तिना ब्रह्मणा भेदः। इदमः सर्वस्य प्रत्याख्यानात् तस्यैव ब्रह्मेति प्रत्यभिज्ञापनादेक एवात्र पदार्थः। स एव इदं सर्वं दृश्यं जगदिति प्रत्यक्षादिप्रमाणैरवैदिकैर्गृह्यते। स एव वेदान्तैर्ब्रह्मेति प्रतिज्ञायते। विवर्तवादमन्तरा इदं सर्वं ब्रह्मति कार्यस्य कारणानन्यत्वं भोग्यभोक्त्रादिप्रपञ्चजातस्य ब्रह्मव्यतिरेकेणाभावं प्रबोधयन्तीनां श्रुतीनामुपपत्तिरेव न सम्भवति। ब्रह्मैव जगद्रूपेण विवर्तते। अविजानद्भिरिदं सर्वमिति च गृह्यते। यदा वेदान्तैरिदं सर्वं दृश्यं जगद् ब्रह्मेति प्रबोध्यते तदा तद् ब्रह्मरूपेण विपरिवर्तते। इदमद्वितीयब्रह्मदर्शनमात्मैकत्वप्रतिपत्तिर्वा श्रुतिप्रामाण्यमन्तरा प्रमाणान्तरैः दर्शनान्तरैश्च नैव सम्पद्यते। अत एवोक्तमाचार्यैः अध्यासभाष्ये—

आत्मैकत्वविद्याप्रतिपत्तये सर्वे वेदान्ता आरभ्यन्ते। (शां. भा. १.१.१) इति।

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कर्मणो गहना गतिः

—श्री रामदास कौण्डिन्यः, एम. ए. साहित्याचार्यः—
[आचार्यः—राजकीय संस्कृत महाविद्यालयस्य, जामनगरम्]

अथैकदा मुम्बापुरीपरिसरे विद्यमानोपवने कस्मिंश्चित् प्रच्छायतरुतले शिलातल उपविष्टो दारिद्र्याभिभूतः अकाल-जराव्याप्तावयवो युवाऽपि वृद्ध इव दृश्यमानः पञ्चविंशति-वर्षीयो विलासः समीपस्थसरसि प्रसन्नगम्भीरे सरोरुहेण क्रीडन्तीं कामपि अनुपमलावण्यां बालां विलोक्य व्यचिन्तयत्—

'अहो साहसमस्या बालिकायाः ! प्रयतते इयं कमलं नीरेण आवरणाय। परं धन्यमिदं कमलं यद्वर्तमानमपि जले स्वावस्थितिं न विजहाति। सलिलसम्पृक्तमपि तदाक्रमितं न भवति। विफला भवन्ति यत्ना अस्याः कन्यकायाः। मयाऽपि यद्येवमेवाचरितं स्यात्, किमिति दुःखाकुलितेन अधुना कालो नेतव्यो भवेत् ?

अतीव रमणीयं सुखदायि खल्वासीन्मम बाल्यम्। तातस्तु सर्वदा मत्संवर्धनरतः सर्वस्वमपि मत्सुखाय प्रदातुकाम आसीत्। सुखसागरनिमग्नस्य मेऽगच्छत् पञ्चवर्षात्मकमायुः। धनिनोऽपि तातस्य स्वसूनुना विदुषा भाव्यम् इत्यासीन्मनीषा। अतः तद्ग्रामे शालायामध्ययनाय प्राहिणोत् स माम्। अस्मिन् ग्रामे न चासीदध्ययनानुकूलो मित्रपरिवारः। सर्वदा ग्राम्यक्रीडातत्परः स मामप्यकरोद् विद्याविमुखम्। किन्तु बुद्धेः तीक्ष्णतया प्रत्येकस्मिन् वर्गे प्रथमा श्रेणी अलभ्यतेति तातः परं सन्तोषमवाप।

ग्रामे तस्मिन् आङ्ग्लभाषाशिक्षणस्य नासीत् व्यवस्थेति तद्ग्रामसमीपस्थे पत्तनेऽध्ययनाय तातसम्मत्या गत आसम्। नगरे तु सर्वं विपरीतमेवासीत्। सुजनदुर्जनयुक्ते तन्नगरे कथं नेतव्या दिवसा इति ज्ञानाय नालमासम्। न चासीत् तदानीं सुदृसन्निर्णायिका मे मतिः। तत्र च यावच्छक्यमध्ययनतत्पर आसम्। **एकस्तपी द्विरध्यायी** इति नियममनुसृत्य स्ववयस्यान्वेषणरतोऽलभे एकं मित्रं विजयनामानम्। तेन सहाभवन्मत्री सत्वरम्। स तु प्रतिदिनं न किमप्यकरोन्मया विना। अहमेवासं तत्सुहृत्। सर्वविषयेषु तन्मत्यनुकूलं च सर्वथाऽकरवम्। नाजानां तदानीं यद् **आरम्भगुर्वी क्षयिणी क्रमेण** इति सुभाषितं सज्जन-दुर्जनमत्रीभेद कथयतीति।

गतेषु केषुचित् मासेषु अहं सर्वथा विजयवशतामगच्छम्। स्वविचारस्वातन्त्र्यमपि अयोग्यं मन्ये। मद्वश करणनिरतो विजयो 'विलास अधीनो जात' इति आनन्दस्य परां कष्ठामयात्। स हि नासीत् तादृश् धनिकपुत्रो यथाऽहमासम्। न चापि स अभ्यसकुशलः। महता कष्टेन परीक्षोत्तीर्णोऽभवत्। एकहायनादूर्ध्वं स्वकपटजालान्तर्गतं मां कर्तुं प्रायतत विजयः। जातश्च विजयी तस्मिन्। आंग्लभाषाऽनभिज्ञो मे पिता "स्वात्मजोऽध्ययनं करोती"ति विपुलं द्रव्यं प्रतिमासं मेऽयच्छत्। विजयो विलासवसुना विलासान् कर्तुं प्रारभत।

अनयैव मंत्र्या आनीतं परिवर्तन मदायुषि। तद्वशगोऽहं मन्त्रौषधिरुद्धवीर्यो भोगीव तत्कथितं सर्वं व्यवहारं समीचीनं मत्वाऽकरवम् ततःप्रभृति अध्ययनं दुःखावहम्, अशन वसन चित्रपटदर्शनं गायन-श्रवणमित्यादि सुखावहमिति निश्चितमकरवम्। 'निसर्गभिन्नाम्पदं श्रीः सरस्वतीतिद्वयं खलु' इति श्रीमतोऽपत्यस्य मे किं विद्यया इत्यविचारयम्। **यावज्जीवं सुखं जीवेत्** इति चार्वाकपद्धतिरेव मानवहितावेति निश्चिनुवम्। पाठशालामगत्वा नगरस्थचेतोहरे स्थले काल-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मनयम्। जनकप्रेषितद्रव्यस्य क्षये जाते पत्रं प्रेष्य तातादलभे इष्टं धनम्। सोऽपि कदाचित् आवश्यकमेव स्याद् धनमिति किमप्यविचार्य प्राहिणोत् तत्।

एतादृशस्य आचारस्य किं स्यात् फलम् अनुत्तीर्णतां विना? धनव्ययोऽभवद् वृथैव। अवलोक्यैवं जनकश्चिन्तयामास-"नूनमत्र केनाप्ययोग्येन कारणेन भवितव्यम्। किमिति सहसा जातं परिवर्तनं मे बालस्य बुद्धौ? सदाचारसम्पन्नस्य बालस्याभ्यासे चित्तं न लगति। स क्रीडारतो जात इति तन्नगरस्थजनानां प्रवादः।" इत्यालोच्य पिता स्वयं तत्रागच्छत्, सूक्ष्मदृष्ट्या च सर्वं व्यवहारमपश्यत्। सर्वामवलोक्य स्थितिं पुत्रमुपदेष्टुमयतत्। परं तद्वागमृतस्य विलासाग्निसन्तप्ते विलासस्वान्ते बिन्दुरपि नावशिष्यत। तदुपदेशः 'अरण्यरुदितमिव' वृथैवाऽभवत्। अतः स "अलमनेन धनव्ययकारिणा ज्ञानप्राप्त्यसाधकेन नगरनिवासेन विलासस्ये"ति निश्चित्य आनयन्मां स्वग्रामम्।

परिसमाप्त एव मे जीवितनाटकस्य प्रथमोऽङ्कः। प्रत्यागत्य तु स्वजन्मभूमिं सुखं च मे शयनं च मे अनया रीत्याऽनयं कालम्। विलासरतस्य विलासस्य मे नाभवत् तृप्तिरेतेन जीवन-मार्गेण। नगरनिवासवत् विपुलधनव्ययेन जीवनानन्दो लब्धव्य इत्यागच्छन्मे मनसि। परं कथं धनमाप्तव्यम्? तदानीं नगरे आसीन्निमित्तमध्ययनस्य। अधुना तु विना कारणं धनप्रदाने तातस्येच्छा कथं भवेदित्ययोग्यमार्गेण धनार्जने मतिमकरवम्। "धान्यविपुलता हि अस्मत्सदनसम्पत्। ग्रामे प्रायः सर्वे व्यवहारा धान्यविनिमयेन भवन्ति" इति निर्णीय धान्यापहरणं कृत्वा स्वेष्टं साधनीयमिति निश्चितवान्। प्रथमं बान्धवरहितात् गृहाद् धान्यमपहृत्य तद्द्वारा आवश्यकवस्तुनो लाभेन सुखमलभे। यथा यथाऽवर्धत

(१९८ पृष्ठस्य शेषांशः)

एकान्ते यत्प्रभावात्सुचरितमतय-
स्तां हसन्तीं हसन्तीं
सेवन्तेऽन्तःसुतृप्ता भवसुखविमुखा-
स्तेऽपि सन्तो वनान्ते।
कान्तारायालचिन्तां दधति गृहिजना-
स्तान्तचिन्ता निशान्तात्
हेमन्तो हन्त कान्ते प्रसरति कुटिलो
भारते भारतेऽस्मिन् ॥ ५३ ॥
रामेन्दुखद्विमित-विक्रमपार्थिवाब्दात्
पूर्वं हि या विरचिता ननु सूक्तयस्ताः।
तोषाय सूक्तिलहरीत्यभिधानवत्या-
मस्यां कृतौ रसविदां खलु संगृहीताः ॥ ५४ ॥
स्वनिर्मितानां सूक्तीनां मञ्जूषैषा विदां करे ॥
समर्पयति सस्नेहमाचार्या-ऽमृतवाग्भवः ॥ ५५ ॥

सुखाशा, तथा तथा धान्यापहरणमपि व्यवर्धत।

अथैकदा धान्यं नयन्नहं जनन्याऽवलोकितो निवारितश्च। परमवधीरिततद्वचनोऽहं स्वेष्टं कार्यं कर्तुमशक्नुवम्। मदेकापत्या साऽपि स्वार्भकस्य अपराधान् न न्यवेदयत् भर्तुः। जननीस्नेहश्चायं मां चौर्यकर्मणो न न्यवारयत्, अपि तु प्रोत्साहितवानेव। "विपुलं धनं धान्यम्, एक एव बालः, अनुभवतु स ऐश्वर्यसुखम्, निवारणेन किं फलम्?" इति विचारेण आत्मजस्य सुखेनात्मानं सुखिनीं मन्यमाना मे माता इन्दिरा मद्रक्षणपरा, सुखसंवर्धनरता चासीत्। एवमवर्धत मे सुखाशा।

एकस्मिन् दिने भ्राम्यन् रथ्ययाऽपश्यं काञ्चिन्नवयौवनवतीं कलहंसगामिनीं स्वनेत्रापाङ्गप्रेक्षणाकृष्टतरुणजनहृदयां सौन्दर्ये रतिमप्यतिक्रामन्तीं षोडशवर्षदेशीयां बालाम्। तद्दर्शनेनैव अनङ्गशरलक्ष्यत्वमगच्छम्। तामेवेन्दुमुखीं चिन्तयतो मे मनः "कु-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्यात् तद्वशीकरणोपायः" इति विचारव्याकुलमभवत्। अनेन विचारेण निशा निद्रया विनैव नीता। अपरस्मिन् दिने ग्रामस्थसुहृदः ज्ञात्वा तन्नामधेयं दुःखसागरे निमग्न आसम्। यतः सा बाला मुम्बापुरीम् अधिवसतः कस्यचित् गुणिनः कन्याऽस्मद्ग्रामे स्वबान्धवान् द्रष्टुमागता। दूरारोहिणी मे मनीषा तां लब्धुम्। अन्यच्च, स्वयं पण्डिता आंग्लभाषाध्ययनं कुर्वती सा कमललोचना कमला मादृशस्य अशिक्षितस्य वशगा कथं भवेत्? अतः खपुष्पमिव विफलो मन्मनोरथ आसीत्। तथापि भवितव्यानां द्वाराणि सर्वत्र भवन्ति इत्येवास्ति आशा!

अथान्यस्मिन् दिने ग्रामसमीपोपवने सन्ध्यासमये भ्रमन्तीं तामुद्विग्नमानसोऽहम् अपश्यम्। अहमपि तदुद्याने स्वमनो विनोदयितुं गत आसम्। इदं हि उद्यानं मे जनकेन दीर्घप्रयत्नैः सर्वफलपुष्पसमृद्धमकारयत्। नगरकलामभूरोऽस्मिन्नुद्याने प्रायो बालाः बालिकाः वृद्धाः तरुणाः—सर्वेऽपि प्रतिदिनं समागत्य सुखशीतल-पवनस्पर्शमुदिता भवन्ति। अहं तु आम्रवृक्षस्याधः छायायामुपविष्ट इतस्तत उन्मनस्कतया दृष्टिम् अचालयम्।

अवलोक्य तां मृगाक्षीं संभाषणाय उत्सुकमभवन्मे मनः। अतः किं करणीयमिति विचारमग्नमेव मां प्रत्यागत्य सा बाला स्वयमेव उपवनमधिकृत्य अपृच्छत्। तदानीम् "अहो मधुरालापाः, चतुरा च भाषणरीतिः, कोकिलमपि तिरस्करोति स्वरेण, कथं च मे सुभाग्यं यदियं मादृशजनदुर्लभा ललितपदविन्यासा बाला भाषणाय प्रेरयति माम्!" इत्यागच्छन्मे मनसि। तत्प्रश्नोत्तरं प्रदाय अन्वभवं युवतीसंभाषणजं हर्षम्। ततश्च सेवकद्वारा फलपुष्पाणि तस्यै कमलायै दापयित्वा "इव आगमनेन अस्मदुपवनं धुनीलं स्यात् किम्?" इत्युक्ते मया "अतिरमणीयेऽस्मिन्नुद्याने आगमनाय को वा न समुत्सुको भवेत्" इत्यमृतमधुराणि अक्षराण्युच्चार्य तन्वङ्गी कुचकलशपरिणाह-भारमन्दगामिनी मद्धृदयोन्माथिनी कमला सदनमगच्छत्।

ततश्च मन्मथेषुप्रहारजर्जरितस्वान्तः कथंकथमपि गृहगमनाय मतिमकरवम्। मत्सेवको गोपालः समीपमागत्य संपूर्णतयाऽविर्भूता विभावरीति न्यवेदयत्। तेन सह मार्गेण प्रत्यागच्छन् "इयं बाला प्रतिदिनमागच्छति भगवन्! कुसुमप्रणयिनो याचते एषा कुसुमानि माम्। अहमपि तस्या मधुरालापेन प्रीतः सुजनकन्यकेयमिति यच्छामि कतिपयानि कुसुमानि" इत्यादिवृत्तम् अहमजानाम्। "कुसुमप्रणयिनोयं पीडयति मम चेतः कुसुमायुधेन! किं करोमि? का गतिः स्यात्? किंनियम् आलम्बनं मे हृदयस्य स्यात्? किं पूर्णा स्यात् मे इच्छा अस्याः प्राप्तेः? सर्वत्र विधिरेव प्रभवति" इति चिन्तयन् गृहं प्राविशम्। मनोराज्यशतेन च निशा अवारिता।

अन्येद्युः निसर्गतो लावण्यजित-पुष्पसायकोऽप्यहं वासः प्रधानं खलु योग्यतायाः इति विचार्य सुवाससाऽऽत्मानं विभूष्य सन्ध्यासमये प्रागामुद्याने। ततः किमिति चिरायति चटुलालका मन्मथपताका कमला इति सुचिरं तन्मार्गप्रतीक्षां कृत्वाऽपि अनागता सा इति भृशमुत्कण्ठितचेता अभवम्। 'किमेषा स्वबान्धवैः निवारिता आहोस्विन्मार्गे मदोन्मत्तवृषभनिपातितेति अस्वस्थशरीरा सञ्जाता, अथवा जनकगृहं गता इति, विचारोऽदुनोत् मे मानसमतितराम्। शर्वर्याः समग्राविर्भावतया तदनागमनं निश्चित्य स्वदैवप्रातिकूल्येन आत्मानमधन्यं मन्यमान उदतिष्ठम्। "कमलाया बान्धवानां गृहे गमनं क्रियेत चेत्सर्वं सुस्पष्टं भवेत्। परं तद्बान्धवाः मम तत्र गमनं निन्द्येयुः, अथवा धनिनो बाल आगत इति मुदिता भवेयुः? यत्किमपि भवतु, प्रियाया विना न लभे शे

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चेतो मोदमिति तन्निवासस्थानगमनं वृत्तज्ञानाय आवश्यक मेव" एवमादि सुचिरं ध्यात्वा कानिचिदत्युत्तमानि फलानि सुरभीणि तन्मनोहारिणि कुसुमानि चादाय तद्गृहगामिना पथा निरगच्छम् ।

भीतभीत इव तस्याः सदनद्वारं प्रविश्य आकस्मिकदृष्टात् बालात् तदुदन्तज्ञानायायतम् । परमहो हृदयविदारिणी खलु सा वार्ताऽऽनीत् । "ज्वरमृदितसर्वावयवा आहारमनभिनन्दतो शयनशरणा मत्पितृभागधेयसुता कमला" इति बालभाषणेन अतीव अस्वस्थोऽभवम् । "द्रष्टुं शक्नुयां किं तव भगिनीम्?" इति पृच्छन्तं मां प्रमुदितस्वान्तो बालस्तच्छयनसमीपं नीतवान् । अवलोक्य तु मां प्रहृष्टा सा कृशाङ्गी उत्थातुं प्रायतत । समीपस्था तन्मातुलजाया तां न्यवारयत् । मयाऽपि तस्य मातुलपत्न्यै दिने दिने कुसुमचयाय आगच्छन्तीयं कन्यकाऽद्य किमिति नागतेति अशुभं आशङ्कमानः तत्कुशलज्ञानाय भवद्गृहागमनस्य अनाहूताऽपि धाष्टर्यमकरवमिति निवेदितवानहम् ।

मातुलपत्नी सुलोचना धनिनः केशवमहाशयस्यायं सूनुरिति परमादरेण मम स्वागतमकरोत् । 'धन्या मन्नाथभगिनीसुता या भवादृशैरेवं चिन्त्यते' इत्युक्त्वा सा गृहाभ्यन्तरमगच्छत् । लब्ध्वा सभाषणावसरं "भवती नागतेति मत्सेवकेन गोपालेन इमानि फलपुष्पाणि प्रेषितानि । गृह्णातु एतानि । अपि च, कथमेकपदे ज्वरपीडिता भवती जाता? किं तत्र कारणम्? अगदनीयं चेत् निवेदयतु" इत्यवोचम् । "नाहं शक्नोमि कारणं ज्ञातुम् । किन्तु ह्य एव रात्रौ उद्यानप्रतिनिवृत्ता शिरोवेदनापीडिता शय्यामधिष्ठाय उन्निद्रा सती यामिनमनयम् । प्रातश्च ज्वरव्याप्तमात्मानमजानम्" इति तत्प्रेयस्या तदीय एवानुनयः प्रकारान्तरेणानुवितः ।

अत्रान्तरे सुलोचनया क्षीरमानीय समर्पितं विलासाय । तं च पीत्वा तस्याः समक्षमेव "सत्वरमेव ज्वररहिता भूत्वा आगम्यतामुपवने प्रसूनावचयाये"ति कमलायै निवेद्य खिन्नस्वान्तः स्वगृहं प्रत्यागच्छम् । ततश्चातीतानि सप्ताष्टदिनानि कमललोचनां नादृष्ट्वा । न चाशक्नुवं तद्गृहं पुनरपि गन्तुम् ।

एकस्मिन् दिने स्वगृहोपरि आलिन्दके प्रियां चिन्तयन् समागच्छन्तं तन्मातुलतनयं रमेशमपश्यम् । सोऽपि बाल आगत्य पत्रमेकं समर्पितवान् । तस्मै बालाय सुपक्वानि फलानि अयच्छम् । रमेश फलान्यादाय प्रणम्य च निरगच्छत् । अहमपि पत्रपठनोत्सुकोऽवाचयं तत्—

"अयि! भगवन् अतीव लज्जते मे चेतः इमान्यक्षराणि लिखितुम । परं किं करोमि ? नाहं प्रभवामि आत्मानं भवद्दर्शनात प्रभृति । ममास्वस्थतायाः भवानेव कारणम् । तस्मिन् दिने उपवने मनोरमं भवद्रूपं सम्यवलोक्य तन्मोहिता नालमासं किमपि कर्तुम् । इदं पत्रं दृष्ट्वा 'निलज्जा एषा बालिका यदं स्पष्टीकरोति हृदगतमि"ति आगच्छेद् भवत्स्वान्ते । परं भगवन्, मदधृद्गतो भवान् सर्वं मदभिप्रायं जानात्येव इति लेखने दोषो नास्तीति सम्यावधार्य भवत्प्रेमोत्पादितधाष्टर्याऽहम् इदं लिखामीति क्षन्तव्योऽयमपराधः सेविकायाः । प्रायः श्व एव मुम्बापुरीं गमिष्यामि । कथं मे तदानीं भवद्दर्शनामृतास्वादसुखप्राप्तिः ? अस्तु, यदभावि न तद्भावि भावि चेन्न तदन्यथा इति सुभाषिताश्रयं विना नास्त्युपायः । निश्चितमिदं जानातु भवान् यदियं कमला पराधीना भवति, सतृष्णा चाऽस्ति" इत्यलं विस्तरेण ।

—भवद्रूपमोहिता दासी कमला ।

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मानस-भारती : देवगिरा गुम्फितं मानसम्

—श्री जनार्दन गङ्गाधर रटाटे, एम. ए. साहित्याचार्यः—

तं भक्तियोगं श्रुत्वाऽतिहृष्टः सौमित्रिरानमत् ।
इत्थं याता दिनाः केचिद् विरागज्ञानचर्चया ॥
रावणस्य स्वसा शूर्पणखा क्रूराहिनी यथा ।
एकद दुष्टचित्ता सा प्राप्ता पञ्चवटीवनम् ॥
दृष्ट्वा कुमारौ विकला सञ्जाता गरुड क्षणात् ।
भ्रातरं पितरं पुत्रमपि दृष्ट्वा तथाविधा ॥
द्रवते स्त्री रविं दृष्ट्वा सूर्यकान्तो मणियथा ।
भूत्वा रम्यवपुः प्राप्य प्रभुं सोवाच सस्मिता ॥
न ते समो नरः कश्चिन्न नारी कापि मे समा ।
विचार्यैव विधात्राऽद्य संयोगोऽस्ति विनिर्मितः ॥
न मे योग्यो वरो लब्धोऽन्विष्टोऽपि भुवनत्रये ।
ततोऽद्य पि कुमारी त्वां दृष्ट्वा तुष्टाऽस्मि चेतसि ॥
दृष्ट्वा सीतां प्रभुः प्राह भ्राता मेऽस्त्यविवाहितः ।
सा गता लक्ष्मणं सोऽपि ज्ञात्वा तां भगिनीं रिपोः ॥
दृष्ट्वा प्रभुञ्च प्रोवाच तयोर्दासोऽस्मि सुन्दरि ।
न ते सुखं पारतन्त्र्ये कोशलेशः परं प्रभुः ॥
सुकरं तस्य सकलं दोषः शक्तस्य नैव च ।
दासः सुखं याचनकः सम्मानं व्यसनी धनम् ॥
व्यभिचारी गतिं भद्रां सुयशो लोभसंयुतः ।
अभिमानी नरो वाञ्छेत् पुमर्थांश्चतुरस्तथा ॥
तदैते प्राणिनो दोग्धुं वाञ्छन्ति गगनं मुधा ।
प्राप्ता प्रभुं सा तेनापि प्रेषिताऽनुजसन्निधौ ॥
तामाह लक्ष्मणस्त्वां स वरयेद् यस्त्यजेत् त्रपाम् ।
प्रभुं प्राप्ता ततः क्रुद्धा जाता विकटरूपिणी ।
सीतां भीतां प्रभुर्दृष्ट्वाऽऽदिशत् सङ्केततोऽनुजम् ॥

ततस्तु सौमित्रिरतीव लाघवा-
च्चकार तां छिन्नसुकर्णनासिकाम् ।
हृतिं ददौ नूनमनेन सद्यः
शक्तिप्रकाशाय दशाननाय ॥१७॥

तस्या विकर्णनासायाः क्रूरायाः शोणितं बहु ।
गैरिकस्य प्रवाहो नु श्यामाद्रेर्निर्गतो महान् ॥
विलपन्ती तदा गत्वा प्राह सा खरदूषणौ ।
धिक्पौरुषं वा धिक् शक्तिमिति ताभ्यामपृच्छ्यत ॥
सा विस्तरेणाकथयद् राक्षसैर्विहिता चमूः ।
अधावन् रक्षसां पुञ्जा नूनं पक्षयुताद्रयः ॥
भिन्नाकारा भिन्नशस्त्रा असङ्ख्या भिन्नवाहनाः ।
विकर्णनासां चक्रुस्तेऽभद्र मग्रे भयानकाः ॥
न च तेऽगणयन्नुग्रानुत्पातान् मृत्युपाशिनाः ।
उड्डयन्ते व्योम्नि केचिद् गर्जन्ति स्तर्जयन्ति च ॥
योधा रक्षश्चमूं दृष्ट्वा तादृशीं मुदिता बहु ।
कश्चिद् वदति जीवन्तौ निग्राह्यौ भ्रातरावुभौ ॥
इमौ धृत्वा मारयीयौ हरणीया च कामिनी ।
धूमपूर्णं नभो दृष्ट्वा रामः प्राहानुजं ततः ॥
तीव्रागतास्त्रपचमूः सीतां धृत्वा गुहां विशः ।
सावधानो लक्ष्मणोऽपि निशम्य वचनं प्रभोः ॥
धनुर्बाणकरोऽगच्छत् सीतया सह कन्दराम् ।
सैन्यं दृष्ट्वाऽऽददे रामो विहस्य कठिनं धनुः ॥
धनुर्भयानकं करे विधाय सज्यमुल्लसन् ।
निबध्य मस्तके जटां विभाति कीदृशः प्रभुः ॥
हरिन्मणेर्महागिरौ भुजङ्गमद्वयं यथा ।
विरोधयुग् विराजते तडित्सहस्रकोटिभिः ॥
कटौ प्रभोर्निषङ्गकं महद् विभाति भासुरम् ।
पुनर्धनुः शरौ प्रभुर्विधाय लक्ष्यसङ्गतौ ।
ददर्श राक्षसीं चमूं हरिर्यथेभसंहतिम् ॥
प्रधाव्य स्वपङ्क्तीर्विहस्याऽऽगतास्ते
निबध्यो निबध्योऽयमित्थं वदन्तः ।
यथा बालसूर्यांऽशुपैर्वेष्टितः स्यात्
तथा रामचन्द्रस्तदा वेष्टितस्तैः ॥१८॥

[क्रमशः]

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्षत्रपति-महाकाव्यम्

—श्री उमाशङ्कर शर्मा त्रिपाठी—

[आंग्लभाषा-प्राध्यापकः—काशी-विद्यापीठस्य, वाराणसी]

[अस्मिन् सर्गे दिल्लीपतिं प्रति 'ज़जिया'-विरोधाय क्षत्रपतेः पत्रमधिकृत्य विषयप्रस्तावः समुपस्थापितः। तच्च पत्रं पारसीभाषयां नीलोजीपन्तेन तत्सचिवेन लिखितम्। इतिहासविदां नाऽनवगतमेतत्। इह तु तच्छायामेवाश्रित्य वर्णितो वंशस्थवृत्तमुखेन पत्रप्रसङ्गः।]

॥ अथ सप्तदशः सर्गः ॥

जजिया-धुर्विपन्नानां लोकानां भिन्नचेतसाम्।
मर्मक्षतमिदं पत्रं भिक्षते त्वामनुग्रहम् ॥ १ ॥

यया विनिश्चित्य तमोऽम्बुधावपि
सदर्थमुक्तैव धियाऽवचीयते।
स्वधर्मबुद्ध्या प्रकृतिं विभज्य यत्
हठात् करानुग्रहनन्दितोत्सवान्।

त्रिलोकभर्तुः परलक्ष्मधीरसौ
शिवाय लोकस्य महीयतां सदा ॥ २ ॥
विधित्सुरार्यान् यतसे निरङ्कुशं
तदस्तु मूलं हि नृपो जनश्रियः ॥ ७ ॥

अबुद्धयाज्ञा-व्यसनस्य चेदयं
ममोद्यमोऽसंस्तुत-पद्धतावपि।
प्रजास्वपेताऽऽवरणासु निश्चितं
करग्रहास्ते निरुपाधिनिर्भरम्।

प्रभो तवाऽनुग्रह-नन्दिताशय-
स्तदस्तु लोकस्य मुदे निरन्तरम् ॥ ३ ॥
प्रमोदनिघ्ना पुलकावली हठात्
मनोरमस्नेह - मुरीकरिष्यति ॥ ८ ॥

अकिञ्चनेऽस्मिन्नपि भूपते जने
निरङ्कुशस्यापि विधेरनुग्रहः।
निकामतप्तासु परिस्खलद्वपुः
प्रियाऽपभिक्षे व्यसनेऽपि बिभ्रती।

मयि स्थिरस्नेहवतां न कोऽपि यो
विवेकमार्गं विषमेऽपि मुञ्चति ॥ ४ ॥
त्रपाच्छदा शीलविभूषणा शुचं
करग्रहाश्वस्तमना न विन्दति ॥ ९ ॥

यशो मदीयं तदुदारभूपते
स्वगुप्तये त्वामपि याचतेऽधुना।
ध्रुवं प्रतिव्यक्ति विविच्य यत्त्वया
श्रितः समन्यायपथोऽप्यनेकधा।

विवेकपद्यामनुपालयाऽऽशु तद्
द्विषोऽपि मन्दस्य जयेन किं वद ॥ ५ ॥
तदात्मवत् सर्वशरीरिवृत्तयो
गुरौ त्वयीष्टामुपयान्तु शिष्यताम् ॥ १० ॥

निशम्य नूनं तव कोशरिक्ततां
ममापि राजन् व्यथते मनो यदि।
स्वकौशलाऽऽराधितसिद्धिविक्रिया
मुताऽऽद्यवंश्यार्जित-धामसंक्षयम्।

सहस्रजिह्वोऽपि तदाधिवेदितु-
र्न वक्तुमीशो भवतो विडम्बनाम् ॥ ६ ॥
किमीहसे दण्डकरोऽपि यत्करै-
र्नवीकरोष्यात्मनि लोकधिक्कृतिम् ॥ ११ ॥

---

१. जजिया = अवरङ्गजीवस्तुरुष्कभूपो जजियाऽभिधं करं भारतीयेभ्यो हिन्दुभ्यः जग्राह। दिल्लीपतिं सन्मार्गं दर्शयितुं—करविरोधाय शिवः पत्रमिदमलिखदितीतिहासः। २ दिल्लीपतिम् = अवरङ्गजीवम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चतुष्पदाचारवताऽपि वर्ष्मणा
विभावयन्नात्मनि लोकमानसम् ।
तथा न कर्तुं यतते पुमानिह
यथा परेतोऽपि जनेषु शोच्यते ॥ १२ ॥

महात्मा को नु तमेकमद्वयं
त्वया विना निन्द्यतरैरपि क्रमैः ।
उपासितुं वाञ्छति धर्मसिद्धये
विपाद्य तत्सृष्टिमकारणं बलात् ॥ १३ ॥

लताः समुच्छिद्य विभज्य वल्लरिं
द्रुमान् समुन्मूल्य सबालवीरुधः ।
वनस्पतिं प्रार्थयतस्तवोपरि
तदार्द्रदृष्टिर्निपतिष्यति ध्रुवम् ॥ १४ ॥

मनोऽनुरागाऽमृतधामनन्दिनीं
लसत्प्रभैः प्रीतिमुपायनैरपि ।
न पार्थिवो यत् क्षमते निषेवितुं
मनोऽर्पयन् तल्लभते ह्यकिञ्चनः ॥ १५ ॥

परिच्छदाडम्बरभीषितं नु किं
तमप्यनीशं परिकल्पसे विभुम् ।
स्वभक्तिमुत्कोचनिभां तवाग्रतो
निवेद्य रक्षिष्यति यः स्वमण्डलम् ॥ १६ ॥

कनिष्ठमन्धे तमसि क्षिपन् छलात्
पलायितं ज्येष्ठमधो निपातयन् ।
कदर्थयन्तं पितरञ्च बन्धने
कमद्भुतं विश्वपतिं समीडसे ॥ १७ ॥

अलक्षणस्यापि जगत्पतेरतो
मुने त्वया लक्षणमद्य कल्पितम् ।
स यस्तवाऽऽचारलभः प्रभुर्हि सः
स वाऽथ यस्मै तव रोचते विधिः ॥ १८ ॥

पटो जगन्नाथवटो निहंसि यान्
स्वधर्ममानी विनिवारितश्रुतिः ।
तदाश्रयैव क्षितिभानुवायवः
सह त्वया बिभ्रति किन्न तानपि ॥ १९ ॥

असङ्गबुद्धेरपि कर्मयोगिनो
न लोकसन्धां समुपेक्षते विधिः ।
जनोऽथवा को न मदासवोन्मदो
वदेत् स्वकूटस्थिति सुज्ञकैरिह ॥ २० ॥

अनेकधर्मान्धविरोधशान्तये
समाननिष्ठाऽऽग्रहकल्पनायता ।
यदार्यलोको यवनीविधीयते
तदेककल्पे तव सत्क्रिया विभौ ॥ २१ ॥

अहोऽनुबन्धोपचितेरयं क्रमः
कृतान्तकल्पं निरवग्रहं यशः ।
वृषं समादत्य भवन्तमीश्वरं
क्षितिस्तरे सातिमवेक्षते प्रजा ॥ २२ ॥

निशाचरणामधिपे प्रशासति
त्वयि प्रशान्तद्विजलोकसत्कृतिः ।
विशङ्कते सिद्धबलोऽपि कौशिकः
सुबाहुविध्वस्त-विविक्तपद्धतौ ॥ २३ ॥

व्यपास्य मोहं यदसम्मतात्मजो
निजात्मनिष्ठो न परानपेक्षते ।
प्रजापितुः शैलमहीयसो विधिः
सुतावधौ नन्दति तन्न तत्त्वतः ॥ २४ ॥

अजानतामार्यशरीरिणामये
दुराग्रहस्त्वद्विमुखाः पतन्ति यत् ।
धनेशहर्म्यादपि दैववञ्चिताः
मुधा परावृत्य तपन्ति भिक्षवः ॥ २५ ॥

विभो सदाऽऽरव्यधराधियस्तव
स्तवाय नेयं जननीव जन्मभूः ।
जना न के वाऽथ शुभैषिणोऽर्जितं
विभावसौ जुह्वति नाकलब्धये ॥ २६ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विपक्षपातार्ह-कृपाणकर्मणा
निदूरुध्य चेतः प्रणयं दयां कुलम् ।
निजेतरानेकमना विभावयन्
मतोऽधिकं गोत्रभिदोऽप्यरिन्दम ॥२७॥

विविक्तचेतःस्थितिरीशसन्निधिः
श्रुतेन किं ग्रन्थिभरेण लभ्यते ।
पथैव विस्मारितधामवृत्तिना
कृतार्थतां विन्दति किं जडाऽध्वगः ॥२८॥

निसर्गलोलामवताऽग्रजाच्छ्रियं
समूढबुद्धेरविता क्षितिस्त्वया ।
जनिक्रमेणाऽग्रजताऽप्यचेतना
विचेतसामेव मता ध्रुवं विधौ ॥२९॥

विमुक्तसङ्गे भवतीश्वरेऽथवा
मुधैव दोषव्यवहार-कल्पना ।
अनन्यहेतुस्तु फलोपचारता
क्रियागुणाऽबद्धगतेर्हि देहिनः ॥३०॥

प्रमाथिकर्मोन्मथितात्मपद्धतिं
विविक्तवासोपचितेष्टवर्त्मनि ।
नियोज्य तातं परमार्थवेदिना
सदर्थिता पुत्रपदस्थितिस्त्वया ॥३१॥

विजित्य राज्यं विधिवृंहितोदयाः
कुलाग्रजास्ते सुलभस्थिरायति ।
न यत्र शक्ताः प्रकृतिप्रसादने
कृती त्वमाद्यो नृप तत्र गीयसे ॥३२॥

गुणाभिमानापरतेर्महात्मनो
निरीक्ष्य कूटस्थितिमात्मभारती ।
उपेक्षमाणं प्रकृतिं यदि स्तुते
न कौतुकं तत् पुरुषे परे त्वयि ॥३३॥

विभो ! भवद्राजकरे क्षमावति
प्रजाजनानामसुरक्षिताः श्रियः ।
सहेलमुन्मुक्तधनाऽऽधिबन्धनाः
स्वभावपद्यामनुयान्ति सत्वरम् ॥३४॥

सृजन् तुरुष्कान् नवलानजोपमः
समर्थचक्रीव भरन् स्वधर्मिणः ।
हरन्निवाऽन्यानपरोऽध्वराहितः
त्रिमूर्तिकल्पः किल कल्प्यसे कलौ ॥३५॥

वनायितायामवनौ हुते पुरे
मनस्सु शङ्काकुलितेषु वा सताम् ।
क्रमेण यत् सत्त्ववलं रजश्चयः
तमांसि तत्ते त्रिगुणानुषङ्गिकम् ॥३६॥

सृजन् हरन् हेतुमदिन्द्रियाङ्कितं
विभासमानं जगदस्पृहोऽप्यहो ।
तवौजसा पार्थिवभावगोचरो
विखण्डितः खण्डितबन्धनोऽप्यसौ ॥३७॥

सधर्मदण्डे त्वयि वीतकामनै-
र्निषेविताऽऽर्यैरपि धर्मदण्डता ।
विमुक्तवैधव्यफलोऽङ्गनाजनो
भ्रमन्ति पोताः परदेशभूमिषु ॥३८॥

उपप्लवेऽप्यात्मगुरुत्वरक्षिणा
विलङ्घितोद्दामबले समन्ततः ।
वसुन्धराधारणसंस्तवोऽप्यसौ
गुरुर्गिरीणामधरीकृतस्त्वया ॥३९॥

अपि श्रिया स्वस्थधिया निषेवितान्
न देहलीयं नवलास्यकौतुका ।
चिरस्य चामीकरचारुपीठिनो
निरीक्षितुं संसहते तडिन्मनाः ॥४०॥

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीमतां, न्यायसार्वभौम-तर्करत्न-न्यायाचार्याद्युपाधिकिभूषितानां

पण्डित हरिरामशास्त्रिशुक्ल महादयानाम्

षष्टिवर्षापनमङ्गलोत्सवे

शुभाभिनन्दनाशंसनम्

प्रणमदमर - वृन्दानन्द-सन्दोहसिन्धु - र्भवतिमिरकदम्बध्वंस-पाथोजबन्धुः ।
वटतरुलतवासः प्रोल्लसन्मन्दहासः स दिशतु मतिभाजां मङ्गलं चन्द्रमौलिः ॥

२.

काशीपण्डितमौलिमण्डनमणिर्विद्यार्थिचिन्तामणिः शास्त्राम्भोनिधिमन्थमन्दरगिरिः शीलस्वभावोज्ज्वलः ।
मान्यः श्रीहरिरामशास्त्रिविबुधोत्तंसः समभ्यर्च्यते विद्वद्भिर्वचनप्रसूननिकरैः षष्टिप्रवेशोत्सवे ॥

३.

पुण्याहं महदद्य मोदमधुरं मन्यामहे यद् गुरौ श्रीराजेश्वरशास्त्रिसूरितिलके कल्याणवर्षोत्सुके ।
शिष्यः षष्टिसमाः समानचरितैः प्राप्तस्तदीयं यशःक्षीरोदं निजकीर्तिदुग्धसुरसैरापूरयन्नेधते ॥

४.

श्रीवामाचरणोद्गता परिचिता प्रज्ञावतां धूर्धरैर्नव्यन्यायलता विचारविततां राजेश्वरालम्बिता ।
श्रद्धार्द्रं हरिरामशास्त्रिवचनारामं प्रयाता क्रमात् प्रोद्यन्नूतनकल्पनाफलभरं सूते विदां तुष्टये ॥

५.

स्नाता तर्कतरङ्गिणीरसभरे स्मृत्वाऽथ धर्मस्थितिं मीमांसाकुशलापि दैवतपरा नीतौ च बद्धादरा ।
बुद्धिः शुद्धिमती सहायमधुना लब्ध्वा विवेकं प्रियं प्राज्ञस्यास्य बिभर्ति केलिकुतुकं वेदान्तवाटीपथे ॥

६.

यस्याऽनेकसभासु भासुरधियः शास्त्रार्थचर्चोदये वागारोहति तत्त्वरत्नशिखरं निश्रेणिका श्रेणिभिः ।
साङ्ख्ये साधुविचक्षणोऽपि विगलत्सङ्ख्यैर्गुणैराश्रितः सोऽयं पण्डितमण्डनो भुवि मुदा दीर्घायुरुद्द्योतताम् ॥

७.

कालेऽस्मिन् कुटिलक्रमे कथमपि द्वित्रा पवित्राशया दैवीं वाङ्मयसम्पदं स्वतपसा रक्षन्ति ये धीधनाः ।
मूर्धन्यः किल तेषु सद्गुरुपदाम्भोजानुगामी जनैः सम्मान्यो हरिरामशास्त्रिसुमतिः शिष्यैर्वृतो वर्धताम् ॥

८.

शान्तस्वान्तजुषः समस्तविषयव्याख्यानवाचस्पतेर्जिह्मासुव्रजपक्षिसंश्रयतरोरेतस्य धन्यात्मनः ।
भूयाद् भूरियशोभरेण धवला दिङ्मण्डली प्रत्यहं जीव्यादेष सुखान्वितश्चिरतरं मृत्युञ्जयानुग्रहात् ॥

साङ्गवेद-विद्यालयः, वाराणसी
श्रावणकृष्णा ८, सं० २०२५

—अभिनन्दन-समिति-सदस्याः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri पञ्जीकृतसंख्या एल० १८१७

सूर्योदयस्य नियमाः

पत्र-संहिता

१. 'सूर्योदय'-मासिकपत्रस्य वार्षिकं शुल्कं रूप्यकपञ्चकं वर्तते। धनादेश (मनीआर्डर) द्वारा तत्प्रेषणीयम्। वी० पी० द्वारा प्रेषणे ५० पणाः पृथक् प्रदेयाः स्युः।

२. आवर्षं गम्भीरसाहित्यसमन्विताः १२ अङ्काः प्रकाश्यन्ते। नवीनग्राहकत्वं प्रथमाङ्कतः (जनवरी-अङ्कतः) एव स्वीक्रियते। माध्यमिकेन केनापि अङ्केन ग्राहकत्वं न स्वीक्रियेत।

३. आंग्लमासस्य २६ दिनाङ्के 'सूर्योदयः' प्रकाशितो भवति। वारद्वयं संशोध्य ग्राहकेभ्यः स प्रेष्यते। अतस्तदलाभे पूर्वं स्वकीय-पत्रालयतस्तदनागमनस्य निर्णयं कृत्वैव १० दिनाङ्कानन्तरं वयं सूचनीयाः।

४. लेख-कवितादीनां भाषा संयता, सरला, शुद्धा च भाव्या। प्रकाशनीय-लेखादीनां स्पष्टाक्षरैः कर्गजस्यैकपृष्ठे एव लेखनमावश्यकम्। अस्वीकृता लेखादयः पोस्टविभागीय-चिटिका (टिकट) प्राप्त्यनन्तरं परावर्तयितुं शक्यन्ते।

५. सम्पादकीय-विषयसम्बद्धे पत्र-व्यवहारे 'सम्पादकः' इति, व्यवस्थाविभागीय-पत्रव्यवहारे च 'व्यवस्थापकः' इति च स्पष्टं लेखनीयम्। तेन उत्तरलाभे मुधा विलम्बो न भवेत्।

विज्ञापन-शुल्कम्

सूर्योदये सुरुचिपूर्णं विज्ञापनं प्रकाश्यते। एकवारं तस्य प्रकाशनस्य शुल्कक्रमश्च अधोलिखितोऽस्ति। सार्वकालिकस्य दीर्घकालिकस्य च विज्ञापनस्य कृते विशेष-सौविध्याय पत्र-व्यवहारः कार्यः।

साधारणस्य प्रतिपृष्ठस्य	१००) रु०	साधारणस्य प्रत्यर्धपृष्ठस्य	६०) रु०
साधारणस्य चतुर्थांशपृष्ठस्य	३५) रु०	आवरण-चतुर्थपृष्ठस्य	२००) रु०
आवरण-द्वितीय-तृतीयपृष्ठयोः	१५०) रु०	प्रथमावरणपृष्ठे विज्ञापनं न स्वीक्रियेत।	

—सङ्केतः—

'सूर्योदय'-कार्यालयः, भारतधर्म-महामण्डलम्, जगत्गंज, वाराणसी।

सम्पादकः, प्रकाशकः, मुद्रकश्च—गोविन्द नरहरि वैजापुरकरः,
श्रीभारतधर्ममहामण्डलम्, जगतगंज, वाराणसी कैण्ट।
मुद्रण-स्थलम्—आनन्दकानन प्रेस, सी० के० ३६/२०, वाराणसी।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सूर्योदयः

भारतधर्ममहामण्डलस्य

मासिकं मुखपत्रम्

वर्षम् ८८

अङ्कः १०

सम्पादकः

गो० न० वैजापुरकरः

अक्तूबर

१९६८

वार्षिक-मूल्यम्

५) रूप्यकाणि

प्रत्यङ्क-मूल्यम्

अर्धरूप्यकम्

मत्कृते त्वत्कृपा शरत् !

अधुनाऽपसृता घनावली प्रतिसीरा तु न मे तमोमयी ।
अभवद् गगनं तु निर्मलं भगवन् नो हृदयं तु मामकम् ॥ १ ॥
सुतरां दिवि भान्ति तारका न तु दैव्यो मम हन्त सम्पदः ।
अतिचारु चकास्ति चन्द्रमा न तु रूपं मम सच्चिदात्मकम् ॥ २ ॥
अभवत्सृतयोऽप्यपङ्किला न ममाचारपरम्परा परम् ।
उदितः कलशोद्भवो मुनिर्न तु बोधो मम भेदरोधकः ॥ ३ ॥
सरितः कलयन्ति तानवं विमलत्वं च न वासनास्तु मे ।
सरितां विहरन्ति जीवने पर-हंसा न तु हन्त मामके ॥ ४ ॥
अभवन् प्रतिकूलभेदिनो वृषभा नैव तु धर्मसञ्चयाः ।
फलनम्र - मनोरमाऽधुना वनमाली न तु मे मनुष्यता ॥ ५ ॥
परितः सुविकासमाप्नुवन्निह काशा न तु मे सुखाशिकाः ।
सरसो व्यकसच्च पङ्कजं हतभाग्यस्य न मे तु मानसम् ॥ ६ ॥
अरिवर्ग-जयाय सोद्यमाः क्षितिपाः प्रस्थितिमद्य कुर्वते ।
न तु काममुखक्षयाय मे सुहृदः सौम्यगुणाः शमादयः ॥ ७ ॥
इयमभ्युदिता शरत्प्रभो ! न ममाभीप्सितसाधने क्षमा ।
अत एव मया प्रतीक्ष्यते भवदीयैव दयोत्तमा शरत् ॥ ८ ॥

—श्री माधवप्रसाद उपाध्यायः
(नयपालाभिजनः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अनुक्रमः

प्रपानकम्	पत्रपुटम्	परिवेषकः
गोविन्दनामा भव	२३३	श्री कवि कर्णपूरः
श्री महर्षि-ज्ञानानन्द-चरितम्	२३४	श्री विन्ध्येश्वरीप्रसाद शास्त्री
ोषमः प्र च्यविद्या-सम्मेलनस्य फलश्रुतिः	२३५	सम्पादकीयम्
(४६) क्षत्रपति-महाकाव्यम्	२३९	श्री उमाशङ्कर शर्मा त्रिपाठी
मानस-भारती	२४०	श्री जनार्दन गङ्गाधर रटाटे
विद्या-धर्मनिधिः काशी, काशिराज-वंशश्च	२४१	श्री काशिराजाः विभूतिनारायणसिंह देवाः
प्राच्य-विद्या-शाखानां सुरुचिरं पथ-प्रदर्शनम्	२४५	श्री आदित्यनाथ झा महाभागाः
किमपि वैदिकं वचो नानर्थकम्	२५१	श्री गोविन्द नरहरि वैजापुरकरः
श्री मोहनदासः (गीतम्)	२५५	श्री रामनाथ पाठकः 'प्रणयी'
(३) कर्मणो गहना गतिः	२५६	श्री रामदास कौण्डिन्यः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सूर्योदयः

रागद्वेषनिशाटनं विधुरयन् मोहं तमो नाशयन्,
तामिस्रं जडवादकैरवकुलं ज्ञानत्विषा ग्लापयन् ।
विद्वत्कोकमशोकयन् नयसुधीरोलम्बमुन्मीलयन्,
सज्ञातः सुमनोमनो मधुरयन् सर्वत्र सूर्योदयः ॥

४४ वर्षं] वाराणसी, आश्विनः, २०२५ : अक्तूबर, १९६८ ई० [१० अङ्कः

गोविन्दनामा भव !

श्री देवराज उवाच—

त्वमसि सकललोकनाथनाथो व्रजपुरनाथसुतः स्वतः स्वतन्त्रः ।
महमहितमहामहत्त्वतत्त्वस्तव महिमा नहि मादृशैर्विगाह्य ॥ १ ॥
निजमदमदिरामुदा मदान्धाः कथमय ते महिमानमामनन्तु ।
प्रकृतिकृतविकारदृष्टिदोषा द्युमणिरुचो न विलोकयन्ति घूकाः ॥ २ ॥
अथ मदमदिराविनष्टदृष्टेरयमुचितो मखखण्डचण्डदण्डः ।
पुरुकरुण सुदण्ड एव पथ्यो हतजनुषां जनुषान्धमण्डलानाम् ॥ ३ ॥
उपकृतमिदमेव मे त्वया यत् पुरुकरुणावरुणालयेन देव ।
अपकृतमिति तन्मया विबुद्धं प्रकृतिखलाः किल विप्रतीकबोधाः ॥ ४ ॥
अपि गतरजसं रजो धुनीते विषयविषामिषलालसान् किमस्मान् ।
कथयितुमथवा मदः कथं स्यात् प्रभवति चेत्तव दुर्नया न माया ॥ ५ ॥
जय जयद जगत्त्रयैकसार व्रजपुरमङ्गल मङ्गलावतार ।
निरुपम-गुणनामधाम दामोदर वसुदामसुदाम-दामबन्धो ॥ ६ ॥
दुरवगम नमो नमो न मोहं पुनरुपपादय देव नो दयस्व ।
सुघटविघटनाय दुर्घटस्यापि च घटनाय भवन्ति ते कटाक्षाः ॥ ७ ॥
अभव बहुभवोंऽशतः पुरा त्वं विबुधमुदे कुतुकादभूरुपेन्द्रः ।
स्वयमयमधुनोक्षितः सुरभ्या भव सकलेन्द्रशिखेन्द्रनीलनीलः ॥ ८ ॥
गोविन्दे त्वभिरामनाम यदपि प्रागेव सिद्धं सदा
गोलाभादथ गोविचारकतया शश्वद् गवां सत्तया ।
गोपेन्द्रात्मज भोस्तथापि भगवन्नद्याऽभिषेकोत्सवे
श्रीगोवर्धन-भूधरेन्द्रधर हे गोविन्दनामा भव ॥ ९ ॥

—श्री कवि कर्णपूरः ।

आनन्दवृन्दावन-चम्पूः
१५.२७३–८१

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्री महर्षि-ज्ञानानन्द-चरितं महाकाव्यम्

—श्री विन्ध्येश्वरीप्रसाद शास्त्री—

तीरे यदीये शिव-शम्भु-रुद्र-प्रासादवर्गा विलसन्ति शुभ्राः ।
शस्त्रालयः सङ्ग्रहसद्म रम्य-ग्रन्थालयश्चापि चकासतेऽत्र ॥ १०१ ॥

१०२. गुलाब - बागेति सुनामधेयं
सुदीर्घमुद्यानमिदं विचित्रम् ।
सिञ्चन्ति यन्त्रेण पयोधरस्थै-
र्घटैः शिलानिर्मित-वारवध्वः ॥

१०३. मध्येजलं पेयपयः पिचोला-
सरोवरस्या-ऽद्भुत-मन्दिराणि ।
उद्यानवद्-भूमि-समन्वितानि
बहूनि राजन्ति लताञ्चितानि ॥

१०४. एषां जगन्मन्दिर-नाम्नि सौधे-
ऽवरङ्गजीवस्य वरेण्य-तातम् ।
मेवाड़-राज्याधिपति-स्तदानीं
नृपं जहाँगीरमहो स्वरक्षीत् ॥

१०५. फतेहनाम्नोऽपि च सागरस्य
तटस्थितानामपि भूधराणाम् ।
उपर्यमी नीमच-मातृ-सौधा
लसन्ति ये दुर्गम-दर्शनीयाः ॥

१०६. दुर्धर्ष-तत्सागर-पूर्वभागे
ह्युद्यानमास्ते रुचिरं सखीनाम् ।
मनोज्ञ-सर्वर्तु-सुखाकरं तद्
विचित्रितं शिल्पकलास्वभिज्ञैः ॥

१०७. अत्रत्य-सद्गुल्म-लता-सुमानां
मनोहराणां विविध-द्रुमाणाम् ।
संसार-पान्थाक्षिकलाप-चौरा
राजन्ति चित्राः शुभसन्निवेशाः ॥

१०८. संविश्रुते श्रावण-भाद्रनाम्ना
कला-प्रपूर्णा-ऽद्भुत - वारियन्त्रे ।
सञ्चालनादेव ययोर्मनुष्यै-
र्वर्षर्तु मोदः स्वनुभूयतेऽत्र ॥

१०९. फतेह-सत्सागरतो वरेण्य-
सम्बन्धसत्त्वादुभयोः सदैव ।
सञ्चालने नास्ति च कापि बाधा
साधारणी कालकृता कदाचित् ॥

सहस्रशः प्रस्तरनिर्मितानां - मनन्त - पक्षीन्द्र - महाद्विपानाम् ।
बम्भ्रम्यमाणैः किल चञ्चुशुण्डैर्यन्त्राश्रितैस्तैः क्रियतेऽम्बुदृष्टिः ॥ ११० ॥

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ऐषमः प्राच्यविद्यासम्मेलनस्य फलश्रुतिः

अक्तूबरमासस्य विगतेषु द्वादश-त्रयोदश-चतुर्दश-दिनाङ्केषु वाराणसेय-संस्कृत-विश्वविद्यालये अखिलभारतीय-प्राच्यविद्यासम्मेलनस्य चतुर्विंशतितममधिवेशनं महता समारम्भेण सम्पन्नम्। आध्यक्ष्यमस्य होशियारपुरस्थ--'विश्वेश्वरानन्द-वैदिक-शोधसंस्थान'-सञ्चालकैः डॉ० विश्वबन्धु-शास्त्रिपादैः कृतम्, ये हि कारणविशेषेणात्र समुपस्थातुं न प्राभवन्। तेषां मुद्रितं बृहदाकारं (२८ पृष्ठात्मकम्) राष्ट्रभाषानिबद्धमभिभाषणं तत्रस्थैरेव कैश्चित् प्राध्यापकैः श्री अग्रवालमहोदयैः संश्रावितम्। अधिवेशनस्य सञ्चालनं समारोपश्च पुनः विगत-सम्मेलनाध्यक्षैस्तत्रभवद्भिः डॉ० आदिनाथ नेमिनाथ उपाध्ये महाभागैर्निर्व्यूढम्। प्रधानस्य सम्मेलनस्य वृत्तम्, प्रमुख-भाषणानि, शाखासम्मेलनानां संक्षिप्तं विवरणम्, निबन्धानां पाठः, अन्यानि च रूपक-संगीताद्यात्मकानि प्रासङ्गिकान्यायोजनानि वृत्तपत्रे बहुशः प्रकाशितानि तत एवाऽवसेयानि। अत्र पुनर्निखिलादस्माद् आयोजनात् प्राच्यभारतीप्रणयिना प्रत्यक्षदर्शिना तटस्थेन यत् के अपि सारस्य-वैरस्ये, उपलब्ध्यनुपलब्धी, आवर्जकता-निरावर्जकते वा समासादिते, तत्सर्वं पाठकानां विचारकाणां पुरः समुपस्थाप्यते। तत्रापि क्रमशो बहिरङ्गमन्तरङ्गञ्च परिशीलनं प्रस्तूयते।

तत्र बहिरङ्गपरीक्षणे सम्मेलनस्य अनन्यसाधारणी उपलब्धिर्नाम प्रचुरसंख्यया संस्कृते राष्ट्रभाषायां वा निबन्धानां पाठो वक्तृणां प्रवचनानि च। अद्यावधिकेषु सम्पन्नेषु सम्मेलनेषु बाहुल्येन प्राधान्येन वा आंग्लभाषामयान्येव एतानि जायन्ते स्म। नूनमेतत् प्राच्यविद्यासम्मेलनस्य कृते श्वित्रायितम्। यद्यस्मिन् सम्मेलने सर्वस्य कार्यजातस्य माध्यमं संस्कृतं न भवेद्, दूरे तिष्ठन्तु संस्कृतभाषाप्रचारस्य सुखस्वप्नाः। वस्तुतोऽत्र जायमानं सर्वमपि कार्यं केवलया गीर्दीगिरेः समनुष्ठेयम्। येषां न तदवबोधस्तेषां कृते कियत्कालमनुवादरूपेण अपरापि काचन भाषा समनुग्रहीतुं शक्यते। तत्रापि प्रथमतो राष्ट्रभाषा हिन्दी, ततः परमेव आंग्लभाषा। अत्रान्तरे तः संस्कृतभाषायां प्रावीण्यमासाद्य स्वाधिकारह्रासकरो न्यूनतेयं क्षिप्रं परिपूरणीया। अहो कष्टम्! रामभद्रवत् जनमतेन राष्ट्रभाषापदे समभिषेक्तुं सज्जीकृतायामस्यां संस्कृतभाषायां मन्थरायमानया सभाध्यक्षविशेषसम्मत्या विवासितेयं साध्वी चतुर्दशवर्षतोऽप्यधिकं विंशतिवार्षिकं वनवासमद्यापि समुपभुञ्जन्ती समवतिष्ठते। शासकीय-त्रिभाषा-सूत्र-कामरूपेण दशकन्धरेण कन्धरे बलात् समुपावेश्य अपहर्तुमपि समुपक्रम्यते। सत्येवं प्राच्यविद्यासम्मेलनकल्पो हनूमानेव वैदेहीमिमां समुज्जीवयितुं प्रभुरिति मत्वैव साग्रहमिदं वचमः।

सम्मेलनमिदं प्राच्यविद्यानां तद्विदाञ्च आसीत्। सुविदितचरा किल तासां कापि चिरन्तनी आदर्शमयी सभ्यता स्वागते, उपवेशने, भोजने, विहरणे विभिन्नजीवनाचारविषये च। यदि नाम सम्मेलनेन सर्वेष्वेषु विषयेषु कोऽप्यादर्शो न समुपस्थाप्येत, कथं नाम प्राकृताः सामान्यजनास्तेन परिचिता भवेयुः? विषयेऽत्र क्षेत्रीयाधिवेशनसंयोजकानामपि दायित्वं प्राच्यविद्या-मातृगृहभूताया वाराणस्याः शिरसि अतितरां विजृम्भते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्मेलनमिदं तेषामतिथिभूतमासीत्। यदि काशिकाधिवेशनेन सा लक्ष्मणरेखा समुल्लिखिता स्याद्, भाविनोऽधिवेशनस्य कृते तल्लङ्घनं दुश्शकं भवेत्। दृशाऽनया विविच्यमाने वाराणसेय-संस्कृत-विश्वविद्यालयेन (यस्य किल अतिथिभूतमासीत् सम्मेलनमिदम्) यावत्प्रयतितम्, किं तत् पर्याप्तं सन्तोषावहम्, आदर्शरक्षणे सावहितं वा वक्तुं शक्येत ?

महता दुःखेन वक्तव्यं भवति यत्सम्मेलनात् पूर्वं प्रत्येकशः काशिक - संस्कृत - महाविद्यालयतः प्रत्यध्यापकम् आर्थिकसाहाय्यं सम्मेलन-सञ्चालनाय मान्यतमैः विश्वविद्यालयाधिकारिभिस्तत्र तत्र गत्वा सङ्कलितम्। परं निमन्त्रणसमये तपस्विनस्ते प्राध्यापकाः सर्वथा विस्मृतास्तैः। फलतो नैके मान्या विद्वांसोऽनाहूतास्तत्र सम्मिलितुं न प्राभवन्। अभूतपूर्वमिदं स्वागत-संयोजनम् ! उपवेशनादेः समपेक्षित - वृत्त-विषयसूचनादीनां आदानप्रदानादेरपि कीदृशी आदर्शायिता व्यवस्थासीत्, सम्बद्धा अधिकारिणः अतिथीनामेतद्विषये कीदृशं साहाय्यं विदधत आसन्नित्यपि न विशेषतश्चर्चास्पदम्। भुक्तभोगिनो जानन्त्येवैतत्। स्वयंसेवकपदवाच्यास्तु बहव आसन्, परं सर्वोऽपि तेषां व्यवहारः कस्यचन अधिकारिणोऽनुकृतेः नातिरिच्यते स्म।

प्रतिनिधीनां विदुषां भोजनस्यापि यादृशी व्यवस्थाऽक्रियत, कथमपि सा भारतीय-परम्परामनुगृह्णन्ती न वक्तुं शक्या। इदमपि श्रूयते यत्तत्र प्रत्यग्रतमा पाश्चात्त्य-भोजनप्रणाली (स्वस्वहस्तेन खाद्यवस्तून्यादाय परिक्रमणपूर्वक - भक्षणरूपा) प्रयुक्ताऽभवत्। यद्येतत् सत्यम्, किमतः परं प्राच्यविद्यासम्मेलनस्य कृते विधुरम् ? अलीगढ़सम्मेलने समतीते किं संवृत्तमित्यस्यात्र कथैव न प्रस्तूयते। वाराणसी विषये तत्रापि 'काशिक-राजकीय-प्रधान - संस्कृत-पाठशाला' - प्रतिनिधिभूतस्य वाराणसेय - संस्कृत-विश्वविद्यालयस्य कृते एवैतदुच्यते। गतो वर्णो गत आश्रमो गता च भारतीया वैदिकी संस्कृतिः रसातले !

काशिक-सांस्कृतिक-पीठानां यात्रा-पर्यवेक्षणविधावपि कियन्तः काशिका अपूर्वा देवालयाः, तीर्थस्थानानि, श्रद्धाकेन्द्राणि च प्रदर्शितानि तदायोजकैरिति त एव जानन्तु। समासत इत्थमधिगम्यते बहिरङ्गपरीक्षणेन अधिवेशनस्यास्य फलश्रुतिः। अतिथिरूपेण समागतेन एकेन शार्मण्येन संस्कृतमस्खलद्वदता विदुषा अस्मन्मित्रमुक्तं यद् 'वयं संस्कृतविद्या - मातृगृहे समायोजितमधिवेशनं द्रष्टुं महता औत्सुक्येन समागताः। परं तत्रास्माभिर्न नावीन्यं दृष्टमस्मत्संस्कृतिदृष्ट्या। न च भारतीय-सांस्कृतिक-मूल्यानां स्फुटं दर्शनमभवत्। प्रायोऽस्मदीयाया एव प्रणाल्या अवशेषात्मकाः प्रकारा दृष्टाः।' इयमस्ति बहिरङ्गदृष्ट्या सम्मेलनस्य फलश्रुतिः।

अन्तरङ्गपरीक्षण-दृष्ट्या विचार्यमाणे केवलं भाषणानां बाहुल्य दृष्टिपथमुपागतम्। निबन्धपाठानामपि एवमेव स्थितिरासीत्। आन्तरशाखागोष्ठीषु नूनं नैके महत्त्वपूर्णा निबन्धाः संश्राविता-स्तैस्तैः अन्वेषणधुरीणैः। परं तेष्वपि प्रायः पाश्चात्त्यपरिकल्पित गवेषणप्रणालीनां धारणानां चैव पिष्टपेषणं दृष्टिपथं समुपागतम्। प्राच्यभारतीयगवेषणविधीनां समुन्मेषो विस्तरः प्रोत्साहनं वा सम्मेलने नूनमावश्यकमासीत्।

प्राच्यविद्यानां प्राचीनपरम्परानुरूपा शास्त्रार्थविचारप्रणाली अन्ततः प्रतीकरूपेण समनुगृहीता सम्मेलनेनेति नूनमभिनन्दनीयं वस्तु। वस्तुत इयं शास्त्रार्थसंस्था संप्रति परां ह्रासपदवीमुपेयुषी दरीदृश्यते। 'वादे वादे जायते तत्त्वबोधः' इति

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हि सर्वतन्त्रसिद्धान्तः। स च शास्त्रीयलक्षणलक्षित एव भाव्यः, तदैवास्य फलस्य तत्त्वतः समुपलब्धिः। सम्मेलनेन संस्थाया अस्या समुज्जीवनायालं प्रयतनीयं विद्यते।

सम्मेलने स्वागताध्यक्षाणां दिल्लीप्रदेशोपराज्यपालानां श्रीमदादित्यनाथ झा महाभागानां सम्मेलनाध्यक्षाणां श्री विश्वबन्धुशास्त्रिणां च भाषणे नूनं समुल्लेख्ये। स्वागताध्यक्षाणां भाषणमिदं सम्मेलनावान्तरशाखानां सर्वासां समीक्षणपुरस्सरं समुपयुक्तानामनेकेषां महत्त्वपूर्णोपायानां संसूचकमासीत्। तत्तच्छाखाविषये तैर्ये ये अनुष्ठेया उपायाः प्रस्ताविताः, तैरस्माकं भूयसा संवादो वर्तते। विशेषतो धर्मशास्त्रशाखाया असमावेशेन सम्मेलनस्य महती न्यूनतेति यत्तैः समुद्घाटितम्, तत्सर्वथा विचारणीयम्। अनुकरणेन च पूरणीयेयं क्षिप्रतरं न्यूनता।

धर्म-दर्शनयोर्जीवने समनुष्ठेयत्वाग्रहोऽपि तेषामतितरां महत्त्वपूर्णः। सम्प्रति तु 'कलौ वेदान्तिनः सर्वे' इव सर्वत्र महत्तरा आदर्शाः तैस्तैः गीयन्ते। कार्यविधौ पुनस्तेषां लेशोऽप्यनुगृह्यते न वेति सुस्पष्टं तटस्थानां—साम्प्रतं विद्वत्समवाये, विशेषतः संस्कृत-विद्वत्समवाये सङ्कुचितभावनाऽनुचितपक्षपातसङ्कुल-कर्तव्यपथविमुखताऽनौदार्यादिकमाकलयताम्, यच्च तादृशादर्शायिते जीवने तमःप्रकाशवत् कथमपि सामानाधिकरण्यं न भजते।

नारी-शिक्षाविषये तैर्यावदुक्तम्, तदल्पमेव। विषयोऽयं सर्वथाऽस्माभिः प्राच्याविद्यानुरागिभिरवधेयः परिपोष्यश्च। प्राच्यविद्यासु विशेषतः संस्कृतविद्यायां तत्रापि सातिशयं धर्म-दर्शनक्षेत्रयोः भारतीयनार्यो यदैव निरतिशयं प्रावीण्यमासादयेयुस्तदैवाद्य अस्माकं भारतीया संस्कृतिः सुस्थिरा भवित्री। नार्यः किल स्वभावतो धर्मभीरवो भावुकाश्च। पुरुषाः पुनर्वैदेशिकसंस्कृतिभिरद्य भृशमभिभूताः प्रायो भावनलेशेनाप्यसंस्पृष्टाः दुस्तर्कवितानं वितन्वते। निसर्गत आत्मसमर्पणरसज्ञास्ता यदि प्राच्यभारतीयविद्याभिः सुशिक्षिता दीक्षिताश्च विधीयेरन्, तदा पुनस्ताः स्वबालकान् शैशवादेव तैः संस्कारैराहितान विधास्यन्ति। आमे च भाण्डे संक्रामिताः संस्काराः सुस्थिरा भवन्तीति सुस्पष्टमेव विज्ञानाम्। तासां प्राच्यविद्योन्मुखीकरणेन पाश्चात्त्य-नवशिक्षा-दीक्षाविषवल्लीत्स्तासां परिरक्षणमर्थादायाति। अतो नारीणां प्राच्यविद्याशिक्षणं यावत् शीघ्रं फलेग्राही भवेत्, तावान् प्रयासो विधेय इत्यस्माकं दृढा मतिः।

सम्मेलनाध्यक्षेण स्वीये भाषणे प्रमुखतः वेदशास्त्रविषये अद्यावधि सम्पन्नानां सर्वासामेव अनुसन्धान-प्रकाशनादिप्रवृत्तीनां संक्षिप्तोऽपि मार्मिक ऐतिहासिकक्रमानुसारी परिचयः सविस्तरं निरूपितः। विशेषतः स्वकीय-संस्थान (विश्वेश्वरानन्द वैदिकशोध-संस्थान)-प्रकाशितानां ग्रन्थानां मूल्यमापनं विहितमास्ते। ततः परं प्राच्यविद्याया विभिन्नशाखानां विषयेऽद्यावधि याः प्रगत्यः सम्पन्नाः, ये च संशोधनाऽनुसन्धान-प्रकाशनादयो जाताः तेषां समासतः समीक्षणं कृतम्। इत्थं स्वपदानुरूपं सर्वेषां विषयाणां तात्त्विकमाकलनं पुरः प्रस्तुत्य तैः संस्कृतभाषाविषये वर्तमान-केन्द्रीयशासनस्य अनपेक्षिता उपेक्षा, प्रतिरोधभावश्च पर दुर्भाग्यपूर्णो निर्दिष्टः।

त्रिभाषा-सूत्र-योजनां संस्कृतभाषा-प्रसारस्य कृते महत्तराभिशापायितां निर्दिशद्भिस्तैरुक्तं यद् यदा राष्ट्रियाखण्डतां स्थापयितुं सर्वाणि साधनानि सर्वाः शक्तयश्च संभूय नियोज्यास्तदा सर्वथा राष्ट्रैक्यसाधनसूत्रं संस्कृतमेव विताड्यते। संवि-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

धान-निर्माणकाले सहजत एव भाषाया अस्या राष्ट्रैक्यसाधकत्वं प्रतिनिधीनां समसंख्यमतैः प्रादर्शितम्। यदि तत्कालीनसभाध्यक्षैः स्वीयं विशेषमतं नोपयुक्तं स्यात् तदा नूनमियमेव देववाणी सम्प्रति राष्ट्रभाषापदमलङ्करती दृष्टिपथं समुपागता स्यात्। तदाऽस्याः सुबहु समुन्नयनस्य नैकान्याश्वासनानि दत्त्वा तत्कालं शासकैः प्रतिनिधीनां मनस्तोषः कृतः। इदानीं पुनस्तदाश्वासनं विस्मार्यते। किमतः परं विक्षोभकर देववाणी-प्रणयिनाम् ?

सम्मेलनाध्यक्षस्य एतद्विषयक-प्रक्षुब्धसंसूचनस्य इदमेव तात्पर्यमस्माभिराकलितम्। भारतशासन सावहितं विचार्य एतद्विषयिणीं स्वीयां साम्प्रतिकीं नीतिं संशोध्य संस्कृतसमुन्नयनाय प्रयतिष्यतीति दृढं विश्वसिमः। यतो हि मानवो मूलतः प्रामाणिको न्यायकारी च भवतीति हि प्रत्नानामनुभवः।

इत्थं समासतः प्राच्यविद्यासम्मेलनस्य अन्तरङ्गदृष्ट्याऽपि फलश्रुतिरस्माभिराकलिता। नूनं सम्मेलनस्य सङ्घटनं महत्त्वपूर्णम्। अद्यावधि तेन विषयेऽत्र बहु कृतम्। सम्मेलनमुत्तरोत्तरं वर्धापयितुमादित एव कृतभूरिश्रमाः सुगृहीतनामधेयाः डॉक्टर दाण्डेकर महाभागाः (पुण्यपत्तनस्थ-भाण्डारकर-गवेषणसंस्थान-सञ्चालकाः) नैकशः साधुवादार्हाः, यैरेतादृशं सर्वथा न केवलमखिलभारतप्रतिनिधिभूतम्, अखिलविश्वप्रतिनिधिभूतमपि बहुशः सङ्घटनमिदं कृतम्। तथापि अद्यावधि सम्मेलनस्य यादृशः कार्यक्रम आसीत्, तत्र समयानुरूपः परिष्कारः सर्वथा समपेक्षित इत्यस्माकं दृढं मतम्। देशस्य पारतन्त्र्यकाले सङ्घटितेन इदानीं पूर्णयौवनमासादितवता सम्मेलनेन भारतीयसंस्कृतिसंरक्षणविषये, विशेषतस्तदाचारशाखारक्षणे दृढमवधेयम्। स्पष्टमेव यत् प्राच्यविद्यासु संस्कृतमेव प्रमुखतरम्। अतः संस्कृतस्य समुन्नयनाय तदुपासकसमाजस्य सुपरिष्कृत-समुन्नयनपथानुसारिप्रगत्याः व्यवस्थायाश्च स्थापनायापि प्रयतनीयम्। सुस्थितेऽस्मिन् समाजे प्राच्यविद्या अपि नूनं सुस्थिता भवेयुः।

तैः स्वीयकार्यक्रमे पाश्चात्यसंस्कृतिसमुन्नयने सहायकाः तत्संस्कृतिप्रभावप्रभाविताः कार्यक्रमास्तथा न पोष्याः, यथा भारतीयप्राचीनसंस्कृतिसमुन्नायकाः। क्रमशोऽस्यां दिशि तैः पूर्णमनोयोगेन पूर्णश्रमेण च प्रयतनीयम्। अत्र विषये वर्तमानानां तत्सञ्चालकानां यावत् दायित्वं ततोऽप्यधिकं प्राचीनसंस्कृति-पक्षपातिनां विदुषामपि वर्तते। तैरस्य सङ्घटनस्याधिकाधिकं सदस्यैर्भूत्वा स्वीयाभिलषित-साधनाय प्रयतनीयमित्येव तेषां कृतेऽस्माकं सङ्केतः। असहयोगकरणं स्वात्मीयेषु न शोभते। स्वपक्षनिष्ठजनानां तत्र बाहुल्येन समावेशं कृत्वा स्वोद्दिष्टसाधनमेव विषयेऽत्र राजमार्गः। आशास्महे यदागामिनि यादवपुराधिवेशने प्राचीनसंस्कृतिप्रणयिनो विद्वांसोऽत्र दृढमवहिता भूत्वा सम्मेलनं शत-सहस्रशाखं विधाय तद्द्वारा यथार्थतो भारतीयसंस्कृति-समुन्नयनकार्यं साधयिष्यन्तीति कृतं पल्लवितेन।

★

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्षत्रपति-महाकाव्यम्

—श्री उमाशङ्कर शर्मा त्रिपाठी—

[आंग्लभाषा-प्राध्यापकः—काशी-विद्यापीठम्, वाराणसी]

विपन्ननाथां महिषीमसंश्रयां
द्विषोऽभिरक्षन्निमित्तबान्धवः ।
द्विषद्भिरात्तावसरैर्जितोऽपि यो
दिवं जयत्येव सदात्मसम्पदा ॥ ६५ ॥

अनाप्त-कैशोरपदोऽपि लीलया
धनाऽऽधिकम्पामचलाञ्चलाश्रये ।
उवाह यः शोणनिभः सुखस्थिरा-
मकब्बरोऽसौ यशसाऽजयद्दिवम् ॥ ६६ ॥

यदीय - दैनन्दिन - कृत्यपद्धतिः
प्रमाणसन्धामभजद् धराभृताम् ।
विधिर्यथाऽन्तःकरणैकसाधनो
ननन्द सिद्धिं स हठादिवोत्सुकाम् ॥ ६७ ॥

सदार्जवाश्वस्तमनोरथो जन-
स्तमेकबन्धुं स्वगुणानुबन्धनैः ।
भृशं सिषेवेऽहिमदीधितिं यथा
प्रकाशितात्मक्षपितक्षपाक्षणम् ॥ ६८ ॥

सदार्यवर्यः स तुरुष्कमण्डनो
गुणैकपात्रं विजयेन्दिरावरः ।
प्रजाजनाऽन्तःकरणेष्वकल्पयत्
स्वराज्यसत्तां न तु दण्डनीतिषु ॥ ६९ ॥

वसुन्धरा विस्मृतपूर्वदुर्गतिः
स्वनामसाफल्यमवाप सुप्रजा ।
धुरं दधाने सहजानुवर्तिनी
ननन्द भूपे प्रकृतिस्तथाविधम् ॥ ७० ॥

तवाभ्रवंश्यप्रणयाभिषिञ्चितं
प्रजाहितस्वादुफलं स्तवोच्छ्रितम् ।
विभो कथं राष्ट्रतरुं भवन्मतिः,
छिनत्ति दुर्दण्ड-कुठारदुर्णयैः ॥ ७१ ॥

स्वयं सशङ्कः किमु शङ्कसेऽनिशं
जनान् सुधारोपितसाध्वसाश्रयैः ।
अहिभ्रमाच्छ्रीचपलाञ्चलं जहत्
खरं वताऽऽरोहसि वाजिसम्भ्रमात् ॥ ७२ ॥

धराऽपभिक्षा प्रकृतिः सविप्लवा
पराजयाङ्का ध्वजिनी हृतं यशः ।
समं तुरुष्कैर्विलपन्ति हिन्दवो
दवाग्निदग्धे तव राज्यकानने ॥ ७३ ॥

तव प्रतीपव्यवहारबृंहित-
प्रचण्डझञ्झानिल-धूतसंहतिः ।
समूलमुन्मूलनमेव साध्यतं
प्रतीक्षते राज्यतरुः क्षतान्तरः ॥ ७४ ॥

विकत्थमानो बहुधा मदोन्मदो
विकल्पयत्यात्मजितं जगत्त्रयम् ।
जनेश तत् स्वास्थ्यमुपैतु सत्वरं
व्यपाश्रिताध्यासतमा मतिस्तव ॥ ७५ ॥

प्रजापतेर्लोकहिताय शासनं
यथाहितध्यानभरं तवानघ ।
अवश्यमार्यं - रुरीकरिष्यते
जिजीविषायै 'जजिये'ति पद्धतिः ॥ ७६ ॥

विधिप्रयुक्तेन पथाऽपि निन्द्यते
यथा कुपात्रे किल दानसत्क्रिया ।
व्यपेतलोकाऽभ्युदयं तथा प्रभो
न शासनं पौरुषमात्रमिष्टदम् ॥ ७७ ॥

यमन्तिमस्वाप - निरुद्धचक्षुषं
निरीक्ष्य दूरादपि कम्पितोरसः ।
तमेव रौद्रं यदधिक्षिपन्ति ते
द्विषद्विपस्तत् शठपाशवश्यता ॥ ७८ ॥

मदोत्कटोन्मादविजृम्भितालसा
विशाम्पते मोहनिशाऽऽर्यचेतसाम् ।
प्रतीक्षते त्वन्मुखपीतिमेन्दुना
सहास्तवेलामचिरं शिवोपसे ॥ ७९ ॥

कथन्नु व्यक्तिक्षणरागचालितं
पतेज्जगद्यानमिवा - ऽन्धगह्वरे ।
स्वमानदण्डेन विलङ्घतां गिरिं
विहाय वल्मीकमहो पिपीलिकः ॥ ८० ॥

---

१. मेवाड़महिषीं रानीकर्मवती दुर्दिने हुमायूनाम्ना अकब्बरपित्रा शत्रुभ्यो रक्षिता ।
२. अकब्बरो मुगलनृपः यशस्विसूधन्यो दिल्लीशतेषु ।

CC-0 In Public Domain. Gurukul Kangri Collection, Haridwar

(क्रमशः)

Digitized by Arya Samaj Foundation Chennai and eGangotri

मानस-भारती—देवगिरा गुम्फितं मानसम्

—श्री जनार्दन गङ्गाधर रटाटे—

[एम० ए०, साहित्याचार्यः]

शृगालका विराविणः पिशाचभूतजातयः ।
विनायकाश्च मूर्धसु सुतालमाचरन्त्यदः ॥
अनेकयोगिनिस्त्रियः समाचरन्ति नर्तनम् ।
लुनन्ति चण्डमूर्तयो रघूत्तमस्य सायकाः ॥
अनेकवीररक्षसामुरो भुजौ शिरांसि च ।
कवन्धका निपातिता वदन्ति गृह्यतामिति ॥ १ ॥

भटान्त्रकोणहस्तकाः प्रधाविनः पिशाचकाः ।
तदन्यकोणधारिणस्तथोच्छलन्ति गृध्रकाः ॥
रणे पुरीव बालकाः समुच्चयन्ति गुड्डिकाः ।
हतास्तथा पलायिता अनेकशो भटा मृधे ॥
परे विदीर्णमूर्तयो व्यथाकुला रवन्त्यपि ।
विलोक्य सैन्यमातुरं समाययुः खरादयः ॥ २ ॥

शरांस्तु शक्तितोमरौ कृपाणपर्शुशूलकान् ।
सहैव राघवे रुषा क्षिपन्त्यसङ्ख्यराक्षसाः ॥
प्रभुः शरान् निवार्य तान् निमेष एव रक्षसाम् ।
सभाह्वयन् परांस्तदा ववर्ष राघवः शरान् ॥
मितांश्च दिग्भिराशुगान् उरस्यदो रघूत्तमः ।
अनीकिनीशरक्षसां समत्यजत् तदा रणे ॥ ३ ॥

पतन्ति भूतले भटाः पुनः समुत्थिताश्च ते ।
मृता न युद्धतत्पराः प्रकाशयन्त्यतिच्छलम् ॥
दृव्यगान्सहस्रसङ्ख्यकान्सुरा विलोक्य राक्षसान् ।
तथैकमेव राघवं भयाप्लुतास्तदाऽभवन् ॥
सुरानृषींश्च राघवः सभीतिकान् विलोक्य तु ।
चकार मायिकः प्रभुः कुतूहलं महद् यथा ॥
परस्परं निशाचरा निभाल्य रामरूपिणम् ।
नियुद्ध्य हस्ततः स्वकाद् विनाशमापुरुत्कटम् ॥४॥

२० (क)

त्यजन्ति देहं मुखतस्तु रामो
रामोऽयमित्थं वचनं वदन्तः ।
रात्रिञ्चरा मुक्तिपदं लभन्ते
कृपानिधिस्तान् निजघान युक्त्या ॥

२० (ख)

वर्षन्ति पुष्पाणि नदन्ति भेर्यः
सुरास्तदानीं स्तुतिमाचरन्ति ।
संस्तूय रामं मुदिता ययुस्ते
शोभा भजन्तो विविधैर्विमानैः ॥

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विद्या-धर्मखनिः काशी, काशिराज-वंशश्च

— डॉ० श्री विभूतिनारायणसिंहदेवाः—

[काशिराजाः, रामनगरदुर्गम्]

[चतुर्विंशतितम-प्राच्यविद्यासम्मेलनस्य स्वागताध्यक्षपदेन कृतेऽस्मिन् स्वागतभाषणे श्रीकाशिराजेन वाराणस्या विद्या-धर्मक्षेत्रयोः अनन्यलभ्यं गौरवं समासतः प्रदर्श्य काशिराजवंशस्य तत्र योगदानमपि सूत्ररूपेण चर्चितम् । यावतांऽशेनैतत् प्रकटीभवति, तावानंशस्तेषां भाषणस्यास्य साभारमत्र प्रकाश्यते ।

—सम्पादकेन]

विश्वस्मिन् नेदृशी काऽप्यन्या नगरी, या त्रिकण्टकविराजिताया: काश्याः प्राचीनतमा जनतायाश्च श्रद्धानिबन्धनी भवेत् । काश्या नामोच्चारणमपि हिन्दूनां हृदये महान्तं प्रेमभरमाविष्कुरुते । धार्मिकपवित्रताया: शास्त्रीयपाण्डित्यस्य चाक्षुण्णं प्रवहन्तं सम्प्रदायं प्रकटयन्ती वाराणसी विश्वेषामार्यजनानां हृदि प्रभूतां श्रद्धामुत्पादयति । जैनानां बौद्धानां चापि कृते एषा पवित्रतामावहति । जैनधर्मस्य तीर्थङ्करेषु उपान्तिमस्तीर्थङ्करः श्रीपार्श्वनाथः काश्यामेव जन्म लेभे, निखिलान् जनसन्तापान् दूरीकर्तुञ्च इत एव स्वीयमहिंसासन्देशं प्रचारयामास । चीनदेशे जापाने ब्रह्मदेशे सिंहले कम्बुजे वा लब्धजनुषां विश्वेषां बौद्धधर्मानुयायिनामपि कृते सैषा वाराणसी किमपि पावनत्वं भजते । यतस्तथागतेन शाक्यमुनिना धर्मचक्रप्रवर्तनं विदधताऽत्रैव ऋषिपत्तने अष्टाङ्गिकमार्गस्य वैशिष्ट्यं समुद्घोषयता बौद्धधर्मस्य काऽपि देशना विहिता । तान्त्रिकसाधनायाः पीठस्थलीत्वेनापि न न्यूनतरं प्रथते काशी । समग्रे भारतवर्षे व्याप्ति समश्नुवानस्य तान्त्रिकत्रिकोणस्य कोणभूताः प्रकाशन्ते कामरूप-कश्मीर-केरलाख्याः ककाराद्यवर्णका देशविशेषाः । एतस्य त्रिकोणस्य केन्द्रभूतेयं तद्रूपैव ककाराद्यक्षरा काशी धर्मानुसन्धानपराणां केषां विपश्चितां मानसे सातिशयमाश्चर्यं नैव जनयति ?

काशिजनपदस्य काशीपुर्याश्चेतिहासः प्राचीनतमं वैदिककालमुपस्पृशति । काशिजनपदस्य निवासिनः काशयः इति पदेन अथर्ववेदस्य पैप्पलादशाखायां (५-२२-१४) शतपथ-ब्राह्मणे च व्यपदिश्यते । शतपथे धृतराष्ट्रनामा काशिराजः काश्यशब्देन अभिहितो विद्यते । असि-वरुणाभ्यां दक्षिणस्यामुत्तरस्यां च विद्यमानाभ्यां नदीभ्यां समावृतेयं नगरी वाराणसीति अन्वर्थकमभिधानं लभते । सेयमथर्ववेदस्य एकस्मिन् सूक्ते (४-७-१) निगूढतरं सङ्केतमावहति, यतः सूक्तेऽस्मिन् निर्दिष्टां वरणवतीं डाक्टर ब्लूमफील्ड महाभागो वरुणानदीरूपेण परिचिनोति । वाराणस्या धार्मिकमैतिहासिकं च महिमानं समुद्घोषयन्ति रामायणं महाभारतं पुराणानि च । महाभारतीये समराङ्गणे पाण्डवपक्षमधिश्रित्य युयुधानः कोऽपि पराक्रमी काशिराजः काशिराजश्च वीर्यवान् इति शब्देन सङ्केतमाधत्ते । मत्स्यपुराणं (१७९ अध्याये), लिङ्गपुराणं (पूर्वार्धे ९२ अध्याये) वामनपुराणं च सचमत्कृति वर्णयन्ति काश्याः समुन्नतान् प्रासादान्, विशालानि उद्यानानि अभिरामान् तडागान्, सौगन्ध्यपूर्णानि नानावर्णाकृतीनि कुसुमानि च । स्कन्दपुराणस्य काशीखण्डं वाराणस्यां विराजमानानां शिवलिङ्गानां स्थितिं स्वरूपं परस्परतो व्यवधानं च भौगोलिकक्षेत्रनिर्देशपूर्वकं विवृणोति । पुराणानुसारं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तीर्थस्थलीयं त्रिषु भागेषु विभक्ता किमपि माहात्म्यमातनुते। वाराणस्या दक्षिणो भागः केदारेश्वरेण, मध्यमो भागो विश्वेश्वरेण, उत्तरो भाग ओङ्कारेश्वरेण चाधिष्ठितो विद्यत इतिहेतुना एकाऽपि त्रयीव एषा पावनतमा भूतभावनस्य हृदयङ्गमा पावित्र्यस्य प्रकर्षमुदगिरति।

काश्या धार्मिकेतिहासो भारतवर्षे लब्धजनुषां नानाधार्मिकसम्प्रदायानामितिवृत्तानां पुञ्जीभूतं स्वरूपमेव। वाराणसेया वैदुषीमण्डिताः पण्डिताः सर्वदैव धर्मस्य धुरं धारयन्तो धार्मिकविवादस्थलेषु निर्णेतृपदमधितस्थुषो विद्वद्गोष्ठीषु किमति प्रागल्भ्यमलभन्त। व्याख्यातेषु धर्मोपदेशेषु तेषां स्वीकृतिसमाधानहेतोः विचारविमर्शजिज्ञासवः काले काले वरिष्ठा धर्मप्रचारका दार्शनिकसम्प्रदायप्रतिष्ठापनपरायणाः सत्यान्वेषणपराश्च विपश्चितः वाराणसीमिमां समाजग्मुः। तेषु श्रीशङ्कराचार्यप्रभृति रामानुज-निम्बार्क-मध्व-चैतन्यपर्यन्तं दार्शनिकमतोपस्कर्तारस्तत्त्वज्ञा रामानन्दादारभ्य कबीर-तुलसीदास-नानक-स्वामिदयानन्दसरस्वतीपर्यन्तं च सन्ताभिधाना भवत्युपदेशकुशला विपश्चितः समये समये काश्यां निवसन्तोऽस्माभिः समुपलभ्यन्ते।

एतेषु माहात्म्यमण्डितेषु नव्यमतोपस्थापननिपुणेषु विद्वद्धौरेयेषु आदिशङ्कराचार्या अष्टमशतकस्य प्रारम्भे समाजग्मुः वाराणसीमिमाम्। मणिकर्णिकाघट्टे निवसन्त आचार्यपादा ब्रह्मसूत्रस्य उपनिषदां भगवद्गीतायाश्च प्रसन्नगम्भीरं भाष्यमत्रैव निबबन्धुरिति शङ्करदिग्विजयस्य अनुशीलनं ध्रुवं प्रमाणयति। अद्वैतविचारधारायाः प्रवहन्त्याः सन्ततं संरक्षणाय ऊर्ध्वाम्नायस्य प्रतिनिधिभूतं साम्प्रतमपि विराजमानं सुमेरुमठं ते प्रस्थापयामासुः। रामानुजाचार्याः निम्बार्काचार्या मध्वाचार्याश्च उत्तरभारतस्थतीर्थानां यात्रप्रसङ्गे काशीमागत्य स्वोपदेशामृतेन अत्रत्यान् निवासिनः कञ्चित् कालं कृतार्थान् विदधुः। चैतन्यमहाप्रभवोऽपि जगन्नाथपुरीतो वृन्दावनगमनकाले तपनमिश्रस्य आवासे स्थित्वा भक्तिरसस्य उपदेशेन भक्ताननेकान् भक्तितत्त्वजिज्ञासून् प्रेमामृतमग्नान् चक्रुः। वल्लभाचार्यास्तु वाराणस्यां बहुकालं व्याप्य निवसन्तः शुद्धाद्वैतपुष्टिभक्त्योः सामरस्यप्रतिपादकं स्वीयम् अणुभाष्यमत्रैव विरचय्य कामपि ख्यातिं जग्मुः। पुराणस्थवचनानां सारमिमं समुपन्यस्य वाराणसेयो महाकविः श्रीहर्षः स्वकीये नैषधचरिते महाकाव्ये स्वर्गप्रतिनिधिभूतेयं वाराणसीति विशदं विवृणोति-

वाराणसी निविशते न वसुन्धरायां
तत्र स्थितिर्मखभुजां भुवने निवासः।
तत्तीर्थमुक्तवपुषामत एव मुक्तिः
स्वर्गात् परं पदमुदेतु मुदे तु कीदृक्॥
(नैषधचरितम् ११.११६)

काशी न केवलं धार्मिकमेव माहात्म्यमाकलयति, यावत् सम्प्रदायपुरःसरशास्त्रालोचनस्य विद्यानिकेतनभूता न कयापि माहात्म्येनातिशय्यते। उपनिषदां कालाद् आरभ्य शास्त्राध्ययनाध्यापनविधौ अविच्छिन्नपरम्परावती वाराणसी सातिशयमहत्त्वमयी वर्तत इति के न जानन्ति ऐतिहासिकवृत्तविदो विद्यार्जनचयचणाः पण्डिताः। बृहदारण्यकोपनिषदि वृत्तमिदं समुपलभ्यते यत् दृप्तं बालाकिगार्ग्यं काशिराजोऽजातशत्रुः शुद्धेन मनसा विशदेन वचसा आत्मतत्त्वरहस्यं समुपदिदेश। आयुर्वेदविज्ञाने शल्यचिकित्सायाः प्रारम्भो वाराणसीत एव बभूव। काशिराजो दिवोदासो धन्वन्तरिर्विद्यामिमां स्वानुभूत्या संवलितां विधाय सुश्रुतमन्यांश्च वैतरणपौष्कलावतादीन् ऋषीन् शास्त्रस्यैतस्य निखिलानि रहस्यानि अध्यापयामास। शल्यचिकित्साकारणादस्मादेव धान्वन्तरीया विद्येति व्यपदिश्यते तज्ज्ञैरायुर्वेदविज्ञानपारङ्गतैर्वैद्यैः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वाराणसीशासका भूपाला अपि शास्त्रप्रचारस्य ग्रन्थनिबन्धनस्य च कृते सौलभ्यं सम्पादयन्तोऽत्रत्यान् विद्वद्वर्यान् भृशमुपकृतवन्तः। द्वादशशतके काशिराजस्य जयचन्द्रस्य सभा विद्वद्धौरेयाभ्यामुभाभ्यां संवर्धितप्रभावा कमपि महिमानं प्राप। तत्र श्रीहर्षो न केवलं कर्कश-तर्कोपबृंहितं द्वैतमतसमीक्षणपरं 'खण्डनखण्डखाद्य'नाम ग्रन्थरत्नं प्रणिनाय, यावत् कोमलकाव्यकलाकलितं ललितं मधुरं 'नैषधचरितमहाकाव्यम'पि विनिर्ममे। जयचन्द्रस्य धर्माधिकारी लक्ष्मीधरभट्टः आचार-तीर्थ-व्यवहारादिनानाधर्मशास्त्रीय-विषयोपन्यासपुरःसरं स्वीयं 'कृत्यकल्पतरुरि'ति अभिधानवन्तं ग्रन्थं विरच्य धर्मशास्त्रीयनिबन्धस्य प्रथमावतरणं विदधे।

मध्ययुगे यवनशासकेषु विद्यमानेष्वपि न किमपि ह्रासमन्वभूदियं गीर्वाणवाणी। भारतवर्षस्य निखिलेभ्यो जनपदेभ्यो विशिष्य च महाराष्ट्रात् कर्णाटकात् आन्ध्रप्रदेशात् वङ्गभूम्या अन्तर्वेदीति नाम्ना विख्यातात् गङ्गा-यमुनयोरन्तराले विद्यमानात् प्रदेशाच्च ब्राह्मणानां शिक्षादीक्षामण्डितानि बहूनि कुलानि वाराणसीं समाजग्मुः। न केवलं तानि तीर्थयात्रैकपराणि बभूवुः, यावत् विश्वेश्वरपुर्यामस्यां शाश्वतनिवासाय च तेषामत्रागमनं सञ्जातम्।

पञ्चदशशतकाद् आरभ्य अष्टादशशतकं यावत् वाराणस्यां शास्त्रानुशीलनस्य महान् समुत्कर्षः साक्षात्क्रियते। शास्त्रशिक्षणस्य चरमोत्कर्षस्तस्मिन् समये बभूव, इत्यपि निगदितुं शक्यते। धर्मशास्त्रे मीमांसायां वेदे ज्योतिषे वैशेषिकेऽद्वैतवेदान्ते व्याकरणे च यानि ग्रन्थरत्नानि निबद्धानि वाराणसेयैर्विद्वद्धौरेयैस्तानि निखिलेऽस्मिन् भारतवर्षे प्रख्यातिं प्रागल्भ्यं प्रसृतिं च भजन्ते इति तत्रभवतां पुरतो न बहु वक्तव्यं वर्तते। प्रख्याततमानां केषाञ्चित् विद्वत्तल्लजानां नामसङ्कीर्तनमेव प्रसङ्गेऽस्मिन् अलंभविष्यति।

दत्तकमीमांसाया रचयिता धर्माधिकारी नन्दपण्डितः, निर्णयसिन्धोर्निर्माता भट्टकुलावतंसः कमलाकरभट्टः, श्रीमद्भागवतस्य व्याख्याकारः श्रीधरस्वामी, शारदातिलकतन्त्रस्य व्याख्याकारो राघवभट्टः, कणादसूत्रेषु उपस्कारस्य निर्माता शङ्करमिश्रः, भाट्टदीपिकायाः कर्ता मीमांसकमूर्धन्यः खण्डदेवः, वेदान्तसिद्धान्तमुक्तावल्याः प्रणेता प्रकाशानन्दः, तत्त्वदीपनस्य रचयिता अखण्डानन्दः, द्वैतमतखण्डनपूर्वकम् अद्वैतसिद्धान्तस्य प्रतिष्ठापक इव विराजमानः अद्वैतसिद्धिप्रणेता मधुसूदनसरस्वती, सांख्यप्रवचनभाष्यस्य विज्ञानामृतभाष्यस्य च निर्माणेन सांख्यवेदान्तसिद्धान्तानां समन्वयेच्छुः विज्ञानभिक्षुः, वरिवस्यारहस्यस्य सौभाग्यभास्करस्य च निर्माता तान्त्रिकशिरोमणिः भास्कररायः, प्रक्रियाप्रकाशस्य प्रणेता शेषश्रीकृष्णः, सिद्धान्तकौमुद्याः शब्दकौस्तुभस्य च रचनया पाणिनीयव्याकरणस्य प्रक्रियाक्रमे व्यवस्थापकस्तैलङ्गो भट्टोजिदीक्षितः, त्रिसंस्करणवर्ती मञ्जूषां निर्माय पाणिनीयव्याकरणदर्शनस्य मार्गोपदेशको महाराष्ट्रियो नागोजीभट्टः, साहित्यशास्त्रीयतत्त्वानां रसगङ्गाधरप्रणयनेन प्रोद्दीपकः पण्डितराजो जगन्नाथः, अलङ्कारकौस्तुभं निर्माय अलङ्कारशास्त्रे नव्यन्यायरीतिप्रचारकः पार्वतीयो विश्वेश्वरपाण्डेयः—एते विराजन्ते काश्या दार्शनिकतत्त्वचिन्तकाः साहित्यमीमांसामर्मज्ञा विद्वांसः, यैः विशिष्टग्रन्थान् विरच्य सच्छिष्यांश्च अध्याप्य काश्याः कीर्तिर्भूतले सर्वत्रैव प्रसारिता। एतेषां विपश्चितां नामस्मरणमपि श्रेयसे कल्पते।

सम्राजः शाहजहांनस्य पुत्रो दाराशिकोहः पण्डितकमलापतित्रिपाठिनः पूर्वजात् त्रिपाठि रामानन्दात् संस्कृतमध्येतुं वाराणसीमुपेतः। संस्कृतस्य

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्यग् अध्ययनं विधाय वाराणसेय-पण्डितानां साहाय्येन उपनिषदाम् अनुवादः पारसीकभाषायां तेन महानुभावेन विहितः प्रकाशितश्च ।

अष्टादशशतेरुत्तरार्धे वाराणसीं 'ईस्ट इंडिया कम्पनी'-नाम्नः संस्थानस्य शासकवर्गं स्वस्यै अवधानदानाय आचकर्ष । वाराणस्यां कृतनिवासः कम्पनीप्रदेशस्य शासनाधिकारे नियुक्त आसीत् डंकननामा कोऽपि चरित्रवान् भारतीयानां हितेच्छुराङ्ग्लदेशीयः शासकः । तेनैव कलिकातास्थो लार्ड कार्नवालिसमहोदयः शासनस्य सर्वश्रेष्ठां धुरं वहन् वाराणस्यां संस्कृतकालेजस्य संस्थापनाय मुहुर्मुहुरभ्यर्थितः । तदाज्ञयैव एकनवत्यधिकसप्तदशशततमे वर्षे अष्टाविंशतितमे दिने अक्तूबरमासस्य धर्मशास्त्रस्य संस्कृतसाहित्यस्य एताभ्यां नितान्तं सम्बद्धस्य हिन्दूधर्मस्य अध्ययनाय एका संस्कृतपाठशाला स्थापिता बभूव । आसीदेषा वैशिष्ट्यमण्डिता अध्यापनसंस्था या संस्कृतविद्यायाः नानाशास्त्रेषु दीक्षितान् पण्डितपुङ्गवान् आकृष्टुं प्रबभूव । तस्यां पाठशालायां वेदस्य वेदान्तस्य न्यायस्य ज्योतिषस्य मीमांसाया विशेषतो धर्मशास्त्रस्य व्याकरण-काव्यशास्त्रयोश्च अध्यापनाय विशदं प्रबन्धमकार्षुरधिकारिपुरुषाः । इयमेव संस्कृत-पाठशाला कालान्तरे 'संस्कृत-कालेज' इति व्यपदिष्टाऽभवत् ।

आरम्भिककालस्य इतिहासवैकल्यात् तदानीन्तनानां कार्यजातमनुरुध्य न बहु वक्तव्यं वर्तते साम्प्रतम् । परन्तु एकोनविंशतितमशतकस्योत्तरार्धे विंशतितमशतकस्य प्रारम्भे च बभूवुरनेके विद्यावदातचरिताः पाण्डित्यप्रौढिमण्डिताश्च पण्डिताः—बालशास्त्री रानडे, दामोदरशास्त्री भारद्वाजः, कैलासचन्द्रशिरोमणिः, गङ्गाधरशास्त्री मानवल्ली, यागेश्वरशास्त्री, तात्याशास्त्री, गापदेवशास्त्री, सुधाकरद्विवेदी, शिवकुमारमिश्राश्च येषां कीर्तिकौमुदी साम्प्रतमपि धवलयति दिगन्तान् । नेदं विस्मरणीयं नाम यत् प्रख्यातिभाजो यूरोपदेशीयाः संस्कृतज्ञाः कोलब्रूक-विल्सन-म्यूर-गफ़ग्रिफिथ-थिबो-वेनिसाख्याः सर्वे एव एते महानुभावाः संस्कृतकालेजेन साकं केनापि अधिकारविशेषेण संबद्धा बभूवुः । केचन तेषु तत्रत्यशास्त्रिभिः शिक्षितविद्याः संस्कृतभाषायाः संस्कृतशास्त्रस्य च विषये भृशमनुरागं भजन्तो देववाण्याः सेवां च विदधतो दरीदृश्यन्ते ।

संस्कृतभाषाया अध्ययनस्य संस्कृतेश्च पक्षे काशिराजवंशेन विनीताः सेवाः कृताः । काशिराजैः पूर्वं कलानां शिल्पस्य चापि संवर्धनं कृतम् । महाराजचेतसिंहेन सह सञ्जाते युद्धे (एकोनाशीत्युत्तरसप्तदशशततमे खीस्ताब्दे) वारेनहेस्टिंग्जो बलवन्तसिंहस्य हस्तलेखानां संग्रहम् अपहृतवान् । किन्तु इदानीमपि दरबारसंग्रहे सन्ति बहुमूल्या हस्तलेखाः, ललितानि चित्राणि, यानि मया रामनगरकौतुकागारे सर्वजनोपयोगार्थम् उपहारीकृतानि ।

यदा काशिराज्यं भारतसाम्राज्ये विलीनमभूत्, ततः प्रभृति 'अखिलभारतीय-काशिराजन्यासः' अष्टादशमहापुराणानां संशोधने प्रकाशने अनुशीलने च व्याप्तः । इदं तु नितरां खेदावहं यत् पुराणानाम् अध्ययनं साम्प्रतमपि प्राच्यविदुषां चेतांसि दृढं नावर्जयति ।

काशिराजेन सह समयमवलम्ब्य सर जोनाथ डङ्कन महानुभावेन काशिराजस्य संस्कृतपाठशाला संस्कृतमहाविद्यालयत्वेन परिणामिता । अस्यैव संस्कृतमहाविद्यालयस्य प्रतिनिधिभूतो विराजते साम्प्रतमेष वाराणसेय-संस्कृतविश्वविद्यालयः । अस्य स्थापना दशवर्षेभ्यः पूर्वं विहिता प्रान्तीयशासनेन । विंशत्या शिक्षणविभागैः, सरस्वती-भवनादिभिश्च अयं विराजते ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्राच्य-विद्या-शाखानां सुरुचिरं पथ-प्रदर्शनम्

—श्री आदित्यनाथ झा, आई० सी० एस०—

[उपराज्यपालः—दिल्ली-प्रदेशस्य]

[वाराणसेय-संस्कृत-विश्वविद्यालयस्य प्रथमोपकुलपतिभिः दिल्लीप्रदेशस्य उपराज्यपालैः श्री आदित्यनाथ झा महोदयैः चतुर्विंशतितमस्य प्राच्यविद्या-सम्मेलनस्य शुभारम्भं कुर्वद्भिः स्वभाषणे सम्मेलनस्य चतुर्दशशाखाः समाश्रित्य अपेक्षितः समयानुरूपः परिष्कारः, अन्यशाखानां सर्वथानुपेक्षणीयानां सङ्कलनस्य हितोपदेशः, साम्प्रतिकयश्च कतिपयाः सम्बद्धाः समस्याश्चर्चिताः। तेषां भाषणमिदं प्राच्यविद्या-प्रणयिनां सर्वेषां कृते नूनं परं प्रेरकं पथ-प्रदर्शकञ्चेति अस्माकं दृढा मतिः। सर्वथा अधिकृताः खलु ते तथा बोधनाय। अतोऽस्माभिरत्र तद्भाषणस्य सारभूतोंऽशः सादरं प्रकाश्यते। —सम्पादकः]

★

विश्वस्मिन् प्राचीदिशः सीमातिशायी महिमा। प्राच्यामेव आदित्यः समुदेति, प्राचीत एव प्रतीचीं प्रतिष्ठमान आत्मनः प्राणप्रदैः किरणैः ऊष्मप्रकाशौ सर्वतो विकिरन् समग्रं जगज् जीवयति। वैदिक्या ऋच इयमुक्तिः नितान्तं सत्या **सूर्य आत्मा जगतस्तस्थुषश्च** इति। अमुमेवार्थमयमौपनिषदो मन्त्रोऽपि समर्थयति—

अथादित्य उदयन् यत् प्राचीं दिशं प्रविशति तेन प्राच्यान् प्राणान् रश्मिषु सन्निधत्ते, यद् दक्षिणां, यत् प्रतीचीं, यदुदीचीं, यदधो, यदन्तरा, दिशो यत्सर्वं प्रकाशयति, तेन सर्वान् प्राणान् रश्मिषु सन्निधत्ते। इति।

तद् यथा तेजःपिण्डात्मकस्य भौतिकस्य भानोरुदयदानेन प्राची विश्वस्य समग्रान् दिग्विभागान् विभासयति, सम्पूर्णं चेतनाचेतनात्मकं जगच्च बहिश्चेतयति, तथैव ज्ञानभानोरपि प्रादुर्भावेन जगतो यदन्तरपि चेतयति तत्सर्वथा सङ्गतमेव। मन्ये, अस्माकं पूर्वजानामश्रान्तसाधनया यो ज्ञानभानुः वेदविद्यात्मना प्राच्याः कुक्षौ कदाचिदाविर्बभूव, निस्संशयम् अद्यतन्याः सर्वा विद्यास्तदोया एव सन्ततयः। ता एव विद्वद्भिः प्राच्यविद्यासम्मेलनस्य चतुर्दशशाखासु अनुशील्यन्ते। ता हि यथा—

१. वैदिक, २. भारतीय, ३. शास्त्रीय संस्कृत, ४. यावनीय (इस्लामिक), ५. अरब-पारसीक, ६. पाली-बौद्ध, ७. प्राकृत-जैन, ८. इतिहास, ९. पुरातत्त्व, १०. भारतीय-भाषा, ११. द्राविडिक, १२. धर्मदर्शन, १३. प्राविधिक-विज्ञान-ललित कला, १४. दक्षिण-पूर्वीय-शाखाश्च।

वेदस्य वैज्ञानिकमध्ययनमावश्यकम्

नात्र काचित् संशीतिर्यत् तस्यास्तस्याः शाखाया अध्ययनं तैस्तैर्विद्वद्भिः यथोचितमनुष्ठीयते। प्रत्येकं शाखायां नवनवा विचारा उद्भाव्यन्ते, नूतना निबन्धा ग्रन्थाश्च लिख्यन्ते, उत्तरोत्तरं कश्चनाभिनवो नवविधो विकासः सम्पाद्यते। तथापि तासु साम्प्रतमपि बहु करणीयमवशिष्यते। यथा प्रथमं वैदिकी विद्याशाखैव समादीयताम्। वेदानामध्ययनं साम्प्रतं चतसृभिः दृष्टिभिः क्रियते—१. धार्मिक-दृष्ट्या, २. दार्शनिक-दृष्ट्या, ३. ऐतिहासिक-दृष्ट्या, ४. सामाजिक-दृष्ट्या च। धार्मिकदृष्ट्या वेदानामध्येतारः समग्रं वैदिकं वाङ्मयं साक्षाद्-परम्परया

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वा यज्ञपरतया व्याचक्षते। दार्शनिकदृष्ट्या वेदाध्यायिनः सम्पूर्णं वेदजातं प्रायेण ब्रह्मपरतया वर्णयन्ति। ऐतिहासिकदृष्ट्या वेदानामध्येतारः प्रतीच्याः प्राच्याश्च विद्वांसो वेदेषु सर्वत्र इतिहासमेव गवेषयन्ति। कतिपयेभ्यो वर्षेभ्यः समाजशास्त्रदृष्ट्या प्रवर्तमानं वेदाध्ययनं वैदिकीं समाजरचनां सामाजिकीं स्थितिं चैव तत्र सर्वत्र अनुसन्दधाति।

तथापि वर्तमानयुगीनया अभिनवतमया वैज्ञानिक्या अध्ययनदृष्ट्या वेदानामध्ययनं नाद्यावधि सुप्रतिष्ठितम्। बहोः कालात्पूर्वं निरुक्तकारेण यास्केन वैज्ञानिकदृशा वेदानां कतिपयान् मन्त्रान् व्याख्याय वेदाध्ययनदिशि वैज्ञानिक्या दृष्टेरुन्मेषः कृत आसीत्। निकटेऽतीते महर्षिदयानन्देनापि कश्चन तादृशः सङ्केतः कृतोऽभूत्। स्वर्गस्थैः श्रीमधुसूदनौझामहाभागैस्तु वेदानामनेकान् वैज्ञानिकव्याख्याग्रन्थान् निर्माय वैज्ञानिकदृष्ट्या वेदानामध्ययनं भृशं प्रोत्साहितमासीत्। महामहोपाध्याय-पण्डितगिरिधरशर्मचतुर्वेदैः, जयपुरस्थैः पण्डित-मोतीलालशास्त्रिभिः, काशीहिन्दूविश्वविद्यालय - प्राध्यापकैः स्वर्गस्थैः डा० वासुदेवशरणाग्रवालैः, अन्यैः कतिपयैश्चास्यां दिशि पर्याप्तं ध्यानं प्रादायि। मयाऽपि अस्मिन् विश्वविद्यालये वैदिकविज्ञान-नाम्ना तदर्थमेको विभागः स्थापित आसीत्। परमिदं खेदस्थानं यत्स विभागो विश्वविद्यालयस्य परवर्तिभिरधिकारिभिः समापितः। परं देशस्यान्यैः वेदविपश्चिद्भिरपि एतद्विषये दृष्टिर्न दीयते। अतोऽहं वैदिक विदुषः समनुरुन्धे यत्तो वैज्ञानिकदृष्ट्याऽपि वेदानामध्ययनाध्यापनयोर्दत्तावधानाः भवन्तु।

शास्त्राध्ययने प्रत्न-नूत्न-परिपाटी संयोज्ये

शास्त्रीयसंस्कृत-शाखायाः प्रवृत्तिविषयेऽप्यस्ति किमपि वक्तव्यम्। तदिदं, यत् साम्प्रतं देशे संस्कृतस्याध्ययनाध्यापने द्विप्रकारं प्रचलतः। एकः प्रकारः संस्कृतमहाविद्यालयेषु प्रचलति, यः पुरातनपरिपाट्यामाधृतो यत्र ग्रन्थानां प्रतिपङ्क्ति प्रतिवर्णं पदकृत्यपुरस्सरं सूक्ष्मतममध्ययनं भवति। अपरः प्रकारोऽधुनातनेषु विश्वविद्यालयेषु प्रचलति, यो नवीनपरिपाटीनाम्ना व्यपदिश्यते। एतदनुसारेण संस्कृतग्रन्थानां यद् अध्ययनाध्यापनं प्रवर्तते, तद् आलोचनप्रधानं प्रसक्तानुप्रसक्तबहुविषयस्पृक् पर्याप्तं व्यापकम्। सत्येवमपि साम्प्रतमुभयोरपि प्रकारयोः किमपि वैगुण्यम्। प्रथमप्रकारेऽध्येतॄणां बुद्धिः ग्रन्थविशेषे स्थलविशेषेषु च सीमिता भवति, अध्येतॄणाम् अपेक्षितो दृष्टिविकासो न जायते। ते विषयस्य व्यापकतां चतुरस्रतां च गाहितुं न क्षमन्ते। अधीयमाने विषये अन्यभाषासाहित्येषु किमस्तीति ज्ञातुं न प्रभवन्ति। अपरस्मिन् प्रकारेऽप्यस्ति दुःखप्रदा न्यूनता। नूतनया पद्धत्या संस्कृतस्याध्येतारः प्रायः पल्लवग्राहि एव पाण्डित्यमर्जयितुं प्रयतन्ते। ते विषयाणां गूढं गभीरं च ज्ञानं नासादयन्ति। फलतस्ते प्रसक्तानुप्रसक्तान् बहून् विषयान् जानन्तोऽपि मौलिक-गभीरज्ञानाभावेन विभिन्नभाषीयसाहित्यत उचिते आदानप्रदाने विधाय किमप्युपयोगि महत्त्वपूर्णं शैक्षिकं कार्यं कर्तुं न शक्नुवन्ति। अतः शास्त्रीयसंस्कृतशाखायाः सम्बद्धान् विदुषोऽपि प्रति मेऽयमनुरोधो विद्यते यत्तैः प्राचीनपरिपाट्याः पण्डितैः सह सम्पर्कं विधाय अस्या न्यूनतायाः परिहारः कर्तव्यः।

बौद्ध-जैन शाखे संस्कृतेन न विच्छिद्येताम्

पालि-बौद्धदर्शनशाखायाः सम्बन्धेऽप्यस्ति मे किञ्चिन्निवेदनीयम्। तदिदं यत्तैः सततमिदमवधेयं यत् पालि-बौद्धशाखाया अस्ति नितान्तं नेदीयान् सम्बन्धः शास्त्रीयसंस्कृतशाखया सह। पालिसाहित्ये बौद्धे वाङ्मये च या काचिद् ज्ञानसम्पद् उपलभ्यते तस्या मूलस्रोतः संस्कृतमेव। अतः पालि-बौद्ध-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शाखाया अध्ययनाध्यापनयोः प्रवृत्त्या तथैव विकसितव्यं यथा तस्याः मूलस्रोतसः पार्थक्यं न भवेत्। पाल्यां बौद्धे वाङ्मये च या जीवनदृष्टिः सन्दृब्धा, यल्लक्ष्याभिमुखं च जनतायाः प्रयाणमाकाङ्क्षितं, या च सामाजिकी व्यवस्था प्रतिष्ठापयिषिता, तत्र सर्वत्र संस्कृतवाङ्मये सञ्चितानां तत्तत्तत्त्वानां प्रभावानुरक्षणमावश्यकम्, येन द्वयोः सम्बद्धशाखयोः अध्ययनाध्यापनाभ्यामर्जनीयया दृष्ट्या समाजे मधुरस्य सामञ्जस्यस्य स्थापना भवितुं शक्नुयात्।

प्राकृत-जैनशास्त्रयोः शाखाया अपि विषये एतादृशाभिप्रायकमेव मे वक्तव्यमस्ति। अस्याः शाखाया अपि शास्त्रीयसंस्कृतशाखया सार्धं घनिष्ठः सम्बन्धोऽस्ति। अस्याः शाखाया अप्युद्भवो विकासश्च शास्त्रीयसंस्कृतशाखोपजीवी एव। अतोऽनया शाखयाऽपि तादृशी एव विकासदिग् अवलम्बनीया येन मूलशाखायाः पार्थक्यं न प्रसज्येत। वस्तुत इमास्तिस्र एव एकस्यैव वेदतरोः शाखाः, अतो या वेदस्य मूलभूता दृष्टिः सैव आसां समासां शाखानां विद्यते। केवलं निरपेक्षदृष्ट्या अध्ययनेनैव किञ्चिद् वैमत्यमापातत उपलक्ष्यते। मम त्वेतत् प्रतिभाति यद् यदि परस्परापेक्षया दृष्ट्या आसां शाखानामध्ययनं प्रवर्त्येत तदा सर्वा इमाः शाखाः वेदस्यैव गौरवं प्रतिष्ठापयन्त्यः पुरातनीं भारतीयां संस्कृतिं परिपोषयन्त्यो भारतराष्ट्रं द्रढिष्ठं बलिष्ठं च कर्तुं नूनं शक्नुयुः।

इतिहास-पुरातत्त्व अन्योन्याविनाभूते शाखे

इतिहास-पुरातत्त्वशाखयोः सम्बद्धान् विपश्चितोऽप्यहं किञ्चित् प्रार्थयिष्ये। मन्मतेन इमे द्वे अपि शाखे अन्योन्याविनाभूते। यथा पुरातत्त्वमितिहासस्य त्रुटितायाः शाखाया योजकं तत्स्वरूपसंस्कारकं च, तथा इतिहासोऽपि पुरातत्त्वस्य पूरकः। इतिहासकूरावलम्बमप्राप्य पुरातत्त्वमकिञ्चित्करमेव। अतोऽनयोः शाखयोः सह प्रवर्तनं मम दृष्ट्या विशेषोपकारकं भवितुमर्हति। कामं द्वे शाखे पृथक् प्रसरताम्, पृथक् च विकसताम्, परं कस्याञ्चिदेकस्यां भूमौ तयोरेकग्रन्थि-बन्धनमावश्यकम्। तत्रेतिहासलेखकान् प्रति ममेयमभ्यर्थना भवितुमर्हति यत्तैः इतिहासं लिखद्भिः महत्त्वपूर्णानां घटनानां गोपनं रूपान्तरीकरणं च नैव कार्यम्। परं घटनानां चित्रणं तथा नैव विधेयं यथा तदुदाहरणेन भविष्यत्सु विश्वनागरिकेषु परस्परमीर्ष्या-घृणादीनां भावानामुन्मेषो भवेत्। सर्वाः घटनाः कालप्रवाहस्य स्वाभाविकपरिणतिमूलकतया वर्णनीयाः। युद्धादिघटनानां हानिकरं स्वरूपं तु नूनं चित्रणीयम्, परं तन्मूलं तथोपन्यसनीयं यथा तेन मानवेषु कौटुम्बिकतायाः प्रतिष्ठापने बाधा न भवेत्।

संस्कृतेन भाषा-विवादः शमनीयः

भारतीय-भाषाशास्त्र-शाखायाः सम्बद्धान् विदुष इदं निवेदयितुं कामये, यत्तैः अस्याः शाखाया माध्यमेन भाषासम्बन्धे तादृशी दृष्टिर्देया यथाऽधुना देशे जायमानो भाषाविषयको विद्वेषः समाप्तिमियात्। स्पष्टमेतद् यद् भाषा मनुष्यस्य भावानां विचाराणां च वाहनम्। अनेनैव वाहनेन एकस्य मनुष्यस्य भावो मनुष्यान्तरं व्रजति। अधुना वैज्ञानिकसाधनानां प्रभावेण मानवसमाजः परस्परमत्यन्तं समीपं गतो विद्यते। अतो भाषामूलकस्य दूरत्वस्यापि परिहार आवश्यकः। भाषाविज्ञानविदां मन्मतेन तात्कालिकमिदमेव कर्तव्यमस्ति यत्तैः भाषासु विद्यमानं दूरत्वं निराक्रियेत। सर्वासां भाषाणां मूलमन्विष्य मूलभूताया भाषाया अभिमुखं सर्वाः भाषाः प्रेर्येरन्। इदं तु प्रायः सर्वेषां भाषाविज्ञानविदां सम्मतं यत् सर्वासां भारतीयभाषाणां मूलभूता भाषा संस्कृतभाषैव। तमिलप्रभृतयो दाक्षिणात्या भाषा अपि [illegible] संस्कृतभवा न मन्येरन्,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पर तासामप्युपरि संस्कृतभाषाया भूयान् प्रभावः परिलक्ष्यत एव। अतः संस्कृतभाषायां तदुद्भवायां संस्कृतशब्दबहुलायां बहुजनबोधगम्यायां कस्यां चिदन्यस्यां वा भारतीयभाषायां भारतीयजनानां प्रीतिसंवर्धनमस्याः शाखाया आवश्यकं कर्तव्यम्। मन्ये, अस्याः शाखाया विद्वांसोऽस्यां दिशि त्वरितं दत्तावधाना भविष्यन्ति।

धर्म-दर्शने जीवने समनुष्ठेये

धर्म-दर्शनोः शाखाया विषयेऽपि विद्यते किमपि वक्तव्यम्। तच्चेदं यद् धर्मो दर्शनं च चक्रद्वयं यद्बलेन भारतराष्ट्रस्य महान् रथः प्रचलति। यावदिमे चक्रे दृढे परस्परापेक्षे च, तावदस्य रथस्य उदन्वदाकाशमहीधरेषु सर्वत्र गतिः अप्रतिहता। अतोऽस्याः शाखाया विद्वज्जनान् प्रति ममेयं प्रार्थना विद्यते यदस्याः शाखायाः प्रवृत्तिस्तथा विकासयितव्या यथा धर्म-दर्शनयोः केवलं शाब्दिकमध्ययनमात्रं न स्याद्, अपि तु मानवजीवने तयोः समीचीनमवतरणमपि भवेत्। धर्मो हि आचरणस्य विषयो न केवलमध्ययनस्य। दर्शनमपि साधनस्य विषयो न केवलं गोष्ठीषु विचारविनिमयमात्रस्य। अतोऽस्याः शाखाया विद्वद्भिः धर्म-दर्शनयोरुच्चकोटेः पण्डितैरेव न भाव्यम्, अपि तु अनुष्ठातृभिः साधकैश्चापि भाव्यम्। यदि ते स्वजीवनादीदृशं प्रारम्भं न करिष्यन्ति तदाऽन्येषां जनानां जीवनानि ते लेशमात्रमपि प्रभावयितुं न शक्ष्यन्ति। अतोऽस्याः शाखाया विदुषां कर्मसु, कर्मफलेषु, परलोके, परमात्मनि च विश्वास आवश्यकः। अयं विश्वास एव मनुष्यं पशुतः पृथक्कृत्य यथार्थमनुष्यं विधत्ते।

मानवसुखित्वाय विज्ञान-कले सह नियोज्ये

प्राविधकविज्ञान-ललितकला-विषययोः शाखाऽपि अतिमहत्त्वपूर्णा विद्याशाखा। अनयोः द्वयोः विषययोरनेया शाखया सह मिथः सापेक्षता स्थापनमावश्यकम्। प्राविधिकविज्ञानं विना मनुष्यस्य वर्तमानं जीवनं समृद्धं न भवितुमर्हति। ललितकलां विना मनुष्यस्य जीवनं सरसं सानन्दं च न भवितुमर्हति। अतो मानवस्य सुखित्वसम्पादनाय द्वयोः विषययोर्विकासः सामञ्जस्यं चानिवार्यतया अपेक्ष्येते। अस्याः शाखाया अस्यां दिशि दृष्टिदानमावश्यकम्।

शिष्टानां शाखानां सारसङ्ग्रहः कार्यः

ईरानीय-अरबी-पारसीक-द्राविड-एशिया-दक्षिणपूर्वीय-विद्याशाखानां विषये ममेदं निवेदनीयमस्ति यद् इमा अपि प्राच्यविद्यानां महनीयाः समृद्धाश्च शाखाः। आसां भाषासु, विषयेषु प्रतिपादनशैलीषु, मानवजीवनं प्रति दृष्टिकोणेषु च प्रभूतं ज्ञातव्यमस्ति। तासां सकाशात् सारान् संगृह्य तेषामितरविद्याशाखीयैः सारैः सह समन्वयं च विधाय सर्वासां प्राच्यविद्याशाखानामेकः सारसङ्ग्रहो निष्कृष्टुं शक्यते, यद्द्वारा देश-काल-जलवायुविभेदोद्भवं दूरत्वं निरस्य सर्वासु प्राच्यमानवजातिषु च मधुरं नैकट्यं सम्पाद्य वसुधैव कुटुम्बकम् इत्येतस्या भारतीयभावनाया उद्बोधनेन विश्वस्य समग्रा मानवजातिरेकस्मिन् प्रणयसूत्रे ग्रथितुं शक्येत। अतः आसां शाखानां विद्वज्जनान् प्रति मेऽनुरोधो विद्यते यत्तैरनयैव दिशा स्वस्वशाखानां प्रवृत्तयो विकासयितव्याः।

नारीशिक्षया संस्कृतेर्बद्धमूलता

प्रसङ्गतोऽत्रेदं मया निवेदयितुं काम्यते यत् नारीजातिः पुरुषरत्नानामाकरभूमिः। सा हि जगत्कर्तुः परमात्मनः प्रसवशक्तेः मूर्तं रूपम्। तस्या एव हस्ते मानवस्य समग्रो विकास आयत्तो विद्यते। पुरुषो योग्यसन्ततेः प्रादुर्भावस्य सङ्कल्पबीजं नार्यायत्तं विधाय विरतो भवति। सैव पुरुषस्य संकल्पबीजं स्वस्मिन् संरक्षति। कालेन सन्ततिं सूते,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जन्मत आकौमारं तत्र संस्कारान् वपति। तदनुसारमेव सन्ततिर्यौवनमासाद्य विश्वस्य नवो नागरिको भवति। अतो भारतीयायां संस्कृतौ नारीजातेः महती प्रतिष्ठाऽस्ति।

स्त्रीजातेरिदं महत्त्वं दृष्टौ निधाय तस्याः सुशिक्षायाः व्यवस्था अत्यावश्यकी। मन्मतेन अधुनातना विद्यालया विश्वविद्यालय श्च भारतीयनारीसमाजाय अपेक्षितायाः शिक्षायाः अनुरूपा न सन्ति। नारीणां भारतीयजीवनदृष्टेरनुरूपाय विकासाय ताभ्यः संस्कृतशिक्षा-प्रदानमावश्यकम्। यतः संस्कृतशिक्षायां धार्मिकताया नैतिकताया आध्यात्मिकतायाश्च बाहुल्यं विद्यते। इमामेव शिक्षां प्राप्य नार्यः सद्गृहिण्यो भूत्वा स्वस्य स्वकुटुम्बस्य च उभयलोकसाधिन्यो भवितुमर्हन्ति। अत एव मया संस्कृतविश्वविद्यालयस्य प्रारम्भिके काले एव बालिकानां संस्कृतशिक्षाया योजना कृतासीत्। शिक्षाभवनमपि तदर्थं तदानीमेव निर्मितम्। परं दुःखस्थानमेतद् यद् विश्वविद्यालयस्य अधिकारिभिरेतद्विषये ध्यानं न दत्तम्, येनाद्यावधि बालिकानां पृथक् संस्कृतशिक्षाप्रबन्धो नाभूत्। अहं वर्तमानान् विश्वविद्यालयाधिकारिणोऽनुरोद्धुमिच्छामि यत्तेऽस्मिन् विषये जागरूकाः प्रयत्नशीलाश्च भवन्तु। प्राच्यविद्यासम्मेलने समवेतानन्यानपि सर्वान् सज्जनानहं प्रार्थये यत्तोऽपि स्वस्व-शिक्षास्थानेषु नारीणां पृथक् संस्कृतशिक्षाव्यवस्थायै प्रयत्नं कुर्वन्तु।

इदमत्र विशेषेण अवधेयं, यद् यदा नार्यः संस्कृतशिक्षिता भविष्यन्ति, तदा नूनं तासां स्तनन्धयाः तासां सम्पर्के संस्कृतसंस्कारं प्राप्स्यन्ति। फलतया तदीयतनुजन्मसु संस्कृताभिरुचेर्निसर्गेणोदेष्यमाणतया संस्कृतं प्रति लोकस्यानुदिनं वर्धमानं नैरस्यं वैमुख्यञ्च निराकृतं भविष्यति। निश्चयेन नारीणां संस्कृतशिक्षणस्यायमेको महान् लाभः। अनेन लक्ष्येणापि नारीणां संस्कृतशिक्षणप्रोत्साहनमावश्यकम्।

अन्यपेक्षिता असङ्कलिताः शाखाः

प्राच्यविद्यासम्मेलनेन कृतेषु विद्याविभागेषु एका न्यूनता परिलक्ष्यते, यदत्र धर्मशास्त्रशाखायाः पुराणशाखायाः योगतन्त्रशाखायाः, आयुर्वेदशाखायाश्च प्राच्यविद्यासम्मेलनस्य विद्याशाखासु समावेशोऽद्यावधि कृतो न विद्यते। इमाः शाखा अपि प्राच्यविद्यानां महत्त्वपूर्णाः समृद्धाः शाखाः सन्ति, अत आसामपि शाखानां समावेशाय ध्यानं दातव्यम्। तत्र धर्मशास्त्रशाखायाः समावेशस्तु प्रथममावश्यकः। यतोऽस्यामेव शाखायां समाजशास्त्रं भारतीयविधिशास्त्रं च यथोचितं सन्निवेशमर्हतः। धर्मशास्त्रे देशकालानुकूल्येन वेदाविरोधेन काले काले नवनवा निबन्धग्रन्थाः रचिताः। दायादिविषये भारतीयविधानस्य दिशः परिष्कृताः। समाजस्य देशकालानुरूपं संशोधनं कृतम्। वर्णाश्रमव्यवस्थायाः स्वरूपादर्शसंरक्षणपूर्वकं जगति समाजस्य पर्याप्ताऽग्रगतिः सम्पादिता। वैदेशिकैः सह सम्पर्के तेषां सभ्यतासंस्कृत्योः देशे प्रवेशे च जाते तदात्मसात्करणाय आवश्यक्यो व्यवस्थाः समये समये कृताः। धर्मशास्त्रशाखायाः प्रतिष्ठापनया ईदृशानां समेषां विषयाणामध्ययनं मननं च प्रवर्तिष्येते, तेन समाजस्य स्वशक्तेः स्वानुष्ठानपद्धतेश्च परिचयेन स्फूर्तिः जागर्तिश्च सम्पस्येते।

इदं न विस्मर्तव्यं यद् धर्मशास्त्रीयव्यवस्थासु देशकालयोरावश्यकताऽनुसारेण परिवर्तनमेव सनातनधर्मस्य सनातनतायाः मूलम् (?)। अस्य वास्तविकतायाः संरक्षणमपि धर्मशास्त्रशाखायाः स्वतन्त्रप्रतिष्ठयैव सुकरम्।

धर्मशास्त्रशाखायाः स्वतन्त्रस्थापनया धर्माणां [illegible] सौविद्यं भविष्यति,

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

Digitized by Arya Samaj Foundation Chennai and eGangotri

Amos Bronson Alcott, Thoreau, Max Mueller, James Freeman Clarke प्रभृतिभिः वैदेशिकैः विद्वद्भिः राममोहनराय-विवेकानन्दप्रभृतिभिर्भारतीयैर्विद्वद्भिश्च धर्माणां सम्बन्धे तुलनात्मको विचारः पूर्वं पर्याप्तं कृतः, परं सा प्रवृत्तिरितः कियतः समयात् शिथिलिता। अतो नूतनया निष्ठया नवेन च लक्ष्येण धर्माणां तुलनात्मकमध्ययनमावश्यकम्। एतस्य सम्पत्तिः धर्मशास्त्रशाखायाः स्वतन्त्र-प्रतिष्ठापनादेव सम्यग् भवितुमर्हति।

अद्य अस्मिन् प्राच्यविद्या-सम्मेलनाधिवेशने भवादृशा देशस्य अनेके प्रतिभाशालिनो दूरदर्शिनो विद्वांसस्तत्त्वचिन्तकाश्च समवेताः। अतः समेषां भवतां पुरस्ताद् देशस्य कियतीः प्रमुखाः समस्याः समुपस्थापयामि। विश्वसिमि भवन्तस्तासां महत्ताम् अवश्यसमाधेयतां च ध्यायन्तोऽनुकूलं समाधानं प्रस्तोतुं नूनं यत्नशीला भविष्यन्ति।

अनुसन्धान-समस्या

तासु समस्यासु एकाऽस्ति अनुसन्धानविषयिणी। पूर्वैः विद्वद्भिः अनुसन्धानविषये या तत्परता जागरूकता मौलिकता च प्रादर्शि, सा साम्प्रतं प्राच्यविद्याविपश्चित्सु न लक्ष्यते। अधुना प्रायेण अनुसन्धानोपाधिप्राप्तयेऽनुसन्धानं क्रियते। यच्च अनुसन्धानं दृष्टिपथे समायाति, तत्र विभिन्न-ग्रन्थेषु सञ्चितानां विषयाणां भाषाभेदेन शैलीभेदेन च संग्रहमात्रं सकलनमात्रं वा भवति। प्राध्यापकैरपि अनुसन्धाननाम्ना यत्किमपि प्रस्तूयते, तत्र काचन मौलिकता नोपलक्ष्यते। मन्ये, अस्या अनुसन्धान-दुरवस्थाया इदमेव कारणं यदनुसन्धानाय यादृशं विस्तृतं गभीरं च अध्ययनमावश्यकम्, अन्यान्य-भाषासाहित्येषु सम्बद्धविषयाणां सम्बन्धे यत्किमपि लिखितं तस्य सर्वस्य यादृशमनुशीलनमपेक्षितं तद् अनुसन्धातृभिर्न क्रियते। अनुसन्धानस्येममुपहास परिहर्तुं तद्द्वारा विद्यानां वास्तविकीं श्रीवृद्धिं च कर्तुमिदमावश्यकं यदनुसन्धानस्य विषये सम्मेलनेन विशिष्टं ध्यानं दीयेत, येन विद्यानां यथोचित-विकासः सम्पद्येत।

जीवनमूल्यस्थापन-समस्या

अन्याः समस्याः सन्ति, देशस्य कोटिशो जनतायाः साक्षरीकरणस्य, जीवनोन्नयनस्य, आर्थिकस्य सामाजिकस्य च अभ्युत्थापनस्य जीवनस्य वास्तव-मूल्यानां पुनः प्रतिष्ठापनस्य च। देशे स्वातन्त्र्य-सूर्योदये जाते धार्मिकताया नैतिकताया आध्यात्म-कतायाश्च वाञ्छितो विकास आशास्यमान आसीत्। परं दृश्यत एतद्, यत्तेषां समेषां विषयाणां महान् ह्रासो जातः। चरित्रदृष्ट्या देश उत्तरोत्तरं पतन्निव परिलक्ष्यते। एभ्यः संकटेभ्यो देशस्य रक्षणमाव-श्यकम्। देशसेवातो विमुखीभूय केवलं सत्ताप्राप्तये संघर्षनिरतैः राजनेतृभिः कार्यमिदं दुष्करम्। इदं पावनमनुष्ठानं भवादृशां विदुषामेव साध्यम्। अत एतद्विषयेऽपि नूनं भवद्भिः सावधानं चिन्तनीयम्, अवश्यञ्च कश्चन मार्गो गवेषणीयः। अन्यथा देशस्य विनिपातो ध्रुवः।

एकत्वभावना-समस्या

स्पष्टमिदं यदिदानीं देशोऽन्तःस्थैः बाह्यैश्च राष्ट्रद्रोग्धृभिः समाक्रान्तो विद्यते। भाषाविवाद-सदृशैः क्षुद्रभावैः जनमानसमाक्रान्तमस्ति। राष्ट्रोन्न-तयेऽपेक्षिता एकत्वभावना प्रतिक्षणं क्षीयमाणा दृश्यते। एषां समेषां दुर्भावानां सर्वासामासां दुष्टप्रवृत्तीनां च जनमनस्तो निस्सारणमविलम्ब-मावश्यकम्। कार्यमिदं निस्संशयं भवादृशां प्राच्य-विद्याविपश्चितामेव सुशक्यम्। विदुषां राष्ट्रस्य मार्गदर्शकत्वं गुरुत्वं च इतिहाससाक्षिकम्। अतो भवद्भिर्यथा विद्यानामभिरक्षणं चिन्त्यते, तथा राष्ट्रस्य रक्षणमपि चिन्तनीयम्। राष्ट्रे सुरक्षित एव विद्यानां सुरक्षितं भवितुमर्हतीति निर्विवादम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

किमपि वैदिकं वचो नानर्थकम्

—श्री गोविन्द नरहरि वैजापुरकरः—

(एम० ए०, न्याय-वेदान्त-साहित्याचार्यः)

निर्विचिकित्समेतद् यद् भारतीयसंस्कृतेः मूलभूतं स्रोतो वेदो नारायणो नाम। स हि अपौरुषेयवचनजातमूर्तिः सर्वस्या भारतीयसन्ततेः सर्वस्वम्। प्रतिपदं तस्य सार्थकत्वं मनुते मीमांसादर्शनम्। अत एव पञ्चविधस्य तस्य प्रत्यक्षशोऽर्थवत्त्वं प्रौढ्या संसाधितं तत्र तत्र शास्त्रकृद्भिः। परं केवलप्रत्नतम-परिष्कृत-वाङ्मयमात्ररूपेण तमवलोकयतां भारतीय-श्रद्धाविमुखानां पाश्चात्यानामनेन किं प्रयोजनम् ? ते हि यस्य स्फुटमर्थवत्त्वं दृश्यते, तदेव पदं वाक्यं वा सार्थकं मन्वते। तदन्यच्च व्यर्थमपि समुद्घोषितुं न मनाग् संकुचन्ति। एतादृशेष्वेव विषयेषु अन्यतमम् ऋग्वेदसंहिताया नवममण्डलीय-द्वादशादिचतुर्दशसूक्तेषु एकोनविंशतिकृत्वः प्रयुक्तं 'इन्द्राय इन्दो परि स्रव' इति वासिष्ठं वचनमपि। नेकेषां पाश्चात्यविदुषां सुदृढा धारणा यद्वचनमिदं सर्वथा अनर्थकमेव।

अन्ये पुनरेतत् स्पष्टमेव निरर्थकमिति तु न सङ्गिरन्ते, तथापि पर्यन्ते पर्यवसानं तत्रैव तेषामभिप्रायस्य। ते अभिप्रयन्ति यत् यथा गीतेषु ध्रुपदं भवति, तद्वदेवेदम्। अतो गीतेषु ध्रुपदपद्धतेरिदं मूलस्रोतोऽपि वक्तुं शक्यमित्यपि तेषां नूत्ना गवेषणा।

किन्तु सूक्ष्मेक्षिकया विचार्यमाणे मतमिदं कथमपि विचारसहं न सिद्ध्यति। यतो हि यया पद्धत्या तैः वैदिकपदानामभिप्रायः परामृश्यते, ततोऽप्यन्या नैकाः पद्धतयोऽभिप्रायव्यञ्जिकाः जागर्तितराम्। यास्काचार्यकृत-निरुक्तग्रन्थपरिशीलनेन स्फुटं दृश्यते यदभिप्रायव्यञ्जिका एकादश पद्धतयः। ताश्च यथा—१. परिव्राजक-पद्धतिः (नि० २.८)। २. नैरुक्त-पद्धतिः (२.८)। ३. ऐतिहासिक-पद्धतिः (२.१६)। ४. आध्यात्मिक-पद्धतिः। ५. आधिदैविक-पद्धतिः (३.१२)। ६. आख्यानसमय-पद्धतिः (७.७)। ७. नैदान-पद्धति (७.१२)। ८. याज्ञिक-पद्धतिः। ९. आर्ष-पद्धतिः। १०. आत्मप्रवाद-पद्धतिः। ११. वैयाकरण-पद्धतिश्च (निरुक्त १३.९)। 'देवीं वाचमि'त्यादि-मन्त्रस्य त्रयोदशे परिशिष्टे तेन षड्भिः पद्धतिभिः अर्था अपि आदर्शरूपेण समुपन्यस्ताः।

वयं पुनरितोऽप्यन्यां द्वादशीं सुभाषितपद्धतिमपि वैदिकवचसाम् अभिप्रायव्यञ्जिकां मन्यामहे। तथा हि—वेदे ऋक्समूहात्मकं सूक्तं सुख्यातचरं वैदिकानाम्। तच्च सूक्तं सुभाषितं चेत्यनर्थान्तरम्। लोके सुभाषितं तदेवोच्यते, येन कस्याश्चित् कथायाः कस्यचिद् दृष्टान्तस्य वा अवष्टम्भेन काचिन्नीतिः निर्दिश्यते, कश्चित सिद्धान्तो वा समुपदिश्यते। वेदेऽपि सूक्तेन तादृशेन भवितव्यमिति सुभाषितपद्धत्याऽपि वेदार्थाभिप्रायव्यञ्जकेष्वन्यतमया नूनं भाव्यमिति।

परिसीमिते स्थाने काले चात्र अस्माभिः ऋग्वेदीय-नवममण्डलस्य कतिपय-वंदमन्त्राणाम्, विवादास्पदस्य च तस्य 'इन्द्राय इन्दो परि स्रव' इति वचनस्य त्रिषु सूक्तेषु एकोनविंशतिकृत्वः प्रयुक्तस्य विचित्रयाऽनया द्वादश्या पद्धत्या पञ्चशो वासिष्ठानभिप्रायान् समुपवर्ण्य वैदिकवचनवेषणा-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रसिका विद्वांसः शिष्टाभिप्रायगवेषणाय सादरमुपनिमन्त्र्यन्ते ।

सतां कोपोऽपि क्षणिकः

आस्तां तावत्, प्रकृतमनुसरामः । परिपश्यन्तु श्रीमन्तः 'इन्द्राय इन्दो परि स्रव' इत्यस्य प्रथमं तात्पर्यम् । तमेव उपवर्णयितुं 'वेदोपदेशचन्द्रिका'कृत् प्रस्तौति—

स्वकोपकारणात् क्षीणं
पुनः पुष्यन्ति साधवः ।
पुपुषू रोहिणीकान्तं
प्रजापति-तदात्मजाः ॥

अस्यां सूक्तौ वर्णितायाः कथायाः स्रोतः तैत्तिरीय-संहितायाम् (२,३,५) समुपलभ्यते । तदनुसारं प्रजापतेः त्रयस्त्रिंशत् कन्या आसन् । सर्वाः सुन्दर्यो गुणावत्यश्चासन् । परस्परं प्रेमाऽप्यासीत् तासाम् । विवाहोत्तरमेकत्रैव सर्वाः कथं निवसेयुरियमासीत् समस्या । अतः प्रजापतिना राज्ञे सोमायैव सर्वाः पत्नीत्वेन समर्पिताः । तासु रोहिणी अतितरां कमनीयेति कृत्वा सोमः सन्ततं तयैव सहाऽरंस्त ।

अथ शिष्टाः कन्यकाः सर्वतो विवशाः पितरमाययुः । सोमश्च सर्वभवगत्य तत्र गत्वा 'सममेव सर्वा दृश्येरन् इतः प्रभृति' इति सशपथं प्रतिज्ञाय ताः प्रत्यावर्तितवान् । तथापि स स्वव्यसनं न त्यक्तवान् । सर्वदा पितृगृहगमनं न शोभनमिति मत्वा कन्यकाः जोषमास्थिताः इत्यवगत्य प्रजापतिना सोमः शप्तः 'कृतस्य फलं भुङ्क्ष्व' इति । विषयलम्पटश्चन्द्रो राजयक्ष्मग्रस्तः सन् अहरहः क्षीणतरतां गच्छन्नासीत् । अन्ततश्च सः शिष्टानां पत्नीनां सविधं गत्वा क्षमां ययाचे । 'पुनः कदाप्यहमेवं न करिष्ये'-इति पत्युः प्रतिज्ञां कारयित्वा पत्नीभिः पिता प्रजापतिः पत्यू रोगमुक्तये प्रार्थितः । चन्द्रश्च रोगमुक्तो भूत्वा सुखेन साम्येन ताभिः सह उवास ।

अस्याः कथायाः प्रकाशे 'इन्द्राय इन्दो परि स्रव' इति (ऋ० ९.११२.१) वचनस्य अयमर्थः—

हे इन्दो सोमात्मक चन्द्र ! मत्कोपेन पूर्वं क्षीणगात्रस्त्वं सम्प्रति इन्द्राय = इन्द्रम्, द्वितीयार्थे चतुर्थी । इन्द्रम् इद्धम् ओजसा दीप्तं निवृत्तक्षयरुजम्, सर्वसमर्थं वा गात्रम् । परि स्रव, परितः = परिवृढ-सर्वावयवतया कृत्स्नावयवोपचयेनेति यावत् । स्रव = गच्छ प्राप्नुहीति भावः ।

पितृप्रसादस्य फलम्

११३ तमस्य सूक्तस्य द्वितीयर्चायां पठितस्य वचनस्यास्य अपरो भावार्थ आदीयताम्—

'इन्द्रायेन्दो परि स्रव ।' —९.११३.२

अस्यार्थः—इन्दो हे चन्द्र, इन्द्राय = इन्द्रं मां प्रजापतिं प्रसादयितुं मम सुतां स्नेहवशात् सूर्यात् मया पुत्रीत्वेन लब्धां सावित्रीं परि = परिणयेन पाणिग्रहणेन वैदिकविवाहविधिना, स्रव = प्राप्नुहि । मद्दुहितुः सावित्र्याः भर्ता भवेत्यभिप्रायः ।

इममेवार्थं सूक्त्या वर्णयति चन्द्रिकाकारः—

प्रजापतिसुता ख्याता
सावित्री रूपशेवधिः ।
भर्तारमीप्सितं लेभे
सोमं पितृप्रसादतः ॥

कथेयं तैत्तिरीयब्राह्मणे (२.३.११) समुपलभ्यते । समासतश्च सा यथा—

सूर्येण स्नेहवशात् स्वपुत्री सावित्री प्रजापतये पुत्रिकात्वेन पालयितुं प्रदत्ता । तेन सा प्रजापतिसुतेति ख्यातिं जगाम । अथैकदा सृष्टिकार्यसन्दर्भे प्रजापतिना त्रयो वेदाः सृष्टाः । तत्रैवोपस्थितेन सोमेन दिव्यशक्त्या स्वकरतले ते गोपिताः । तत्रैव

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सावित्री अपि समुपस्थिता आसीत् । सोमस्य शंत्वाधायकेन रूपेण सा मुमुहे । चन्द्रः पुनः श्रद्धायां समासक्त आसीत् । सत्येवं कथं सावित्री-सङ्कल्पः पितुः पुरतस्तस्याः चन्द्रावाप्त्याग्रहः सफलो भवेत् ? महान् आसीदयं यक्षप्रश्नः । अन्ततः प्रजापतिप्रदत्त-सौन्दर्यचूर्णेन वशीकरणतिलकं कृत्वा यथानिर्दिष्टा सावित्री सोममुपगता । तिलकालङ्कृतां दृष्ट्वा सोमस्तामकामयत । 'एकपत्नीनिष्ठतायाः करतलगोपित-वेददर्शनस्य च प्रस्तावं समुपस्थाप्य तत्पूरणानन्तरं प्रजापतेरनुज्ञामासाद्य उभयोः वैदिको विवाहः समभवदिति ।

विश्वासघातस्य दुष्परिणामः

श्रद्धातपोयुक्तायैव, न तु विश्वासघातिने परिस्रवितुं सोमं प्रार्थयन्नपि मन्त्रांशोऽयं जागर्ति—

'आ पवस्व दिशां पते आर्जीकात् सोममीढ्वः ।
ऋतवाकेन सत्येन श्रद्धया तपसा सुतः ॥
इन्द्रायेन्दो परि स्रव ।'
(ऋ० ९.११३.२)

अयमर्थः—हे दिशां पते प्राच्यादीनां दिशां प्रकाशकत्वेन स्वामिन्, हे मीढ्व कामानां सेक्तः, हे सोम ! आर्जीकात् तन्नामकात् जनपदात् आ पवस्व अस्मद्यज्ञं प्रत्यागच्छ । कीदृशः ? ऋतवचनेन सत्येन श्रद्धया तपसा च युक्तैः दीक्षितैः सुतोऽभिषुतस्त्वं पवस्व । हे इन्दो यज्ञसाधनसोमात्मकलताविशेष, ऋतवाक्य-तपः-श्रद्धादि-सद्गुणसम्पन्नाधिकारि-पुरुषधौरेयलभ्य ! इन्द्राय = इन्द्रम्, 'यावद् वाक्यं सावधारणमि'ति अत्रापि इन्द्रमेव, परि स्रव = प्राप्नुहि, तस्य तप-श्रद्धादिसम्पन्नत्वात् । न तु अन्यं तत्प्राप्तिलोभेन विश्वासघातिनम् असुरपक्षं परित्यज्य देवपक्षे समायातं शण्डामर्कादिकमिति । तथा च वेदोपदेशचन्द्रिका-सूक्तिः—

परपक्षं न गृह्णीयाद्
विवेकी पदलिप्सया ।
शण्डामर्कौ स्वपक्षघ्नौ
लेभाते न समीहितम् ॥

एतत्सम्बद्धा कथा त्वित्थम्—एकदा देव-दानवयुद्धे उभावपि पक्षौ समबलावभवताम् । कस्यापि पक्षस्य पराजयः असम्भाव्यः आसीत् । यतो हि एकत्र देवपक्षस्य रक्षणं देवगुरुणा बृहस्पतिना पुरोहितेन भूत्वा अक्रियत, अपरत्र च असुरपक्षस्य रक्षणं शण्डामर्काभ्यां सिद्धमन्त्राभ्यां पुरोहिताभ्यामक्रियत । सत्येवं कथं सङ्करः संहतो भवेत् ? देवगोष्ठ्यां विषयेऽत्र विचारानन्तर निर्णयो जातो यत् यथाकथमपि प्रलोभ्य तौ असुरपुरोहितौ स्वपक्षे समानेयौ । तदैव प्रश्नोऽयं समाहितो भवेत् । देवैश्च सोमपानस्य लोभेन तौ तत्पक्षात् प्रच्याव्य स्वपक्षतां नीतौ । तेन असुराणां पराजयः समभूत् । अथ अमृतप्राशनसमये यदा शण्डामर्कौ परया आशया तत्र समागतौ, तदा देवैः अर्धचन्द्रं दत्त्वा तौ निष्कासितौ । सहजं पक्षं क्षणात् लोभेन परित्यज्य परपक्षग्रहीता नवे सद्योगृहीते पक्षे कथं स्थिरो भवेदित्यस्येदं निदर्शनम् । साम्प्रतिकानां 'दल-बदलुआ'-परपर्यायाणां जाज्वल्यमाना इयं फलश्रुतिः ।

दिव्यवस्तुसंग्रहो राष्ट्रहिताय

अन्योऽप्येको मन्त्र आदयीताम्—

'पर्जन्यवृद्धं महिषं तं सूर्यस्य दुहिता भरत् ।
तं गन्धर्वा प्रत्यगृभ्णन् तं सोमे रसमादधुः ॥
इन्द्रायेन्दो परि स्रव ।'
(ऋ० ९. ११३. ३)

अयमर्थः—सूर्यस्य दुहिता श्रद्धा । सा पर्जन्यवृद्धम् = पर्जन्यवत् समर्थम् । यद्वा पर्जन्येन तत्कार्य-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

त्वेन उदकेन प्रवृद्धम्। महिषं महान्तं पूज्यं वा। तं सोममाभरत् द्युलोकादाहृतवती। तम् आह्रीयमाणं सोमं गन्धर्वा विश्वावसुप्रभृतयः। प्रत्यगृभ्णन् = प्रत्यगृह्णन् प्रतिगृहीतवन्तः। ततो गन्धर्वाः प्रतिगृहीतं रसं सोमे प्रत्यक्षमादधुः। अतः हे इन्दो सोम, दिवि वर्तमान! माम् उपासीनानां पुत्रस्थानीयानाम् आर्याणां कल्याणार्थं परि स्रव = परितः सर्वतः कार्त्स्न्येन मया सार्धं यजतामार्याणां निवास-स्थानं धराधाम गच्छ, व्रज प्रतिष्ठस्वेति भावः।

अयमेवाशयः सूत्रौ समुद्वर्ण्यते—

आनयेदन्यतो दिव्यं
स्वराष्ट्रहितकाम्यया।
स्वर्गादुपाहरत् सोमं
गायत्री श्येनविग्रहा॥

कथ्यम् ऐतरेयब्राह्मणे (१. २७) श्रूयते—अद्भुतगुणैः सुख्यातं गन्धर्वलोकगतं सोमं देवर्षिप्रभृतयः सर्वेऽपि वाञ्छन्त आसन्। गन्धर्वाः पुनस्तं स्वराष्ट्रस्य अनन्यसाधारणं वस्त्विति कृत्वा प्राणपणेन कृपणधनेनेव ररक्षुः। अथैकदा देवर्षिप्रभृतीनां विचारोऽभवद् यत्कथमयं सोमवृक्षो गन्धर्वलोकादानीय स्वदेशे संरोप्य प्रश्नोऽयमेकान्ततः समाधेय इति। ऋषिभिरुक्तम्—'श्रूयते, गन्धर्वैः नारी सर्वथा समाद्रियते। अत एतदर्थं कापि स्त्री प्रेषणीया एतमानेतुम्।' अथ सूर्यदुहिता श्रद्धामेतदर्थं प्रेषितवन्तस्ते। सुन्दर्या च तया तत्र गत्वा सोमस्य क्षेत्रमवगतम्। मौनेन ततस्तमुत्पाट्य श्येनरूपं परिगृह्य मुखे पादयोश्च शाखाद्वयं समादाय सा स्वदेशं परावृत्ता। गन्धर्वास्तद् दृष्ट्वा तं परिहर्तुं श्येनं समुपजग्मुः। अथ स्त्रीरूपं धृत्वा तेषां स्त्रीदाक्षिण्यस्य बलेन सा सोममादाय निष्कण्टकं स्वदेशं समागता। तत्र च सोमस्य रोपणेन प्रश्नस्यास्य सार्वकलिकं समाधानमभूत्। देवा ऋषयश्च सोमं प्राप्य परं मुमुदुरिति।

पावमान्याः परम प्रभावः

इत्थं निदर्शनरूपेण कतिपयानाम् 'इन्द्राय इन्दो परि स्रवे'ति वचनानामर्थाः अस्माभिः परामृष्टाः। सेयं दिगवशिष्टेष्वपि वचनेषु संयोज्या।

इमा ऋचः पावमान्य इति गीयन्ते। तदध्ययनस्य फलश्रुतिः स्वयं भगवत्यैव श्रुत्या समाम्नाता—

'पावमानीर्यो अध्येत्यृषिभिः संभृतं रसम्।
तस्मै सरस्वती दुहे क्षीरं सर्पिर्मधूदकम्॥'
(ऋ० ९. ६७. ३२)

अस्यार्थः—यो ब्राह्मणः पावमानीः = पवमानदेवताका ऋचस्तदात्मकम्। ऋषिर्मधुच्छन्द आदिभिः संभृतं रसं सूक्तं सूक्तङ्वम्। अध्येति = अधीते। तस्मै पवमानाध्ययनं कुर्वते जनाय। सरस्वतीः = सर्वत्र सरणवती वाग्देवता। क्षीरं यज्ञसाधनभूतं पयः सर्पिस्तादृशं घृतम्, मधु मदकरमुदकं सोमम्। दुहे स्वयमेव दोग्धि, एनं नरं यागादिपरं वेदाशास्त्रविदं करोतीत्यर्थः।

चन्द्रिकाकृदपि अमुमेवार्थं सूक्त्या गायति—

स्वाध्यायनिरतं विप्रं
सदा प्रीणन्ति देवताः।
अध्येति पावमानीर्य-
स्तस्मै दुग्धे सरस्वती॥

विषयेऽत्र सप्तसिन्धवनिवासिनः शत्रुञ्जयस्य राज्ञः कथा निदर्शनम्। प्रवासाय ससैन्यं सपरिकरं निर्गतः सः कस्यचन ऋषिवरस्य आश्रमं प्राप्तः। ऋषिपत्न्या सहजेनातिथ्यभावेन राजा आतिथ्यस्वीकरणाय प्रार्थितः। परं विशालपरिवारोपेतस्य तस्य स्वागतं सर्वथाऽशक्यकरं मत्वा सा परां चिन्तां

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गांधीशती-समुपहारः

श्री मोहनदासः

जयतु चिरं श्री मोहनदासः !
भारतवर्षे,
गलदुत्कर्षे
येन कृतः सर्वाङ्गविकासः !
जयतु चिरं श्री मोहनदासः !
ग्रामे-ग्रामे,
सस्यारामे,
प्रसृतो यस्याहिंसोल्लासः !
जयतु चिरं श्री मोहनदासः !
परमोदारः,
कोऽप्यवतारः
यस्याभूत् स्वातन्त्र्य-विलासः !
जयतु चिरं श्री मोहनदासः !
यस्य चरणयोः,
प्रगति-शरणयोः,
मानवतायाः चरमप्रकाशः !
जयतु चिरं श्री मोहनदासः !
तेषु प्रणामाः,
ममाविरामाः,
छिन्नो येन दासता-पाशः !
जयतु चिरं श्री मोहनदासः !

—श्री रामनाथ पाठकः 'प्रणयी'

गतवती। ऋषिणा उक्तम्–'चिन्तां मा कुरु, साध्वी ! पावमान्यः सर्वं पूरयिष्यन्ति। क्षिप्रं तत्पाठमहमाचरे' इति।

अथ पाठप्रभावेण ऋषेर्दूरस्था भगिनी भूत्वा सरस्वती तत्र अकस्मात् समागता। स्वहस्तसंस्पर्शेन अत्यल्पमपि अन्नं विपुलतमं षोडशसम्भारसंभृतं साऽकरोत्। राजा तत्परिकराश्च सर्वे ऋषेः अभूतपूर्वेण तेन स्वागतेन परं विस्मयं गताः। ऋषिणा चायं पावमानीनां प्रभावो निरूपितस्तेभ्यः।

ता इमाः पावमान्यो सर्वथा मूर्तरूपाः मूर्तफलप्रदाः सत्यो कथं स्वात्मनि निरर्थकानि वचनानि बिभरेयुः ? अत्रावश्यकता वर्तते श्रद्धासंबलयुक्तस्य गहन-गवेषणस्य। अखिलभारतीय-प्राच्यविद्यासम्मेलनस्य चतुर्विंशतितमाधिवेशनप्रसङ्गे परमपूज्य-गुरुवर्याणां वेददर्शनाचार्याणां महामण्डलेश्वराणाम् श्रीमतां उदासीन-सम्प्रदायाचार्यवर्याणां श्रीगङ्गेश्वरानन्दस्वामिपादानां पथप्रदर्शनेन समाधिगतानि इमानि नव्यानि भव्यानि तत्त्वानि शोधविशारदानां विदुषां पुरतः समुपस्थापयन्नयं पावमानीः प्रार्थयते यत् ताः स्वविषये निरर्थकत्वभ्रान्तिं धारयतां चेतांसि पावयित्वा जगतः क्षेमाय सुखाय च कल्पन्तामिति।

★

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

 Digitized by Arya Samaj Foundation Chennai and eGangotri

कर्मणो गहना गतिः

—श्री रामदास कौण्डिन्यः, एम० ए०, साहित्याचार्यः—

[प्राचार्यः—राजकीय-संस्कृत-महाविद्यालयस्य, जामनगरम्]

"अहो अकालकुपितो मम प्राणेश्वरः आर्यनाथः। आर्यनाथ! किमयं दास्या अपराधःसोढव्यो न भवेत्? अन्यैः स्नेहार्द्रैः वचोभिः करिष्ये संभाषणम्। हे विलास, स्यात् किं सफलः आवयोः मनोरथः? सत्यमेव भविष्यामि त्वद्धृदयस्वामिनी अथवेदं सर्वं मे मनोराज्यमेव स्यात्? ततश्च ध्रुवं आत्मघातिनी स्याम्। आत्मनाशः पाप इति वदन्ति पण्डिताः। परं युवतीजनकटाक्षावशीभूतानाम् अनङ्गशरापीडितानामेव तेषामियमुक्तिः। नाभविष्यन् ते वक्तुम् एवं समर्था, यदि रमणीवागमृतास्वादमग्नाः अभविष्यन्। त्वं खलु श्रीमतः सुतः। अहं तु यथाकथञ्चित् संसाररथवाहनसमर्थस्य गुणिनो रमाकान्तस्य कन्या। रमाकान्तोऽपि मे तातो मारहित इति कथं घटेत् आवयो सम्बन्ध इति विचारो व्याकुलयति माम्। अन्यच्च, विजात्यन्तर्गतभेदजात्युत्पन्नाऽहं शास्त्राचाररतस्य धार्मिकस्य ते पितुः वधूत्वेनाभिमता भवेयं किम्?"

"अयि कुशलालापिनि कमले, दर्शितमात्मनः पाण्डित्यमनेन विचारेण। परमिदं निश्चितमवधारय यदयं जनः परवानेव। यदि त्वमनुकूला प्रथमं तदा तातमनुकूलयितुं यतिष्ये। अननुकूले तस्मिन् सद्मसंपदादित्यागे मे दृढा मतिः। स्वजीवितत्यागेनापि करिष्ये ते प्रियम्। परं तातवशीकरणम् आवयोः भाविसंसारदृष्ट्या हितावहं मन्ये। अहं हि अशिक्षितो न कथमपि भवेयं समर्थो धनार्जनाय। तदभावे न केवलम् अमृतमधुरालापैः कालो नेतुं शक्य इति तात्त्विकी स्थितिः। त्वं शालान्तपरीक्षाया अध्ययनं यथाशक्ति कुरु। भव चोत्तीर्णा तस्याम्। यतो मम जनकस्य न भवेत्प्रायः सम्मतोऽयं विवाहः, ततस्तव शिक्षणं प्रारम्भे स्यादुपयोगि जीविकानिर्वाहसाधनत्वेन। निसर्गत एव कुशाग्रा मे मतिः, तथाप्यधुना शिक्षणाय सर्वथा पिता मे न दास्यत्यनुज्ञाम्। यतः प्रथममेव दुर्जनसङ्गत्या मया अविश्वास उदपादि तन्मतौ। सर्वथा दैवं प्रतिकूलं स्याच्चेत् श्रमजीविनां धनार्जनोपायं स्वीकृत्य त्वत्सुखसंवर्धनायैव मे यत्नो भविष्यति।"

अनेन प्रदीर्घसंवादेन घटिकात्रय यापितमावाभ्याम्। ततो गृहगमनविलम्बो मा भवतु इति उदतिष्ठाव। ततः परिमृदितमृणालम्लानावयवा कमला दीर्घं निःश्वस्य अवहृतया स्वशिरो मम स्कन्धेऽस्थापयत्। तत्स्पर्शजनितोन्मादोऽहं मद्वदनस्थापित-नयनाया उन्नतोरोजाकृष्टमद्धृदयाया कान्तायाः कमलायाः पृष्ठे वामकरं निधाय दक्षिणेन मुखं उन्नमय्य नेत्रसङ्केतेन लब्ध्वाऽनुमतिं सुचिरं तदधरामृतास्वादमन्वभवम्। "श्वः पुनः अस्मिन्नेव समये आगन्तव्यमि"ति कथयित्वा लज्जावनतमुखी सा स्वगृहं न्यवर्तत। अनवाप्तकामसुखोऽवाप्तेषन्मोदोऽहमपि कामानलसंतप्तस्वान्तः कथं कथमपि न्यवर्ते स्वनिवासस्थानम्।

मुम्बापुरी - निवासः सुखकर आसीत् जनकजनन्योरिति तौ सप्ताष्टदिनानि वसितिं कर्तुं निश्चयमकुरुताम्। स हि मेऽनुकूल एवाभवत्। प्रतिदिनं सायङ्काले मदिराक्ष्याः कमलाया मुखकमलमिललोचनोऽहं सुधामयैरालापैः समुद्रसंकते तया सह संभाषणादिकार्यमग्नः सानन्दं तावन्तं कालमनयम्। एतावता कालेन परं प्रवृद्ध आवयोः स्नेहः। शरदिन्दुवदनां तां विना क्षणोऽपि मे खेदमुदपादयत् स्वान्ते।

ततश्च समागतोऽस्माकं स्वग्रामप्रत्यावर्तकालः। तदा कमलाऽसूचयत्—"विलास, यथा-कथञ्चित् क्रियतां यत्नस्तव पितरौ मम गृहमानेतुम्। तेन च स्यादेवाल्पपरिचयः सर्वेषामि"ति। तच्छ्रुत्वा इदमपि प्रायो भवेदुपकारकमिति निश्चित्य "अपि अरालालके, ध्रुवं यतिष्ये" इत्युक्त्वा निवासस्थानं प्रत्यागच्छम्।

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सूर्योदयस्य नियमाः

पत्र-संहिता

१. 'सूर्योदय'-मासिकपत्रस्य वार्षिकं शुल्कं रूप्यकपञ्चकं वर्तते। धनादेश (मनीआर्डर) द्वारा तत्प्रेषणीयम्। वी० पी० द्वारा प्रेषणे ५० पणाः पृथक् प्रदेयाः स्युः।

२. आवर्षं गम्भीरसाहित्यसमन्विताः १२ अङ्काः प्रकाश्यन्ते। नवीनग्राहकत्वं प्रथमाङ्कतः (जनवरी-अङ्कतः) एव स्वीक्रियते। माध्यमिकेन केनापि अङ्केन ग्राहकत्वं न स्वीक्रियेत।

३. आग्रहमात्रस्य २६ दिनाङ्के 'सूर्योदयः' प्रकाशितो भवति। वारद्वयं संशोध्य ग्राहकेभ्यः स प्रेष्यते। अतस्तदलाभे पूर्वं स्वकीय-पत्रालयतस्तदनागमनस्य निर्णयं कृत्वैव १० दिनाङ्कानन्तरं वयं सूचनीयाः।

४. लेख-कवितादीनां भाषा संयता, सरला, शुद्धा च भाव्या। प्रकाशनीय-लेखादीनां स्पष्टाक्षरैः कर्गजस्यैकपृष्ठे एव लेखनमावश्यकम्। अस्वीकृता लेखादयः पोस्टविभागीय-चिटिका-(टिकट) प्राप्त्यनन्तरं परावर्तयितुं शक्यन्ते।

५. सम्पादकीय-विषयसम्बद्धे पत्र-व्यवहारे 'सम्पादकः' इति, व्यवस्थाविभागीय-पत्रव्यवहारे च 'व्यवस्थापकः' इति च स्पष्टं लेखनीयम्। तेन उत्तरलाभे मुधा विलम्बो न भवेत्।

विज्ञापन-शुल्कम्

सूर्योदये सुरुचिपूर्णं विज्ञापनं प्रकाश्यते। एकवारं तस्य प्रकाशनस्य शुल्ककमश्च अधोलिखितोऽस्ति। सार्वकालिकस्य दीर्घकालिकस्य च विज्ञापनस्य कृते विशेष-सौविध्याय पत्र-व्यवहारः कार्यः।

साधारणस्य प्रतिपृष्ठस्य	१००) रु०	साधारणस्य प्रत्यर्धपृष्ठस्य	६०) रु०
साधारणस्य चतुर्थांशपृष्ठस्य	३५) रु०	आवरण-चतुर्थपृष्ठस्य	२००) रु०
आवरण-द्वितीय-तृतीयपृष्ठयोः	१५०) रु०	प्रथमावरणपृष्ठे विज्ञापनं न स्वीक्रियेत।	

—सङ्केतः—

'सूर्योदय'-कार्यालयः, भागवतधर्म-महामण्डलम्, जगतगंज, वाराणसी।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri
पञ्जीकृत-संख्या एल० १८९७

महामण्डल-वृत्तम्

शारदीय-नवरात्र-महोत्सवस्य समायोजनम्

२१९ तमः श्री चण्डीमहायज्ञः, पूर्णाहुति-महोत्सवश्च

वाराणसी। आश्विन शुक्ल प्रतिपदारभ्य नवमीं यावत् (२३ सितम्बरतः ३० सितम्बर १९६८ पर्यन्तम्) श्री भारतधर्म-महामण्डलस्य प्रधानकार्यालये भगवत्याः पराम्बायाः श्री गायत्रीदेव्याः भव्ये मन्दिरे प्रतिवार्षिकः शारदीयनवरात्र-महोत्सवो महता समारोहेण सम्पन्नः। कर्मकाण्डविशारदानां वैदिकमूर्धन्यानां विदुषां सहयोगेन प्रथमदिने भगवत्या आवाहनपूजनोत्तरं सप्तशतीपाठो होमश्च प्रारभत। अन्तिमदिने नवम्यां मध्याह्ने महामण्डल-प्रधानमन्त्रिभिः श्री शिवनन्दनलाल दर महाभागैः पूर्णाहुति-महोत्सवः सम्पादितः। ब्राह्मण-संभावन-भोजन-प्रसादवितरणादिना च समारोहः पूर्णतां गतः। अस्मिन्नवसरे प्रतिदिनं भगवत्याः श्री गायत्रीदेव्याः श्री लक्ष्मीनारायणादि-प्रतिष्ठित-देवविग्रहाणां विशेषशृङ्गा-भजन-कीर्तनादिकमपि समायोजितमासीत्।

पूर्णाहुति-समारोहावसरे समवेतान् भावुकानालक्ष्य महामण्डलसञ्चालिकाभिः पूज्य श्री विद्यादेवी महोदयाभिरुक्तं यद् 'आर्यजातेः समस्त जीवन यज्ञमयम्। यज्ञमुखेनैव मानवानां दैवजगता संपर्को जायते, देवानां कृपया च मानवैर्निखिला मनोवाञ्छिता भोगा आसाद्यन्ते। यज्ञसंस्था किल देवसम्पर्कस्थापनस्य राजमार्गः। तस्या ह्रासेनैवाद्य राष्ट्रं विपन्न दृश्यते। महामण्डलेन इदमेव निर्णीय ५३ वर्षतः यज्ञसंस्था प्रचाल्यते। महामण्डलभवने स्थायी यज्ञ-शालाऽपि वर्तते, यत्र नके महायज्ञा अद्यावधि विश्वकल्याणकामनया संपन्नाः। यज्ञोऽयं तस्यां परम्परायां २१९ तमो वर्तते। राष्ट्रमङ्गलकामुकानां सर्वेषां भावुकानां कर्तव्यमेतत् यदस्या यज्ञसंस्थाया अक्षुण्णप्रचलनाय सर्वविधः सहयोगो विधेये इति।

सम्पादकः, प्रकाशकः, मुद्रकश्च—गोविन्द नरहरि वैजापुरकरः,
श्रीभारतधर्ममहामण्डलम्, जगतगंज, वाराणसी कैण्ट।
मुद्रण-स्थलम्—आनन्दकानन प्रेस, सी० के० ३६/२०, वाराणसी।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सूर्योदयः

भारतधर्ममहामण्डलस्य

मासिकं मुखपत्रम्

❀

वर्षम् ४४

❀

अङ्कः ११

❀

सम्पादकः

गा० न० वैजापुरकरः

❀

नवम्बर

१९६८

❀

वार्षिक-मूल्यम्

५) रूप्यकाणि

❀

प्रत्यङ्क-मूल्यम्

अर्धरूप्यकम्

❀

शून्यं किलैकं स्थितम्

अत्राहं कुत आगतः कथमिति ज्ञातं न किञ्चिन्मया
केनाऽपि प्रबलेन पातित इवाऽऽयातोऽस्म्यनीशो भुवम्।
वारोव प्रवहामि हन्त विवशो जाने न यामि क्व वा
जीर्णं पर्णमिवानिलो वहति मां कोऽप्येकलः कौतुकात् ॥१.

अनारभ्य स्पष्टं कमपि कुत आभात इह रे
कुतोऽकस्मादस्मादपि चलसि जानन्न किमपि।
क्षणं तिष्ठ प्राणप्रिय सकल विस्मारणपटुं
सुधाया अप्येकं पिब चषकमुत्सारितभयम् ॥२.

एकं द्वारमभूत्तथाविधमहो नोत्कीलितं यन्मया
दृष्टिर्मे न बिभेदयां जवनिका दृष्टे दृगेकाद्भुता।
त्वं चाहं च परस्परं धृतकरौ यावत् क्षणं सुस्थितौ
तावन्न त्वमभूर्न चाहमभवं शून्यं किलैकं स्थितम् ॥३.

— स्वर्गीयाः श्री खिस्ते नारायणशास्त्रिपादाः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अनुक्रमः

प्रपानकम्	पत्रपुटम्	परिवेषकः
प्रणय-गीतम्	२५७	श्री शुक्राचार्यः
श्री महर्षि-ज्ञानानन्द-चरितम्	२५८	श्री विन्ध्येश्वरीप्रसाद शास्त्री
संस्कृतशिक्षाया ह्रासः किमर्थम् ?	२५९	सम्पादकीयम्
रस-स्वरूप-विमर्शः, भक्तिरसश्च	२६३	श्री पूज्य करपात्रस्वामिनः
मानस-भारती	२६४	श्री जनार्दन गङ्गाधर रटाटे
वैदिकाऽवैदिक-दर्शन-मीमांसा	२६५	श्री जगन्नाथ श्रीधरशास्त्री पदे
(४७) क्षत्रपति-महाकाव्यम्	२६८	श्री उमाशङ्करशर्मा त्रिपाठी
हृदय-भेदः	२७०	सङ्कलितः
राष्ट्रकविः कालिदासः	२७१	श्री जगनारायण पाण्डेयः
कर्मणो गहना गतिः	२७५	श्री रामदास कौण्डिन्यः
श्री करपात्रस्वामिनं प्रति	२७९	सङ्कलितम्
देश-निर्माणे युगं नेता वा बावकः ?	२८०	श्री छबिलाल पोखरेलः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सूर्योदयः

रागद्वेषनिशाटनं विधुरयन् मोहं तमो नाशयन्,
तामिस्रं जडवादकैरवकुलं ज्ञानत्विषा ग्लापयन् ।
विद्वत्कोकमशोकयन् नयसुधीरोल्लम्बमुन्मीलयन्,
सञ्जातः सुखनोमलो मधुरयन् सर्वत्र सूर्योदयः ॥

४४ वर्षे] वाराणसी, कार्तिकः २०२५ : नवम्बर, १९६८ ई० [११ अङ्कः

प्रणय-गीतम् !

गोप्य ऊचुः

मैवं विभोऽर्हति भवान् गदितुं नृशंसं संत्यज्य सर्वविषयांस्तव पादमूलम् ।
भक्ता भजस्व दुरवग्रह मा त्यजास्मान् देवो यथाऽऽदिपुरुषो भजते मुमुक्षून् ॥ १ ॥
यत्पत्यपत्य-सुहृदामनुवृत्तिरङ्ग स्त्रीणां स्वधर्म इति धर्मविदा त्वयोक्तम् ।
अस्त्वेवमेतदुपदेशपदे त्वयीशे प्रेष्ठो भवांस्तनुभृतां किल बन्धुरात्मा ॥ २ ॥
कुर्वन्ति हि त्वयि रतिं कुशलाः स्व आत्मन् नित्यप्रिये पतिसुतादिभिरार्तिदैः किम् ।
तन्नः प्रसीद परमेश्वर मा स्म छिन्द्या आशां भृतां त्वयि चिरादरविन्दनेत्र ॥ ३ ॥
चित्तं सुखेन भवताऽपहृतं गृहेषु यन्निर्विशत्युत करावपि गृह्यकृत्ये ।
पादौ पदं न चलतस्तव पादमूलाद् यामः कथं व्रजमथो करवाम किं वा ॥ ४ ॥
सिञ्चाऽङ्ग नस्त्वदधरामृतपूरकेण हासावलोक-कलगीतज-हृच्छयाग्निम् ।
नो चेद्वयं विरहजाग्न्युपयुक्तदेहा ध्यानेन याम पदयोः पदवीं सखे ते ॥ ५ ॥
यर्ह्यम्बुजाक्ष तव पादतलं रमाया दत्तक्षणं क्वचिदरण्यजनप्रियस्य ।
अस्प्राक्ष्म तत्प्रभृति नान्यसमक्षमङ्ग स्थातुं त्वयाऽभिरमिता बत पारयामः ॥ ६ ॥
श्रीर्यत्पदाम्बुजरजश्चकमे तुलस्या लब्ध्वाऽपि वक्षसि पदं किल भृत्यजुष्टम् ।
यस्याः स्वक्षणकृतेऽन्यसुरप्रयासस्तद्वद् वयं च तव पादरजःप्रपन्नाः ॥ ७ ॥
तन्नः प्रसीद वृजिनार्दन तेऽङ्घ्रिमूलं प्राप्ता विसृज्य वसतीस्त्वदुपासनाशः ।
त्वत्सुन्दरस्मितनिरीक्षण-तीव्रकामा-तप्तात्मनां पुरुषभूषण देहि दास्यम् ॥ ८ ॥
वीक्ष्यालकावृतमुखं तव कुण्डलश्रीगण्डस्थलाधरसुधं हसितावलोकम् ।
दत्ताभयं च भुजदण्डयुगं विलोक्य वक्षः श्रियैकरमणं च भवाम दास्यः ॥ ९ ॥
का स्त्र्यङ्ग ते कलपदायतमूर्च्छितेन सम्मोहिताऽऽर्यचरितान्न चलेत्त्रिलोक्याम् ।
त्रैलोक्यसौभगमिदं च निरीक्ष्य रूपं यद् गोद्विजद्रुममृगाः पुलकान्यबिभ्रन् ॥ १० ॥
व्यक्तं भवान् व्रजभयार्तिहरोऽभिजातो देवो यथाऽऽदिपुरुषः सुरलोकगोप्ता ।
तन्नो निधेहि करपङ्कजमार्तबन्धो तप्तस्तनेषु च शिरस्सु च किङ्करीणाम् ॥ ११ ॥

श्रीमद्भागवतम्
१०.२९.३१–४१.

—परमभागवताः श्रीशुकाचार्याः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्री महर्षि-ज्ञानानन्द-चरितं महाकाव्यम्

—श्री विन्ध्येश्वरीप्रसाद शास्त्री—

कृत्यं च यन्नायनिकं कवीनां न लेखनी कर्तुमहो समर्था।
अतो विलोक्यं स्वयमेव विज्ञैस्तत्रत्यमत्यद्भुतदृश्यजातम् ॥ १११ ॥

११२. समस्त - लोकतिग - मेदपाट-
राज्यव्यवस्था क्रियते मिलित्वा।
सामन्तकाः षोडश ते प्रधाना
द्वात्रिंशदन्येऽपि भवन्ति गौणाः ॥

११३. तेषामधीनोऽस्ति महारणोऽसा-
वादेश - संपालयिता विनीतः।
तैरेव सम्मिल्य हि मेदपाट-
नृपाय सिंहासन - मर्पयन्ति ॥

११४. श्रीद्वारकेशस्य महाद्युतेश्च
श्रीनाथदेवस्य वरर्षभस्य।
विख्यातकीर्ते-र्जगदीश्वरस्य
तस्यैकलिङ्गस्य च मन्दिराणि ॥

११५. अनन्यसाधारणतां श्रयन्ति
प्रधानभूतानि लसन्ति राज्ये।
महारणस्येह च मेदपाटे
तद्भिन्न-देवायतनं ह्यसङ्ख्यम् ॥

११६. स चैकलिङ्गो भगवान् प्रगीतः
श्रीमेदपाटाधिपति - र्वरेण्यः।
महारणाद्याः सकला नृपालाः
सामन्तकाः सन्ति तदीयभृत्याः ॥

११७. श्रीद्वारकाधीश-सुमन्दिरं तच्-
छ्रीवल्लभाचार्य - सुपुत्र-पौत्रैः।
निर्मापितं यस्य च राग-भोग-
व्यवस्थितिः सा स्तवनीयरूपा ॥

११८. सुमन्दिरं तज्जगदीश्वरस्य
श्रीमाञ् जगत्सिंह-महारणोऽभौ।
व्यरीरचत् सप्तदशे शताब्दे
द्विकोटि-मुद्रा व्ययितास्तदाऽत्र ॥

११९. विशालमेतादृश-मन्दिरं हि
सुदुर्लभे भारतखण्डमध्ये।
अत्रत्य-मभ्यर्हित-कारुकार्यं
विस्मापयत्येव विदेशपान्थान् ॥

सन्मन्दिरेऽस्मिन् प्रभुभक्त - मीरा - महोदयायाः प्रणयीष्टदेवः।
वंशीधरो राधिकया समेतो विराजते दर्शक - चित्तचौरः ॥ १२० ॥

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृत-शिक्षाया ह्रासः किमर्थम् ?

विगते मासि वाराणसेय-संस्कृत-विश्वविद्यालये समायोजितस्य अखिल-भारतीय - प्राच्यविद्यासम्मेलनस्य प्रतिनिधीनां विश्वमान्यविदुषां हस्ते 'संस्कृत-शिक्षाया ह्रासः किमर्थम् ?' इतिशीर्षकान्विता राष्ट्रभाषाग्रथिता एका अल्पीयसी पुस्तिका उपायनीक्रियत। पुस्तिकाया अस्या लेखकाः वाराणसेय-गोयनका - संस्कृत - महाविद्यालयस्य पुराणेतिहास-विभागाध्यक्षाः श्रीराममूर्तिशास्त्रिपौराणिकाः सन्ति, ये हि प्रायो विंशतिवर्षैस्तत्र अध्यापयन्ति। दश पृष्ठमात्रायामस्यां संस्कृतशिक्षाह्रासस्य एकादशैरुपशीर्षकैः कारणानि निर्दिशद्भिः पर्यन्ते तत्परिष्काराय विश्व-विद्यालयोपकुलपतयः प्रार्थिता विदुषा लेखकेन।

शीर्षकेषु प्रथम–द्वितीयशीर्षकयोः विषय एक एव यत् संस्कृतविद्यायाः अध्ययनं प्राचीनकालाद् ब्राह्मकाले प्रातरेव जायते स्म। इदानीं मध्याह्ने काले संस्कृत - पाठशालानामनिवार्यतः प्रवर्तनं कारयित्वा शिक्षाधिकारिण एव तद्ध्वंसे परं सहायका अभवन्। तृतीय-चतुर्थशीर्षकयोः संस्कृतस्य कृतेऽनपेक्षितस्य विषयस्य पूरापादानं ह्रासहेतुरुपन्यस्तः। तत्रापि प्रथमतो ग्रन्थानां बाहुल्यम्, परतश्च संस्कृतेन सह हिन्द्यांग्लभाषाध्ययनमिश्रणस्य अनौचित्यं निरूपितम्। पञ्चमे उपशीर्षके परीक्षा-समयस्य मार्चमासारम्भतः अप्रैलमासस्य अन्ते मईमासस्य प्रारम्भे च नयनं शिक्षायाः ह्रासकरं समाम्नातम्। षष्ठ-दशमोपशीर्षकयोः प्रबन्धक-निरीक्षकयोः क्रूरशासनस्य कुफलनिर्देशपूर्वकं यथाक्रमं प्रबन्धकस्य मन्त्रिणश्च वा योग्यताया मापनं कृतम्। सप्तमे सर्वविधाभिः विभिन्नपरीक्षाभिः सह वाराणसेय - संस्कृत-विश्वविद्यालयीय - परीक्षायाः समकक्षता-मान्यताप्रदानमपि शिक्षाह्रासे महत्तरं साधनं निर्दिष्टम्। अष्टमे उपशीर्षके उत्सव-क्रीडा-योजनादीनामाधिक्यं दोषस्यास्य निदानं निरूपितम्। विद्यालयीयाऽवकाश-दुर्दशाचित्रमपि एकादशोपशीर्षके चर्चितं अत्रैव विभागे समाविशति। नवमे पुनः अनाचारेण शिक्षाहानिः समर्थिता।

निष्कृष्य विचार्यमाणे मान्यैर्लेखकैः शिक्षा-ह्रासस्य हेतुः वर्तमान - शिक्षणव्यवस्था एव प्रायशा निरूपिता। अन्येऽप्यत्र हेतवो विलसन्ति। वस्तुतः समग्रा साम्प्रतिकी शिक्षाव्यवस्थैव अस्या स्थितेरुत्तरदायिनी। नैकवारमस्माभिरत्र विषये स्वीया विचाराः प्रकटीकृताः। परं यदि संस्कृतसमुन्नयनस्य नेतृपदं वोढृणां मनसि विषयेऽत्र अवधानमनावश्यकं प्रतिभातीति चेत् को नाम कदा प्रभृति अरण्यरुदितं कुर्यात् ? तथापि विज्ञेन लेखकेनात्र नवेन प्रयतितम्, अतोऽस्माभिरपि एकवारं पुनः 'न्यूनं सम्पूर्णतां यातु' इतिदृष्ट्या स विषयः समासत उपक्रम्यते।

'सा विद्या या विमुक्तये' इति हि भारतीय-संस्कृतेः डिण्डिमघोषः। 'विद्या विवादाय·····' खलस्य जायते, न पुनः साधोः। विवादैस्तु दूरे आस्ताम्, कथञ्चन कीदृशमपि बन्धं विधात्र्यपि 'विद्या' न गीयतेऽत्र। तस्याः एव लब्धेरुपायाः विविधशास्त्राणि कलाश्चाश्च स्थूलारुन्धती-न्यायेन।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सेयं विद्या केवलं वीतरागाणां तपस्विनां विदुषामेव आयत्ता गुरुगृहोपासनेनैव सुलभा। नहि तत्र कोऽपि शासको धनपतिर्वा प्रभवति किमपि विषयविशेषं निर्देष्टुम्। सर्वथा शासननियन्त्रण - पारतन्त्र्य-विरहिता प्रतिकेन्द्रं विकेन्द्रिताऽपि शाश्वतेन केनचन नियमेन नियतयोग्यतया च केन्द्रिता तत्तत्क्षेत्रीय-परिस्थित्यनुगृहीता उपाध्यायमति-समुन्मिषिता शिक्षाव्यवस्था प्राचलद् भारतस्य समतीते स्वर्णिम-युगे। तत्फलमपि सुवर्णवृष्ट्यायितं समनुभूतमनेन राष्ट्रेण। तेनैव च जगद्गुरुत्वमासादितम्, विश्व-स्मिन् चारित्र्यशिक्षणस्य अद्वितीया गुरुता च स्वस्मिन् सगौरवं समुद्घुष्टाऽनेन राष्ट्रेन।

कालक्रमेण क्रमशो ह्रसन् गतः सोऽस्माकं दिव्य आदर्शः। अद्य तु अस्माभिरेव स्वीयेऽध्ययनकाले यादृश आदर्शो विलोकितः, सोऽपि स्वप्नायते। नास्ति तादृशी साम्प्रतं छात्रेषु गुरुभक्तिः, गुरुवचना-नुसृतिः, अध्ययननिष्ठा, नव-नवज्ञानार्जनलालसा च। अद्य अध्ययनमपि विशुद्धो व्यवसाय एव सम्भूतः। छात्राणां कृते स्वाभिभावकेभ्यो निष्प्र-यासं पर्याप्तं द्रव्यं निष्कास्य निर्ममं तद्व्ययेन विलासमय-जीवनयापनस्य सरलतम उपायः किल महाविद्यालयविश्वविद्यालय-स्नातकत्ववरणं नाम। गुरवोऽपि प्रायो यथाकथञ्चन पदवीमासाद्य तत्पदे समासीनाः जाड्यापरपर्यायं गुरुत्वमापन्नाः अङ्गुलि-द्वयावशिष्टं स्वर्गं मन्वते। गुरोर्वास्तवकर्तव्यनिर्व-हणपराङ्मुखास्ते विधेयान् विनेतुं कथमपि न पार-यन्ति। फलत उभयोः प्रमादेन परिपुष्टा अनु-शासनहीनता कीदृशं सुरसावदनं व्याददातीति साम्प्रतिकानां विश्वविद्यालयानां दर्शनेनैव स्फुट-तरम्। तत्कथाऽपि त्रासायाऽलम्।

शासकाः पुनरविशेषेण सर्वक्षेत्रनियन्त्रणमेव स्वीयशासनस्य निकषं मत्वा अन्यत्रधीविलास-मुन्मुक्तं प्रसारयितुमक्षमाभूत्वा शिक्षाक्षेत्रे नवनवाः कल्पनैकरमणीया योजना अवतारयन्ति। काम ता योजनाः योज्यानां हिताय भवन्तु मा वा, तेभ्योऽस्य चिन्तैव न जागर्ति। राजनीतिवत् शिक्षाक्षेत्रेऽपि मुण्डगणनां संख्यागौरवमेव वा कस्य-चन मूल्यस्य निकृष्टमपि प्रकृष्टं मापकं मन्यते तैः। फलतश्छात्रैरपि सङ्घीभूय विभिन्नेषु विश्वविद्याल-येषु यन्नग्नं ताण्डवमद्य अभिनीयते, न तत्तिरोहित-मक्षिण्वताम्।

अतो वयं सुस्पष्टं सविनयञ्च शासकाननु-रुन्धामो यन्न्यूनातिन्यूनं संस्कृत - शैक्षणिकक्षेत्रम् अनेन सांक्रामिकेण व्याधिना सर्वथा परिरक्षा-न्त्विति। तदर्थं संस्कृतस्य या प्राचीना अध्ययनाध्या-पनप्रणाली वीतस्पृहैः आचार्यैः परिकल्पिता, ता एव सम्प्रत्यपि प्रोत्साहनीया। तदनुसारं तत्र तत्र स्थाने स्वतन्त्रगुरुकुलानां सङ्घट्टनम्, सुयोग्यानां कृतविद्या-नामाचार्याणां माध्यमेन विकेन्द्रितायास्तस्याः सुनागरिकताधायिकायाः जीवनं प्रोज्ज्वलयित्र्याः शिक्षायाः प्रवर्तनम्, समये समये अधिगतविद्यानां तत्र तत्र विद्वत्संसदि परीक्षणमुखेन पाण्डित्यप्रमा-पनम्, एवमादयः प्राचीनप्रकारा एवानुसरणीयाः। तदैव संस्कृत-वेदशास्त्रज्ञानरूपोऽस्माकं चिरन्तनो निधिः सुरक्षितः स्यात्। शासनेन सुस्पष्टं ध्येयं यदत्रापौरुषेयो निर्देशोऽयं जागर्ति यत् '...निष्कामः षडङ्गो वेदोऽध्येयो ज्ञेयो गेयश्च' इति। संस्कृत-वेदशास्त्राशिक्षा किल राष्ट्रजीवनस्य मूलभित्तिपरि-रक्षणेनैव कृतार्था, न पुनः सामान्यदैनिकजीवन-यापनसाधनसम्पादनेन। तद्धि अत्यल्पमस्याः राष्ट्र-मानबिन्दुपरिरक्षण - परिवर्धन-कारिण्याः विद्यायाः प्रयोजनम्। अन्ततो निष्कादिरूपस्य द्रव्यस्य लक्ष्म्या वा मूल्यं सर्वथाऽस्थिरमेवेति अर्थशास्त्र-विदां नातिरोहितम्। वस्तूनां वास्तवं मूल्यम्,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

लक्ष्मीरूपत्वम् तद्व्यवहाराय विनिमयप्रणाल्याः कार्यकारित्वम्, अन्ततश्च विश्वशान्ति-सुव्यवस्था-स्थापनरूपस्य अनितरराष्ट्रसाधारणस्य भारत-राष्ट्रलक्ष्यस्य सर्वतः संगोपनं कथमपि कस्यापि विप्रतिपत्तिपदं नाश्रयते। एभिरेव उद्देश्यैः अस्माकं भारतराष्ट्रमिदं सर्वविधभौतिक - समुन्नतिसम्पन्ने विश्वसिमन् स्वकीयामनुपेक्षणीयस्वातन्त्र्यप्रतिष्ठां बिभर्ति। तन्निर्वहणश्च केवलमाध्यात्मिकताधिष्ठिते प्रशस्यतमे वैदिक-शास्त्रीयवाङ्मये एवाधिष्ठित-मिति नात्र लेशतोऽपि संशीत्यवसरः।

सर्वथा समादरणीयेऽप्यस्मिन् क्रमे परिस्थित्य-नुसारं किमपि परिवर्तनमावश्यकमेवेत्यत्र न कापि विप्रतिपत्तिः। तथापि तत्परिवर्तनं तथा न भाव्यं येन मूलभूतमेव लक्ष्यं विकृतिं भजेत। वस्तुतः संस्कृतविद्या किल दिनकर इव विजृम्भते, यस्या उपस्थितिमात्रेण सकलानि तमांसि विलीयन्ते। सूर्य इव गृहे गृहे गत्वा प्रबोध्य प्रतिपुरुषं प्रतिस्थानं तमापनोदनं तस्यै नापेक्षितम्। तत्प्रकाशेन सर्वमपि राष्ट्रव्यापि तमः सपदि व्यपोहृते।

सत्यप्येवं साम्प्रतिक-भौतिक-वैज्ञानिक-प्रचार-युगानुसारं विद्याया अप्यस्याः तथाकथित-प्रसार-प्रचारोऽत्यावश्यकतां भजते, इत्यत्र नास्माकं दुरा-ग्रहः। तदर्थं गुरुकुलेन, विद्वत्संसत्परीक्षणेन, विकेन्द्रित-शिक्षाव्यवस्थया सहैव विद्यालय-महाविद्यालय-विश्वविद्यालयानां सङ्घटनम्, केन्द्रीय-परीक्षा-संस्थायाः अर्धकेन्द्रित-जनपद-नगर-प्रदेश-राष्ट्रस्तरीय-शिक्षाव्यवस्थाया अपि आवश्यकताऽनुमन्तुं शक्यते। परं सा व्यवस्था यदि नाम प्राचीनभारतीय-संस्कृत-शिक्षालक्ष्य-प्रणालीप्रतीपतां गच्छेत्, तदा कथमपि नानुग्राह्या भवेत्।

इमामेव दृशमनुगृह्य संस्कृतविद्या-मातृगृहे प्रचलितमाधुनिकयुगीनं पठनपाठनं पर्यवेक्षेत चेत स्फुटं दृश्येत यद् भूतपूर्व-कम्पनीशासनाग्रहं स्वीकृत्य अस्मत्पूज्यैः प्राच्यैर्विद्वद्भिरेयैः काशिक-राजकीय-संस्कृत-प्रधानपाठशालायाः सङ्घटनम्, तदीय-परीक्षाव्यवस्था चानुमता। मान्यैः संस्कृतप्रणयिभिः तत्कालीनशासकैः विदुषां सगौरवः संस्कृतविद्यायाश्च तन्माहात्म्यं यथाशक्ति संरक्षितम्। नैकैः पाश्चात्य-पण्डितैः श्रद्धास्पदस्य भारतीयवाङ्मयस्यानुवादा-दिकमपि कृतम्।

न केवलं तदीया मौलिकाः सिद्धान्ताः एव तैः परिपालिताः, प्रत्युत सत्त्वसङ्कुले प्रातःकाले एव अध्ययनम्, एकैकगुरुनिष्ठा, अवकाशा-मर्यादादिकं बाह्यमनुशासनमपि मूलानुसार्येव सुरक्षितम्। परं क्रमशः साम्प्रतिक-युगानुरूपताधानयत्ने तत्सर्वं स्वर्गीय डाक्टर गङ्गानाथ झा-कालिक-व्यवस्थारूप-तायां पुनस्तत्परिष्कारेण महामहोपाध्याय-श्रीकवि-राजमहाभागकालिक-व्यवस्थारूपतायां परिणतम्। स्पष्टमेतद् यत्तावानेव साम्प्रतिकतानुग्रहोऽस्माकं संस्कृतविद्याशिक्षायाः कृतेऽनमासीत्। ततः परं वाङ्मयेऽत्र साम्प्रतिकतानयनमोहः किल संस्कृत-विद्यायाः संस्कृताध्ययनाध्यापनस्य मौलिकं रूपमेव खण्डयितुं प्रभवेत्, यच्चास्माभिः डाक्टर भगवान-दाससमितिप्रस्तावानुसारं तदा पाठ्यक्रमपरिवर्त-नारम्भतः अद्यावधिकं जातेन परिवर्तनेन स्फुटमनु-भूतम्, अनुभूयते च। दृढमवधेयं यत्संस्कृत-वेदशास्त्र-विद्या यावद् सविधि शौचाचारादिनियमानुगृहीता गुरुमुखतो नाधीयते, तावत्सा तेजस्विनी वर्चस्विनी वा न जायते। अतेजस्का विद्या गृहीताऽगृहीता वा समैव। अत एव वेदारम्भे शान्तिपाठे 'तेजस्विनाव-धीतमस्तु' इति पठ्यते। तदर्थं प्राचीनैव अध्ययना-ध्यापनप्रणाली नियमाश्च समनुग्राह्याः। तदैव राष्ट्रस्यायं निधिः सुरक्षितो विधातुं शक्येत।

अतोऽस्माभिस्तस्मिन्नेव पूर्वतनीय - पाठ्यादि-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्रमे परावर्तनीयम्। सत्येवं संस्कृतविदुषां नवयुगानुरूपतां विधातुं किं करणीयमिति प्रश्नस्तु अनुत्तरित एव तिष्ठति। स हि विषयो नूनं स्वतन्त्रेण निबन्धेन विवेचनीयः। तथापि अवसरेऽस्मिन् संक्षेपेण तद्दिग्दर्शनं वाञ्छ्यते चेदिदं वक्तुं शक्यते यदेतादृशनवयुगानुरूपविदुषां निर्माणाय स्वतन्त्रा परीक्षा, स्वतन्त्रः पाठ्यक्रमः, स्वतन्त्रा च पाठनशैली प्रस्तोतव्या। तत्र समुत्तीर्णाः लौकिके सर्वस्मिन्नपि क्षेत्रे यथा क्षमा भवेयुस्तथा निःसङ्कोचं प्रयतनीयम्। ते किल 'संस्कृतपण्डित'-पदवीं कथमपि न भजिष्यन्ति, केवलं 'संस्कृतज्ञ'-संज्ञामेव भूषयिष्यन्ति। यदा तेभ्योऽपि 'संस्कृतपण्डितत्व'स्य वाञ्छा स्यात्तदा पुनरपि सः प्राचीनपाठ्यक्रम एव सविधि पठनीयो भवेत्।

सत्येवं प्राचीनपाठ्यक्रमानुसारं समधीयमानानां विदुषां योगक्षेमस्य क उपायः इत्ययं प्रश्नस्तु असमाहित एव। तदर्थमस्माकं मतमिदं यत्तैः कर्मकाण्ड-पुराण-ज्यौतिषाऽऽयुर्वेद - तन्त्रादिरूपाणामर्थकरीणां विद्यानामेवाऽऽश्रयोऽवलम्बनीयः। प्राचीनकाले एता एव विद्याः समाश्रित्य अस्माकं पूर्वजैः स्वीयो योगक्षेमः निर्व्यूढश्चेदस्माकं तत्त्वतः संस्कृतविद्यासमुन्नयनं वाञ्छतां कृते कथं नाम ताः कार्यकारिण्यो न भवेयुः ?

अन्ततः संस्कृत-वाङ्मय-रक्षणं नूनं महत्तरं राष्ट्रोन्नयन-व्रतम्। व्रतं मूलतः कष्टकरमेव भवति, न तु सुखकरम्, यद्यप्यग्रे परिणामे तत् शाश्वतसुखकरमेव जायते। तदुद्देशेनैव हि तत्समाचर्यते। अतस्तत्र केवलमिदमेव द्रष्टव्यं भवति यद् यथाकथमपि जीवनयात्रा प्रचलतु इति। सत्येवमेतैः 'संस्कृतपण्डितैः' आधुनिकतम-प्राध्यापक-प्रवाचक-विभागाध्यक्षादिसुलभ-सौविध्यानामाशैव त्यक्तव्या इत्येव तेषां व्रतनिष्ठायाः कृते प्रशस्ततमं भवेत्।

यथाऽस्माभिः संस्कृतसमुन्नयनव्रतिनः अनायास-वैध-समुपलब्ध-साधनैरेव सदा सन्तोषं जीवनयापनाय प्रार्थ्यन्ते, तथैव राष्ट्रशासनमपि तेषां कृते सर्वविधसहयोग-प्रदानाय समनुरुद्ध्यते। यतो हि तत्किल राष्ट्रपरिपालनाय गृहीतव्रतम्, एतेऽपि च राष्ट्रमूल-संरक्षणायैव व्रतं समाचरन्ति। नहि सैन्यम्, राजनीतिः, दण्डनीतिः अर्थश्च—इत्येव राष्ट्ररक्षणस्य मूलस्तम्भाः। प्रत्युत संस्कृतविद्यासदृशः सुदृढो मूलस्तम्भः एतेषु कोऽपि नास्ति। कस्यापि राष्ट्रस्य वास्तविकं स्वतन्त्रमूल्यं तदीया संस्कृतिरेव। सा च तद्राष्ट्रिय-प्रतनशास्त्राण्येव समाश्रित्य सुस्थिरा भवति। भारतराष्ट्रस्य संस्कृतिः पुना राष्ट्रिया सत्यपि अखिलविश्वस्यापि प्रातिनिध्यकरणे प्रभवति। अतस्तस्याः संस्कृतेः परिरक्षणं विश्वस्य कृते परमावश्यकं चेद् भारतराष्ट्रसञ्चालकानां कृते किमु वक्तव्यम् ? अतो भारतशासकैः एते संस्कृतपण्डिताः वर्षासनादिना नूनं समर्चनीयाः। प्राचीनभारते इदमेव जायते स्म। प्राचीनभारतशासनप्रतिनिधिभूतेन वर्तमानस्वतन्त्रशासनेनाप्ययं क्रमोऽनुसरणीय इत्येव तटस्थानां निर्विधिकित्सं मतम्। अपि नामावधास्यति भारतशासनमत्र ?

★

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पूर्वतोऽनुवृत्तः

रस-स्वरूप-विमर्शः, भक्तिरसश्च

—श्री पूज्य करपात्रस्वामिनः—

यदुक्तम्—"स्वप्रकाशवादे आवरणभङ्गमन्तरेण इतरस्यानपेक्षणात् तस्मादेव आनन्दीभवनसम्भवात् पूर्वांशवैयर्थ्यमि"ति। तदपि न; आवरणभङ्गेन चिदात्मना प्रकाशेऽपि रसात्मना प्रकाशाय पूर्वांशस्य सार्थक्यात्। अतः स्वान्तःकरणसाक्षितया आत्मनो भानेऽपि अनाद्यविद्याप्रतिबन्धेन पूर्णानन्दात्मनाऽभानमुपपद्यते। तदुक्तम्—

अतो भानेऽप्यभाताऽसौ परमानन्दताऽऽत्मनः।
इति।

तत्र पूर्णानन्दात्मना भाने तत्त्वसाक्षात्कारोऽपेक्षितः। रसात्मना भानाय आवरणभङ्गमात्रमपेक्षितम्। अत एव सावरणोऽनावरणं रसं लब्ध्वाऽऽनन्दीभवति इत्यपि युक्तमेव। न च अनावरणः सन्नित्यनेनैव तत्सिद्धमिति वाच्यम्; तत्त्वसाक्षात्कारमन्तरा सावरणस्य सर्वथा अनावरणत्वासम्भवात्। केनचिदंशेन तथात्वे तु पूर्वोक्तव्यवस्थैव युक्ता। विषयावच्छिन्न-चैतन्यनिष्ठस्य आवरणस्य भङ्गे विषयप्रकाश एव। स्थाय्यवच्छिन्न-चैतन्य प्रकाशे तु रसात्मना भानम्।

न च चेतनस्य निरंशत्वेन तस्मिन्नेव कथमंशाशिभावः? कथं चांशेन भानम्, अंशान्तरेण चाभानमिति वाच्यम्; वृक्षयोर्भानेऽपि तदभिन्नस्य भेदस्याभानवत् प्रकृतेऽपि तदुपपत्तेः। यथा त्वन्मते निरंशस्य निर्विकारस्यापि रससिन्धुर्बिन्दुः स्वल्पानन्दो जीवः संभवति, तथैव प्रकृतेऽपि तत्सम्भवात्।

एतावांस्तु विशेषः—त्वन्मते स परमार्थभूतः, अत्र त्वविद्योपाधिनिबन्धन एव। अयं स प्रकृतपरमात्मैव रसः रसपदार्थः। तमेव नापरं पूर्णात्मनांऽशेन वा लब्ध्वाऽयं सोपाधिको जीवः आनन्दीभवति।

न चेदृशस्य स्थाय्यवच्छिन्नस्य भग्नावरणस्य चैतन्यस्य उत्तरमीमांसया गतार्थता; तत्र अनवच्छिन्नचैतन्यस्य उपेयत्वात्, गुडजिह्विका-न्यायेन परमोपेयप्रतिपत्यर्थत्वाद् रसशास्त्रस्यात्रापि सार्थक्यात्। त्वन्मते तु उत्तरमीमांसयाऽपि सविशेषस्य प्रतिपत्तव्यत्वेन रसशास्त्रस्यापि अप्राकृतरसपर्यवसितत्वेन उत्तरमीमांसया अनारभ्यत्वापत्तेश्च।

न च अपारमार्थिकत्वापत्त्या न रसशास्त्रस्य तत्र पर्यवसानमिति वाच्यम्; धर्मशास्त्रवत् तथात्वेऽपि दोषाभावात्। अप्राकृतरसपर्यवसायित्वे तु ब्रह्मपर्यवसायित्वमेव। भक्तिरसस्य निरुपमसुखसंविद्रूपस्य अस्पृष्टदुःखानर्थव्रातस्य भक्तियोगस्य भगवद्रूपत्वोक्तेः। न च तथात्वे स्थायिभावाऽलम्बनविभावयोरैक्यापत्तिरिति वाच्यम्; बिम्ब-प्रतिबिम्बवदभेदेऽपि सोपाधिकभेदसत्त्वात्। न च तर्हि निर्विशेषस्येव अस्यापि पारमार्थिकत्वे सद्वितीयत्वापत्त्या निर्विशेषत्वहानिः स्यादिति वाच्यम्; तस्योपाधेः परमार्थसत्तापेक्षया किञ्चिन्न्यूनसत्ताकत्वेऽपि बाधाभावात्। भगवद्गुणानां तद्भूषणाद्यपेक्षया उत्कर्षेऽपि सर्वनिरपेक्षस्वरूपापेक्षया किञ्चिन्निष्कर्षवत् तददोषात्। बिम्ब-प्रतिबिम्बयोरिव स्थाय्यवच्छिन्न - विभावालम्बन - चैतन्ययोरभेदेन तत्रापकर्षाभावात्।

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मानस-भारती--देवगिरा गुम्फितं मानसम्

—श्री जनार्दन गङ्गाधर रटाटे, एम० ए०, साहित्याचार्यः—

यतोऽजयदरीन् रामो भीतिर्नृस्वर्गिणां गता।
ततः समानयत् सीतां सौमित्रिर्विगतव्यथाम्॥
आलिलिङ्ग प्रभुस्तुष्टस्तं नमन्तं पदाब्जयोः।
मृदुलं श्यामलं गात्रं प्रेम्णा पश्यति जानकी॥
तदानीं नयने तस्या अवलोके न तृप्यतः।
पञ्चवट्यां वसन् रामोऽकरोल्लीलाः सुखप्रदाः॥
दृष्ट्वा शूर्पणखा नष्टौ तदानीं खरदूषणौ।
गत्वोचे रावणं क्रुद्धा देशः कोशश्च विस्मृतौ॥
मद्यपोऽहर्निशं शेषे शत्रुं वेत्सि न शीर्षगम्।
विना नीतिं प्राप्य राज्यं विना धर्मं तथा धनम्॥
समर्पणं विना विष्णोः सत्कर्म विहितं यदि।
विना विवेकं पठिता विद्या च श्रमदा फले॥
सङ्गाद् यतिः कुमन्त्राच्च नृपो मानात् सुबोधनम्।
पानाल्लज्जा शीलहानात् प्रेम गर्वाद् गुणी जनः॥
शीघ्रमेते विनश्यन्ति नीतिरित्थं श्रुता मया॥
अरी रोग-वैश्वानराघेशसर्पा
न ऊना विचार्याः कदापीह लोके।
निगद्येति नाना प्रकारं विलप्य
तदा रोदनं साऽकरोत् तीव्ररूपम् ॥२१॥ (क)
मध्येसभं सा विकला पपात
नानाविधानं रुदती जगाद।
किं जीवतीत्थं त्वयि मेऽस्ति युक्ता
गतिर्दशग्रीव विचारयाऽऽशु ॥२१॥ (ख)

व्याकुला उदतिष्ठन्त श्रुत्वैतत् ते सभासदः।
तामुत्थाप्य करे कृत्वा समाश्वासनमाचरन्॥
पप्रच्छ रावणः केन कृत्ते ते कर्ण-नासिके।
सोचे दशरथस्य द्वौ नरशार्दूलकौ सुतौ॥
वनं क्रीडितुमायातौ प्रतीता मां तयोः कृतिः।
पृथ्वीं करिष्यतः सर्वां रक्षाभीरहितामुभौ॥
बालौ धीरौ कालतुल्यौ धन्विनौ गुणसंयुतौ।
अतुल्यबलवीर्यौ तौ खलानां निधने रतौ॥
सुरर्षिसुखदौ शोभाधाम द्वौ भ्रातरौ परम्।
रामस्तन्नाम नार्येका ताभ्यां सह सुशोभना॥
सौन्दर्यराशिर्नारी सा विधात्रा निर्मिता तथा।
तस्याः पुरो यथा तुच्छा रतीनां शतकोटयः॥
अनुजस्तस्य चिच्छेद कर्णनासे तदा मम।
श्रुत्वा स्वसारं तव मामुभावहसतां ततः॥
श्रुताक्रोशौ समायातौ सहायौ खरदूषणौ।
किन्तु क्षणेनैव तथा सैन्यं सर्वं विनाशितम्॥
वधं त्रिशिरसः श्रुत्वा खरदूषणयोस्तथा।
रावणस्याङ्गानि तत्र प्रदीप्तान्यभवन् क्षणात्॥
स्वसारमाश्वास्य दशाननस्तु
निजं बलं तां प्रति वर्णयित्वा।
अतीव चिन्तावशगो जगाम
प्रासादमेनं निशि नैव निद्रा ॥२२॥
(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वैदिकाऽवैदिक-दर्शन-मीमांसा

—श्री जगन्नाथ श्रीधरशास्त्री पदे—

[वटोदर-पत्तनस्थैः सुप्रसिद्धप्राच्य-प्रतीच्यविद्याकोविदैः श्री शास्त्रिपादैः विशेषतः 'सूर्योदय'स्य कृते परया कृपया संग्रन्थितोऽयं सकलः शास्त्राम्भोधिसमुन्मथनसारसर्वस्वो निबन्धः विगतेष्वङ्केषु वारत्रयं धारावाहिकतया प्रकाशितः। ततः परं तेषां कार्यव्यस्ततयाऽस्माभिरग्रिमोऽंशो विलम्बेनासादितोऽत्र विज्ञेभ्यः पाठकेभ्यः सादरमुपायनीक्रियते।—सम्पादकेन]

"अपरे तु वादिनः पारमार्थिकमेव जैवं रूपमिति मन्यन्ते। अस्मदीयाश्च केचित् तेषां सर्वेषामात्मैकत्व-सम्यग्दर्शनप्रतिपक्षभूतानां प्रतिबोधायेदं शारीरकमारब्धम्" इति च। (शां० भा० १.३)

इत्थं प्रमाणान्तराप्रमेयस्यापि परब्रह्मणो वेदान्तैः प्रबोधितं विकारगोचरमवस्थानम् अवधारितम्। अत्रैकस्यैव पदार्थस्य दर्शनद्वयं सम्पन्नम्—श्रौतमेकम्, अपरमश्रौतम्। एकस्यैव पदार्थस्य परस्परविरुद्धमेतद् दर्शनद्वयमिति स्पष्टप्रतिपत्त्यर्थमत्रैव संक्षेपतः परामृश्यते प्रसङ्गागतत्वात्। विस्तरस्तु यथास्थानमेव करिष्यते। प्रसङ्गागतदर्शनद्वयविचारानन्तरं प्रकृतं क्रमप्राप्तं ब्रह्मणो लक्षणं विस्तरेण उपपादयिष्यते।

पादोऽस्य विश्वा भूतानि। (मा० सं० ३१.३) **विष्टभ्याऽहमिदं कृत्स्नमेकांशेन स्थितो जगत्।** (गी० १०.४२) इत्यादिषु श्रुतिस्मृतिषु ब्रह्मणो विकारवर्ति स्वरूपं प्रतिपादितम्। सर्वाणि भूतानि परस्य ब्रह्मणः सोपाधिकं स्वरूपम्। भूतानि हि द्विविधानि—स्थावराणि जङ्गमानि च। सर्वाणि पाञ्चभौतिकानि। तत्राऽऽकाशः पृथिवी चेति महाभूतद्वयं जडेऽपि विद्यते। अवशिष्टं महाभूतत्रयम् अग्निर्वायुर्जलं चेति चेतनानां भूतानाम् असाधारणो धर्मः। एतन्महाभूतत्रयमेव सर्वेषां भूतानां लक्षणम्। तत्र मध्यस्थो वायुः योगवाह इत्यग्निना युक्त उष्णो भवति, जलेन युक्तश्च शीतो भवति। तथा चोक्तं चरके—

योगवाहः परं वायुः संयोगादुभयार्थकृत्।
दाहकृत् तेजसा युक्तः शीतकृत् सोमसंश्रयात्॥
(चिकित्सास्थानम् ६.२८)

एवम् अग्निर्जलं चेति महाभूतद्वयमेव प्राधान्यतोऽवशिष्यते इति महाभूतद्वयात्मकान्येव सर्वाणि भूतानि—आग्नेयानि आप्यानि च। तैजसानि जलानि चेति वा। डलयोरभेद इति तैजसानि जडानि च। चेतनान्यचेतनानीति यावत्। चेतन आत्मा, शरीरं चाचेतनम्। तत्रात्मनः प्रत्यक्षेणाग्रहणात् शरीरस्य च प्रत्यक्षेण ग्रहणात् सर्वाणि भूतानि इदं सर्वमिति व्यपदिश्यन्ते। चेतनेनात्मना परित्यक्ते शरीरे अग्नितत्त्वव्यतिरेकेण चत्वारि महाभूतानि विद्यन्त एवेति अग्निरेव भगवान्—

अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः। (गी० १५.१४) इति स्मृतेः स्वयंज्योतिस्वरूप आत्मा। तथा चोक्तम् उत्तरमीमांसायां सूत्रे भाष्ये च—

अत्रैव चोपपत्तेरेष ऊष्मा। (ब्र० सू० ४.२.११)

CC-0. Panini Kanya Maha Vidyalaya Collection. Gurukul Kangri Vishwavidyalaya, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'अस्यैव च सूक्ष्मस्य शारीरस्यैव ऊष्मा यमेतस्मिञ्छरीरे संस्पर्शेनोष्माणं विजानन्ति। तथा हि—मृतावस्थायामवस्थितेऽपि देहे विद्यमानेष्वपि च रूपादिदेहगुणेषु नोष्मा उपलभ्यते, जीवदवस्थायामेव तु उपलभ्यत इत्यत उपपद्यते प्रसिद्धशरीरव्यतिरिक्तव्यपाश्रय एवैष ऊष्मेति। तथा च श्रुतिः—'उष्ण एव जीविष्यत् शीतो मरिष्यत्'' इति।

(शाङ्करभा० ४.२.११)

आत्मा हि नित्योऽविनाशी च। भूतचतुष्टयात्मकं जलप्रधानं जडं शरीरमनित्यं विनाशी च। तस्मादिह सर्वं दृश्यं जगदविनाशिस्वरूपेण ब्रह्मेति आत्मेति पुरुष इति वासुदेव इति च श्रुतिभिरवधार्यते। इत्थमेकस्यैव पदार्थस्य दर्शनद्वयं सम्पद्यते—विवेकेन आत्मा, अविवेकेनेदं सर्वमिति।

(१)

ब्रह्मदर्शनमात्मैकत्वदर्शनं वा वैदिकम्, ब्रह्मणो वेदैकगम्यत्वात्, केवलायां चितिशक्तौ प्रकाशमानत्वाच्च। चितिर्ज्ञानं वेदाश्चेति पर्यायाः। अत एव ब्रह्म चिन्मयं विज्ञानघनं त्रयीमयं वेदमयं चोच्यते। ब्रह्मधर्मश्चिच्छक्तिः। धर्मेणैव धर्मी परिज्ञायत इति चिच्छक्त्या वेदैर्वा ब्रह्म ज्ञातुं शक्यते। शक्तिशक्तिमतोरभेदः सम्बन्धः। अयमेवार्थः **शास्त्रयोनित्वात्** इति सूत्रेण (ब्र० सू० १.१.३) ज्ञाप्यते। शास्त्रं वेदाः चितिशक्तिर्वा योनिः कारणं प्रमाणमस्य ब्रह्मणो यथावत् स्वरूपाधिगमे। शास्त्रस्य वेदानां चितिशक्तेर्योनिः कारणं ब्रह्म। व्युत्थाने आनन्दांशादेव चितिशक्तेरुद्भवः, समाधौ आनन्दांशे चितिशक्तेर्विलयश्च। श्रुतेरक्षुण्णं श्रूयमाणत्वाद्। अस्मिन् पक्षे प्रत्यक्षं प्रमाणं वेदाः स्वतःप्रमाणं च।

अस्य सर्वस्य दृश्यस्य विषयीभूतस्य जगतो दर्शनमनात्मदर्शनं वा अवैदिकं तार्किकं च, वेदनिरपेक्षप्रमाणविषयत्वात्। अवैदिकास्तार्किका द्विविधाः—तर्कानुकूलं वेदान् शब्दप्रमाणत्वेन प्रमाणयन्तो भूतेन्द्रियात्मकस्य दृश्यस्यापवर्जनानन्तरं देहव्यतिरिक्तस्य चिदात्मनोऽस्तित्वं मोक्षकाले प्रत्यक्षीकुर्वाणा भोगापवर्गवादिनो वैदिकभिन्ना वैदिकसदृशाः। वेदानप्रमाणयन्तो देहव्यतिरिक्तस्य चिदात्मनोऽस्तित्वमनङ्गीकुर्वन्तः अपवर्गवादिनो भोगवादिनश्च वेदबाह्याः।

(२)

ब्रह्मदर्शनं देवानाम्। देहात्मदर्शनं इदं सर्वमिति दृश्यस्य जगतो वा दर्शनमसुराणाम्। तथा हि—

देवाश्च वा असुराश्च। उभये प्राजापत्याः पस्पृधिरे।

(मा० शा० १.२.५.१; ५.१.१.१; ११.१.८.१)

ह्या ह प्राजापत्याः। देवाश्चासुराश्च, ततः कानीयसा एव देवा ज्यायसा असुरास्त एषु लोकेष्वस्पर्धन्त।

(मा० बृ० १.१.१; १.३.१)

इति प्राजापत्यानां भूतानां देवासुरविभागः, तेषु स्पर्धा च श्रूयते। गीताशास्त्रेऽपि—

द्वौ भूतसर्गौ लोकेऽस्मिन् दैव आसुर एव च।

(१६.६)

इति लोके सृज्यमानानि भूतानि दैवासुरसम्पद्युक्तानि प्रोक्तानि। सर्वेषां भूतानां द्वैविध्योपपत्तेः। विभागोऽयं सनातनः, इदानीमपि लोकेषु दर्शनात्। भगवता स्वयमेवायं विभागः सविस्तरं गीताशास्त्रे षोडशाध्याये प्रपञ्चितः। दैवी सम्पदुपादानार्थमासुरीसम्पच्च परिवर्जनार्थं महता कौशल्येन प्रदर्शिता।

तत्र देवानामिन्द्रो विरोचनश्चासुराणां ब्रह्मज्ञानार्थं प्रजापतिं जग्मतुः। प्रजापतिना प्रथमं देहात्मवाद एव प्रोक्तः। विरोचनेन च यथाश्रुतं गृहीतः, असुरेभ्यश्च प्रोक्तः। असुरास्तेन अनात्मवादिनः संवृत्ताः। इन्द्रेण तु यथाश्रुतं न गृहीतः। पुनः पुनरागत्य एकशतं वर्षाणि ब्रह्मचर्येण प्रजापतिं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परितोष्य ततो ब्रह्मज्ञानं गृहीतम्। देवेभ्यश्च प्रोक्तमिति देवा ब्रह्मवादिनः संवृत्ताः इति छान्दोग्ये अष्टमाध्याये श्रूयते। तत आरभ्यैव अनात्मवादोऽसुराणाम्, आत्मवादश्च देवानामिति विभागः प्रवृत्तः।

दिवु क्रीडा-विजिगीषा-व्यवहार-द्युति-स्तुति-मोद-मद-स्वप्न-कान्ति-गतिषु (११०७ सि० कौ०) इति। दीव्यन्तीति देवाः। पचादिषु पाठात् (३.१.१३४ पा० सू०) अच्। द्युतिमन्तो द्योतमाना वा देवाः। द्योतमानत्वं च स्वयंज्योतिःस्वरूपेण आत्मनैव। शोभनं राजन्ते इति सुराः। राजृ-दीप्तौ। अन्येभ्योऽपि (वा० ३. २. १०१) इति डः। न सुरा असुराः सुरविरुद्धाः, देहात्मवादिनो जडास्तामसा वा।

(३)

ब्रह्मणोऽविनाशित्वाद् अनुच्छित्तिधर्मत्वात् अस्तीत्येवोपलब्धव्यः। (क० ६. १३) इति श्रुतेश्च नित्यमस्तित्वम्। अत एव ब्रह्मवादिन आस्तिकाः।

सर्वं परिदृश्यमानं जगद् विनाशीत्यनित्यम्। आद्यन्तवच्च। पूर्वं नासीत् भविष्ये च न स्यात्। कालद्वये अभावाद् वर्तमानकाले एव केवलमस्तितत्व-दर्शनाद् भवस्याप्युभयतोऽभावेन ग्रस्तत्वाद् ब्रह्मण्येकस्मिन् अविद्याध्यस्तं जगद् वर्तमानकालेऽपि नास्तीत्येव उच्यते। तेन अनात्मवादिनो नास्तिकाः। आत्मनोऽस्तित्वाङ्गीकाराभावात् जगदसत्यमप्रतिष्ठितं च भवति। तथा चोक्तं गीतायाम्—

असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरम्।
(१६ १) इति।

(४)

ब्रह्म गो ध्रियमाणत्वाद्, अत एवाविनाशित्वाद् ब्रह्म धर्मः। जगतोऽध्रियमाणत्वात्, अत एव विनाशित्वात् जगदधर्मः। अत एव ब्रह्मवादिनो धार्मिकाः। जडवादिनोऽधार्मिकाः कामुका वा।

ब्रह्मदर्शने ब्रह्मणोऽजत्वादविनाशित्वादत एव नित्यत्वाद् उत्पत्तिप्रलयचिन्ता नास्ति। अनुत्पद्यमानत्वादत एव अकार्यत्वाच्च कारणविचारोऽपि नास्ति।

इदं सर्वमित्यनात्मदर्शनम्। इदं सर्वं परिदृश्यमानं जगत् कार्यत्वात् कथमुत्पन्नं कस्माच्चोत्पन्नमिति जगत्-कारणवादः समुज्जृम्भते। वेदबाह्या-अवैदिकाश्च सर्वेऽपि तार्किकाः सप्रमाणं जगत्कारणं तर्कयन्ति। तथापि न तत्र कस्याप्यैकमत्यमिति महदाश्चर्यम्। ऐकमत्याभावात् तार्किकाणां विभिन्ना जगत्कारणवादाः प्रवर्तन्ते। सर्वेऽप्येते वादिनो महताऽभिनिवेशेन परतन्त्रसिद्धान्तान् दूषयित्वा स्वसिद्धान्तं प्रतिष्ठापयन्ति। एवं तार्किकाणां सर्वेऽपि जगत्कारणवादा दूषिताः खण्डिताश्च भवन्तीति तेषु प्रामाण्यं न प्रतिष्ठते। तार्किकाः परस्परमेवं दूषयित्वा जगत्कारणवादस्तर्केण सर्वथा दुरुपपाद इत्येव साधयन्ति। तर्केणैव कार्यकारणभावस्य अप्रतिष्ठितत्वात् कार्यकारणभाव एव जगदन्तरेण प्रतिष्ठते इत्येव निगमयन्ति। अत एव ब्रह्मवादिनां तैः सार्धं विवादस्य प्रसङ्ग एव नोपतिष्ठते। अत एवोक्तं गौडपादाचार्यैः—

भूतस्य जातिमिच्छन्ति वादिनः केचिदेव हि।
अभूतस्यापरे धीरा विवदन्तः परस्परम्॥
भूतं न जायते किञ्चिदभूतं नैव जायते।
विवदन्तोऽद्वया ह्येवमजातिं ख्यापयन्ति ते॥
ख्याप्यमानामजातिं तैरनुमोदामहे वयम्।
विवदामो न तैः सार्धमविवादं निबोधत॥
(गौ० का० ४.३-५)

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्षत्रपति-महाकाव्यम्

—श्री उमाशङ्कर शर्मा त्रिपाठी—

[आंग्लभाषा-प्राध्यापकः—काशी-विद्यापीठम्, वाराणसी]

प्रतीहि राजन्नुपलब्धचेतनाः
पुरा प्रतप्ताः प्रतिशोध-दुष्कृतिः ।
तनीयसीं वाऽपि कदर्थनां प्रजा
न वेत्ति विस्मर्तुमुदायुधोन्मदा ॥ ८१ ॥

यशस्करा[1]जीवदया दयादृशः
सुखं समुत्तीर्ण-चलोर्मिनिम्नगाः ।
भवत्कुलाद्याः त्रिदिवं ययुर्यया
तरिः कथं धीवर सैव खण्ड्यते ॥ ८२ ॥

सुपात्रनिक्षिप्त - मनल्पलब्धये
यदल्पमप्याहु - रपास्तकल्मषाः ।
अलं महापात्रतया तदग्रत-
स्तव स्थितिर्नन्दतु पुण्यपर्वणि ॥ ८३ ॥

अनेन नूनं नवनिर्णयेन ते
निरामयत्वं प्रकृतिर्गमिष्यति ।
प्रजासु मातेव भवन्मतिः सदा
सुखावधाना - ऽवसरार्थनिश्चया ॥ ८४ ॥

अघावसानो-ऽर्थबलेन लभ्यते
किमत्र वाऽघं परतन्त्रतासमम् ।
तदाशु लोको दुरिताद्विमुक्तये
ददातु नव्यं करमिष्टभूभृते ॥ ८५ ॥

विधिप्रबन्धा - नतिमानुपाध्वन-
स्तवाऽऽत्मयोनेरिव सृष्टिविस्तरान् ।
मुधा यतन्ते मनुजाः परीक्षितुं
फलार्गलाकीलित - कर्मवृत्तयः ॥ ८६ ॥

सुषुप्तिलीन - श्चरणाहतैरतो
महाभुजङ्गः शिरसीव कालराट् ।
अयं स्वदेशः कुपिताक्षिभीषणं
जयाय जागर्तु कशोपमैः करैः ॥ ८७ ॥

स्वभूपभक्ति - र्धनसङ्ग्रहादरो
मनोरतिस्त्यागपथे-ऽघसंच्छिदि ।
यथार्थमात्मस्थितिबोधसत्क्रिया
नवं करं भूरिफलाय कल्पते ॥ ८८ ॥

स्तवः प्रवादो द्वयमप्यसंशयं
धियामुपाधिर्नहि वस्तुधर्मता ।
विभिन्नदेशस्थितिकालयन्त्रितो
विहातुमीशो न जनो निजाग्रहम् ॥ ८९ ॥

तदत्र मात्सर्यजडीकृता नु वा
प्रतीतपद्या प्रकृतिः त्वयि प्रभो ।
त्वमश्रुतैस्तां व्यसनक्षतामथो
चिकित्सितुं शल्यपथैः प्रवर्तसे ॥ ९० ॥

क्व भिक्षुकग्रासमुषा श्रुतस्त्वया
नवक्रमोऽयं दुरिताऽधमाऽवधिः ।
अलं रुदत्कीटपतङ्गदोहनै-
स्तवार्थिनोऽभीष्टसुरद्रुमे मयि ॥ ९१ ॥

सुवर्णता - मायसमप्यनुत्तमां
सकृत्करस्पर्शसनाथितं मम ।
विभो ! यदाविष्कुरुते निरन्तरं
किमर्थिनोऽपि क्षतकर्ण ! भिक्षसे ॥ ९२ ॥

१. यशस्करीजीवं ददाति यशस्करीजीवदा तया ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उदग्रधामोदय - नन्दितात्मनः
सपक्षता हिन्दुजनाय तेऽचिरम् ।
परां भवत्कीर्तिमपेतसंशयां
पतङ्ग ! दिष्ट्या प्रकटीकरिष्यति ॥ ९३ ॥
प्रजापतेस्तेऽतिशयाऽऽत्मसम्पदं
व्यनक्ति सम्बन्धजनिः करग्रहः ।
अभीष्टपीडानुभवोऽपि तद्विधा-
वनल्पपुण्यायतिरेव देहिनाम् ॥ ९४ ॥
वृको यथा पाशनिबद्धविग्रहो
ज्वलत्क्षुदुत्ताप - समाकुलेन्द्रियः ।
सुतीक्ष्ण - दंष्ट्राव्यवसाय-भीषणं
न वेत्सि मांसाशनमात्मनोऽपि किम् ॥ ९५ ॥
स्वयं गलन्नागलतादलं यथा
प्रवर्तमानं तव कर्म भूपते ।
उभौ हि पूर्वापरवर्तिनौ हठान्
निहन्ति भूतञ्च भविष्यमुज्ज्वलम् ॥ ९६ ॥
व्यपत्रपात्मन् करमीहसे कथं
प्रजासु रक्षाभरणाक्षमोऽप्यहो ।
व्यपेक्षते क्लीवधवं किमाकुला
कुदैवयोगाच्छलिताऽपि कामिनी ॥ ९७ ॥
भृशातुरै - र्दण्डविमण्डितै - र्जनै-
रुरीकृतेयं पितृपक्षता न वा ।
प्रसीद कामं बलिपुष्ट - तुष्टये
दुरात्मनां दुर्विधयोऽपि दक्षिणाः ॥ ९८ ॥
न राजसिंहे बलनिग्रहेण किं
करग्रहायोत्सहसे परस्वमुट् ।
कृशाऽपि तेषां करवालिका नु किं
भवादृशानां मुखमुद्रणे क्षमा ॥ ९९ ॥
पतत्प्रकर्षोऽपि तवाऽनिशाऽशनि
प्रहारभिन्नावयवो जरन्मते ।
न राष्ट्रशाखी पतितोऽवनौ यदि
परं प्रभावोऽक्षवरस्य तद्ध्रुवम् ॥ १०० ॥
अकिञ्चनेनाऽपि मया तव स्थितिः
प्रकल्प्य राज्यं नृपताजुषाऽऽहृता ।
त्वयाऽपि मानुष्यपथार्हगौरवं
ममोद्यमोऽयं धरणीश ! रक्ष्यताम् ॥ १०१ ॥
पुरा यथाशीविषभीतिशङ्कया
फणामवेक्ष्यैव वशङ्कता अपि ।
ध्रुवं जनाः डुण्डुभसत्त्ववर्तिन-
स्तवाद्य याथार्थ्यविदो न बिभ्यति ॥ १०२ ॥
निषेवितोऽरण्यमरुत्तपत्पथाः
पयोधिशूरै - र्लुठिता मुहुर्मुहुः ।
निरस्तपाथेयजडा सदाशिषा
क्षमावलं ते दृढयन्ति तीर्थगाः ॥ १०३ ॥
अरक्षितान् गोडभुवो प्रजाजनान्
विदेश्यजालमा- बलिपुष्ट ! निर्दयम् ।
हठात् क्षिपन्तो व्यसने पशूनिव
ह्रियं रुषं वा जनयन्ति किं त्वयि ॥ १०४ ॥
मया समाकर्षयताऽपि सूरते
तव स्थितिर्नैगमसम्पदा सह ।
प्रकाश्य दिल्लीबलचित्रसिंहतां
चिकित्सिताः मोघभयातुराः विशः ॥ १०५ ॥
भृतिं गृहीत्वाऽपि समुज्झितोद्यमो
वपुर्धरो - दण्डभयै - र्विशोध्यते ।
करग्रहीता परिरक्षणाक्षमो
नृपोऽपि किं वञ्चयितुं प्रभुं प्रभुः ॥ १०६ ॥

---

१. राजसिंहः—मेवाडनृपः हृदयशङ्कुरिव दिल्ली-पतेरवरङ्गजीवस्य ।

१. 'मक्का' प्रति प्रस्थिता तीर्थगाः तुरुष्काः मध्येपथं पोर्तुगालीयैः जलदस्युभिः बलात् लुण्ठिताः ।

२. वङ्गप्रान्ते यूरोपीयाः व्यापारिण प्रजाजनं बहुविधं निर्भयं विपदि न्यपातयन् ।

३. 'सूरत'नगराभियाने निहत्य दिल्लीसैनिकान् शिवराजो धनं जग्राह ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हृदय-भेदः

सङ्कलितम्

अहमेकदा स्वदेशस्यैव प्रान्तान्तरं गत आसम्। तदा तत्र एका विशाला साहित्यिक-गोष्ठी आयोज्यमाना आसीत्। तत्र प्राप्तोऽहं परिचितस्य एकस्य धनि-महानुभावस्य गृहे न्यवसम्। आसीदेका तदीया षोडशवर्षकल्पा सुशिक्षिता सभ्यतमा च पुत्री। तां दृष्ट्वैव किञ्चित् समनुरक्त इव अहमभवम्। यदा भोजनार्थं निर्धारितकोष्ठे प्राविशम्, तदा तत्र मलिनवेषवती अपि सुमनोरमा एका प्रकृतितः एव सुरूपा बाला मदीय-भोजनप्रबन्धार्थं तिष्ठन्ती आसीत्। क्रमशः ताभ्यामुभाभ्यां सह तेषु पञ्चषेषु दिनेषु मम परिचय-विकासोऽभवत्।

अन्त्ये साहित्यिक-गोष्ठी अपि परिसमाप्ता। एकं मह्यं समर्पितं पुष्प-गुच्छं तस्यै दत्त्वा अहं ततः तदा निवर्तितोऽभवम्। वायुयानतः तस्मिन् एव दिने राजधानीं प्रति मया कार्यक्रमानुसारं निवर्तितव्यमासीत्।

अतः स्वकीयां परिचारिकां बालाम्, या सदा सर्वात्मना मत्सेवापरायणा आसीत्, आहूय सस्नेहं दश-रूप्यकाणां पत्रकं तस्य हस्तयोः अददम्। परं तदैव सा अश्रुमयनेत्रयोः कोपावेशं प्रकटयन्ती अवदत्—'महोदय! न मह्यम् इदमावश्यकम्।'

गृहात् निसृतोऽपि उपनयनस्य विस्मरणेन पुनः गृहान्तः प्रविशन् अहमशृणोम्—'किं मया तस्य सेवा तस्या अपेक्षया न्यूना विहिता आसीत्? किमर्थं मह्यं पुष्पमेव दत्त्वा तस्यै रूप्यकाणि दत्तानि' इति सुन्दर्याः कोपाविष्टं स्वरम्। तदैव पित्रा उक्तमश्रूयत—'तथापि तथादृशकवेः स्मृतिपुष्पं नालिकायां निक्षिपत्या त्वया न साधु कृतम्।'

स्वयं गलन्नागलतादलं यथा
प्रवर्तमानं तव कर्म भूपते।
निहन्ति पूर्वापरवर्तिनावुभौ
प्रसह्य भूतञ्च भविष्यमुत्तरम् ॥१०७॥

विभर्तु शक्त्या स्वपथाग्रहं जनो
महीयसी सा प्रथिता तथापि धीः।
जने प्रयातेऽपि तदीयपद्धति-
र्निषेव्यते बुद्धिपरिष्कृता यदि ॥१०८॥

अतीतलेखं पठतां महीपते!
दुराग्रहस्यावसरः क्व चेतसि।
महौजसः के न कृपाणशासनाः
धिगेकशेषाः जगताऽद्य विस्मृताः ॥१०९॥

जगत् भवत्पूर्वमवर्ततैव तद्
ध्रुवं भवत्यस्तमितेऽपि वर्तताम्।
भविष्यपृष्ठे दुरिताङ्कसन्निभां
निजस्मृतिं किन्तु नरेश! मा लिख ॥११०॥

विहाय शब्दं स्वभुवं महस्कराः
प्रयान्ति भावाः मनसः परावधिम्।
अतोऽर्थसिद्धाः परिणामदृश्य-
श्चलन्ति नैवाभिधयाऽप्यकान्तया ॥१११॥

स्वराज्यलक्ष्म्याः प्रणयाय भूपते
स्वकीर्तिदेहस्य निरामयाय च।
अनेन पत्रेण दुरन्तकापथं
जगद्धनं साधुनिषेवतामिह ॥११२॥

आद्योद्घोषै - र्द्विजानाममृतकलवतां मन्दवात - प्रवाहैः,
व्योम्नाऽन्तर्गर्भधान्ना यमनियमवतां ब्राह्मपद्मावधानैः।
भूयो भूयोऽपयातुं तिमिरमुपदिशंश्चापि बद्धाग्रहं तत्
यः प्रातो हन्ति देवः खरशरकिरणैस्तं शिवार्कं नतोऽस्मि ॥११३॥

॥ इति क्षत्रपति-महाकाव्ये पञ्चदशः सर्गः ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

राष्ट्रकविः कालिदासः

—श्री जगनारायण पाण्डेयः, साहित्याचार्यः, साहित्यरत्नम्—

एकस्य तिष्ठति कवेर्गृह एव काव्य-
मन्यस्य गच्छति सुहृद्भवनानि यावत्।
न्यस्याऽविदग्धवदनेषु पदानि शश्वत्
कस्यापि सञ्चरति विश्वकुतूहलीव॥

इति कविशेखर-राजशेखरोक्तदिशा कश्चिद् विरल एव सत्कविः एतादृशो भगवान् धन्वन्तरिर्यो निखिलं विश्वमपि सुधामयीभी रचनावचनावलीभिः पीयूषरसायनं पाययन् अमन्दानन्दसन्दोहमनुभावयति। यद्यपि संस्कृतसाहित्ये बहवः कवयो जाताः, परमेतादृशा द्वित्रा एव महाकवयः स्वजनुषा भारतभुवममुं समलचक्रुः, येषां लेखनी राष्ट्रियसांस्कृतिकभावनानामुद्वेलने सम्यक् समर्था स्यात्। दृशाऽनया आदिकवि - वाल्मीकि - व्यासानन्तरं कविकुलगुरुः कालिदास एव स्मृतिपथमधिरोहति। बाढं बाणो धुनोतु मूर्धानं धीमताम्। कामं मयूरो नृत्यतु काव्यविपिने। वर्धयतु च स्वच्छन्दं हर्षप्रकर्षं हर्षो विद्वन्मण्डले। तथापि साहित्य-चैत्ररथविहरण-व्यसनिनो नलकूबरस्य कालिदासस्य प्रसन्नरमणीयायाः काव्यकलायाः न कोऽपि पदमादधाति।

कालिदासस्य रचनासु भौतिकजीवनं प्रति महानुल्लासः, भविष्यन्त्या अभ्युन्नत्याः महत्याशा, आधिदैविकजीवनं प्रति दृढा श्रद्धा, आध्यात्मिकजीवनं प्रति च स्वाभाविकी आत्मीयता दरीदृश्यते। सर्वतोभावेन राष्ट्राऽभ्युदयकामनयाऽस्य महाकवेः सम्पूर्णमपि साहित्यं परिप्लुतमिति न केवलं भारतीया एव, वैदेशिका अपि विद्वांसो मुक्तकण्ठमुरीकुर्वन्ति।

कालिदासस्य प्रथमा रचना ऋतुसंहारकाव्यं यत्र भारतीयदृशा सरसपदावलीभिर्गुम्फितं प्रण्णामपि ऋतूनां वर्णनं हठात् सहृदयहृदयान्यावर्जयति। सुख-दुःखयोरनुभवो यथा मानवैः क्रियते, तथैव पादपादिभिरपीति कविनाऽत्र समुपबृंहितम्। अत एव वसन्तमुपेत्य द्रुमादयोऽपि नवीनतामावहन्तीति महाकविराह—

द्रुमाः सपुष्पाः सलिलं सपद्मं
स्त्रियः सकामाः पवनः सुगन्धिः।
सुखाः प्रदोषा दिवसाश्च रम्याः
सर्वं प्रिये चारुतरं वसन्ते॥

अस्यैव भावस्य विकसितं स्वरूपं शाकुन्तलस्य चतुर्थाङ्के समुपलभ्यते।

भारतीया संस्कृतिः आशोन्मुखीति नाऽत्र संशीतिलेशः। अस्माकं वेदाः पुराणानि चैतदेव प्रतिपदमुदघोषयन्ति। अस्य महाकवे रचनास्वपि नैराश्यवादस्य कृते नास्ति मनाक् स्थानम्। ये तु मानवजीवनं निस्सारं मायिकञ्च मन्यन्ते, न ते परीक्ष्य वादिनः। यत्र जीवने अभ्युदयजातं प्रतिपदं विलोक्यते, कथं तन्निस्सारं मन्येत? महाकविरपि रघुवंशे प्रतिपादयति—

मरणं प्रकृतिः शरीरिणां
विकृतिर्जीवनमुच्यते बुधैः।
क्षणमप्यवतिष्ठते श्वसन्
यदि जन्तुर्ननु लाभवानसौ॥

कालिदासस्य निखिलं रघुवंशकाव्यमेव राष्ट्रियकाव्यत्वेन प्रगल्भते। रामचरितव्याजेन कविना दक्षिणोत्तरभारतयोरेकात्मकता दृढीकृता। यथा—

लङ्कानाथं पवनतनयं चोभयं स्थापयित्वा
कीर्तिस्तम्भद्वयमिव गिरौ दक्षिणे चोत्तरे च।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वदेशस्य प्रत्येक-प्रदेशश्रीवर्णनेन सह तत्तत्-प्रदेशवासिनां वेषभूषादिविषयेष्वपि कालिदासस्य प्रतिभाविलासो नूनमवलोकनीयः। भारतभुवो भक्तशिरोमणिनाऽनेन कविना रघु-दिग्विजयकाले, इन्दुमती-स्वयंवरे, रामस्य लङ्कातः अयोध्यासमागमनावसरे च वारत्रयं स्वदेशस्य मनोहारि चित्रणमुपस्थापितम्।

भारतीयसंस्कृतेर्मूलाधारमङ्गीकृत्यैव कविना **वागर्थाविव संपृक्तौ** इत्यत्र शिवपार्वत्योर्मनोज्ञं युगलस्वरूपं प्रदर्शितम्। अद्याप्यार्यैः नारी स्वस्वामिनोऽर्धाङ्गिनीति कथ्यत एव। रघुवंशवर्णनमिषेण कालिदासेन तात्कालिक-भारतीयानामादर्शमयं जीवनदर्शनमुद्घाटितम्। श्रुतिस्मृतिभ्यां विनिर्मितमिदं भारतराष्ट्रं त्याग-तपश्चर्या-तपोवनानां त्रिवेणीसलिलैः परीवर्धितमिति रघुवंशाऽध्ययनेन सुस्पष्टं प्रतीयते। रघुवंशीयानां धनार्जनं दानाय न दुरुपयोगाय, परिमितभाषणं सत्यरक्षणाय, यशसे च विजिगीषा न तु रिपुनाशाय, पाणिग्रहणं सन्तानाय न तु कामवासनापूर्तये। ते शैशवकाले विद्याऽभ्यासं, यौवने विषयाऽनुरागं जरायाश्च मुनिव्रतं धारयन्ति। अन्ते च यथेच्छं योगाभ्यासेनैव शरीरं परित्यजन्ति। एवमासीदस्माकं पुरातनो भारतीयसमाजः। यथा—

त्यागाय संभृतार्थानां सत्याय मितभाषिणाम्।
यशसे विजिगीषूणां प्रजायै गृहमेधिनाम्॥
शैशवेऽभ्यस्तविद्यानां यौवने विषयैषिणाम्।
वार्धके मुनिवृत्तीनां योगेनान्ते तनुत्यजाम्॥

याऽपि शासनस्य मर्यादा कालिदासवाङ्मये, सा नान्यत्र कुत्रचन अवलोक्यते। अहो शासनमर्यादायाः पराकाष्ठा यत्र न केवलं पौराङ्गना एव, वाराङ्गना अपि पवनेनाऽपि स्प्रष्टुमशक्याः। यथा—

यस्मिन् महीं शासति वाणिनीनां
निद्रां विहारार्धपथे गतानाम्।
वातोऽपि नास्रंसयदंशुकानि
को लम्बयेदाहरणाय हस्तम्॥

कविरयं यागक्रियायां मन्त्रे च दृढं विश्वसिति। दानस्य गौरवख्यापने त्वयं लेशतोऽपि क्लेशं नानुभवति। रघुवंशस्य पञ्चमसर्गे दानस्याद्वितीयमुदाहरणं दर्शनीयम्। वरतन्तुशिष्यः कौत्सो गुरुदक्षिणार्थं दानरिक्तहस्तस्य रघोः सकाशमुपगच्छति। तदानीं रघुर्यावत् कुबेराद् धनमादातुमीहते, तावदेव कोषमध्ये हिरण्मयी वृष्टिः समजायत। पणशून्योऽपि रघुः निखिलमपि तद्धनं सानन्दं कौत्साय समर्पयति। किन्त्वादर्शस्याप्याऽदर्शोऽयं यद् निर्धनोऽपि विगतधनतृष्णः कौत्सः केवलं गुरुप्रदेयमात्रं धनं ग्रहीतुं कामयते। दातृग्रहीत्रोरयमाग्रहो नूतमतीव श्लाघ्यतमः। एतादृशी घटना विश्वेतिहासेऽपि सुदुर्लभेति न काचिद् विचिकित्सा।

कुमारसंभवेऽपि भारतवर्षस्य महिमालयं हिमालयं वर्णयन् कविः स्वदेशं प्रति श्रद्धातिशयमभिव्यनक्ति। काव्येऽस्मिन् महाकवेः मुख्यमुद्दिष्टम् अनुरागसमाध्योरेकत्र समवस्थानं प्रतिभाति। कुमारसंभवस्य पञ्चमसर्गोऽमुमेव साग्रहं प्रतिपादयति। दाम्पत्यजीवनं त्यागेन सहैश्वर्यस्य तपश्चर्यया च सहाऽनुरागस्य सामञ्जस्येनैव धन्यं मन्यते।

कुमारसंभवाऽध्ययनेन निश्चीयते यद् भोगोऽपि त्यागं विना रोग एव। केवलं ब ह्यसौन्दर्यमाश्रित्य कृतं प्रेम जलबिन्दुरिव क्षणमात्रस्थायि। यावच्च अनुरागस्तपोवह्नौ न तप्यते, न तावदुपयोगितामाधत्ते। अत एव पार्वत्यपि मदनं भस्मावशेषमवलोक्य त्यागेन तपश्चर्यया च शिवं पतिमाप्तुमर्हति। अनयोरभावे निसर्गकन्या सा शकुन्तलाऽपि चिरं

CC-0. In Public Domain. Gurukul Kangri Vishwavidyalaya, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दुःखमवाप। परम्—वसने परिधूसरे वसाना नियमक्षाममुखी धृतैकवेणिः इत्येवं तपस्तप्त्वा सैव स्वप्रियतमस्य दुष्यन्तस्य कम्बुकण्ठहारोऽभवत्। वस्तुतस्त्वत्र महाकविना आदौ शकुन्तलाया दुष्यन्तेन अवमाननं दर्शयित्वा—

अतः परीक्ष्य कर्तव्यं विशेषात् सङ्गतं रहः।
अज्ञातहृदयेष्वेव वैरीभवति सौहृदम्॥

इत्युपदेशगिरा गान्धर्वविवाहस्य प्रत्याख्यानं कृतमिति निश्चीयते।

रघुवंशे पुनः आदर्शधर्मपत्न्याः लक्षणं प्रतिपादयन्नयं महाकविर्निगदति—

गृहिणी सचिवः सखी मिथः
प्रियशिष्या ललिते कलाविधौ। इति,
अपांसुलानां धुरि कीर्तनीया। इति च।

शकुन्तलायाः पतिगृहगमनवेलायां कविना कण्वमुखेन याऽऽदर्शमयीः रीतिः प्रदर्शिता सा भारतीयललनानां कृते वरदानरूपैव। यथा—

शुश्रूषस्व गुरून् कुरु प्रियसखीवृत्तिं सपत्नीजने,
भर्तुर्विप्रकृताऽपि रोषणतया मा स्म प्रतीपं गमः।
भूयिष्ठं भव दक्षिणा परिजने भाग्येष्वनुत्सेकिनी,
यान्त्येवं गृहिणीपदं युवतयो वामाः कुलस्याधयः॥

सौन्दर्यस्य समुपासकोऽयं कविचक्रवर्ती कथयति यत् रमणीयपदार्थाः स्वशोभयैव विराजन्ते, न त्वन्येन केनचिन्मण्डनेनेति—

किमिव हि मधुराणां मण्डनं नाऽऽकृतीनाम्।

सौन्दर्यं कदाचिदपि न पापकारीति स्फुटं कुमारसंभवे शिववचसा प्रतीयते—

यदुच्यते पार्वति! पापवृत्तये
न रूपमित्यव्यभिचारि तद्वचः।

रमणीयं सौन्दर्यञ्च तदेव यत् प्रियेषु सौभाग्यफलाय स्यात्। सौन्दर्यं तावत् तपस्यायाः एव मधुरं फलमिति सजलजलदगभीरया गिरोद्घोषयति कविः—

कुले प्रसूतिः प्रथमस्य वेधस-
स्त्रिलोकसौन्दर्यमिवोदितं वपुः।
असुग्यमैश्वर्यसुखं नवं वय-
स्तपःफलं स्यात् किमतः परं वद॥

कालिदाससूक्तीनां जनजीवने कियत्युपयोगितेति तु जानन्त्येव विद्वत्तल्लजाः।

'एको हि दोषो गुणसन्निपाते
निमज्जतीन्दोः किरणेष्विवाङ्कः।'
'विकारहेतौ सति विक्रियन्ते
येषां न चेतांसि त एव धीराः।'

इत्यादयः कुमारसंभवस्य सूक्तयः,

'पदं हि सर्वत्र गुणैर्निधीयते।'
'निर्गलिताम्बुगर्भं शरद्घनं नार्दति चातकोऽपि।'
'भवितव्यानां द्वाराणि भवन्ति सर्वत्र।'
'सतां हि सन्देहपदेषु वस्तुषु
प्रमाणमन्तःकरण-प्रवृत्तयः।'

इत्यादि-रघुवंशा-ऽभिज्ञानशाकुन्तलयोः सूक्तयः,

'कामार्ता हि प्रकृतिकृपणाश्चेतनाऽचेतनेषु।'
'याच्ञा मोघा वरमधिगुणे नाऽधमे लब्धकामा।'
'पुराणमित्येव न साधु सर्वम्।'

इत्यादयो मेघदूतस्य च सूक्तयः प्रतिपदं मानवजीवने समीचीनतामञ्चन्ति।

यद्यपि मानवः सदाऽमन्दानन्दानुभूतिमेव कामयते, परं हन्त दुःखं तत्पृष्ठत एव संलग्नमवतिष्ठते। रघुवंशे प्रारम्भे संयमस्य तपश्चर्यायाश्च साम्राज्यं जागर्ति। किन्तु तदवसाने क्षणिकाऽऽनन्दस्य इन्द्रियलोलुपतायाश्च नृत्यं दृग्गोचरीभवति। मेघदूते राष्ट्रकविना कालिदासेनेदमेव प्रतिपादितं यदस्मिन् जगति नहि कोऽपि केवलं सुखी वा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

केवलं दुःखी, किन्तु सुखदुःखे चक्रवत् सदैव परिभ्रमत इति। यथा—

कस्यात्यन्तं सुखमुपनतं दुःखमेकान्ततो वा,
नीचैर्गच्छत्युपरि च दशा चक्रनेमिक्रमेण।

प्रकृतिसाहचर्येणैव मानवजीवनस्य पूर्णतेति वविर्दृढो विश्वासः। अत एव यक्षः स्वप्रियायाः सन्देशवाहकत्वेन मेघमेव नियोजयति। पतिगृहगमनाऽवसरे शकुन्तलामाश्रमस्था वृक्षा एव विविधैराभूषणैर्मण्डयन्ति।

कालिदासस्य काव्यनिर्माणकलाया मुख्यं प्रयोजनं जनताजनार्दनस्य आराधनमेव प्रतीयते। यथोक्तं तेनैव मालविकाग्निमित्रस्य मङ्गलाचरणे—

देवानामिदमामनन्ति मुनयः शान्तं क्रतुं चाक्षुषम्,
रुद्रेणेदमुमाकृतव्यतिकरे स्वाङ्गे विभक्तं द्विधा।
त्रैगुण्योद्भवमत्र लोकचरितं नानारसं दृश्यते
नाट्यं भिन्नरुचेर्जनस्य बहुधाऽप्येकं समाराधनम्॥

महाकविना स्वनाटकावसाने यानि भरतवाक्यानि संयोजितानि तैरपीदमेव सिद्धयति यदस्य वाङ्मयं सर्वजनहिताय सर्वजनसुखाय च प्रकाशत इति।

परस्परविरोधिन्यो - रेकसंश्रयदुर्लभम्।
सङ्गतं श्रीसरस्वत्योर्भूतयेऽस्तु सदा सताम्॥
सर्वस्तरतु दुर्गाणि सर्वो भद्राणि पश्यतु।
सर्वः कामानवाप्नोतु सर्वः सर्वत्र नन्दतु॥

—विक्र० ५।२४-२५

प्रवर्ततां प्रकृतिहिताय पार्थिवः
सरस्वती श्रुतिमहती महीयताम्॥

—शाकु० ७.३५

क: पुनर्विश्वबन्धुत्वभावनासंवलितानि इमानि पद्यानि स्मारं स्मारं कालिदासं राष्ट्रकविपदेन नालङ्करिष्यति?

सरस्वतीनिःश्वाससदृशे कालिदासकाव्ये चत्वारोऽपि पुरुषार्थाश्चतुःषष्टिकलाश्च स्वयमेव परिस्फुरन्ति। तत्रापि त्रिवर्गमध्ये धर्मो महत्तम इत्येव कविवरो वम्भणीति—

अनेन धर्मः सविशेषमद्य मे
त्रिवर्गसारः प्रतिभाति भाविनि।

—कु० सं० ५।३८

शङ्करः खलु चतुर्वर्गस्य सङ्गमस्थानम्। अतः कविः सर्वत्र प्रायो मङ्गलाचरणे शिवस्याष्टमूर्तीनां स्तुतिं कुर्वन्न परिश्राम्यति। विलोक्यतां तावत् शाकुन्तले—

या सृष्टिः स्रष्टुराद्या वहति विधिहुतं,
या हविर्या च होत्री
ये द्वे कालं विधत्तः श्रुतिविषयगुणा,
या स्थिता व्याप्य विश्वम्।
यामाहुः सर्वबीजप्रकृतिरिति यया
प्राणिनः प्राणवन्तः
प्रत्यक्षाभिः प्रपन्नस्तनुभिरवतु वस्ताभिरष्टाभिरीशः॥

यद्यपि धर्मार्थौ जेतुं कामः सदैव यतते, परमस्माभिर्धर्मस्य रक्षायै सावधानेन भाव्यम्। इदमेव मानवाऽभ्युदयस्य मूलम्। भगवता शङ्करेण मदनं दाहयित्वा कविना कामोपरि धर्मस्य विजयः प्रदर्शितः। कुमारसंभवे कामोऽपि महाकविलेखन्या लब्धवर आदर्शपराकाष्ठामुपगत इति—

अद्य प्रभृत्यनवताङ्गि तवाऽस्मि दासः
क्रीतस्तपोभिरिति वादिनि चन्द्रमौलौ।
अह्नाय सा नियमजं क्लममुत्ससर्ज
क्लेशः फलेन हि पुनर्नवतां विधत्ते॥

अनेन पद्येन सुस्पष्टमेव।

एवं कविकुलगुरोः कालिदासस्य रचनानां सूक्ष्मपरीक्षणानन्तरं निर्णीयते यद् भारतीयसंस्कृतेः सभ्यतायाश्च प्रतिनिधिभूतोऽयं महाकविर्नूनमस्माकं

(शेषांशः २७९ पृष्ठे)
CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एका भावकथा—३

कर्मणो गहना गतिः

—श्रीरामदासः कौण्डिन्यः, एम० ए० आचार्यः—

[प्रधानाचार्यः—राजकीय-संस्कृत-महाविद्यालयस्य, जामनगरम्]

[अनेनाङ्केन धारावाहिकी भावकथेयं परिसमाप्यते। विदुषा लेखकेन सरसया सरलया च भाषया अद्यतन-नवशिक्षित-समाजस्य मूर्खस्य धनपतेश्च जीवितं जागृतं चित्रमत्र भावप्रवणया शैल्या चित्रितं नूनं संस्कृतप्रणयिभ्य इत्थं लेखनाय प्रेरयेत्। संस्कृतं कठिनतममिति प्रवाद एतादृशेन सरस-सरलेन नव्यगल्प-वाङ्मयेन सहजतः परिहर्तुं शक्य इत्यस्माकं दृढं मतमिति सप्रश्रयं मुच्यते।—सम्पादकेन]

ततो रात्रौ नवबादनसमये जननीं लक्ष्मी-नारायणमन्दिरं नेतुं सिद्धोऽभवम्। साऽपि मुदिता उद्युक्ता अभवत्। जनकस्यापि स्वान्ते सहसैवागतो देवायतनगमनविवेक इति सोऽपि आवाभ्यां सार्धमागच्छत्।

"अहो अतिरमणीयमिदं स्थानम्। एकतो गन्धर्वतुल्यं गायनम्, अन्यत्र भक्तजनकृत-भगवन्नामोच्चारणम्, भक्त्याऽवनतशिरः प्रमदा-समुदायः, दीनान्धजनव्याप्त-सोपानपरम्परा" इति मातुः वचांसि आकर्ण्य अहमपि तन्मत्यनुकूलं सर्वमवदम्। प्रभुदर्शनादूर्ध्वं मन्दिरप्राङ्गणे उपाविशाम।

वासन्तिकेन्दुप्रकाशे सुधाधवले प्रचलितासु कथासु अहमवदम्—"अयि जननि! अस्मद्ग्रामस्थ-लक्ष्मणमहाशयस्य भगिनी ललितादेवी अस्यां मुम्बापुर्यां वर्तते। तत्कन्या कमला यदाऽऽगता अस्मद्ग्रामे, तदा प्रतिदिनमस्मदुपवने पुष्पाण्यवचिनोतुम् आगच्छत् सा। मुम्बापुरीं यदा वयम् आगन्तुं समुद्यताः, तदा लक्ष्मणमहाशयैः तद्भगिनी-कुशलं ज्ञातुं कथितम्। निवासस्थानादिकं मे विदितम्। तस्मात् स्याच्चेदिच्छा ते स्वान्ते तर्हि गच्छाम" इति।

"सत्यं ललिताऽत्र वसति? अतिसरला सा बाला बाल्ये। नियतं तद्गृहं गत्वा पश्यामस्तत्संसार-निपुणताम्" इति जनकः सहसैवावदत्। तदाकर्ण्य "अहो दैवानुकूलता" इति भम मनस्यागतम्। अतः श्वः सायंकाले तद्गृहगमनं निश्चित्य पुनरपि भगवद्वन्दनं विधाय गृहं न्यवर्तामहि।

अस्मद्धृद्गतो विचारो मया दूरध्वनियन्त्रद्वारा कमलायै निवेदितः। हर्षाकुलितहृदया सा एकाक्षरमपि वक्तुं नाशक्नोत्। यथासमये तैलशकटद्वारा तद्गृहमगच्छाम। कमलाकथितवृत्तान्त-मुदितस्वान्तो रमाकान्तः "श्रीमन्तः केशवमहाशया आगच्छन्ति" इति ललिताललितवचन-माकर्ण्य भृशमुत्सुकः अस्मन्मार्गप्रतीक्षामकरोत्। वेषभूषाविवर्धितलावण्या मत्प्रिया कमला वातायनस्था अस्मान् द्रष्टुमतस्ततो मार्गे प्राहिणोत् नयने। अवलोक्यास्मान् तु दूरात् हर्षोत्फुल्ललोचना द्वारमागत्य स्वागतमकरोत्।

दुग्धपानाद्यनन्तरं प्रचलितायां कथायां "आर्य रमाकान्त, इयं प्रौढा ललिता बाल्येऽतिमुग्धा अक्षरमपि वक्तुं नापारयत्। परमस्य नगरस्य संपर्कादियमधुना सुशिक्षितमप्यतिशेते भाषणे। अतितरां सन्तुष्टोऽस्मि एनं सुखिनं भवद्भवं वीक्ष्य। सर्वथा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एतादृगेव संसारः असारोऽपि ससारो भाति। इयं ते कन्या कमला अपि अतिनिपुणा दृश्यते" इत्यवदत् मे जनकः। ततो "रात्रौ अत्रैव भोजनं कर्तव्यमि"ति रमाकान्ताग्रहेण तत्र गृहे भोजननिश्चयः कृतस्तातेन।

इमं वृत्तान्तं सुहृदे माधवाय निवेदयितुमुदतिष्ठम्। अत्रान्तरे "अयि तात, अहमपि गच्छामि विलासेन सह। वृत्तान्तं निवेद्य शाकापणात् शाकादिकं गृहीत्वा शीघ्रमेव प्रतिनिवर्तविहि" इति कमलया प्रार्थितो जनको रमाकान्तोऽकथयत्—"अये, कदा कथं च जातो विलासेन सह तव परिचयः? आः ज्ञातम्! तद्ग्रामगता त्वमुपवने समासादितवती परिचयमिति एकदा कथितं त्वया। साधु, गच्छ सत्वरं प्रत्यागच्छ च। यतः पाककार्याय ते साहाय्यमावश्यकं भवेत्।" इत्थम् उपवनकथामग्नेषु सर्वेषु आवां पूज्यमाधवमहाभागगृहं गन्तुं निरगच्छाव।

मध्येमार्गं कमलाऽवदत्—"अयि प्रिय विलास, अतिचतुरोऽसि, कथमिदं त्वया एकपदे सम्पादितम्! का वा ते वाङ्मोहिनी, यया आकृष्टा जननी, वशं नीताश्च जनकः। अयं परिचयः कदाचित् स्यादुपकारकः आवयोः भाविनि कार्ये इति मम भाति। परं विलास, एकमेव शल्यं मे हृदि! तच्च नाम गुणवानपि त्वं न करोषि अध्ययनमि"ति।

"अयि चतुरे, समाक्रान्ता वयोमर्यादाऽध्ययनस्य। अपरञ्च, तातोऽपि नानुकूलः स्यादिति पुरैव निवेदितम्, तथापि यतिष्ये" इति मया प्रत्युत्तरितम्। इत्थं वृत्तान्तमग्नौ आवां वृत्तान्तनिवेदनादिकार्यं सम्पाद्य सर्वेषां चेतस्सु संशयो मा जायतामिति अचिरादेव प्रत्यागतौ रमाकान्त-भवने।

रात्रौ चतुरगृहिणी-सम्पादितेन उत्तमान्नभक्षणेन प्रमुदितचेताः जनकः "अतितरं प्रीतोऽस्मि ललिताप्रयत्नसम्पादितान्नसेवनेन! अयि रमाकान्त, ग्रामस्थाऽशिक्षिताऽपि इयं बाला गृहकर्मनिपुणा मधुरान्नं प्रदाय सर्वतः आदर्शं संसारं प्रकटीकरोति। भवतु सर्वदैवम् इति प्रभुप्रार्थनां विना किं मेऽधीनमि"ति। इत्युक्त्वा स्वनिवासस्थानगमनोत्सुको मे तातः "अयि ललिते, किं निवेदयामि त्वत्सहोदराय लक्ष्मणाय" इत्यवदत्।

तातवचनमाकर्ण्य ललिता सप्रश्रयमुवाच—"किमन्यत्? वयं सर्वे कुशलिनः स्मः। अन्तराऽन्तरा पत्रप्रेषणेन तत्रस्थवृत्तान्तज्ञानं यथा भवेत् तथा करणीयम्। अपि च, सकुटुम्बेन दीपावलीकाले आगमनमवश्यं कर्तव्यम्। युष्माभिरपि तदानीं ध्रुवमागन्तव्यम्। यतस्तस्मिन् काले इयं मोहमयी मुम्बापुरी स्वर्गमपि न्यक्करोति स्वैश्वर्येण। न च श्रीमतो भवतः किञ्चिदतिकठिनं दुःखदायकं च स्यादत्र पुनः पुनः आगमनम्। तस्मिन् काले मम गृहे एव निवासः कार्यः" इति। ललितायाः चेतोहरमाकर्ण्य वचः "यथोक्तं त्वया तथा कर्तुं यतिष्ये" इत्युक्त्वा निरगच्छत् तातो गृहात् बहिः। अतोऽहमपि अश्रुपरिप्लुतनयनां मञ्जुघोषां कमलां दृष्ट्वा नेत्रसङ्केतेन तां कथञ्चित् समाश्वास्य पितृभ्यां सह स्वनिवासस्थानमागच्छम्।

× × ×

एवं संचिन्तयतो दारिद्र्याभिभूतस्य तस्य विलासविनष्टधनस्य विलासस्य श्रवणपथे सद्योदृष्टपरीक्षाफलानां बालिकानां संलापध्वनिरगच्छत्। श्रुत्वा तु तं सस्मार सः—"अहो कीदृशो मे आनन्दकालः कमलापरीक्षोत्तीर्णताश्रवणेन तदानीम्! मद्वचनप्रोत्साहिता सा बाला भगीरथप्रयत्नान् कृत्वा शालान्तपरीक्षायां प्रथमश्रेणीमलभत। वृत्तपत्रे विलोक्य तन्नाम सत्वरमेव प्राहिणवम् अभिनन्दनपत्रम्, परं नालभे तस्या प्रत्युत्तरम्। "आनन्दसागरनिमग्ना सखीजनकथारता सा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कदाचिद् नाभवदेव समर्थो शीघ्रमुत्तरं दातुम्, आगमिष्यति योग्यसमये' इति विचार्य अहमपि तूष्णीमभवम्। पत्रं विना मासद्वयमतीतम्।

ततश्चैकदा रथ्ययाऽटन् रमेशं दृष्ट्वा तं कमलावृत्तान्तम् अपृच्छम्। "सा अधुना महाविद्यालये कलाविभागे प्रथमवर्षस्याध्ययनं कर्तुं गच्छति" इति तस्मात् विज्ञाय खिन्नमानसो गृहं प्रत्यागच्छम्। "नूनमेषा मां न स्मरत्यधुना। विद्यानिपुणा सा निर्गुणं मां विस्मृता इत्यत्र किमाश्चर्यम्? परं तस्याः स स्नेहः, ते मधुरा आलापाः, सा सर्वस्वार्पणबुद्धिः, चुम्बनादिकार्येऽनुमतिः' इत्यादि किं सूचयति? तस्याः प्रत्यक्षदर्शनेन सर्वमेव स्पष्टं भवेत्" इत्थं कथञ्चन स्वात्मानं समाश्वासितं मया।

नासीत् ग्रामे कालयापनसाधनम्। जनकस्तु न दास्यत्यनुज्ञां मुम्बापुरीं गन्तुम्। कमलामेलनोत्कण्ठितोऽहमेकस्यां रात्रौ जनन्या मञ्जूषायाः कानिचित् आभरणान्यादाय अपरेद्युः अनिवेद्य पितृभ्यां मुम्बापुरीमगच्छम्। तत्र च सरदारगृहे भोजनशयनादिप्रबन्धं कृत्वा "कथं सा द्रष्टव्या, तस्याः गृहं गन्तव्यं किम्' इति विचारयन् समुद्रतीरे सायंकाले भ्रमन् अकस्मात् आधुनिकवेषालङ्कारावलोकनीयां केनापि रूपवता यूना सह भ्रमन्तीं कमलामपश्यम्। तद्दृश्योत्पादितसन्देहोऽहं तन्निर्णयाय तयोः पश्चात् अन्यजनापवारित आटम्। यद्यपि आंग्लभाषानभिज्ञोऽहमासम्, तथापि तयोः आंग्लभाषासंवादतात्पर्यज्ञाने कथमपि समर्थोऽभवम्। तयोः संवादः वज्राघात इवाजनयत् पीडां मे स्वान्ते। नान्यत्किमपि तत्तात्पर्यं प्रेमान्तरेण। अतः परं किं दुःखावहं यत् क्रमशः समुद्रतीरे संप्राप्य एकान्ते तस्याः स एव अधरोष्ठस्तेन तरुणेन मेऽक्ष्णोः पुरतः चुम्बितो यो मया सदयं पुरा रतेषु पीतः। प्राभवत्तद्दृश्यं मामधः पातयितुम्।

स एव दिवसो ममाधोगतेः कारणम्। सदाचारसंपन्नस्य विप्रस्य सुतः मदान्धः संवृत्तः। कमलाविलासदर्शन-सन्तप्तचेता अहं आत्मनो विनोदाय मानसिकत्रासनाशाय येन केनापि प्रकारेणायते। आसीत्तदानीं विपुलं वसु मत्समीपे। तद्व्ययेन स्वसन्तोषप्राप्तिः करणीया इत्यागच्छत् मे मनसि। नाधुनाऽनया कौमारबन्धक्या मे किमपि प्रयोजनम्।

× × ×

अत्रान्तरे उपवनस्थे तस्मिन् सरसि कश्चित् युवा रूपयौवनसम्पन्नया कयाचित् वारयोषिता भ्रमन् विलासदृग्गोचरमयासीत्। दृष्ट्वा तु तादृशं तं जनं सोऽचिन्तयत्—

"अहो सा मन्मनो वशीकृत्य मोहजालाधीनकरणनिष्णाता सौन्दर्यसरित् राधा, या तदानीमुद्विग्नावस्थायां भ्रमन्तम् आकारेण बहुमूल्यवस्त्रादिभिश्च श्रीमतः पुत्रं विज्ञाय सुधामधुरेण कटाक्षेण स्मितहास्येन मां वशं नेतुमयतत। आदावेव संत्रस्तः सुखार्थी अहं विनायासेन तद्वशतामगच्छम्। अतीवोन्मादकारि तस्या अत्युन्नतपीवरकुचकलशाया राधाय रूपं यौवनं चाभीत्। वशीकरणतत्परायाः तस्या नासीत्किमप्यशक्यम्। झटित्येव सा मां तदमृततुल्यालापमुग्धं स्वसदनमनयत्।

गत्वा च तत्र रतिचतुराऽनेकविधैः साधनैः सम्पूर्णतया मां तदधीनमकरोत्। तया सह अनङ्गकेलिविहरणतत्परोऽहं नाजानां किमकरणीयं किं वा करणीयमिति। तद्वचनदासो विलासोऽहं तत्कथितं सर्वमेव योग्यं स्वसन्तोषकरमिति मत्वाऽकरवम्। साधुजनविगर्हितं सुरापानमपि आत्मनो हिताया-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मन्ये। तत्क्षणं "स्वकीयं सत्कुलं सदाचारधर्मो द्विजत्वादिकं सर्वमेकपदे एव विस्मृतं मया।

ईषच्छान्ते चानङ्गदाहे "कथं विप्रेण मया इदमसत्कर्म अक्रियत। अधुना कथं स्तेनस्य दुराचाररतस्य मे शक्यं जनक-जननीपुरतः स्थातुम्" इति मया विचारितम्। तथापि शृङ्गारसास्वादः पुनरपि तस्मिन्नेव कुकर्मणि मां प्रेरितवान्। **न जातु कामः कामानामुपभोगेन शाम्यति** इति सुभाषितं नाकरोत् निवासं मे हृदि।

अन्यच्च, सा राधा अपि मां प्रोत्साहितवती—"प्रिय विलास, जनकधनस्य त्वमेव स्वामी, तदीयं सर्वं वस्तु तवैव। नियमानुसारेण पितुर्धनं लब्ध्वा यावज्जीवं सुखं जीवेव" इति। तद्भाषणचातुरीमोहितोऽहं तद्वचनं वेदा इति मत्वा तथाकर्तव्यमिति निश्चित्य सुरापानोन्मत्तो गृहं प्रति न्यवर्ते।

मदागमनसन्तुष्टा जननी स्वालङ्कारनाशेऽपि सुरक्षितं स्वतनयं मामवलोक्य परं मुदिताऽभवत्। मच्चौर्यकर्मणा क्रुद्धं तातं च शान्तमकरोत्। नाजानात् कारुण्यैकनिधाना मे माता परिवर्तनं मद्धृदयस्य। संभाषणोत्सुकायामपि तस्यां नाहमभाषे एकमप्यक्षरम्। यथाकथञ्चित् भुक्त्वा रात्रौ पितरमवोचम्—"नियमानुसारेण शीघ्रं धनविभागो मे देयः। अन्यथा न्यायालयगमनं करिष्ये" इति।

सुरापानोन्मत्तास्य मम मुखस्य दुर्गन्धेनाऽप्रीतो जनको न किमप्यवदत्। "अस्मिन् ग्रामे आत्मनो विलयं गच्छेत् प्रतिष्ठा, इतो वरं मृत्युः, नास्ति लेशतोऽपि पुत्रसुखं मे, उत्कुलेनानेन तनयेन को लाभः?" इति स्वभाग्यं निन्दित्वा अन्येद्युः पिता मह्यं धनविभागं प्रायच्छत्। तत्सर्वं धनमादाय तात-जननीवचनमनाकर्ण्य पुनरपि चेतोहारिण्या राधाया सदनं गत्वा आत्मनो धनव्ययेन तत्सन्तोषं सम्पाद्य स्वसुखावाप्तिमकरवम्।

गतेषु केषुचित् मासेषु सा रमणी राधाऽवदत्—"अयि विलास, समाप्तप्रायं ते धनम्। अधुना कथं तदभावे सुखमनीषा पूर्णा स्यात्? तस्मात् पुनरपि धनमानेतव्यम्।"

निर्घृणोऽपि तातो मद्वियोगव्याकुलो मद्दुराचारखिन्नमानसः आधिग्रस्तोऽभवत्। दुराचरणात् मां निवारयितुं सर्वेऽपि विफला अभवन् तात-प्रयत्नाः। जराजीर्णशरीरः सः आधिव्याधिग्रस्तः सन् मासचतुष्टये यमसदनातिथिरभवत्। सेयं वार्ता तदानीं नालमासीत् मां दुःखिनं कर्तुम्। गणिकाधरपानमदान्धोऽहं तातमरणमपि आत्मनो हितायेति मत्वा मुदितः सन् स्वीयहृदयदेवतां राधां 'विपुलधनलाभावकाशोऽयम्' इति वचसा प्रीणयित्वा स्वग्राममगच्छम्।

तत्र च स्वकार्यसाधनाय कृतकशोकं दर्शयित्वा सर्वमुचितं पितृश्राद्धादिकार्यं कृत्वा जननीं सान्त्वयित्वा पत्रद्वारा राधास्वान्ते विश्वासमुत्पाद्य मासद्वयमयापयम्। एतावता कालेन संपूर्णतातसम्पदोऽधीशोऽभवम्। जननीमतानुकूलं तामायत्तां कर्तुं सर्वमकरवम्। अशिक्षिताऽनभिज्ञा सा मत्कथिते प्रत्येकस्मिन् कार्ये स्वाक्षरीमयच्छत्। ततश्च जितमात्मनं मन्यमानोऽहं विपुलधनव्ययं कर्तुं प्रारभे। नैकया विलासिन्या राधया सह रतिसुखेनाभवन्मे मुदितं स्वान्तमिति विपुलाभिः गणिकाभिः सह यौवनोन्मादपरिहाराय रतिक्रीडासक्तो भूत्वा कालमनयम्।

विपुला धनसरित् रिक्ताऽभवत् अनेन मार्गेण। ततश्च क्षेत्रविक्रयेणोपादितं धनमपि विनष्टम्। अन्ते सदनविक्रयाय बद्धपरिकरो जननीवचनं तिरस्कृत्य तद्विक्रयेण अवाप्य धनं विषयासक्तोऽभवम्।

जाते च विभवक्षये पर्यत्यजन् गणिकाः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्री करपात्रस्वामिनं प्रति

★

ऐक्य जयन्ती-
महोत्सवावसरे समर्पितम्

वन्दे श्रीकरपात्रं संचिन्मात्रं सदा सदानन्दम् ।
यतिवरमतिवरणीयं परिचरणीयं च यस्य चरणयुगम् ॥ १ ॥

दधानः सोल्लासं वचसि मृदुतां हासमधरे
हृदि ब्रह्मानन्दं विनयमभितोऽमन्दमनिशम् ।
विपश्चिन्मूर्धन्योऽखिलधरणिधन्यो धवलधी-
र्विभा भास्वद्गात्रो जयति करपात्रो यतिवरः ॥ २ ॥

अवाङ्मनसगोचरं मनसि वाचि संचारयन्
मुरारिमुरलीरवं पुनरहो मृदु श्रावयन् ।
यतिः परमपावनो रतिमपि त्रिधा वर्णयन्
मुकुन्दरसलम्पटो जयति वीतरागो भवान् ॥ ३ ॥

पुराणनिगमाटवी - परिवृढोऽसि पञ्चाननो-
ऽथवास्यखिलदर्शनाध्ययनशीललीलस्तिभिः ।
सुकीर्तिकुलनन्दिनी - करसरोजलाल्योऽथवा
निकुञ्जरसभृत्कथामृतझरोऽसि लोलाशुकः ॥ ४ ॥

पर्यहरन् मित्राणि बन्धुवर्गश्च । अपमानपरम्परा तु मां दुःखस्य परां काष्ठामनयत् ।

यस्मिन् देशे न सम्मानो न प्रीतिर्न च बान्धवाः ।
तस्मिन् विभवहीनो यो वसेत् स पुरुषाधमः ॥

इति विचार्य धनरहितस्यात्र अवस्थानं 'सर्वथाऽयोग्यमिति बुद्धया जनन्या सह स्वग्रामं विहाय अन्यत्रागच्छम् । तत्रापि जीविकासाधनमलब्ध्वा मुम्बापुर्यां स्यादेव कश्चिदुपाय इति धर्मशालायां जननीं स्थापयित्वा अत्रागच्छम् ।'

× × ×

अत्रान्तरे कस्यचित् याचकस्य दीनं स्वरमाकर्ण्य व्याकुलः सोऽचिन्तयत्—'अधुना मयाऽपि एषा एव रीतिः अनुकरणीयेत्यहो धिक् माम् । परं कः उपायः ? क्षुधाकुला धनवतो भार्याऽभागिनो मम माता धर्मशालायां निवसती इति किमपि मया आप्तव्यमेव ।'

विचारेण तेन खिन्नः सः उपवने इतस्तत आहिण्डद् अवदच्च—कर्मणो गहना गतिः ।

(२७४ पृष्ठस्य शेषांशः)

राष्ट्रकविरिति । भारतीया संस्कृतिरस्यैव वाग्देवताऽवतारस्य गिरा निगदति । अस्यैव मेघदूताऽभिज्ञानशाकुन्तलाभ्यां जगति भारतेन स्वकीयं महद्गौरवं संरक्षितम् । कालिदासीय-साहित्यस्य आलम्बनं मानवहृदयस्य नैसर्गिक्य प्रवृत्तय एव । महर्षिभिः प्रतिपादितानां चिरन्तनसत्यानामेवाभिनिवेशोऽस्य कवितायां प्रसरीसरीति । वस्तुतः कविताकामिनीविलासो महाकविकालिदासः सर्वतोभावेन अस्माकं राष्ट्रकविरित्यत्र न केषाञ्चिदपि काचिद् विप्रतिपत्तिः ।

साम्प्रतं मानवा मिथः कलहायमाना दरीदृश्यन्ते । वयं प्रलयङ्करसमरानले निजपुरातनगौरवमिमं विस्मरामः । सर्वत्र अविश्वासस्यैव साम्राज्यं वरीवर्ति । अस्यां विषमदशायां यदि वयं कालिदासस्य सन्देशमुपदेशञ्च शिरसा वहेम तदा तूनमस्मिन् विज्ञानयुगेऽपि जगति सर्वोत्कृष्ट मानवत्वं लभेमहीति दृढो विश्वासः ।

★

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri. Gurukul Kangri Vishwavidyalaya

Digitized by Arya Samaj Foundation Chennai and eGangotri

देशनिर्माणे युगं नेता वा बाधकः ?

— श्री छबिलाल पोखरेलः —

ऋग्वेदे सं० ७-६-७-५ "आहा ता उत्तरा युगानि यत्र जापयः कृणवन्नजामि"—आगमिष्यन्ति तानि युगानि यत्र जापयः करिष्यन्ति अजामि कर्माणि" इति निरुक्तम्। अत्र युगशब्दः परिवर्तित-समयवाची। यथा—पूर्वं पाषाणयुगमासीत्, अधुना यन्त्रयुगमिति वदन्ति। एतादृशयुगविषयेऽपि न किञ्चिदत्र वक्तव्यम्। ज्योतिर्विद्भिः पञ्चाङ्गे कलेर्गताब्दा ५०६३ लिखिताः। एवमेव अन्यत्रापि युगमानं लिखितं विद्यते। तथा च दिनमासवर्षादि-क्रमेण सत्य-त्रेता-द्वापर-कलियुगानां मानमिति समायातम्। परं तद्विषयेऽपि नात्र विवेचनीयम्। किन्तु सत्यादिचतुर्षु युगेषु सुखदुःखादिविषये कर्तव्य-विषये च ब्राह्मण-धर्मशास्त्र-पुराण-महाभारतादौ विशेषतो मतद्वयं वर्तते। तदेव कीदृशम् ? तयोर्मध्ये कतरत् श्रेष्ठतरमनुसरणीयं चेत्येवात्र विवेचनीयम्।

प्रथमं तावत् सत्ययुगे सर्वे जनाः शान्ताः सुखिनो निर्वैराः स्वे स्वे कर्मणि स्थिताश्चौर्य-मिथ्यावादादि-दोषरहिता धार्मिका दृष्टाः, पुष्टाश्च आसन्। त्रेता-द्वापरादौ क्रमेण धर्मस्य पादशो ह्रासात् चौर्य-मिथ्यावादादि-दोषयुक्ताः किञ्चिद् दुःखिनः सञ्जाताः। कलियुगारम्भे तु धर्मस्य एक एव, पादोऽवशिष्टः। सोऽपि कलेरन्ते नङ्क्ष्यति एव जनानां च दुःखं वर्णनातीतं भविष्यति। ईश्वरभजनं केऽपि न करिष्यन्ति। तेषामायश्च स्वल्पं भविष्यति। दुर्भिक्षपीडया, परस्परं कलहेन, नास्तिक्येन च प्रजाः नाशं गमिष्यन्ति—इत्यादिकान् कलेर्बहुशो दोषानुक्त्वा ततो मोक्षार्थं बहव उपाया वर्णिताः। एतन्मतं प्रायशः श्रुतप्रायमेव।

द्वितीयं मतं पुनः मनुस्मृतौ महाभारते ऐतरेय-ब्राह्मणादौ च वर्णितम्। तद्यथा—

कृतं त्रेतायुगं चैव द्वापरं कलिरेव च।
राज्ञो वृत्तानि सर्वाणि राजा हि युगमुच्यते॥
कलिः प्रसुप्तो भवति सजाग्रद् द्वापरं युगम्।
कर्मस्वभ्युद्यतस्त्रेता विचरँस्तु कृतं युगम्॥

अत्र राजशब्देन जननेताऽपि ग्रहीतुं शक्यते। राज्ञो व्यवहारेण युगनिर्माणं भवति। यदा राजा नेता वा देशविकासकर्मणि प्रसुप्त इव भवति, तदा कलियुगम्। यदा सर्वतोमुखीमुन्नतिं कर्तुं सर्वदा परिश्राम्यन् भवति, तदा सत्ययुगम्। एवमेव ऐतरेयब्राह्मणे अपि विद्यते।

महाभारते शान्तिपर्वणि (७०.७९) कर्ण-पर्वणि (१०३.१३१)—

कालो वा कारणं राज्ञो राजा वा कालकारणम्।
अत्र ते संशयो मा भूद्राजा कालस्य कारणम्॥
राजा कृतयुगस्रष्टा त्रेताया द्वापरस्य च।
युगस्य च चतुर्थस्य राजा भवति कारणम्॥

समयानुसारं राजा भवति अथवा राजानुसारेण समयो भवति, अत्र सन्देहो नास्ति, राजानुसारेण समयो भवति। एवं च कलियुगस्य सत्ययुगस्य च निर्माता राजा नेता एव वा। युगनिर्माणं मनुष्या-धीनमिति समायाति। सर्वैर्मनुष्यैः देशविकासाय सपरिश्रमं बुद्धिपूर्वकं यत्नो विधीयते चेत् सत्ययुगं निर्मातुं शक्यते। कलियुगेन देशनिर्माणे बाधा न क्रियेत।

महाभारत-मन्वादीनां पूर्वोक्तेन कथनेन अपरे एवं मन्यन्ते यत् तदानीं समाजे कलियुगेन सर्वं नाश्यते,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अंशुक-पातोत्प्रेक्षा-विलासाः

—श्री हरिसूरिः—

[श्रीमद्भागवतस्य दशमस्कन्ध-पूर्वार्धलीला-मर्मप्रकाशके 'भक्तिरसायने' श्रीहरिसूरिणा 'तदङ्ग-सङ्गेति' (१०.३३.१८) श्लोकविवरणे गोपिनामंशुकपातमनुलक्ष्य समुद्भावितासु उत्प्रेक्षासु काश्चन इमे नूनं सहृदयहृदयान्यावर्जयिष्यन्तीति दृढमाशास्महे ।—सम्पादकः]

यद्योगतो वयमिहेदृशसौख्यभाजो जाता इति स्मरणमांशिकमप्यमूषाम् ।
नास्तीति कोपचलितं किमितोऽधिवासादास्वेवमास शिथिलं ध्रुवमंशुकं तत् ॥
एतत्सहस्थितितया विहितेऽधिवासे मोक्ता प्रभुः कचिदसावपि वा मम स्यात् ।
इत्यादृतावपि न मां स्मरतोऽधुना तावित्यंशुकं तदनुतापितयाऽऽप मुक्तिम् ॥
अस्मिन्नयत्नसुलभे सति मुक्तियोगे प्राप्तेऽलसं यदि वसामि तदन्यकाले ।
सा नेति संभ्रमचलद्ध्रुवमंशुकं तत् पादे पपात विधृतोद्धरणाभिलाषम् ॥
स्वावासि सर्वजनमुक्तिसुखावहाऽपि काञ्चीमदाश्रयतया श्रियमाप मुक्तेः ।
अद्याप्यनङ्गगृहगोपनकार्यहं चेद्धिङ् मामिति स्म गलदंशुकमास सद्यः ॥
मत्वा विष्णुपदं मयेदमनिशं निःशङ्कमासेवितं कोऽयं मे गुणिनोऽप्यघःस्थितिकरो मोहोऽलमित्याकुलम् ।
दृष्ट्वा विष्णुपदं स रूपसुरतानन्दप्रसङ्गप्रदं प्राप्तुं तत्प्रथमं भ्रमास्पदमरं युक्तं जहौ चीवरम् ॥

विक्रियते । कलियुगप्रभाव दूरीकरणाय नास्माकं सामर्थ्यमिति धारणा बलवती आसीत् । तादृश-धाराणाया दूरीकरणाय मन्वादौ तथा लिखितम् ।

एतयोर्मध्ये द्वितीयं मतं श्रेष्ठमनुसरणीयं च । यतः प्रथममते कलियुगस्य दोषवर्णने च जातिविषये हरिभजनविषये च विशेषतया लिखितम् । विप्राः हरिभजनं न करिष्यन्ति, शूद्रा उन्नतासनमधिरुह्य उपदेक्ष्यन्ति इत्यादिकं यत् लिखितम्, सर्वं तत् हरियजने प्रवृत्त्यर्थमर्थवाद इव भाति ।

किं तर्हि सर्वं तदुन्मत्तलिखितम् ? न ह्यत्र, द्वेषबुद्धिः विधेया । केचन लेखास्तात्कालिक लाभं विचार्य लिख्यन्ते, केचन च सार्वकालिकं लाभम् । तदानीन्तनेषु हरिभजनस्य प्रचारार्थं तथा लिखितम्, यतस्तत्रैव कलिकृताः सर्वे दोषा हरिभजनेन नश्यन्ति इत्युक्तम् । अत एव श्रीमद्भागवते द्वादशस्कन्धे उक्तम्—

प्रभवन्ति यदा सत्त्वे मनोबुद्धीन्द्रियाणि तु ।
तदा कृतयुगं विद्याद् दाने तपसि यद्रुचिः ॥
यदा मायानृतं तन्द्रा निद्रा हिंसा विषादनम् ।
शोको मोहो भयं दैन्यं स कलिस्तमसा स्मृतः ॥

इत्थं विचार्यमाणे स्फुटं प्रतीयते यत् राष्ट्रोत्थाने युगकृता कापि बाधा न भवति । सम्प्रति याः किल सर्वतोमुखीनाः बाधाः दृश्यन्ते, तासु राष्ट्रसञ्चा-लकानां नेतृणामेव सार्वत्रिकः प्रमादो दूषितता च कारणम् । अतो यथा तेषां परिष्कारः शीघ्रं भवेत्तथा प्रयतनीयम् । यत्नोऽप्ययं राष्ट्रप्रजा-जनानामेव कर्तव्यम् । यतो हि लोकतन्त्रे सत्तायाः वास्तवं केन्द्रं लोका एवेति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सूर्योदयस्य नियमाः

पत्र-संहिता

१. 'सूर्योदय'-मासिकपत्रस्य वार्षिकं शुल्कं रूप्यकपञ्चकं वर्तते। धनादेश (मनीआर्डर) द्वारा तत्प्रेषणीयम्। वी० पी० द्वारा प्रेषणे ५० पणाः पृथक् प्रदेयाः स्युः।

२. आवर्षं गम्भीरसाहित्यसमन्विताः १२ अङ्काः प्रकाश्यन्ते। नवीनग्राहकत्वं प्रथमाङ्कतः (जनवरी-अङ्कतः) एव स्वीक्रियते। माध्यमिकेन केनापि अङ्केन ग्राहकत्वं न स्वीक्रियेत।

३. आंग्लमासस्य २६ दिनाङ्के 'सूर्योदयः' प्रकाशितो भवति। वारद्वयं संशोध्य ग्राहकेभ्यः स प्रेष्यते। अतस्तदलाभे पूर्वं स्वकीय-पत्रालयतस्तदनागमनस्य निर्णयं कृत्वैव १० दिनाङ्कानन्तरं वयं सूचनीयाः।

४. लेख-कवितादीनां भाषा संयता, सरला, शुद्धा च भाव्या। प्रकाशनीय-लेखादीनां स्पष्टाक्षरैः कर्गजस्यैकपृष्ठे एव लेखनमावश्यकम्। अस्वीकृता लेखादयः पोस्टविभागीय-चिटिका-(टिकट) प्राप्त्यनन्तरं परावर्तयितुं शक्ष्यन्ते।

५. सम्पादकीय-विषयसम्बद्धे पत्र-व्यवहारे 'सम्पादकः' इति, व्यवस्थाविभागीय-पत्रव्यवहारे च 'व्यवस्थापकः' इति च स्पष्टं लेखनीयम्। तेन उत्तरलाभे मुधा विलम्बो न भवेत्।

विज्ञापन-शुल्कम्

सूर्योदये सुरुचिपूर्णं विज्ञापनं प्रकाश्यते। एकवारं तस्य प्रकाशनस्य शुल्कक्रमश्च अधोलिखितोऽस्ति। सार्वकालिकस्य दीर्घकालिकस्य च विज्ञापनस्य कृते विशेष-सौविध्याय पत्र-व्यवहारः कार्यः।

साधारणस्य प्रतिपृष्ठस्य	१००) रु०	साधारणस्य प्रत्यर्धपृष्ठस्य	६०) रु०
साधारणस्य चतुर्थांशपृष्ठस्य	३५) रु०	आवरण-चतुर्थपृष्ठस्य	२००) रु०
आवरण-द्वितीय-तृतीयपृष्ठयोः	१५०) रु०	प्रथमावरणपृष्ठ विज्ञापनं न स्वीक्रियेत।	

—सङ्केतः—

'सूर्योदय'-कार्यालयः, भारतधर्म-महामण्डलम्, जगत्गंज वाराणसी।

सम्पादकः, प्रकाशकः, मुद्रकश्च—गोविन्द नरहरि वैजापुरकरः,
श्रीभारतधर्ममहामण्डलम्, जगतगंज, वाराणसी कैण्ट।
मुद्रणस्थानम्—आनन्दकानन प्रेस, सी० के० ३६/२०, वाराणसी।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सूर्योदयः

भारतधर्ममहामण्डलस्य

मासिकं मुखपत्रम्

वर्षम् ४४

अङ्कः १२

सम्पादकः

गो० न० वैजापुरकरः

दिसम्बर

१९६८

वार्षिक-मूल्यम्

५) रूप्यकाणि

प्रत्यङ्क-मूल्यम्

अर्धरूप्यकम्

वाग्देवी विमलयतु मे वीक्षणपथम्

पुरा दिव्यैर्गेयैर्भृशमपरिमेयैरुपचिता
ततस्त्वार्षैः सूक्तैः परतरपटूक्तैः परिणुता ।
ततो नानागुम्फैः सुकविभिरभीड्या समुदभू-
दसौ सा वाग्देवी विमलयतु मे वीक्षणपथम् ॥१॥

कलात्मा कारुणामुरसि विपुलात्मा मतिमतां
सतां सौजन्यात्मा समितिषु धृतात्मा धृतिमताम् ।
चले चैतन्यात्मा प्रचितिरचले विश्ववरदा
सदा सर्वात्माऽसौ जयति जयतात् सा भगवती ॥२॥

यया लोके वेदाः परिकलितभेदाः प्रकटिताः
स्मृतीनां धात्री या प्रसवनकरी योपनिषदाम् ।
समस्तत्रैलोक्ये ह्युपदिशति याऽध्यात्मिकपथं
स्फुरद्दिव्यज्योतिर्जगति जयतान्निर्जरगिरा ॥३॥

विधत्ते संस्कारान् सुवति सुखसारामपि मतिं
ततो दत्ते विद्यामिह च निरवद्यां च परतः ।
सदा सौम्याचारानुपदिशति नारायणपरान्
गुरुर्गैर्वाणीयं जयति वरवाणी - परिवृढा ॥४॥

पुरा ब्रह्मा यस्यां सविधि वरिवस्यामरचयत्
ततो दिव्यज्ञानैर्मुनिभिरभिधानैरपि नुता ।
पुराणोद्यद्व्यासोदितमतिविलासोत्सवभृता
सुराणां सा भाषा मतिमदभिलाषान् सफलयेत् ॥५॥

—स्वर्गीयाः भट्टश्री-तैलङ्ग-मथुरानाथशास्त्रिणाः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अनुक्रमः

प्रपानकम्	पत्रपुटम्	परिवेषकः
गुरुं दत्तात्रेयं भज !	२८१	श्री पूज्य श्रीधरस्वामी
श्री महर्षि-ज्ञानानन्द-चरितम्	२८२	श्री विन्ध्येश्वरीप्रसाद शास्त्री
यदा जलनिधिरपि दादग्धुं प्रावर्तत !	२८३	सम्पादकीयम्
रस-स्वरूप-विमर्शः, भक्तिरसश्च	२८८	श्री पूज्य करपात्रस्वामिनः
वैदिकाऽवैदिक-दर्शन-मीमांसा	२८९	श्री जगन्नाथ श्रीधरशास्त्री पदे
पाश्चात्त्यसंस्कृतविदुषां संस्कृतपद्यानि	२९१	श्री वे० राघवन् महोदयाः
मानस-भारती	२९४	श्री जनार्दन गङ्गाधर रटाटे
(२) व्यञ्जना अर्थव्यापारो, न शब्दस्य	२९५	श्री कान्तानाथ शास्त्री तैलङ्गः
चतुश्चत्वारिं शद्वर्षीया लेखसूची		सङ्कलिता

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सूर्योदयः

रागद्वेषनिशाटनं विधुरयन् मोहं तमो नाशयन्,
तामिस्रं जडवादकैरवकुलं ज्ञानत्विषा ग्लापयन् ।
विद्वत्कोकमशोकयन् नयसुधीरोलम्बमुन्मीलयन्,
सञ्जातः सुमनोमनो मधुरयन् सर्वत्र सूर्योदयः ॥

४४ वर्षं] वाराणसी, मार्गशीर्षः २०२५ : दिसम्बर, १९६८ ई० [१२ अङ्कः

गुरुं दत्तात्रेयं भज !

जगत्सत्यं वा नो न च तनुरहं वा तनुरहम्, अहं भूमा नो वा मनुत इति यो नोऽद्वयरसः ।
न माया नोऽविद्या स्पृशति किल यं तं सुविमलं गुरुं दत्तात्रेयं भज नतमनोऽभीष्टवरदम् ॥ १ ॥
त्रिमूर्तीनां मायारहितमतिशुद्धं निजपदं परं सच्चित्सौख्यं प्रकटितमहोऽत्र त्रिवदनैः ।
निजब्रह्मैक्यं यद्विहरति वितन्वन् य इह तं गुरुं दत्तात्रेयं भज नतमनोऽभीष्टवरदम् ॥ २ ॥
तपस्तेपेऽत्रिर्यत्तनुजजनने भक्तिवशतः, तया प्रीत्या दत्तः स्फुटतरपरात्मैव कृपया ।
ददात्यात्मानं यो ह्यतिकरुणया तं सुखनिधिं गुरुं दत्तात्रेयं भज नतमनोऽभीष्टवरदम् ॥ ३ ॥
विभुर्यो नित्यो वाऽक्षरमिति च वा ब्रह्म परमं वरेण्यं सत्यं वा ह्यतनुविभवः पाशरहितः ।
स्वभक्तानां मुक्त्यै सगुण इति यस्तं श्रुतिनुतं गुरुं दत्तात्रेयं भज नतमनोऽभीष्टवरदम् ॥ ४ ॥
न भोगैर्नो दानैर्न च खलु तथा यागनिचयैर्न शास्त्रैर्नो योगैर्बहुविधविधानैर्न वशगः ।
कलौ भक्त्या प्रीतो भवति च वशो यस्तमभयं गुरुं दत्तात्रेयं भज नतमनोऽभीष्टवरदम् ॥ ५ ॥
न माया नोऽविद्या जगदिदमहो जैवमथवा न पिण्डं ब्रह्माण्डं भवति न जनुर्यस्य दयया ।
दयासिन्धुर्यस्तं भवदलनदक्षं मुनिनुतं गुरुं दत्तात्रेयं भज नतमनोऽभीष्टवरदम् ॥ ६ ॥
भवेद्यः सन्तुष्टः स्मरणमपि चेद्वा यदि कृतं निजं ज्ञानं दत्वा विषयविषपाशान् दलति यः ।
जगत्सेतुर्यो वै भवजलनिधिं तर्तमिह तं गुरुं दत्तात्रेयं भज नतमनोऽभीष्टवरदम् ॥ ७ ॥
न माया नोऽविद्या न च मम तु जीवेशकलना न विश्वं नो पिण्डं न च मम जनिर्वा मृतिरपि ।
नरो नो नारी वा न च मम विकारः क्वचिदिति गुरुं दत्तात्रेयं भज नतमनोऽभीष्टवरदम् ॥ ८ ॥

— श्री समर्थानुगृहीत-महात्मा श्रीधरस्वामी —

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्री महर्षि-ज्ञानानन्द-चरितं महाकाव्यम्

—श्री विन्ध्येश्वरीप्रसाद शास्त्री—

अद्यापि तत्सङ्ग्रह-सद्ममध्ये प्रतापवीरस्य महारणस्य ।
कुन्तान् कृपाणान् कवचानि लोको निरीक्ष्य को विस्मयमेति नान्तः ॥१२१॥

१२२. एकैकमप्येषु गुरुत्व - शालि
प्रतापवीरेण धृतं रणेषु ।
सामर्थ्यवान् साम्प्रतिको मनुष्यो
वीरोऽपि नोत्थापयितुं समर्थः ॥

१२३. तत्रैव पृष्ठास्तरणं पुराणं
निभाल्यते तस्य च चेतकस्य ।
वीराग्रणीः कोऽपि नरो गृहीत्वा
जनुर्ध्रुवं घोटकमत्र लेभे ॥

१२४. भयद्रुतस्य ह्यवरङ्गजेब-
पितुः कदाचिच्छरणागतस्य ।
उष्णीषमद्यापि विलोक्यतेऽत्र
सुरक्षितं शाहजहाँ-नृपस्य ॥

१२५. पत्राण्यनेकानि च राजकीय-
प्रबन्धवन् - निर्जरवाङ्मयानि ।
तत्र स्थितानि प्रविलोक्य राष्ट्र-
भाषात्वमासिद्ध्यति संस्कृतस्य ॥

१२६. इंग्लैण्डराजेन तु मित्रतायाः
सम्बन्ध आस्ते हि महारणस्य ।
संसूचयेत्येतदमुष्य - मुद्रा-
ङ्कितं वचो निर्जरवर्णजन्म ॥

१२७. निर्भीतयोऽस्मिन् विचरन्ति गावः
श्वानश्च शुन्यो विविधाः प्रमत्ताः ।
सद् - ब्रह्मचर्यं परिपाल्यमानाः
संरक्षिता भोजनपानतृप्ताः ॥

१२८. यावद्धि दिल्लीनगरे वरेण्ये
नैजाधिपत्यं न भवेद्धि तावत् ।
पत्रेषु भोज्यं भवनं न रच्यं
प्रतापवीरेण कृता प्रतिज्ञा ॥

१२९. सम्पाल्यतेऽद्यापि किरातवंश्यैः
शीतोष्णदुःखानि शतं सहित्वा ।
तलेष्वरण्येषु महीरुहाणां
वसद्भिरेतै - र्गिरिगह्वरेषु ॥

किरातवीरत्वकथा प्रसिद्धा तदीयबालोऽपि च निर्भयोऽस्ति ।
व्यापादयत्येकशरेण सिंह - व्याघ्रादिहिंस्रानपि वन्यजन्तून् ॥१३०॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

(क्रमशः)

Digitized by Arya Samaj Foundation Chennai and eGangotri

यदा जलनिधिरपि दादग्धुं प्रावर्तत···!

उच्यते यद् 'अग्निर्जलेन शाम्यति। तद्धि प्रज्वलतः प्रचण्डतमस्य अग्नेः सर्वमपि गर्वं क्षणेनाखर्वं विधातुं प्रभवति। परं यदा तज्जलमेव तन्निधिः सागरो वा दादहीति, तदा परमेश एव परिपातु तत्परिसरं भस्मसात्करणेन। उत्तरप्रदेशीय-माध्यमिक-शिक्षक-महाभियानेन इयमेव स्थितिरद्य समुपस्थापिता यस्या एकमात्रं दायित्वं प्रादेशिक-केन्द्रीयशासनस्य राजहठे एव वर्तते। अध्यापकाः किल राष्ट्रजीवनस्य जीवनम्। तरेव भाविनो राष्ट्रनिर्मातारः सृज्यन्ते। मर्यादारक्षणे ते सागरमपि अतिशेरते। कस्यापि राष्ट्रस्य स्थितेः समुन्नतेश्च मूलं तत्र वसन्तः आकारेण आचारेण च सरलाः, लक्ष्येन पुनः सर्वातिशायिन एते अध्यापका एव। यथैते अस्मिन् राष्ट्रसंस्थापनकार्ये सर्वथा अवहिता भूत्वा उत्तरोत्तरं प्रगता भवेयुस्तथा प्रवृत्तिप्रवर्तनं शासकानामनुपेक्ष्यं कर्तव्यम्। तदन्तरायभूता ये केचन प्रसङ्गा असुविधाश्च स्युः, स्वीयविशेषसामर्थ्योपयोजनेन शासनेन सावहितं परिहरणीयाः। किन्तु उत्तरप्रदेश-शासनं, यद्धि साम्प्रति राष्ट्रपति-शासनान्तर्गतं विजृम्भते, तन्नूनं सर्वथा एतद्विपरीतमेव समाचरत् शीतलं शान्तञ्च जलमिदम् उत्तरोत्तरं दादग्धुं विचेष्टते।

एते किल अराजकीया प्राथमिक-माध्यमिक-विद्यालयाध्यापकाः भीषणेऽस्मिन् महर्घता-युगे अत्यल्पं वेतनमासादयन्ति, येन तेषां जीवनयात्राऽपि न प्रचलति। चिरात् सुबह्वनुनीतं तैः प्रादेशिकशासनं समुचितवेतनानुदानदानाय। संविधानानुसारं 'समानकार्यस्य कृते समानवेतन'-सिद्धान्तस्य जागरूकत्वेऽपि शासनद्वारा एतेषां प्रार्थनस्य समुपेक्षणं मूलतः अशोभनं मानवतापरिपन्थि एव विद्यते। संविच्छासनेन प्रायोऽनुमोदितापीयं तेषामभ्यर्थना शासनेनानेन छलेन पद्भ्यो लुण्ठिता यत् 'अचिरादेव जायमानेन जनप्रतिनिधिशासनेनैव इदं क्रियेत' इति। किन्तु यदा उदरज्वाला दादहीति, तदा समयपरिरक्षणस्य अवकाश एव कथं भवेत्? फलतो माध्यमिकाध्यापक-सङ्घेन विगतदिसम्बरमासारम्भतः प्रदेशव्यापि महाभियानं प्रारब्धम्। अध्यापनकार्यबहिष्कारपूर्वकं तत्र तत्र क्षेत्रीयप्रधानशासकस्य मण्डलाधीशस्य न्यायालयस्य वा पुरतः शान्तिमय-प्रदर्शनं वैध-याच्ञायाः समुद्घोषश्च संभूय कतिपयेऽध्यापकाः कुर्वन्ति। राजपुरुषाश्च तान्निगृह्य कारागारे प्रक्षिपन्ति। समासतस्तेषां महाभियानस्येदं रूपम्। अद्यावधि प्रदेशेऽस्मिन् महाभियाने प्रायो दशसहस्रमिता अध्यापकाः कारावासं भजन्ते।

नूनमध्यापकानामिदमभियानं राष्ट्रपितुर्महात्मगान्विनः सत्याग्रह-महाभियानस्य सर्वथाऽन्वर्थतां भजते। विंशतिदिवसैः परिचाल्यमाने प्रदेशव्यापिनि महाभियानेऽस्मिन् कुत्रापि केनापि अध्यापकेन तादृशी काऽपि चेष्टा न कृता, या किल सत्याग्रहमर्यादामतिक्रामेत्। नूनं सत्याग्रहकारिणां साम्प्रतिकानां राजनैतिकदल-सदस्यानां कृते आदर्शभूतमिदं माध्यमिकाध्यापकानां महाभियानम्। मूलतस्तेषामभ्यर्थनं सर्वथा वैधं वर्तते, तत्स्वी-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कारय पुनस्तैरनुष्ठीयमानः पन्था अपि प्रशस्यः। इत्थं साध्य-साधनयोः शुद्धत्वे अन्ततोऽनुकूलफललाभस्तु भवेदेव, काममद्य कष्टपरम्परास्तत्र दृश्यन्ताम्। आनुषङ्गिको लाभो नाम तस्य अविशेषेण सर्वेषां जनानां महाभियानेऽस्मिन् अभूतपूर्वा सहानुभूतिः दरीदृश्यते। सर्वाण्येव राजनैतिकदलानि अविशेषेण महाभियानस्यास्य हार्दिकं समर्थनं कुर्वन्ति। केवलं ते एवास्य विरोधिनो ये मानवतामपि न जानन्ति, राष्ट्रगौरवमपि पददलितं कर्तुं मनाग् न संकुचन्ति, पूर्वशासकानामाङ्गलानामेव रीतिमनुसृत्य समानकार्येऽपि मूल्यवैषम्यनीतिं परिचालयन्ति, यथा कथञ्चन स्वीयपदरक्षायै लोकतन्त्रपरिपन्थि-शासकीयदर्पप्रदर्शनाय च प्रयतन्ते।

राज्यशासनमत्र कथयति यदध्यापकानामभ्यर्थनस्य औचित्येऽपि राज्यस्य वित्तीया स्थितिस्तादृशी नास्ति, यया प्रश्नोऽयं समाधातुं शक्येत। किन्तु राज्यशासनस्यास्य कथनस्य कियद् भ्रान्तत्वं तत् संसत्-सदस्यैः श्रीप्रकाशवीरशास्त्रिभिरेव एकस्मिन् निबन्धे सप्रमाणं स्फुटीकृतमस्ति। विषयस्पष्टीकरणाय तेषां विचारा अत्र विस्तरशः समुपस्थाप्यन्ते परीक्ष्यन्ते च।

शास्त्रिणो लिखन्ति—'भारतशासनद्वारा सिद्धान्तरूपेण कोठारी-आयोगस्य प्रतिवेदने स्वीकृते सति येषु राज्येषु अद्यावधि शिक्षकाणां वेतनस्तरस्य समुचितः परिष्कारो नाभवत्, प्रायस्तेषु सर्वेषु असन्तोषो व्याप्त एवास्ति। उत्तरप्रदेशे पुनरयं चरमकोटिं गतो यत्र पूर्वत एव शिक्षकाणां कृते शासकीय-कोषागारो रिक्त इव वर्तते। शासकीयसूचनानुसारं प्रदेशे त्रिंशदधिकेषु मण्डलेषु शिक्षणसंस्थाः पूर्णतो मुद्रिताः, अर्धमुद्रिताश्चतुर्थांशमुद्रिताश्च वर्तन्ते। अनुपदमेव प्राथमिकविद्यालया-ध्यापकैस्तत्र अभियानं कृतमासीत्। इदानीं उच्चतर-माध्यमिकविद्यालय-शिक्षका अपि प्रदर्शन-सत्याग्रहाद्युपायान् अवलम्बन्ते। दौर्भाग्याद् राज्ये स्थितिरियं तदा विषमतरा जायते, यदा छात्राणामपि अभियानानि प्रचलन्ति। परिस्थितेर्गाम्भीर्यस्य वास्तविकं मूल्यमापनं न क्रियेत तदाऽस्य दूरगामिनो भीषणश्च परिणामाः स्युः।'

नूनमियं स्थितिः कस्यापि स्वतन्त्रदेशस्य प्रादेशिकशासनस्य केन्द्रीयशासनस्य च शासनाक्षमतां वदति। विशालतमस्य राज्यस्य अर्धाधिकमण्डलेषु शिक्षणसंस्थानां मुद्रणं तत्कालीनशासनस्य कृते कलङ्कास्पदम्। कामं कस्यचन उद्योगालयस्य कतिपयानामुद्योगालयानां वा मुद्रणेन शासनस्य यावती प्रत्यक्षहानिर्जायते, तावती हानिरनेन शिक्षासंस्थाया व्यापकमुद्रणेन मा भवतु। परं तस्य या मूलगता हानिर्भवेत्, तत्कल्पनमेव परं शोचनीयम्। छात्र-महाभियानेन संकुलमपि राज्यं नवमिदं महाभियानमुपेक्षते, किमतः परं तस्याऽदूरदर्शित्वम्?

शास्त्रिभिरग्रे उच्यते यत् 'साम्प्रतं भारते प्राथमिकशिक्षकाणां सर्वतोऽधिका दयनीया स्थितिः उत्तरप्रदेशे वर्तते। पंजाब-हरियाणाप्रभृति-न्यूनकायेष्वपि राज्येषु प्राथमिकविद्यालयानां वेतनक्रमः ३५७), ३५२) रुप्यकाणि वर्तते। सत्येवं देशस्य सर्वतो महति प्रदेशेऽस्मिन् प्राथमिकाध्यापकेभ्यः महर्धतासाहाय्यान्वितं ८०), १०२) रूप्यकवेतनं मिलति। केन्द्रीय-शिक्षामन्त्रिणां कथनानुसारं वेतनमिदं संशोध्य ११०), १२५) रूप्यकाणि मासिकवेतनरूपं निर्धारितमस्ति। सत्यप्येवम् अन्यराज्यतुलनादृष्ट्या अत्यल्पमेवैतत्। शिक्षामन्त्रिण इदमपि वदन्ति यद् उत्तरप्रदेशे प्राथमिकविद्यालयाध्यापकेभ्यः सार्धशत-रूप्यकमित-मासिक-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

Digitized by Arya Samaj Foundation Chennai and eGangotri

वेतनदाने राज्यशासनोपरि कोटिसप्तकरूप्यकाणां व्ययभारो भवेत्। इयान् विपुलो राशिः किल राज्ये लोकप्रिय-शासन-सङ्घटनानन्तरमेव दातुं शक्यः। किन्तु अद्य तु तादृशलोकप्रियशासनसङ्घटनं तस्य सुस्थिरता च भविष्यद्गर्भे एव। राष्ट्रपति-शासनकाले केन्द्रशासनं विषयेऽत्र यावत् कर्तुं प्रभवति, तावत्तु कृत्वा प्रदर्शयेत् !'

एते अङ्का एव एकदेशीयावान्तरशासनानां परस्परं महतीं विसंवादितां निदर्शयन्ति। लोकप्रिय-शासनस्य वार्ता पर्यायेत इदं व्यनक्ति यदिदं शासनं प्रश्नममुं कालहरणकोटिकं विधातुमभिवाञ्छति।

श्रीप्रकाशवीरशास्त्रिणो लेखेऽस्मिन् अग्रे लिखन्ति—'कतिपय-वर्षेभ्यः पूर्वं श्रीखेर-महोदयानामाध्यक्ष्ये एका समितिः सङ्घटिताऽऽसीत्। तया समित्या समनुरुद्धमासीद् यद् राज्यशासनं आयस्य दश प्रतिशतभागः शिक्षायां व्ययं कुर्यात्। देशस्यास्य नैकैः राज्यैरिदं स्वीकृतम्। किन्तु उत्तरप्रदेश-शासनेन न स्वीकृतम्। तद्धि आयस्य षट्प्रतिशत-भागमेव व्ययीकुरुते। इत्थं तत् चतुर्दशकोटि-रूप्यकाणि शिक्षाविभागतः सञ्चितानि करोति। यदि राज्यशासनं राशिरयं शिक्षकवेतनस्तर-निर्धारणे व्ययीकुर्यात् तदा नूनमेतदर्धो भागः केन्द्र-शासनेनापि तेन लभ्येत। एवं एकविंशति-कोटि-रूप्यकैः शिक्षकाणामयमसन्तोषो बह्वंशेन निर्वापयितुं शक्यः स्यात्।

'अध्यापकानां सहयोगस्य अपरोऽप्येकः प्रकारो भवितुं शक्नोति। तेषां बालकेभ्यो विश्व-विद्यालयस्तरीय - शिक्षणस्य अमूल्यसुविधा दीयेत। चिकित्सा-निवासव्यवस्थेऽपि शासनं स्वयं कुर्यात्। शिक्षाविभागे तेषां सन्तानेभ्यः प्राथम्यं दीयेत। इत्थं शिक्षकेषु व्याप्तस्य असन्तोषस्य दूरीकरणाय यत् शक्यं तत्तु करणीयमेव।'

नूनं तदा खेर-समित्याः प्रतिवेदनोपेक्षकं प्रादेशिकशासनं कांग्रेसदलीयमेवासीत्, न तु संयुक्तविधायकदलीयमिति पुनर्विस्मर्तुं मशक्यम्। आश्चर्यमेतत्, तथापि तद्दलमग्रिमे उपनिर्वचने स्वात्मानं निर्वाचयितुं प्रार्थयेत् ! शास्त्रिमहोदयैः यावन्तः शिक्षकसाहाय्यदृष्ट्या पन्थानः प्रदर्शिताः, तदनुसरणे नूनं शिक्षकाणामसन्तोषो बह्वंशेन निर्वापितः स्यात्। यतो हि स्वभावतस्ते सन्तोषिनः। ससम्मानं स्वल्पलाभेनापि प्रमोदिनः सन्ति।

शास्त्रिणोऽग्रे शिक्षकोत्पीडनविषये लिखन्ति—प्रारम्भिकशिक्षा किल मण्डलपरिषदाम्, नगरपालिकानां विकासखण्डानाञ्च अधीना। तेन शिक्षाकाणां पुरतो नैका अन्या अपि बाधा उपतिष्ठन्ते। प्रायो भूयसा क्षेत्रेभ्यः श्रूयते यत् स्वल्पवेतनभागिभिरेभिः अध्यापकैः राजनैतिककार्येभ्यः शुल्कं गृह्यते, निर्वाचनादिषु घृणित-राजनीतावपि एते नियोज्यन्ते तैस्तैः शिक्षासंस्थानैः। तथा कर्तुमसमर्थताप्रदर्शने इयद्दूरं तेषां स्थानान्तरणं क्रियते येन वेतनस्य बहुलो भागो मार्गव्यये एव समाप्येत। ग्रामेषु कन्या-विद्यालयीयाध्यापिकानां यदैतादृशं स्थानपरिवर्तनं क्रियते, तदा तासां स्थितिः पुनरतीव असह्यतरा जायते।'

ग्रामीण - प्राथमिक-विद्यालयानां शास्त्रिवर्यैः चित्रितेयं स्थितिः सर्वथा वास्तविकी। मण्डलपरिषत्-सञ्चालितेष्वेषु विद्यालयेषु, तत्रापि बालिका-विद्यालयेषु नासद्वयोत्तरं वेतनवितरणं तु नियतमेव। नैकवारं चतुर्भिः मासैरपि वेतनं वितीयते। सत्येवं तत्रस्थाः शिक्षिकाः कथं जीवनं यापयन्तु इत्यस्यापि विचारं कर्तुं न कोऽप्यग्रेसरति।

शास्त्रिवर्या अग्रे लिखन्ति यद् 'आंग्लशासनकाले राजकीय-विद्यालयेषु महाविद्यालयेषु च वेतनादीनां विशेषसौलभ्यमासीत्।' तत्रस्थाः शिक्षकाः 'शासनस्य

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रेष्ठा बालकाः' इत्युपाधिं भजन्ते स्म। किन्तु साम्प्रतं स्वतन्त्र-भारतस्य संविधाने ३९ धारायां स्पष्टमेव समानकार्यस्य कृते समानवेतन-सिद्धान्तः स्वीकृतोऽस्ति। सत्येवं राजकीय-विद्यालयेषु राजकीयानुदानभाक्षु विद्यालयेषु च वेतन-महर्घताभृतिविषये एतावन्महद्वैषम्यं किमर्थम्? यदा किल राजकीय-विद्यालयापेक्षया एते -विद्यालयेषु परीक्षाफलानि अनुशासनञ्च विशेषतः स्तुत्यं भवति। उभयोः वेतनक्रमे समतासिद्धान्तस्य समन्वयने प्रादेशिकशासनोपरि महत्तरो व्ययभारो न भवेत्। केवलं सार्धकोटिरूप्यकमितेन अतिरिक्तानुदानेन समस्येयं समाहिता भवितुं शक्नोति। अचिराद् राज्यपालेन एतद्विषयको योऽध्यादेशः प्रचारितस्तत्रापि राज्यपालमहोदयेन समता-सिद्धान्तः स्वीकृत आसीत्। न जानीमो वयं यत्स अध्यादेशः कुत्र गतः? इति।'

अनेन विवेचनेन स्पष्टं यदस्माकं स्वदेशीया शासकाः कथं भूतपूर्व-वैदेशिकशासकाननुकुर्वन्ति। तथापि उच्यते, यदस्माकमादर्श-शासनम्। अहो विधि-विडम्बना!' राज्यपालस्वीकृतोऽध्यादेशोऽपि यत्र कार्यान्वितो न भवति, तादृशं शासनं कीदृग् आदर्शपूर्णमिति स्फुटं वक्तव्यं नावशिष्यते।

श्रीप्रकाशवीरशास्त्रिवर्या अग्रे लिखन्ति यत् 'संयुक्त-विधायक-दलस्य भूतपूर्वशासनेन प्रायो निर्णयः कृत आसीत् यदनुदानभाजां विद्यालयानां शिक्षकाणां वेतनं राज्यकोषेणैव दीयेत। तथैव छात्रेभ्यो मिलितं विद्यालयीयाध्यापनशुल्कम्, अन्यविधश्च तदायः शासकीयकोषे एव सञ्चितः स्यात्। केरलराज्ये महाराष्ट्रराज्ये च पद्धतिरियमादित एव प्रचलति। अस्या आवश्यकता एतदर्थमपि वर्तते यद् बहुषु स्थानेषु एतादृशा आक्षेपाः श्रूयन्ते यदध्यापकानां वेतनं वेतनपुस्तके पूर्णं लिखित्वा तत्र तेषां प्राप्तिहस्ताक्षरमपि कार्यते, परं पूर्णं वेतनं न दीयते। उद्योगविहीनताभिशप्ता नव्यशिक्षका विवशतः इदं कर्तुं प्रवर्तन्ते। तथापि न ज्ञायते यद् शिक्षकाणामिदमुचितमभ्यर्थनं शासनेन किमिति न स्वीक्रियते? भीषणमहर्घताकालेऽस्मिन् कियदवधिरेतेषामिदं दुःखं गुप्तं स्थातुं शक्नुयात्? अनेन प्रशासनिव्ययेऽपि साधारणी वृद्धिर्भवितुं शक्नोति। परं शिक्षकाणामुदरकृन्तनस्य दूषितेयं प्रणाली तत्-क्षेत्रीयशासनस्य कृते शोभावहा कथमपि नोच्येत। तद्दोषदूरीकरणाय संभाव्यमानोऽप्ययं भारस्तादृशो महान् न भवेत्।'

शास्त्रिणामिदं वक्तव्यं सर्वथा तथ्यपूर्णमेव। संस्कृतपाठशालाध्यापकाः प्रायोऽनेन महारोगेण ग्रस्ताः बहुत्र। अङ्गुलिगण्या विद्यालया वर्तन्ते अस्यापवादभूताः। सम्प्रति विद्यालय-सञ्चालनमपि एको व्यवसाय एव संवृत्तः। तथाकथित-धर्मभीरूणां संस्कृत-विद्यालयसंचालकानामियं दशा चेत् सर्वथा भौतिकतासमुपासकानां आंग्लविद्यालय-सञ्चालकानां कृते किमु वक्तव्यम्? संस्कृत-विद्यालयानामियं स्थितिरनेन लेखकेन एकवारं कस्यचन शिक्षाधिकारिणः पुरतः स्थापयित्वा तन्निरोधाय ते प्रार्थितास्तदा तैरुक्तं यदहमपि इदं जानामि। तथापि भवद्भिरध्यापकैः किमिति इत्थं क्रियते? किञ्चित्तु पूर्वतोऽधिकं मिलत्येव। तावदपि न मिलेच्चेत् किं करिष्यन्ति शिक्षकाः? सर्वथा अन्याय-निवारणाय शासनं कुर्वतां शासकानां कर्तव्यमेतद् यदनेन महारोगेण शिक्षका मोचनीया इति।

शास्त्रिणोऽग्रे लिखन्ति यत् 'कस्मिन्नपि देशे राष्ट्रनिर्मातृणां शिक्षकाणां कृते कार्यमुद्रणाय प्रदर्शनाय वाऽग्रेसरणं कथमपि न शुभपरम्परा। तथापि शासकीया दुर्नीतिरेव एतेभ्य एतत्करणाय विवशतामापादयति। अस्य कुप्रभावश्छात्रेषु न भवेदिति तु कथं सम्भवि? वर्तमानच्छात्र-महाभियानस्य भूयसा कारणमसन्तोष एव। यदा ते स्वशिक्षकान् राजपथे उद्धुष्य विद्यालयबहिष्कारं कुर्वतः पश्यन्ति, तदा तेषु तदनुकृतिर्वर्धिता परिलक्ष्येत चेत्तत् स्वाभाविकमेव।'

शास्त्रिपादेरनेन विवेचनेन एकेनैव दण्डेन छात्राः, शिक्षकाः शासनञ्च त्रयोऽपि दण्डिताः। वयमपि स्वीकुर्मो यत् शिक्षकाणामिदं न कर्तव्यम्। तैस्तथाकृते छात्रेभ्योऽपि तदपेक्षया आधिक्येन तदनुकरणस्य प्रेरणा मिलेदित्यपि स्वाभाविकम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परं सर्वस्यास्य पापस्य दायित्वं शासने एव। यतो हि यदि तेनैव विषयेऽत्र विवेकः कृतः स्यात्तदा अयमप्रियः प्रसङ्ग एव नोपस्थितः स्यात्। छात्रैरपि दृढमवधेयं यदस्माकमध्यापका उदरज्वालादग्धा एव तथा कुर्वन्ति, नान्यथा। नाविदितमेतत् तेषाम् उदरज्वालया महर्षेर्विश्वामित्रस्यापि कृते किमकरणीयं करणीयमभवदिति। अतस्तैः 'यान्यस्माकं सुचरितानि तानि त्वयोपास्यानि' इत्ययमेव श्रुतिनिर्देशो राष्ट्रहितदृष्ट्या माननीयः।

शास्त्रिभिः शिक्षादानरूपे समाने कार्ये चतुर्विधभेदेषु कियद् वैषम्यं शासनेन क्रियत इति निरूपयद्भिर्लिखितं यत् 'सम्प्रति प्राथमिक-माध्यमिक-स्तरीय शिक्षा श्रेणीचतुष्टये विभक्ता वर्तते। एतादृशा अपि सार्वजनिकविद्यालयाः सन्ति देशेऽत्र, यत्र पठतां छात्राणां कृते २५०-३०० रूप्यकमितो मासिकव्ययः क्रियते। पाठयद्भिः शिक्षकैः पुनः अशीतिरूप्यकात्मकमेव मासिकवेतनं लभ्यते। इतोऽन्ये माण्टेसरी-विद्यालयाः कानवेण्ट-विद्यालया अपि प्रचलन्ति। राष्ट्रैक्यता-परिषदि सर्वत्र विद्यालयेषु समताधानस्य निर्णयस्तु भूतपूर्व एव। ज्ञायते स कर्णजानां समुद्रे एव कुत्रचन सुरक्षितः स्यात्। यदि प्रारम्भत एव शिक्षाक्षेत्रे एतादृशी विषमता परिपाल्येत तदा व्यावहारिकक्षेत्रे समताया कथमाधानं भवेत् ?'

लोकतन्त्र-प्रतिष्ठापकं स्वात्मानं मन्यमानानां शासकानां लोकतन्त्रप्रतीपकार्यं निर्दिशद्भिः शास्त्रिपादैरन्ते लिख्यते यत् उत्तरप्रदेशे शिक्षकाणाममुं विद्यालयबहिष्कारं निरोद्धुं प्रादेशिक-शासनेन एकोऽध्यादेशोऽपि प्रचारितः। एवमेव विगते १९ अक्तूबर-दिनाङ्के केन्द्रीय-कार्यकराणां कार्यबहिष्कारविषयेऽपि अध्यादेशः प्रचारितपूर्वः केन्द्रीय-शासनेन। शासकीयनियमेषु समस्यासमाधायकेषु विधानेषु सत्स्वपि अध्यादेश-घोषणम्, तदवहेलनाय अवसरदानञ्च कियद् दूरदर्शितापूर्णं बुद्धिमत्तापूर्णं वा वक्तुं शक्येत ? अग्रे चीनादि-परराष्ट्रियविशेषबाधाप्रसङ्गेषु अध्यादेशघोषणस्य आवश्यकत्वं नहि अकल्पनीयं वस्तु साम्प्रतिकस्थितेरवलोकनेन। यदि नाम जना एवमेव अध्यादेशावज्ञाकरणे पटवः स्युस्तदा तादृशे राष्ट्रसङ्कटसमये परचक्रबाधाकाले कथमध्यादेशाः कार्यकारिणो भवेयुरित्यपि किं विचारितं पदे पदेऽध्यादेशं घोषयद्भिरस्मच्छासकैः ? शिक्षक-महाभियान-सदृशानां महाभियानानां दमनाय अध्यादेशप्रयोगः कथमपि बुद्धिमत्तापूर्णो न मन्येत। नवयुवकेष्वद्य चतुर्दिगसन्तोष उत्तरोत्तरं परिवर्धमानो दृश्यते। क्षुद्रा राजनैतिकस्वार्थास्तेषां प्रोत्साहने सक्रियाः सन्ति। एवं स्थितौ तान् सन्मार्गे समानेतुं गृहीतव्रतान् शिक्षकानपि शासनं स्वपोषणाद् विरक्तान् विधातुं प्रयतते चेत् एतत् महत्तरः ऐतिहासिकः प्रमादः स्यात्' इति।

शास्त्रिपादैरनेन उपसंहारेण सर्वमपि शिष्टमत्र विषये वक्तव्यं परिसमापितम्। स्वर्गीय-नेहरू-महोदयानामसाधारणेन अधिनायकल्पनेतृत्वेन अस्माकं देशे सम्प्रति दृश्यमाना ईदृशी अराजकतामयी स्थितिस्तदा निरुद्धाऽभवत्। स्वर्गीय-शास्त्रिशासनकालः पुनः स्वल्पतम एवाभवत्, तत्रापि परकीययुद्धप्रसङ्गे एव तस्य ब्रह्मेशो यापितः। तथापि तेषां लोकसमाराधकेन सहजस्वभावेन एतादृशस्य दृश्यस्य तदाऽपि दर्शनं नाभवत्। परं शास्त्रिवर्यणामनन्तरं तु सर्वत्र शासकेषु उच्चोच्चतर-पदलाभस्पर्धैव जनराष्ट्रसंरक्षणादधिकं दृष्टा दृश्यते च इति हि दुर्भाग्यपूर्णा स्थितिः। क्षुद्रस्वार्थस्य कृते दलपरिवर्तनम्, राजनैतिकदलानामभिसन्धयः, परराष्ट्र-परिपोषितानां स्वात्मीयानां राष्ट्रद्रोहः एवमादिभिः पूर्वत एव उन्मथितमिवास्ति अस्माकं राष्ट्रम्। शिक्षका विद्योपासका एव एकमात्रमाशाकेन्द्रमासीदस्य चतुर्दिग्व्यापिनोऽसन्तोषाग्नेः शमनाय। परं शासकानां महत्या कृपया (?) सोऽपि सागरो जलराशिरद्य दादग्धुं प्रवृत्त इति भगवानेव राष्ट्रं परिपात्वित्येव वयं कामयामहे।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रस-स्वरूप-विमर्शः, भक्तिरसश्च

—श्री पूज्य करपात्रस्वामिनः—

एवं प्राकृतरसवर्णनेन भगवदालम्बनके अप्राकृत-रसेऽवतार एव तु मुख्यं रसशास्त्रतात्पर्यम्। तस्यैव सर्वशेषित्वप्रसिद्धेः। तत्र—

मद्गुणश्रुतिमात्रेण मयि सर्वगुहाशये।
मनोगतिरविच्छिन्ना यथा गङ्गाम्भसोऽम्बुधौ॥
देवानां गुणलिङ्गानामानुश्रविककर्मणाम्।
सत्त्व एवैकमनसो वृत्तिः स्वाभाविकी तु या।
लक्षणं भक्तियोगस्य निर्गुणस्य ह्युदाहृतम्॥

इत्यादिरीत्या भगवद्गुणश्रवणादिना द्रुतस्य स्निग्धस्य मनसो धारावाहिकतां गतायां भगवदाकाराकारितायां वृत्तौ तदभिव्यक्ते निरुपमसुखसंविद्रूपे भगवत्येव वा भक्तिशब्दप्रयोगः।

अचिन्त्याभेदाभेदवादिभिस्तु—

अन्याभिलाषिताशून्यं ज्ञानकर्माद्यनावृतम्।
आनुकूल्येन कृष्णानुशीलनं भक्तिरुत्तमा॥

इति भक्तिलक्षणमुक्तम्। एतच्च श्रीभगवतः स्वरूपभूताऽऽह्लादिनीशक्तिवृत्तिरूपम्। अतोऽप्राकृतमपि कामादिवृत्तितादात्म्येनैव आविर्भूतम्।

माहात्म्यज्ञानपूर्वस्तु सुदृढः सर्वतोऽधिकः।
स्नेहो भक्तिरिति प्रोक्तस्तया मुक्तिर्न चान्यथा॥
सर्वोपाधिविनिर्मुक्तं तत्परत्वेन निर्मलम्।
..... हृषीकेशसेवनं भक्तिरुच्यते॥

इति नारदपाञ्चरात्र-वचनात्।

अहैतुक्यव्यवहिता या भक्तिः पुरुषोत्तमे।
सालोक्य-सार्ष्टि-सायुज्य-सारूप्यैकत्वमप्युत॥
दीयमानं न गृह्णन्ति विना मत्सेवनं जनाः।
स एव भक्तियोगाख्य आत्यन्तिक उदाहृतः॥

इति भागवत-वचनाच्च।

द्रुतचित्तानां द्रवप्रयोजक-सात्त्विकप्रकाशवृत्ति-प्रतिबिम्बोद्ग्राहिण्याम् अप्राकृतायामाह्लादिनीवृत्तौ आलम्बनवैचित्र्यात् नानाविधाभिः स्वदमानायां मुख्यस्थायित्वेन व्यवह्रियमाणायां मुख्यरसस्वरूपताविश्रामयोग्यतावत्यां भक्तिशब्दः। तेनान्याभिलाषिताशून्यं तदेकस्पृहत्वमेव रतेर्लक्षणम्। यथा—

व्यक्तं मसृणतेवान्तर्लक्ष्यते रतिलक्षणम्।
मुमुक्षुप्रभृतीनाञ्चेद् भवेदेषा रतिर्नहि॥
विमुक्ताखिलतर्षैर्या मुक्तैरपि विमृग्यते।
या कृष्णेनातिगोप्याशु भजद्भ्योऽपि न दीयते॥
सा भुक्तिमुक्तिकामत्वाच्छुद्धां भक्तिमकुर्वताम्।
हृदये संभवत्येषा कथं भागवती रतिः॥
प्रेम्णस्तु प्रथमावस्था भाव इत्यभिधीयते।
शुद्धसत्त्वविशेषात्मा प्रेमसूर्यांशुसाम्यभाक्॥
रुचिभिश्चित्तमानृण्यकृदसौ भाव उच्यते।
आविर्भूय मनोवृत्तौ व्रजन्ती सत्स्वरूपताम्॥
स्वयंप्रकाशरूपाऽपि भासमाना प्रकाश्यवत्।
वस्तुतः स्वयमास्वादस्वरूपैव रतिस्त्वसौ।
कृष्णादिकर्मकास्वादहेतुत्वं प्रतिपद्यते॥

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वैदिकाऽवैदिक-दर्शन-मीमांसा

—श्री जगन्नाथ श्रीधरशास्त्री पदे—

ब्रह्मसूत्रेषु उपन्यस्तो जगत्कारणवादो ब्रह्मात्मभावप्रतिपादनपर एव, न सृष्टिप्रतिपादनपर इति स्थाने स्थाने आचार्यैर्भाष्ये उक्तम्। तथा हि—

'अपि च यदा तत्त्वमसीत्येवंजातीयकेन अभेदनिर्देशेन अभेदः प्रतिबोधितो भवति, अपगतं भवति तदा जीवस्य संसारित्वं ब्रह्मणश्च स्रष्टृत्वम्। समस्तस्य मिथ्याज्ञानविजृम्भितस्य भेदव्यवहारस्य सम्यग्ज्ञानेन बाधितत्वात्। तत्र कुत एव सृष्टिः, कुतो वा हिताकरणादयो दोषाः? अविद्याप्रत्युपस्थापितनामरूपकृत-कार्यकारणसङ्घातोपाध्य-विवेककृता हि भ्रान्तिः हिताकरणादिलक्षणः संसारो न तु परमार्थतोऽस्तीत्यसकृदवोचाम। जन्ममरणच्छेदन-भेदनाद्यभिमानवत्।'

(शां० भा० २.१.२२)

'न चेयं परमार्थविषया सृष्टिश्रुतिः। अविद्याकल्पित-नामरूपव्यवहारगोचरत्वात् ब्रह्मात्मभाव-प्रतिपादनपरत्वाच्चेत्येतदपि नैव विस्मर्तव्यम्।'

(२.१.३१)

'आत्मैकत्ववादे जगदेव नास्ति। का तस्योत्पत्ति-चिन्ता। अत एवाचार्यैः वैषम्यनैर्घृण्याधिकरणं (ब्र. सू. २.१. ३४–३६) श्रुतिप्रामाण्येन यथाकथञ्चित् प्रस्थापितमपि **'तत्तु समन्वयात्'** इति सूत्रे भाष्ये (ब्र. सू. १.१.४.) **'पत्युरसामञ्जस्यात्।** इति सूत्रे भाष्ये (२.२.३७) प्रत्याख्यातम्।'

आत्मैकत्ववादे एकमद्वितीयं कूटस्थं नित्यं च ब्रह्म। श्रुतिभिर्ब्रह्मव्यतिरिक्तस्य प्रपञ्चस्य निराकरणाद् ब्रह्ममात्रपरिशेषाच्च एक एव पदार्थः। पदार्थान्तरस्याभावात् कामभेदानां धर्मार्थकाममोक्षाणां भोगापवर्गवादिभिर्द्वैतिभिः परिकल्पितानां स्थानमेव नास्ति। ब्रह्मैव धर्मी। तस्याविनाशित्वाद् अनुच्छिन्नधर्मत्वात् तस्मिन्नधर्माभावः। केवल धर्म एव। ब्रह्मणो नित्यं ध्रियमाणत्वाद् अवतिष्ठमानत्वाद्वा ब्रह्म धर्मरूपमेव। अभेदोपचाराद् धर्म इत्येव व्यपदिश्यते। अत एव ब्रह्मवादो धर्मवाद इत्याख्यायते। अत्र धर्मी सनातन इति धर्मोऽपि सनातन उच्यते। अयं धर्मधर्मिविचारो वैदिकैः सर्वत्र नित्यानित्येषु पदार्थेषु प्रवर्तितः। अनन्तानि च धर्मिशास्त्राणि निर्मितानि। भोगापवर्गवादस्य केवलापवर्गवादस्य भोगवादस्य स्वभाववादस्य च बहुभिः प्रचारणात् स्वीकाराच्च तानि सर्वाणि शास्त्राणि नष्टानि नाशितानि च। केवलं भोगापवर्गप्रस्थापकानि शास्त्राणि प्रवर्तन्ते। धर्मनाशे धर्मिनाशो धर्मप्रतिष्ठायां धर्मिप्रतिष्ठेति धर्मिप्रतिष्ठार्थं सर्वत्र धर्मप्रतिष्ठापनमेव वैदिकानां धर्मः संवृत्तः। धर्मविचारार्थं धर्मी एक एवापेक्ष्यत इति एकत्वे अद्वितीयत्वे च धर्मविचारः। द्वैते भोगविचारः, भोक्ता भोग्यश्चेति पदार्थद्वयनिष्ठत्वात्।

वेदोक्तस्य धर्मधर्मिणोर्विचारार्थमेव मीमांसाशास्त्रं प्रवृत्तम्। पूर्वमीमांसायाम् **अथातो धर्मजिज्ञासा** (पू० मी० १.१.१) इति धर्मविचार आरब्धः। उत्तरमीमांसायां च **अथातो ब्रह्मजिज्ञासा** इति (ब्र० सू० १.१.१) धर्मिविचार उपक्रान्तः। धर्मी एकमेवाद्वितीयं ब्रह्म। तस्याप्रमेयत्वात् प्रथमं धर्मजिज्ञासैव। धर्मश्च देहोपाधिकश्चिदात्मा। **स्वरूपप्रतिष्ठा वा चितिशक्तिः** (यो० सू० ४.३४) इति चितिशक्तौ देहोपाधिके चिदात्मनि स्वरूपावस्थाने वा योगदर्शनस्य परिसमाप्तिदर्शनात्।

ब्रह्मणो विकारवति प्रमेयं रूपमेव धर्मशब्देनोच्यते। **तच्च पादोऽस्य विश्वा भूतानि** (मा० सं० ३१.३)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इति मन्त्र एवोक्तम् । विषयोऽयं भावनोपनिषद्भाष्ये भास्त ररराजैः स्वसम्प्रदायानुसारं परिष्कृतः । तथा हि—

'निरुपाधिकी संविदेव कामेश्वरः ।

(भावनोप०, २६)

"उपाधिरहितं शुद्धं चैतन्यमेव बिन्दुरूपः कामेश्वरः । 'संविद् कामेश्वरः स्मृतः' इत्युपबृंहणात् ।"

(भाष्यम्, २६)

सदानन्दपूर्णा स्वात्मैव परदेवता ललिता ।

(भावनोप०, २७)

"संविदो निरुपाधिकत्वविशेषणबलात् तदङ्कनिलयायाः परदेवतायाः किञ्चिदुपाधिविशिष्टत्वमात्रेण ततो भिन्नतयोपास्यत्वम् । तादृशश्च स्वात्मैव । स्वाभिन्न एव परदेवता उपास्तिरूपज्ञानविशेषनिरूपित-मुख्यविशेष्यताशालिनी । तामेव असाधारणनाम्ना निर्दिशति ललितेति । अत्र सदानन्दपूर्णेत्युपाधिकथनम् । तेन अन्तःकरणावच्छिन्नस्य न ललितात्वं तस्योपासककोटौ प्रवेशात् । अत एव स्वात्मेत्युक्तम् । स्वस्योपासकस्य आत्माऽन्तर्यामीति तदर्थत्वात् । इत्थं च एक एवात्मा अन्तःकरणोपाधिकः सन्नुपासको भवति । सत्त्वचित्त्वानन्दत्वरूप-धर्मत्रयविशिष्टवेषेण ललिता भवत्युपास्या । धर्मत्रयविनिर्मुक्तं धर्मिमात्रमुपास्यदेवताधारभूतः कामेश्वरो भवतीति विवेकः ।....." (भावनोपनिषद्भाष्यम्, २७) "अत्रेदं गुरुमुखैकवेद्यं रहस्यम् । निरुपाधिकपदेन केवलत्वस्य सदानन्दपूर्णपदेन धर्मविशिष्टत्वस्य च कथनेन विशिष्टकेवलयोरवयवावयविनोरिव अयुतसिद्धयोस्तादात्म्यरूप एव सम्बन्धः न, संयोगादिरूपो भेदघटितः ।"...

(भावनोपनिषद्भाष्यम्, २८) ।

आत्मनो देहपरिच्छिन्नस्य ब्रह्मणश्च धर्मधर्मिणोरभेदः सम्बन्धः । तयोरनन्यत्वम्—

तदनन्यत्वमारम्भणशब्दादिभ्यः

(ब्र० सू० २.१.१४)

इत्यारम्भणाधिकरणे प्रस्थापितम् । धर्मनाशे धर्मिनाशः । यद्यप्यात्मनो नाशो न भवति अविनाशित्वात्; तथापि देहात्मवादे अविद्यया समुत्थिते देहव्यतिरिक्तस्यात्मनोऽस्तित्वस्य भानमेव न भवति । अयमेवाविद्यया आत्मनाश उच्यते । अत एव गीताशास्त्रे—

नष्टात्मानोऽल्पबुद्धयः ।

इत्यसुरा नष्टात्मान उक्ताः । य एवमात्मनाशं कुर्वन्ति, ते आत्महन इत्युच्यन्ते । तथा चोक्तम् ईशोपनिषदि—

असुर्या नाम ते लोका अन्धेन तमसाऽऽवृताः ।
तांस्ते प्रेत्यापि गच्छन्ति ये के चात्महनो जनाः ॥

(ईशोप०, ३)

आत्मनाशे चैवमन्तर्यामित्वेन प्रतीतस्य ब्रह्मणोऽपि नाशो भवति । ब्रह्मणः प्रतीतिरेव न भवति । धर्मप्रतिष्ठायां धर्मिप्रतिष्ठेति सिद्धान्तात् देहात्मवादे नष्टे आत्मबोधे संवृत्ते आत्मप्रतिष्ठायां तस्मिन्नेवात्मनि प्रथममनन्यत्वेन अन्तर्यामित्वेन च विद्यया ब्रह्मप्रतीतिर्भवति । इयमेव ब्रह्मप्रतिष्ठा । अत एवोक्तं गीताशास्त्रे—

ब्रह्मणो हि प्रतिष्ठाऽहममृतस्याव्ययस्य च ।
शाश्वतस्य च धर्मस्य सुखस्यैकान्तिकस्य च ॥

(गी० १४.२७)

अत्राहंशब्देन ब्रह्मणो विकारवर्ति एकमद्वितीय स्वरूपमीश्वर इति व्यपदिश्यमानं सोपाधिकं सगुणं च गृह्यते । तत्रैव ब्रह्मणः प्रतिष्ठा । देहोपाधिके आत्मन्येव ब्रह्मप्रतीतिरनन्यत्वेन भवति । तथा च श्रुतिः—

आत्मन्येवात्मानं पश्येत् । (बृ० उ० ४.२.२८)

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पाश्चात्त्य-संस्कृतविदुषां संस्कृतपद्यानि

—डाक्टर श्री वे० राघवन्—

सप्तदशशतकमध्ये ऐरोपीयानां विद्यारसिकानां संस्कृतभाषायाः संस्कृतसाहित्यस्य ज्ञानमुदियाय, यदविलम्बेन प्रतायते स्म। समन्तरे शतके उपनिषदां, भगवद्गीतायाः अभिज्ञानशाकुन्तलस्य च अनुवादा ऐरोपीयभाषासु अवतारिताः पाश्चात्त्यविद्वद्भिरेव। तदनन्तरे शतके ऐरोपीयेषु विश्वविद्यालयेषु सर्वत्र संस्कृतविद्या अध्यापनाध्ययनाभ्यां व्याख्याप्रकाशनाभ्यां च सुप्रतिष्ठिता बभूव। अयं च संस्कृतप्रचारः पाश्चात्त्यदेशेषु तथा समैधत, यथा तद्द्वारा संस्कृतमातृभूमौ भारतदेश एव तस्या भाषायाः कोऽपि नवोन्मेष आविरासीत्।

यद्यप्येतैः पाश्चात्त्यसंस्कृतविद्वद्भिः संस्कृतवाङ्मयस्य प्रचारणे महती सेवा कृता, तथापि तेषां संस्कृतभाषायां किं पर्याप्तं पाण्डित्यमभूदिति भारतीयाः पण्डिताः सदैव सशेरते स्म। किञ्च ते पाश्चात्त्यविपश्चितः विमर्शविचक्षणाः, सूचीसम्पादनेषु व्यग्राः, ग्रन्थ-तत्कर्तृ-कालपौर्वापर्यादिविचारेषु दक्षाः, ग्रन्थमध्ये प्रक्षेपनिर्णयेषु दत्तदृष्टयश्च। किन्तु संस्कृतवाङ्मये यत्तत्त्वं दरीदृश्यते, यश्च रसः समुल्लसति, तयोरवगाहनेऽनुभवे वा न ते कुतूहलिन इति प्रायो भारतीयानां विदुषां कोऽप्याशयो वरीवर्ति। तादृशी संभावना तु सुतरामतात्त्विकीति परिशीलनशालिनां स्फुटं भविष्यति। यावानभिनिवेशस्तैः वेदे शास्त्रे च प्रदर्शितः, तावान् काव्ये नाटके च। बहुभिः तत्रत्यैः पण्डितैः कविभिश्च कालिदास-शूद्रकादिकृतानां काव्य-नाटकादीनामनुवादा विरचिताः। बहुषु विद्यास्थानेषु च तत्तद्देशभाषासु शाकुन्तलमृच्छकटिकादिकं रङ्गे प्रयुक्तम्। पूर्व-यवन (ग्रेक्क)-साहित्यसमुपलम्भेन ऐरोपीयानां यो मतिविकासः सम्बभूव, तादृशः कोऽपि नवोन्मेषः शाकुन्तलेन उपनिषद्भिः गीतया च तेषां शेमुषीणां समजनि।

स्वीयानां भाषाणां ज्येष्ठां भगिनीमेनां संस्कृतभाषां न केवलं ते वाचा यथासम्भवं व्यवहर्तुं प्रायतन्त, परं यथा भारतीयाः कवयस्तथा तेऽपि स्वयं तस्यां भाषायां पद्यान्यपि निर्मातुं समुद्यममकुर्वन्। एतादृशी तेषां या संस्कृतश्लोक-विरचनव्यसनिता आसीत, अस्ति च संप्रत्यपि, सा प्रायोऽत्रत्यानां न परिचिता। पाश्चात्त्यसंस्कृतरसिकानां संस्कृतकाव्यकरणाभिरुचिरियम् अनुन्मीलितचरी दिगिति कृत्वा संस्कृतप्रतिभास्वदनिरतानां पुर इदमपूर्वं वस्तु प्रस्तोतुमभिलषामः।

एतेषां पाश्चात्त्यसंस्कृतविरचनेषु किञ्चित् मुद्रितं, किञ्चित् अप्रकाशितमपि तत्र तत्र हस्तलिखितेषु तदीयपुस्तकेष्वेव दृश्यमानम्, अन्यच्च किञ्चित् तत्सुहृद्भिः सह पत्रविनिमय-समयेषु तदा तदा लिखितं च। त्रिविधादप्यस्मात् पाश्चात्त्यसंस्कृतश्लोकबन्धात् किमप्युदाहरिष्यामः।

प्राचीनभारतीय विषयविमर्शप्रवृत्तासु पत्रिकासु 'इण्डियन् आण्टिक्वारि'-नाम्नो पत्रिका सुविदिता। तत्र १९०३, १९०४, १९०५ तमवर्षेषु प्रकाशितासु सञ्चिकासु सुभाषितमालिकाः काश्चन प्रकाशिता दृश्यन्ते। एताश्च जर्मनदेशे जेना (Jena) नाम्नी नगरे विश्वविद्यालये यः संस्कृताचार्य आसीत् कापेल्लर'-नामा (Capeller), तेन सन्दृब्धाः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अत्र १९०२-सञ्चिकायां (३००-३०८; ३९९-४०९; ४७१-४७७ पत्रेषु) 'सुभाषित-मालिका' नाम्नी श्लोकमाला अनेन जर्मनीय-संस्कृतपण्डितेन कापेल्लर्-नाम्ना विरचिता प्रकाशिता। अस्यां श्लोकावल्यां गेथे-पिल्लर्-लेस्सिङ्-प्रभृतीनां जर्मन-कवीनां सुन्दराणि लोकानुभवमेदुराणि तत्त्वगर्भाणि सुभाषितानि सरलया शैल्या संस्कृतभाषायाम् अनूद्य दत्तानि। श्लोकेष्वेषु न केवलं संस्कृतसहभूः पद्धा शैली दृश्यते, परन्तु अनुष्टुब्-आर्या-उपजाति-वसन्ततिलका-शिखरिणी-शार्दूलविक्रीडितादिविचित्रं वृत्तं च यत्यक्षरमात्राशुद्धमुपयुक्तमालोक्यते। एवमनेनैव कापेल्लर्-महाशयेन 'यवन-शतकम्' इति ग्रेक्व-कवीनां होमर्-पिण्डार्-ऐश्चेलस्-साफक्लीस्-प्रभृतीनां काव्यनाटकादिभ्यः शतं पद्यानि अनूदितानि १९०४-५ सञ्चिकयोः मुद्रितानि वर्तन्ते। कृतहस्तेन अनुवादकेनेह औपच्छन्दसिक-द्रुतविलम्बित-जलोद्धतगति-मन्दाक्रान्ता-पृथ्वी - स्रग्धरा-प्रमुखानि छन्दांसि च उपयुक्तानि।

प्रसिद्धे 'केम्ब्रिज्'-विश्वविद्यालये संस्कृतहस्तलिखितमातृकाणां परीक्षणार्थं मया मासमेकमुषितम्। तदा तत्रस्थ-ग्रन्थालये रक्षितानां संस्कृत-मातृकाणां मध्ये व्यलोकयमहं किमप्याधुनिकं पुस्तकम् (नोट्-बुक्), यदुपरि च तत्रैव संस्कृताध्यापकपदमलङ्कृतवतः 'कोवल्' (Cowell) नामकस्य पण्डितस्य अभिधा अदृश्यत। विमर्शमार्गे प्रसिद्धोऽयं 'कोवल्' संस्कृतभाषायां, भारतदेशे, संस्कृतविद्याकेन्द्रभूतेषु वाराणस्यादिषु क्षेत्रेषु च कियतीमिव आवेशमयीं प्रीतिमुवाहेति अस्मिन् पुस्तके तद्धस्तेनैव विलिखितेभ्यः श्लोकेभ्यः स्फुटीभवति। कोवल्-पण्डितस्य श्लोकविरचने लाघवं न बभूव, यतः प्रथममनेन गुरु-लघु-गणादि अक्षरशो विन्यस्य तदधः पदबन्धो विलिखितो विलोक्यते। कचित् वृत्तभङ्गोऽपि भाति, व्याकरणदोषोऽपि। तथापि संस्कृतश्लोकग्रथने तस्य य आग्रह आसीत्, स सर्वानिवास्मान् आवर्जयिष्यति। अस्मात् पुस्तकादुद्धृताः केचन कोवल्-श्लोका उदाह्रियन्ते।

'सेण्ट् पीटर्स्बर्ग् संस्कृत-जर्मन्-अभिधान-कोशः' सर्वेषां परिचित एव, तथैव तत्संपादकयोरन्यतरः 'बोथ्लिङ्क्'-पण्डितश्च। अयं च कोशः पाश्चात्यसंस्कृतकार्यकलापस्य मूलाधारभूतः। कोश-संपादनकार्ये पूर्णे बोथ्लिङ्क्-पण्डितस्य जन्मदिवसे एष श्लोकस्तस्मै कोवल्-महाशयेन प्रेषितः—

यशः श्रमेणैव नरैरुपार्ज्यते
श्रमेण कोषोऽपि समाप्तिमाप्तवान्।
श्रमे व्यतीते वदते सरस्वती
ध्रुवं स (or स एष) कोषोऽप्यमरो भविष्यति॥

अत्र अमरशब्दे श्लेषं रसिकाः परिभावयन्तु।

'लेप्सिग्'-विश्वविद्यालयात् 'डॉक्टर्'-विरुदम् अधिगतवतः सुप्रसिद्ध-संस्कृतविदुषो मोक्षमुल्लर्-नामकस्य पञ्चाशदब्दोत्सवाभिनन्दनसमये कोवल्-विदुषा पद्यमेतत् मोक्षमुल्लर्-सकाशं प्रेषितम्—

रयेण तुल्या व्यतियान्ति वत्सरा
जरावशं यौवनमाशु नश्यति।
अलं शुचा किं परिदेवनैर्गुरो
क्व देहराहुः क्व यशःसुधाकरः॥

प्रेमचन्द्रतर्कवागीशानां चरित्रप्रतिपादकं निबन्धं प्रेषितवते तदनुजाय रामाख्यपण्डिताय तदानीं स्वयं वृद्धतां गतेन कोवल्पण्डितेन प्रेषितमिदं पद्यम्—

विद्यालयो निर्जरयौवनः क्व
काव्यं च नित्यामृतकामवर्षि।
क्वाहं च जीर्णो बल-धी-विहीनः
निस्सारतां देहभृतां धिगेव॥

अत्रैव किमप्याङ्गलभाषापद्यमपि दत्तं, तस्य

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Thou hidden love of God whose height,
Whose depth unfathomed no man knows,—
I see from far thy beauteous light,
Only I sigh for thy repose;
My soul is sick. nor can it be.
At rest till it finds rest in thee.

यस्योच्चत्वमगाधतां च न जनो
वेदामितां दूरतो
ज्योतिः सुन्दरमस्य गूढभगव-
त्स्नेहोऽहमीक्षे तव।
शान्त्यै तेऽन्तरहं विनिश्वसिमि हा
खिन्नो ममात्मा त्वयं
शान्तिं लब्धुमलं न यावदयतां
नो शान्तिमेष त्वयि॥

'आक्स्फोर्ड्'-नगरे प्रख्यातं संस्कृतविद्यास्थानं वर्तते। संस्कृताध्यापनार्थं तत्र 'इण्डियन् इन्स्टिटयूट्' (Indian Institute) इति विशालं गृहं वर्तते, यस्य निर्माणार्थमपेक्षितं धनं प्रायः भारतदेशादेव स्वीकृतम्। गृहस्यास्य १८८३ तमे वर्षे वेल्स्-युवराजेन उद्घाटनावसरे स्मरणार्थं द्वारदेशे निहिते शिलापट्टे द्वौ श्लोकौ उट्टङ्कितौ ययोर्द्वितीय एवमाशास्ते—

ईशानुकम्पया नित्यमार्यविद्या महीयताम्।
आर्यावर्ताङ्ग्लभूम्योश्च मिथो मैत्री विवर्धताम्॥
इति।

कतिपयवर्षेभ्यः पूर्वम् आक्सफोर्डविश्वविद्यालयाधिकारिभिः एतस्माद् भारतीयधनसाहाय्येन प्रतिष्ठापिताद् गृहात् संस्कृतशिक्षाविभागो बहिष्कर्तव्यः, स्वीयनिर्वाहकार्यविभागात् स आलयः स्वीकर्तव्य इति अध्यवसाय ऊरीकृतः। बहुभिः प्राच्यविद्यानुरागिभिः प्रतिषेधघोषे कृतेऽपि प्रतिनिविष्टचित्तैः स निर्णयो न त्यक्तः। ततः तत्र संप्रति संस्कृताचार्यपदमलङ्कुर्वता 'बर्रो' (Burrow) नामकेन संस्कृतविदुषा एते श्लोका विरच्य मह्यं प्रेषिताः—

ततः षष्टितमे वर्षे दुर्नयग्रस्तबुद्धिभिः।
विद्यालयमहामात्रैः आर्यधर्मपराङ्मुखैः॥
सरस्वतीं लघूकृत्य पाण्डित्यमवमान्य च।
तयोर्भूम्योस्तिरस्कृत्य मैत्रीमनर्थकामिव॥
कायस्थ-राक्षसानां च परस्वादानगृद्धिनाम्।
गणकानां च हस्तेषु प्रापिता स्वार्थसिद्धये॥
विद्याविहीना शालैषा परैर्नीता पराभवम्।
अयोध्या प्रोषिते रामे नष्टश्रीरिव शोचति॥

हालण्ड-देशे लेय्डन्-नगरे केर्ण् इन्स्टिटयूट्' (Kern Institute) नाम्नि प्राच्यविद्याविमर्शालये 'केल्डर्'-नामकः (Kelder) डाक्टर् पदवीप्राप्त्यर्थमुद्युञ्जानो युवा संस्कृताधीती मया दृष्टः। स मह्यं पश्चाल्लेखमेकं प्रेषयन् तत्र स्वेन पूर्वं निबद्धं शृङ्गारश्लोकमेकं मन्दाक्रान्तावृत्तबद्धं प्राहिणोत्। स चैषः श्लोकः—

पुष्पापूर्णे तरुणतरले गीयते कोकिलेन
पुण्याशोके तरु-नत-तले शोकहर्षाकुलेन।
कारुण्येन प्रतिरववतोरावयोः शृण्वतोर्यत्
कामेनार्तौ (स्) मरणमनसौ वाशितापुङ्गवौ स्वः॥

रूसदेशे 'लेनिन्ग्राड्'-नगरे संस्कृतविद्वान् कलियानोव् (Kalyanow) नामास्ति, य आत्मानं कल्याणमित्रमभिदधाति। स वर्षद्वयात् प्राक् भारतमागतः, तत्तन्नगरं द्रष्टव्यमन्यच्च दृष्ट्वा स्वदेशं प्रति प्रस्थितः भारतीयमित्रेभ्यः संस्कृतश्लोकाञ्जलिं समर्पयामास। तत्र यद्यपि भावः, शब्दशुद्धिश्च प्रायः समीचीनं प्रकाशेते, तथापि बह्वीषु पङ्क्तिषु छन्दसि प्रमादोऽस्ति। साध्वीः काश्चित् पङ्क्तीरत्र मनाक्संशोध्य उदाहरिष्यामः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मानस-भारती--देवगिरा गुम्फितं मानसम्

—श्री जनार्दन गङ्गाधर रटाटे, एम० ए०, साहित्याचार्यः—

अचिन्तयत् स नास्त्येव कोऽपि देवाहिपक्षिषु ।
यो दासमपि मे गच्छेत् तुल्यौ मे खरदूषणौ ॥
भगवन्तं विना कस्तौ हन्तुं शक्नोति भूतले ।
सुराणां रञ्जनो देवो यदि भूभारभञ्जनः ॥
अवतीर्णस्तर्हि तेन कुर्यां वैरं हठादपि ।
हतश्च तस्य बाणेन तरिष्यामि भवार्णवम् ॥
तामसेन शरीरेण भजनं न भविष्यति ।
अतो मनोवाक्करणैर्ममायं दृढनिश्चयः ॥
एतौ नरौ भूपपुत्रौ तज् जित्वा स्त्रीं हराम्यहम् ।
एकाकी यानमारुह्य तं देशं रावणो गतः ॥
समुद्रस्य तटे यत्र मारीचो राक्षसोऽवसत् ।
इतश्चक्रे प्रभुर्युक्तिं तां कथां शृणु पार्वति ॥
यदानुजो मूलफलादि - कन्द-
ञ्चानेतुमासीद् गतवानरण्यम् ।
कृपानिधानः सुखपुञ्जभूतो
रामस्तदोचे मिथिलेशपुत्रीम् ॥ २३ ॥
शृणु प्रिये सुव्रतिनि नृलीलां काञ्चिदीप्सिताम् ।
सुशीले वस वह्नौ त्वं हनिष्ये यावदस्रपान् ॥
रामेणोक्तेति तत्पादौ ध्यायन्ती साग्निमाविशत् ।
समशीलां रूपनम्रां न्यधाच्च स्वां प्रतिच्छविम् ॥
सौमित्रिरपि नाज्ञासील्लीलामर्म प्रभोः कृतम् ।
इतो गत्वा शठः स्वार्थी मारीचं रावणोऽनमत् ॥
मार्जाराङ्कुशसर्पाणां धनुषश्चानतिर्यथा ।
शिवे ! तथानतिर्लोके नीचस्यातीव दुःखदा ॥
प्रियाऽपि भयदाऽकालपुष्पाणीव खलस्य वाक् ।
ततः समभ्यर्च्य समादरेण
पप्रच्छ मारीच इदं स्वकीयम् ।
व्यग्रं कुतस्तात तवास्ति चित्त-
मेकश्च कस्मात् समुपागतो माम् ॥ २४ ॥
दुर्भणो रावणो मानी तं चख्यौ सकलां कथाम् ।
भवितुं च च्छलमृगं प्राह हर्तुं नृपस्त्रियम् ॥
ततस्तमाह मारीचः शृणु रावण ! मद्वचः ।
नरा चराचरेशास्ते मा कार्षीस्तैर्विरोधिताम् ॥
तैर्हतं हन्यते जातं जायते निखिलं जगत् ।
कौशिकस्य मखं पातुमेतौ यातौ कुमारकौ ॥
मयि तत्र शरं रामो निःशल्यं प्राक्षिपत् परम् ।
क्षणेनैव समायातो योजनानां शतं त्वहम् ॥
ताभ्यां साकं कृते वैरे न कदापि हितं भवेत् ।
कीटभृङ्गा इव द्वौ तौ पश्यमीतस्ततः सदा ॥
तात ! यद्यपि तौ मर्त्यौ तथाप्यतिपराक्रमौ ।
ताभ्यां सह विरोधे तु पूर्णता स्यान्न ते क्वचित् ॥
यस्ताटकां तत्सदृशं सुबाहु-
ञ्चाहन् धनुः शाम्भवमाबभञ्ज ।
खरत्रिशीर्षास्त्रिदूषणानां
हन्ताऽतिवीरो मनुजः कथं स्यात् ॥ २५ ॥

(क्रमशः)

सर्वत्र भारते खण्डे कृतज्ञात्मा स्मराम्यहम् ।
बहून् देशान् दृष्टवन्तः चारुप्रकृतिविस्मिताः ।
दृष्टपूर्वा न चास्माभिः कदाचन तथाविधाः ॥
कलकत्तानगरीं गत्वा विमानेन विहायसा ।
दृष्ट्वा तांस्तांश्च विषयान् पाटलीपुत्रमागताः ॥

× ×

इतो गता वयं शीघ्रं बङ्गलोरपुरं प्रति ।
यत्र प्रियः शीतवातो नित्यं वहति दक्षिणः ॥
ततो मद्रासनगरं यत्र स्नाता महार्णवे ।
महान्तीं सुलोचनां श्रीवद्दायतलोचनाम् ।
सस्नेहमभिनन्दामि तेजसाऽऽप्याश्च मोहितः ॥

× ×

बहुराष्ट्राण्यतिक्रम्य विमानेन विहायसा ।
पुराणीं सुन्दरीं भूमिं भवतां वयमागताः ॥
युष्मान् वयं सूचयामः स्निग्धानस्मत्सुहृज्जनान् ॥
अस्मद्भूम्योः पूर्वकालादासीन्मैत्र्यं सनातनम् ।
एतद्विवर्धनार्थं च वयं सर्वे यतामहे ॥
अविभेद्यमिदं मैत्र्यं प्रजानामावयोर्महत् ।
सर्वत्र जनताभूत्यै जीवतात् शाश्वतीः समाः ॥

—'अमृतलता'तः साभारम्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

व्यञ्जना अर्थव्यापार एव, न शब्दस्य

—श्री कान्तानाथ शास्त्री तैलङ्गः—

[प्रवाचकः—कला-संकायस्य, हि० वि० वि०, वाराणसी]

(२)

श्रीमताम् अभिनवगुप्ताचार्याणाम् अनन्तरं श्रीमम्मटाचार्या अलङ्कारशास्त्रस्य सुख्याता आचार्या अभवन्। तत्परवर्तिनामाचार्याणां मतानां विवेचनात्पाक् पुनरपि एकवारम् अत्रान्तरे कुसुमसमययुगम् इत्यादिवाक्यस्य विचार आवश्यको यद्धि प्रथमाङ्के समुल्लिखितमासीत्। यतो हि वाक्यस्य तस्य अपरोऽप्यर्थः सम्भवति। तथा हि—

"अत्रान्तरे कुसुमसमययुगमुपसंहरन्नजृम्भत ग्रीष्माभिधानः फुल्लमल्लिकाधवलाट्टहासो महाकालः" इति।

प्रासङ्गिकोऽर्थोऽयम्—अत्रान्तरे वसन्तर्तोः मासद्वयमुपसंहरन् आपणहृद्यकारिण्याः फुल्लमल्लिकाया विकासकारी ग्रीष्माख्यो महासमयः प्रारभत इति।

अप्रासङ्गिकश्चार्थोऽयम्—फुल्लमल्लिका-सदृशधवलाट्टहासशालो महाकाल इति।

प्रासङ्गिकाऽप्रासङ्गिकयोः अर्थयो रूपणम्—महाकाल (देवविशेष)-सदृशो महाकालः (महासमयः)।

अनेनापि अर्थेन सिद्धान्ते किमप्यन्तरं नायाति। अत्र 'महाकालादि'-शब्दाः ऋतुपक्षीयमर्थम् अभिधाशक्त्या समुपस्थापयन्ति, न देवताविशेषपक्षमित्यस्य स्वीकारे न किमपि प्रबलं विनिगमकं दृश्यते। प्रत्युत उभावपि अभिधयैव समुपतिष्ठन्ते इत्यत्र उभयोः सङ्केतितत्वमेव तर्कसम्मतं विनिगमकम्। अभिधया उभयोरर्थयोः समुपस्थितौ प्रकरणादिकमिदं निश्चिनोति यदेतयोः कोऽर्थः प्राकरणिकः को वाऽप्राकरणिक इति। उपर्युक्तोदाहरणे 'ग्रीष्माभिधानः' इति पदस्य सान्निध्यं बोधयति यदत्र ऋतुपक्षीयोऽर्थ एव प्राकरणिकः, देवतापक्षीयश्च अप्राकरणिक इति। सङ्केतितार्थः सदैव वाच्यो भवति, न व्यङ्ग्य इति हि वस्तुस्थितेः।

अन्यदप्यत्र विचारणीयम्। योगरूढशब्दस्थले 'रूढिर्योगापहारिणी'ति नियमेन नियमतः पूर्वं रूढ्यर्थ एव समुपतिष्ठते, ततः परमेव यौगिकोऽर्थः। यथा 'पङ्कज'शब्देन प्रथमतः 'कमल'मेव ज्ञायते, ततः परमेव 'पङ्कजनिकर्तृ' इति। तदनुसारम् 'अत्रान्तरे' इत्याद्युदाहरणे 'महाकालादि'शब्दैः प्रथमतो देवताविशेषपक्षीयः अर्थ एव समुपतिष्ठेत, यतः स रूढ्यर्थः। ततः परमेव ऋतुपक्षीयोऽर्थः परिस्फुरेत्, तस्य यौगिकार्थत्वात्। एवञ्च प्रथमार्थे अभिधया नियन्त्रिते द्वितीयार्थस्य व्यञ्जनया उपस्थितेः स्वीकारेऽत्र अप्राकरणिकार्थ एव अभिधागम्यः प्राकरणिकश्च व्यञ्जनागम्यो भवेत्। तेन च सर्वव्यवस्थैव भग्ना स्यात्। यद्यस्मन्मतानुसारम् उभावप्यर्थौ अभिधेयौ स्याताम्, न तदा काऽप्यव्यवस्था भवेत्। अभिधया उभयार्थोपस्थितौ प्रकरणादिभिः निश्चीयते यत्कोऽत्र मुख्योऽर्थो विवक्षितः, कश्च गौणः। मुख्यार्थमादायैव पूर्वं प्राकरणिक-वाक्यार्थोपस्थितिः। ततः परमेव गौणार्थमादाय अप्राकरणिक-वाक्यार्थोपस्थितिः। तदनन्तरम् उभयोः उपमानोपमेयभावोऽपि व्यज्येत। उभावप्यर्थौ वाच्यावेव, अलङ्कारांशः पुनः व्यङ्ग्यो भवेत्।

एतदुदाहरणविषये अभिनवगुप्ताचार्याणामिदं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मतं यदत्र 'अवयवप्रसिद्धेः समुदायप्रसिद्धिर्बलवती'-ति नियमं बाधित्वा 'महाकाला'दिशब्दाः केवलम् ऋतुपक्षीयमेवार्थं समुपस्थाप्य निराकाङ्क्षा भवन्ति। यतो हि तेषामभिधाशक्तिः ऋतुवर्णनप्रस्तावेन नियन्त्र्यते। ततः परं जायमाना देवतार्थोपस्थितिः व्यञ्जनाव्यापारेणैव जायते।[1]

अभिनवगुप्ताचार्याणां मतमिदं नानुभवेन संयुनक्ति। अनुभवस्तु अयमेव यद् योगरूढस्थले रूढिलभ्योऽर्थ एव प्रथममुपतिष्ठते। यदा च सः प्रकरणेन न संवदति, तदैव यौगिकार्थोपस्थितिर्जायते। अन्यथा रूढेर्माहात्म्यमेव विलीयेत।

इदमत्र विचारणीयम्—योगरूढशब्देषु योगशक्ते रूढशक्तेश्च सङ्करो जायते। प्रकरणादिभिः एकस्याः शक्तेर्नियन्त्रणे स्वीकृतेऽपि अपरा शक्तिः अनियन्त्रिता तिष्ठत्येव। सैव अपरमर्थं समुपस्थापयिष्यति, स च वाच्यार्थोऽपि अभिधीयेत। एतादृशे स्थले व्यञ्जनाया अवकाश एव न दृश्यते। प्राकरणिका-प्राकरणिकार्थयोः रूपणे व्यञ्जना पुनः सम्भवी। न तत्रास्माकं काऽपि विप्रतिपत्तिः। तद्विषये एतावदेव वक्तव्यं यदयमलङ्कारांशः अर्थैरेव समुपतिष्ठते, अतस्तत्किल आर्थीव्यञ्जनायाः क्षेत्रमिति।

श्रीमम्मटाचार्या अपि शब्दशक्तिमूलक-ध्वनि-विषये अभिनवगुप्ताचार्यानेव अनुसरन्ति। यच्च अभिनवगुप्ताचार्यैः सङ्केतितम्, मम्मटाचार्यैस्तद् विवृतम्। तैरुच्यते यद् वस्तुध्वनिर्नाम अलङ्कार-रहितः[2] केवलो वस्तुध्वनिः। अत्र तैरस्य सिद्धान्तस्य समर्थने नूत्ना युक्तयो नोपस्थापिताः। अतो वयमपि किमप्यत्र वक्तुं न वाञ्छामः। अभिनवगुप्ताचार्य-मतविषये पूर्वप्रदर्शितयुक्तिभिरेव इदमपि मतं निराकृतं भवति। उदाहरणानि पुनरग्रे समीक्षेरन्।

मम्मटाचार्याणां पश्चात् विषयेऽत्र पण्डितराज-जगन्नाथैः नूत्ना विचाराः प्रकटिताः। तेषां मतमिदं यद् अनेकार्थकस्थले उभावप्यर्थौ अभिधयैव उपस्थाप्येते। अप्राकरणिकार्थस्य कृते व्यञ्जनाश्रयणं निरर्थकम्। किन्तु विषयोऽयं केवलं रूढिशक्तेः योगशक्तेश्च क्षेत्रं व्याप्नोति। योगरूढशक्तिस्थले योगरूढशब्देषु चोभयोः शक्त्योः सङ्करो जायते। तत्र रूढिशक्तिः योगशक्तिं बाधित्वा स्वयमेव प्राकरणिकार्थं समुपस्थापयति, बाधितत्वाद् योगशक्तिस्तत्र नोल्लसति। अतोऽवयवलभ्योऽर्थो व्यञ्जना-व्यापारेणैव समुपतिष्ठते।

पण्डितराजैः विषयेऽत्र विचारयद्भी रसगङ्गाधरे अनेकार्थकस्थले अप्राकरणिकार्थं व्यङ्ग्यं स्वीकुर्वतां मतद्वयं समुद्धृत्य सुपुष्टयुक्तिभिः तत् खण्डितञ्च। मतद्वयस्य खण्डनाय तैः या युक्तयः प्रदर्शितास्ता अत्र विविच्यन्ते।

प्रथममतम्[1]—प्रकरणादिज्ञानं तदधीनतात्पर्य-निर्णयो वा द्वितीयपदार्थोपस्थितौ प्रतिबन्धकः। अन्यथा अनेकार्थकशब्दघटितैर्वाक्यैः शाब्दबोधा-नेकतापत्तेः। न चेदं सम्भवति, प्रतिवाक्येन एकस्यैव शाब्दबोधस्य दर्शनात्। अत एवोक्तम्—'शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः' इति। 'अनवच्छेदे' इत्यस्य तात्पर्यविषये सन्देहे सतीत्यर्थः। 'विशेषस्मृति'र्नाम एकमात्रस्य अर्थस्य स्मृतिः। तेन 'सुरभिमांसं भक्षयति' इत्यनेन वाक्येन केवल सुगन्धिमांसपक्षीय एवार्थ उपतिष्ठते। गोपक्षीयो-र्थश्च अभिधया नोपतिष्ठते। तथापि तदर्थोप-

१. ध्वन्यालोकः, काव्यमाला-संस्करणम् पृ० ९९।

२. 'अनलङ्कारं वस्तुमात्रम्।'—काव्यप्रकाशः, वामनाचार्यकृत व्याख्योपेतः, पृ० १२८ (चतुर्थं संस्करणम्)।

१. रसगङ्गाधरः, काव्यमाला संस्करणम्, पृ० ११६।

२. तत्रैव, पृ० ११०-१११।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्थितिर्जायत एव। अतस्तदर्थं व्यञ्जना आवश्यकी। प्राकरणिकार्थोपस्थित्यनन्तरमपि प्रकरणादि-ज्ञानस्य तात्पर्यनिर्णयस्य च प्रतिबन्धकद्वयस्य समुपस्थितत्वात् अप्राकरणिकार्थम् अभिधा नोप-स्थापयितुं प्रभवति। एतादृशेषु स्थलेषु प्रतिबन्धक-द्वयमेतत शब्दैरभिधेयेतरार्थोपस्थितौ न बाधकम्। अन्यथा व्यङ्ग्यार्थस्यापि उपस्थित्यसम्भवात्। तौ हि केवलमभिधाव्यापारेणैव अन्यार्थोपस्थितिं प्रतिबध्नतः। अत एव व्यञ्जनया द्वितीयार्थोप-स्थितिः। अत एव च मम्मटाचार्या आहुः—

अनेकार्थस्य शब्दस्य वाचकत्वे नियन्त्रिते।
संयोगाद्यैरवाच्यार्थधीकृद् व्यापृतिरञ्जनम्॥[1]
इति।

अत्र 'यन्त्रण'-पदार्थो नाम अन्यार्थोपस्थापन-प्रतिबन्धः।

पण्डितराजकृतं प्रथममत-खण्डनम्[2]—वाक्यार्थ-ज्ञाने एकार्थमात्रविषयायाः पदार्थोपस्थितेः कारणत्वस्वीकारो व्यर्थः। पदैरनेकार्थोपस्थितावपि प्रकरणादिज्ञानजन्य-तात्पर्यज्ञानसहकारेण प्राकरणि-कार्थविषयकशाब्दबोधस्य पूर्वं सम्भवात्। अतस्तदर्थं प्रकरणादिज्ञानजन्य-तात्पर्यज्ञानस्य प्रतिबन्धकत्व-कल्पने प्रमाणाभावात्। अपरार्थोपस्थापक-पदज्ञान-रूपसामग्रीसमवधाने अपरार्थोपस्थितेः समुचित-त्वात्। तत्र तादृशप्रतिबन्धकस्य वक्तुमशक्य-त्वात्। आत्मनि शब्दार्थसम्बन्धसंस्कारस्य तदु-द्बोधकपदज्ञानस्य च समवधाने अर्थस्मृतेर्ब्रह्मणापि रोद्धुमशक्यत्वात्।

नेदं समुचितं यत् 'संस्कार-तदुद्बोधकसामग्री-समवधाने स्मृतेरनिवार्यत्वम्' इति नियमो-ऽन्यत्रास्तु, शब्दार्थविषये पुनस्तदपवाद एवेति। शब्दजन्यस्मृतिविषये अनुभवविरुद्धाया एतादृश्याः कल्पनाया निष्फलत्वात्। अनुभवस्तु एवमेवाह यदुभयोः अर्थयोरुपस्थितिः अभिधयैव जायत इति।

सोऽयमनुभवस्तित्थम्—दुग्धप्रकरणे केनचनो-क्तम् 'पयो रमणीयम्' इति। अत्र प्रकरणज्ञस्य दुग्धरमणीयताप्रतीतिः, प्रकरणानभिज्ञस्य च जल-रमणीयतोपस्थितिः। सत्येव प्रकरणज्ञोऽपरं बोध-यति यदत्र वक्तुः पयःशब्दस्य दुग्धे तात्पर्यम्, न जले। किन्तु कथमिदं स बोधयेत् यदि नाम भव-न्मतानुसारं तत्र केवलस्यैकस्यैव अर्थस्य उपस्थितिः स्यात्? तदा स जलरूपार्थं निषेद्धुमपि न शक्नु-यात्। तत्कृतेन जलनिषेधेन प्रतीयते यदुभावप्यर्थौ तत्प्रतीतिपथमवतरतः। अतः प्रकरणज्ञानस्य प्रथ-मत एव द्वितीयार्थोपस्थापनप्रतिबन्धकत्वमिति तु रिक्तं वचः।[3]

---

१. काव्यप्रकाशः, द्वितीयोल्लासः।

२. रसगङ्गाधरः, काव्यमाला सं० १९३०, पृ० ११२-१३।

३. अनुभवविश्लेषणमुखेन पण्डितराजस्य उत्तर-मिदम् अपूर्णमिव भाति। अत्र वादी वक्तुं शक्नोति यत् पयःशब्देन तत्र अभिधया दुग्धस्य व्यञ्जनया च जलस्य उपस्थितिः सम्भवति। अत एव स जलं निषेधति। पण्डितराजेनास्य किमपि उत्तरं न दत्तम्। किन्तु द्वितीय-मतखण्डनावसरे यत्किमप्युक्तम्, तत्रास्योत्तरं मिलति। तच्च यथा—द्वितीयार्थोपस्थित्यर्थं व्यञ्जनोल्लासः अनेका-र्थैकशब्दस्थले सर्वत्र जायते यत्र कुत्रचन वा? यदि सर्वत्र, तदा स वाच्यार्थ एव उच्येत, नियमतः सर्वत्रोपस्थितेः सङ्केतितत्वाच्च। अथ न सर्वत्र व्यञ्जनोल्लासः, केवल-मेतादृशे एव स्थले यत्र कश्चित् चमत्कारी अर्थः समु-पस्थितो भवेत्, तदा तादृशस्थलविशेषे नूनतमव्यञ्जना-व्यापारकल्पनापेक्षया नियन्त्रिताया अभिधाया एव उल्लासस्वीकारः प्रशस्ततमः स्यादिति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

द्वितीयं मतम्[1]—यत्रानेकार्थक-शब्दप्रयोगस्तत्र तात्पर्यज्ञानस्य शाब्दबोधकारणत्वस्वीकार आवश्यकः। परं तदर्थं पूर्वत एव 'अनेकार्थक-शब्दानामेकार्थमात्रोपस्थापकत्वम्' इति कल्पनमनावश्यकम्। अनेकार्थकशब्दैः अभिधया प्राकरणिकाऽप्राकरणिकार्थोपस्थितौ प्रकरणादिज्ञानजन्य-तात्पर्यनिर्णयबलात् पूर्वं मुख्यपक्षीयार्थस्यैव शाब्दबोधस्वीकारसम्भवात्। सत्येवम् एकार्थमात्रविषयिण्या स्मृतेर्नापेक्षा। अन्यार्थोपस्थितौ प्रकरणादेः प्रतिबन्धकत्वकल्पनत्वस्याप्यनावश्यकत्वात्। इत्थं नानार्थकस्थले प्रकरणादिज्ञान - तात्पर्यनिर्णयबलेन प्राकरणिकार्थस्य शाब्दबोधे अप्राकरणिकार्थस्य बोधाय व्यञ्जनाव्यापारस्वीकार आवश्यक एव।

न चात्र प्राकरणिकार्थ-शाब्दबोधोत्तरम् अभिधयैव अप्राकरणिकार्थस्य बोध इति वक्तुं शक्यम्; अभिधाजन्यबोधे तात्पर्यज्ञानस्य कारणत्वात्, तस्य च प्रकरणादिद्वारा केवलप्राकरणिकार्थे एव सौलभ्यात्। अतात्पर्यविषयद्वितीयार्थस्य शाब्दबोधाय व्यञ्जनारूप - व्यापारान्तरस्य आवश्यकत्वात्। व्यञ्जनाजन्यशाब्दबुद्धौ तात्पर्यज्ञानस्यानपेक्षितत्वात्।

स्यादेतत्—यद्यनेकार्थकस्थले प्राकरणिकार्थबोधाय एकार्थमात्रोपस्थितेः कारणत्वास्वीकारे प्राच्यं 'विशेषस्मृतिहेतवः' इति वचनं कथं सङ्गच्छेत ? तथैव प्रकरणादिज्ञानस्य द्वितीयार्थोपस्थितौ प्रतिबन्धकत्वास्वीकारे 'प्रकरणादिज्ञानमनेकार्थकशब्दानां वाचकत्वमेकस्मिन्नेवार्थे नियन्त्रयती'ति वथनमपि कथमुपपद्येत ? द्वितीयमतानुसारं 'विशेषस्मृतिहेतवः'इत्यत्र 'स्मृति'शब्दस्य 'निश्चय'-परत्वकल्पनेनादोषात्। 'विशेषस्मृति'र्नाम विशेषविषयकः तात्पर्यनिश्चयः। 'संयोगाद्यैर्वाचकत्वे नियन्त्रिते' इत्यस्य च एकार्थमात्रविषयक-तात्पर्यनिर्णयद्वारा मुख्यपक्षीयार्थस्य शाब्दबोधानुकूलस्थितिसम्पादनार्थत्वात्। अवाच्यार्थस्य च स्पष्टतः अतात्पर्यार्थत्वात्। एवञ्च न प्राचीनोक्तीनामसङ्गतिरिति।

उपर्युक्त - द्वितीयमत - मीमांसाविषये अपरोऽप्येकः प्रश्नः परिस्फुरति। स प्रश्नो द्वितीयमतानुयायिभिः कृतं तदुत्तरञ्च पण्डितराजैः रसगङ्गाधरे समुल्लिखितम। ततः परमेव तैर्द्वितीयमतस्य खण्डनमारब्धम्। अत्रापि तदुल्लेखो विषयोपष्टम्भनाय समुचित इति कृत्वा विविच्यते।

द्वितीयमते इदं शङ्क्यते यत् प्राकरणिकार्थस्य शाब्दाबोधोत्तरं तेषामर्थानां का स्थितिः ये किल अप्राकरणिकाः, अभिधया च प्राकरणिकार्थेन सहैव समुपस्थापिताः ? प्राकरणिकार्थबोधोत्तरं तेऽस्माकं स्मृतिपटले विराजन्ते विलीयन्ते वा ? वर्तमानत्वे व्यञ्जनाया इदमेव कृत्यं यत्तेषामन्वयं विधाय अप्राकरणिकार्थबोधः कारयेत्। किन्तु नेदं सङ्गतम्; पदार्थनामन्वयकरणं न व्यञ्जनायाः कार्यम्। सा हि केवलं द्वितीयादिपक्षीयान् अर्थानुपस्थाप्यैव कार्तार्थ्यं भजते। अर्थानन्वीय शाब्दबोधजननं हि तात्पर्यवृत्तेः आकाङ्क्षा-योग्यताऽऽसक्त्यादि-सहकारिकारणानां वा कार्यम्। अत इदमेव मन्तव्यं यत् प्राकरणिकार्थबोधोत्तरम् अप्राकरणिकार्थाः स्मृतिपटलतो विलीयन्ते। पश्चात् व्यञ्जना समागत्य पुनस्तानुपस्थापयति। ततोऽन्वीय अप्राकरणिकार्थानां शाब्दबोधः। सत्येवम् अयमेवात्र प्रश्नो यत् पश्चादागतो व्यञ्जनाव्यापारः केनोपोद्बलकेन द्वितीयाद्यर्थं समुपस्थापयेत् ? प्राकरणिकार्थस्य शाब्दबुद्धिं सम्पाद्य पदज्ञानं तु समाप्यते कृतकार्यत्वं तत्। तथा सति पदज्ञानमन्तरा

१. रसगङ्गाधरः, काव्यमाला सं०, १९३० ई०, पृ० १११-१२।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सूर्योदयः

भारतीय-संस्कृतेः प्रातिनिधिकं संस्कृतं मासिक-पत्रम्

सम्पादकः	वार्षिकमूल्यम्	प्रकाशकः
श्री गोविन्द नरहरि वैजापुरकरः	रूप्यकपञ्चकम्	श्री भारतधर्म-महामण्डलम्
एम० ए०, न्याय-वेदान्त-साहित्याचार्यः		जगत्गंज, वाराणसी

चतुश्चत्वारिंशद्वर्षीया लेख-सूची : १९६८

[अत्र प्रथमं ससङ्केतं लेखकनाम, तदनु लेखनाम, पृष्ठसंख्या चेति क्रमोऽवसेयः । —सम्पादकः]

सम्पादकीयम् (अग्रलेखः)—चतुश्चत्वारिंशत्तमे वर्षे अस्माकमावश्यकता ३, दलपरिवर्तनं दलातीतता वा किं श्रेयः ? २७, नारीत्वनिवर्तन-सङ्कटं कथं परिहरणीयम् ? ५२, मातृहस्तेन भोजनम्, मातृमुखेन शिक्षणञ्च ७५, संस्कृत-परीक्षाः, अस्माकं कर्तव्यञ्च ९९, गोवध-निरोधप्रश्नः, अस्माकं कर्तव्यञ्च १२३, साम्प्रदायिकतानिरोधो भारतीय-संस्कृतिश्च १४७, यौनशिक्षा-प्रस्तावो भारतीय-संस्कृतेः कृते श्वित्रम् १८७, प्राच्यविद्या-सम्मेलनस्य स्वागतं निवेदनञ्च २११, ऐषमः प्राच्यविद्या-सम्मेलनस्य फलश्रुतिः २३५, संस्कृत-शिक्षाया ह्रासः किमर्थम् ? २५९, यदा जलनिधिरपि दादग्धुं प्रावर्तत···! २८३ ।

सम्पादकीया टिप्पणी—पन्त-शती-समारोहः ५, स्वर्गीयाः श्री अणे, (दीनदयाल) उपाध्यायश्च ४३, स्वर्गीयाः श्री (विनायक बोबा) भागवत महाभागाः ५४, वेदमूर्तिभ्यः (सातवलेकर महोदयेभ्यः) श्रद्धाञ्जलिः १८९, स्वर्गीयाः श्री बालशास्त्रि हरदासाः १९०, चिरं जीवन्तु श्री हरिराम-शुक्लाः १९०, प्रादेशिक-शासनेन निष्पक्षता प्रदर्शनीया २१३ ।

श्री 'अङ्गारः' ३०/४० घासीटोला, वाराणसी—दशमो दीक्षान्त-समारोहो दीक्षान्त-भाषणञ्च ६, सर्वं प्रियं चारुतरं वसन्ते (अनूदितम्) ४५, धन्यो राजा, धन्यं च राज्यम् ६५, वृत्तिः ८९, मिथ्या गर्वो न कर्तव्यः ११५ ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्री अनन्तशास्त्री पिंगळे, सीनियरशास्त्री, डेक्कन कालेज, पूना—विवाहवयोमर्यादा-प्रकल्पस्य शास्त्रीयतरत्वं समाजहितकारकत्वं च ९१।

श्री अमृतवाग्भवाचार्यः, गङ्गामन्दिरम्, भरतपुर (राजस्थान)—श्रीसूक्ति-लहरी १५१, १९७।

श्री आदित्यनाथ झा, उपराज्यपालः दिल्ली-प्रदेशस्य, दिल्ली—प्राच्यविद्याशाखानां सुरुचिरं पथ-प्रदर्शनम् २४५।

श्री आनन्दतीर्थ वरखेडकरः, हैदराबाद—मम मानस-वासिनी ९०।

श्री उमाशङ्करशर्मा त्रिपाठी, आंग्लभाषा-प्राध्यापकः, काशी विद्यापीठम्, वाराणसी—क्षत्रपति-महाकाव्यम् १२, ४७, ६४, १११, १३३, २०६, २२९, २६८; चक्रि-चूडामणिः ८४।

श्री ओङ्कारप्रसाद त्रिपाठी, प्राचार्यः मन्नूलाल संस्कृत महाविद्यालयः, अतर्रा, बाँदा—मानवस्य ईश्वराधीनत्वम् १५०।

श्री कपिलदेव त्रिपाठी, पुराणाध्यापकः वाराणसेय-संस्कृत-विश्वविद्यालयः, वाराणसी—कालिदासः २०।

श्री (पूज्य) करपात्रस्वामी, ब्रह्मकुटीरः, नारदघाट, वाराणसी—(भक्तिरसार्णवे) रस-स्वरूप-विमर्शः, भक्तिरसश्च १०, ३१, ५५, ७९, १०३, १२९, १५३, १९५, २१४, २६३, २८८।

श्री कान्तानाथशास्त्री तैलङ्गः, प्रवाचकः, कला-संकायः, हिन्दूविश्वविद्यालयः, वाराणसी—व्यञ्जना अर्थव्यापारः, एव न शब्दस्य २१७, २९५।

श्री (स्व०) गङ्गाधर रामकृष्ण वरकले, वाराणसी—श्रीगणपति-लीलावतार-मञ्जरी १९१।

श्री गोपालदत्तपाण्डेयः, संस्कृत-विभागाध्यक्षः, राजकीय स्नातकोत्तर महाविद्यालयः, नैनीताल—यशःशरीरा नित्यानन्द-पन्तपदाः

श्री गोविन्द नरहरि वैजापुरकरः, एम० ए०, न्याय-वेदान्त-साहित्याचार्यः, श्रीगङ्गाधरशास्त्रि-भवनम्, के० ३०।४०, घासीटोला, वाराणसी—किमपि वैदिकं वचो नानर्थकम् २५१।

श्री छविलाल पोखरेलः, नेपाल—देशनिर्माणे युगं नेता वा बाधकः ? २८०।

श्री जयनारायण पाण्डेयः, साहित्यविभागः वा० सं० विश्वविद्यालयः, वाराणसी—राष्ट्रकविः कालिदासः २७१।

श्री जगन्नाथ श्रीधरशास्त्री पदे, अध्यक्षः स्नातकोत्तरशिक्षाविभागस्य, गायकवाड संस्कृत-विश्वविद्यालयः, लहरीपुरा, मङ्गलपेठ, बडौदा—धर्मे सर्वं प्रतिष्ठितम् ३३, ५७, (अद्वितीयस्य ब्रह्मणो लक्षणाभावः) १६१, १९९, (वैदिका-ऽवैदिक-दर्शन-मीमांसा) २६५, २८९।

श्री जनार्दन गङ्गाधर रटाटे, एम० ए०, साहित्याचार्यः, दुर्गाघाट, वाराणसी—मानस-भारती—देवगिरा गुम्फितं मानसम् १६, ४४, ७० ९३, ११६, १५४, २०५, २३१, २४०, २६४, २९४।

श्री टी० ए० भाण्डारकरः, एम०, ए० साहित्याचार्यः, कमच्छा, वाराणसी—विद्वत्सभावर्णनम् (सितम्बरमासीये तृतीयावरणपृष्ठे)।

श्री त्र्यम्बकः कविवरः—पिक-विलापः ११०।

श्री दुर्गादत्त उपाध्यायः, साहित्याचार्यः, विन्ध्याचल, मिर्जापुर—श्रेयस्कृते श्रीगुरुतेजसे नमः १२७।

श्री न० चि० वे० नरसिंहाचार्यः, तिरुपति, (आन्ध्र)—गुरु-निर्वेदः, छात्र-वेदना २१६।

श्री ना० वा० मराठे, ग्रन्थपालः, इण्डियन इंस्टीट्यूट आफ एडवान्स स्टडीज, शिमला—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्री (स्व०) नारायणभट्ट पर्वणीकरः राजगुरुः, जयपुर—गङ्गां हृदब्जे स्मरेत् (मईमासस्य मुखपृष्ठे)।

श्री (स्वर्गीय महामहोपाध्याय) नारायणशास्त्री खिस्ते, वाराणसी—अयि पुष्पसखे ! (फरवरीमासस्य मुखपृष्ठे), फाल्गुन-मङ्गलम् ४९, मङ्गलं मासावतरणिका च १२१।

श्री पट्टाभिराम शास्त्री, साहित्यविभागाध्यक्षः, वाराणसेय-संस्कृत-विश्वविद्यालयः, वाराणसी—नैनीतालः—अभिनवं खण्डकाव्यम् १३८।

श्री प्रशस्यमित्र शास्त्री, आचार्यनगर, कानपुर—प्रवल्लिका-प्रमोदः १३७।

श्री बटुकनाथ शास्त्री खिस्ते, एम० ए० साहित्याचार्यः, प्राध्यापकः वा० सं० विश्वविद्यालयस्य, विनयका, कोल्हुआ, वाराणसी—नामाऽपि न ज्ञायते १४४, अम्बिका-षट्पदीस्तवः २०६।

श्री बालचन्द्र दीक्षितः, प्रधानाचार्यः, बाजोरिया-संस्कृत-महाविद्यालयस्य, अस्सी, वाराणसी—जनसंख्यावृद्धेः निदानं वास्तवोपायश्च १८।

श्री ब्रह्मानन्द त्रिपाठी, एम० ए०, साहित्याचार्यः, प्राध्यापकः दयानन्द कालेज, वाराणसी—हास्यरसावताराय श्रीकृष्णदेवप्रसादाय श्रद्धाञ्जलयः (मार्चमासस्य तृतीयावरणपृष्ठे)।

श्री (स्व० भट्ट) मथुरानाथ शास्त्री, जयपुर—वाग्देवी विमलयतु मे वीक्षणपथम्। (दिसम्बरमासस्य मुखपृष्ठे)।

श्री (काशी सुमेरुपीठाधीश्वराः शङ्कराचार्यः) महेश्वरानन्द सरस्वतीपादः, धर्मसङ्घ-शिक्षामण्डलम्, दुर्गाकुण्ड, वाराणसी—दर्शन-पीयूष-निर्झरः ११७।

श्री माधवप्रसाद उपाध्यायः, नेपाल—मत्कृते त्वत्कृपा शरत् (० अक्तूबरमासस्य मुखपृष्ठे)।

श्री (स्व०) रघुनाथ शास्त्री सहस्रबुद्धिः, वाराणसी—शुद्धवर्णोच्चारण - शिक्षा - दीक्षा ३९, उपेन्द्र-गुणकीर्तनम् २२२।

श्री रतिनाथ झा, प्राध्यापकः संस्कृतमहाविद्यालयस्य, हिन्दूविश्वविद्यालय, वाराणसी—द्वैवार्षिकी कविभारती—संक्षिप्तः परिचयः ७७।

श्री (पद्मभूषण पण्डितराज) राजेश्वर शास्त्री द्राविडः, रतनबाग, रामनगर, वाराणसी—भारतीया राजनीतिः तात्त्विकं विवेचनम् ८१, १०५।

श्री रामकृष्ण शर्मा आन्ध्रः, दिल्ली—श्रीलालबहादुरशास्त्रिणः स्मृतिः ९।

श्री रामदास कौण्डिन्यः, एम० ए०, साहित्याचार्यः, प्राचार्यः राजकीय-संस्कृत-महाविद्यालयस्य, जामनगर (गुजरात)—कर्मणो गहना गतिः २०१, २२५, २५६, २७५।

श्री रामनाथ पाठकः 'प्रणयी', प्राध्यापक, जैन कालेज, आरा (शाहाबाद, बिहार)—श्री मोहनदासः २५५।

श्री (स्वर्गीय महामहोपाध्याय) रामशास्त्री तैलङ्गः वाराणसी—वितरतु करुणामयी दृशं तरणिः ?, अघवेणीहरं भज हरम् २५।

श्री रामस्वरूपशास्त्री 'अमरः' प्राध्यापकः बालमण्डल-संस्कृत-विद्यालयस्य, तालबहेट, झांसी—महर्घते महामाये ! २३।

श्री 'रेखा-रमणः' वाराणसी—हरिश्चन्द्रीयं वसन्त-विलसितम् ६६।

श्री (स्वर्गीय महामहोपाध्याय) लक्ष्मणशास्त्री तैलङ्गः, वाराणसी—मम निर्णायको रघुवरः ७३।

श्री लक्ष्मीनारायण द्विवेदः, प्राचार्यः श्रीधरसंस्कृत-विद्यालयस्य, तिर्वा, फर्रुखाबाद—शिशिरविलासः १४, ३७, ६१।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्री (स्व०) विन्ध्येश्वरीप्रसाद शास्त्री, वाराणसी—श्री महर्षि-ज्ञानानन्द-चरितं महाकाव्यम् २, २६, ५०, ७४, ९८, १२२, १४६, १८६, २१०, २३४, २५८, २८२।

श्री (डॉ० काशिराजः) विभूतिनारायणसिंह देवः, रामनगर, वाराणसी—विद्या-धर्मखनिः काशी, काशिराज-वंशश्च २४१।

श्री विष्णुदेव पण्डितः, एम० ए०, वेदान्त-शास्त्री, कांकरिया रोड, अहमदाबाद—दधीचि-प्राण-संवादः १३६।

श्री वेदप्रकाश उपाध्यायः—वासन्ती - लीला (मार्चमासस्य मुखपृष्ठे)।

श्री डॉ० वे० राघवन्, संस्कृत-विभागाध्यक्षः मद्रास विश्वविद्यालयः, मद्रास—पाश्चात्त्यसंस्कृत-विदुषां संस्कृतपद्यानि २९१।

श्री शिवकुमार शास्त्री व्याकरणाचार्यः, प्राचार्यः संस्कृत-महाविद्यालयः, इटारसी—आस्तिको महर्षिः कणादः ९४।

श्री (डॉ०) शिवशरण शर्मा, प्राचार्यः राजकीय संस्कृत महाविद्यालय, दतिया (मध्य-प्रदेश)—स्वतन्त्रतेयं नास्ति खेलनम् (जनवरी-मासस्य मुखपृष्ठे); प्रभात-वेला (सितम्बर-मासस्य मुखपृष्ठे)।

श्री श्रीकृष्ण शर्मा, वाराणसी—गोवधनिरोधो मांसभक्षणञ्च १४१।

श्री (समर्थानुगृहीत महात्मा) श्रीधर स्वामी, वरदपुरम्, पो० यडगेमणे, ता० सागर, जि० शिमोगा (मैसूर)—२८१।

श्री सरयूप्रसाद शास्त्री 'द्विजेन्द्रः' विरदोपुर, अजमतगढ़ पैलेस, वाराणसी—देवीभागवतमेव महापुराणम् २१।

श्री (स्वामी) लक्ष्मणशास्त्री, नागौर (राजस्थान)—श्रीहरि-स्तोत्रम् १४५।

श्री हरिसूरिः—शिशुकपातोत्प्रेक्षा - विलासः (नवम्बरमासस्य तृतीयावरणपृष्ठे)।

श्री (डॉ०) हरिदत्त पालीवालः, उपमन्यु-भवनम्, कायमगंज, फर्रूखाबाद—शिशिर-विलास-व्याख्या १४, ३७, ६१; मङ्गलं स्तोत्रञ्च—एकं समीक्षणम् १५५।

आवरण - प्रथमपृष्ठानि—स्वतन्त्रतेयं नास्ति खेलनम् १, अपि पुष्प-सखे ! २, वासन्ती-लीला ३, भगवत्पाद, श्री शङ्कराचार्यानुस्मरणम् ४, गङ्गां हृदब्जे स्मरेत् ५, अर्थमनर्थं भावय नित्यम् ६, आचारः परमो धर्मः ७, निवृत्तरागस्य गृहं तपोवनम् ८, प्रभात-वेला ९, मत्कृते त्वत्कृपा शरत् १०, शून्यं किलैकं स्थितम् ११, दाग्देवी विमलयतु मे वीक्षणपथम् १२।

अभिनन्दन-पत्राणि—श्री हरिरामशास्त्रिशुक्ल-महोदयानाम् (अगस्तमासस्य तृतीयावरणपृष्ठे); श्री काशीनाथ बालकृष्ण गोडसे पादानाम् २३२, श्री कमलाकान्त मिश्रपादानाम् २३२, श्री करपात्र-स्वामिनं प्रति २७९।

सङ्कलितानि—श्री लक्ष्मीनृसिंह मम देहि करावलम्बम् (श्री मदाद्यशङ्कराचार्याः) ९७, कृष्णात्परं किमपि तत्त्वमहं न जाने १८५ बोधि-वृक्षः—स्वातन्त्रबोधः (श्री स्वामी रामतीर्थः) १९४, गोविन्दनामा भव (श्री कविकर्णपूरः) २३३, प्रणय-गीतम् (श्री शुकाचार्याः) २५७, हृदय-भेदः २७०, महामण्डलवृत्तम् (मार्चमासस्य द्वितीयावरणपृष्ठे, अक्तूबरमासस्य चतुर्थावरण-पृष्ठे)।

परीक्षा-फलम्— अखिलभारतीय-धार्मिका-ध्या-पिका-संस्कृत-विद्या-पीठस्य, १९६८ ई० १६५।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तत्रार्थोपस्थितेरशक्तयप्रायत्वात्। एवञ्च प्राकरणिकार्थबोधोत्तरं समागतो व्यञ्जनाव्यापारो व्यर्थः स्यात्। द्वितीयार्थं व्यङ्ग्यार्थं मन्वतां सविधे किमस्य समुचितं समाधानम्?

द्वितीयमतानुयायिनः प्रश्नममुं त्रिधा समुत्तरन्ति।[1] एकः पक्षः कथयति यत् ययाऽभिधया प्राकरणिकार्थोपस्थितिः स व्यापारः समुपस्थित एव। तत्सम्बन्धेन पर्यायतः पदज्ञानमपि समुपस्थितमेव। तद्बलेनैव व्यञ्जनाव्यापारो द्वितीयार्थं समुपस्थापयेत्। द्वितीयपक्षस्येदं मतं यत् मुख्यार्थबोधोत्तरं पदज्ञानं तिष्ठतु मा वा, पदेन प्राप्तः शक्यार्थस्तु (वाच्यार्थस्तु) वर्तत एव। तस्मिन् शक्यार्थे शक्यतावच्छेदकरूपेण पदस्यापि विशेषणतया भानम्। इत्थं विशेषणतया पदमपि उपस्थितमेव। तेनैव व्यञ्जना द्वितीयार्थं समुपस्थापयेत्। तृतीयपक्षः पुनरेवमाह—आवृत्त्या पुनस्तानि पदानि उपस्थापयितुं शक्यन्ते। इत्थमावृत्तिद्वारा पुनरुपस्थितैः पदैः व्यञ्जना अप्राकरणिकानर्थान् समुपस्थापयितुं प्रभवति। तेषामन्वयेन द्वितीयपक्षीयार्थस्यापि शाब्दबोधसम्भवात्।

पण्डितराजकृतं द्वितीयमतखण्डनम्—यदुच्यते, 'प्रकरणादिज्ञानेन प्राकरणिकार्थे तात्पर्यविषयतानिर्णयोत्तरं पूर्वं प्राकरणिकार्थस्य शाब्दबोधः, तदनन्तरञ्च व्यञ्जनाव्यापारद्वारा अतात्पर्यविषयीभूतस्यार्थस्य बोध इति; तत्रेदं जिज्ञास्यते यत् किं नानार्थकस्थले सर्वत्रैव व्यञ्जनलासो यत्र कुत्रचन वा? नाद्यः; नानार्थकस्थले सर्वत्र उभयार्थोपस्थतौ तात्पर्यज्ञानस्य कारणत्वकल्पनं व्यर्थं स्यात्। न चोभयोरर्थयोः कोऽभिधया को वा व्यञ्जनया समुपस्थित इति निश्चेतुम्, व्यञ्जनोपस्थापितार्थस्य स्थाने अभिधोपस्थापितार्थस्य प्रसरकृतामव्यवस्थां रोद्धुं च तात्पर्यज्ञानस्य कारणत्वमावश्यकमिति वाच्यम्; एवं सति नानार्थकस्थले सर्वत्र उपतिष्ठतोऽर्थस्य वाच्यार्थत्वस्वीकार एव युक्तः स्यात्।

यद्युच्येत—अनेकार्थकशब्दैः उभयार्थोपस्थित्यनन्तरं प्रकरणादिद्वारा यत्रार्थे वक्तृतात्पर्यनिर्णयः,

---

१. द्वितीयमतसमर्थकैः व्यञ्जनाव्यापारद्वारा अर्थोपस्थितये पदज्ञानप्राप्त्युपपत्तिसाधिकाः या युक्तयः समुपस्थापिताः, नूनं ताः सर्वथा निर्बलाः। तथा हि—

प्रथमदलस्य कथनमिदं यत् 'प्रथमार्थोपस्थापकोऽभिधाव्यापारस्तत्र तिष्ठत्येव, न च समाप्यते, तत्सम्बन्धेनैव पदज्ञानमपि तत्र वर्तत एव' इति, सर्वथा कपोलकल्पनैव। वस्तुतः प्रथमार्थमुपस्थाप्य अभिधा विलीयते। कार्योत्पत्त्यनन्तरं व्यापारसत्तायाः क्वाप्यदर्शनात्। व्यापारानुपस्थितौ च तन्मूलकपदज्ञानस्य कथा दूरापास्तैव।

द्वितीयदलस्य कथनमिदं यत् 'शक्यार्थे शक्यतावच्छेदकवत् पदस्यापि विशेषणतया भानम्' इति, तदपि कल्पनामात्रम्। अर्थे पदज्ञानस्यावृत्तेः। 'पुस्तकमानय' इति वाक्यश्रवणानन्तरं यदर्थः प्रतीयते, तत्र सर्वेषां सर्वदा तदर्थबोधकशब्दानामपि विशेषणतया प्रतीतिरिति अनुभवपथानाश्रयणात्। पश्चाद् विशेषविमर्शानन्तरं यदा ज्ञायते यदयमर्थः एभिः शब्दैर्निर्गत इति, तदा अर्थे शब्दा विशेषणतया प्रतीयन्ते। क्षणं तथास्वीकारेऽपि विशेषणतया प्रतीयमानाः शब्दास्तथा न कार्यकारिणो यथा स्वरूपतः प्रतीयमानास्ते कार्यकारिणो जायन्ते। स्वरूपतः प्रतीत्यैव शब्दस्य अर्थोपस्थापनक्षमत्वात्।

तृतीयदलस्यापि कथनमिदं यत् 'आवृत्तिद्वारा पुनः पदं प्राप्तुं शक्यम्' इति, व्यञ्जनामेव सर्वथा व्यर्थयति। यतो हि द्वितीयवारं समागतः शब्दः सहैव अभिधामपि समानयेत्। तयैव अपरया अभिधया द्वितीयार्थोपस्थितिसम्भवात्। तथा सति व्यञ्जनाया निरुपयोगात्।

वस्तुतोऽनेकार्थकस्थले सर्वत्र एकरूपयोः द्वयोः शब्दयोरुच्चारणं भवति। द्वावपि शब्दौ एकरूपेणैव पुरः उपतिष्ठतः। उभावपि स्व-स्वाभिधया उभयपक्षीयावर्थौ समुपस्थापयतः। तदनन्तरं प्रकरणादिज्ञानेन [illegible]

निर्णयः सूचयति यदनयोः कोऽर्थः प्राकरणिकः को वाऽप्राकरणिकः? ततः पूर्वं प्राकरणिकपक्षीयार्थस्य, पश्चाच्च अप्राकरणिकपक्षीयार्थस्य शाब्दबोधो भवति। उभावप्यर्थौ वाच्यार्थौ इति स्पष्टं प्रतीयते।

CC-0. Prof. Satya Vrat Shastri Collection. Gurukul Kangri Collection, Haridwar

11260
Digitized by Arya Samaj Foundation Chennai and eGangotri

स धेवेत्थं पूर्वं शाब्दाबोधे उपस्थिते, नापरार्थ इति; तदा एतन्नियमनाय अभिधोपस्थापित-प्राकरणिकार्थ-शाब्दबोधे तात्पर्यनिर्णयस्य हेतुत्वमावश्यकम्। अन्यथा पूर्वमतात्पर्यविषयीभूतार्थस्यापि शाब्दापत्तेः। किन्तु नैवं जायते। तात्पर्यविषयकार्थबोधोत्तरमेव अतात्पर्यविषयकार्थशाब्दबोधदर्शनात्। द्वितीयार्थस्त्वस्मन्मते शाब्दबोध एव, न मानसो बोधः। अत उभयोरर्थयोः परस्पर किमपि भेदकं वक्तव्यम्। तदेव हि वाच्यार्थत्वं व्यङ्ग्यार्थत्वञ्चेति।

तदपि सर्वं व्यर्थमेव; यथा श्लेषस्थले उभयार्थोपस्थितिस्तथैव शब्दशक्तिमूलक-ध्वनिस्थलेऽपि उभयार्थोपस्थिति-स्वीकारेऽनौचित्याभावात्। नेदमपि विचारसहं यत् श्लेषस्थले तु उभयार्थे तात्पर्यज्ञानम्, शब्दशक्तिमूलक-ध्वनिस्थले पुनरेकस्मिन्नेवार्थे, यतो हि वाच्यार्थविषयक-शाब्दबोधे तात्पर्यज्ञानं न कारणम्। यदि वाच्यार्थविषयक-शाब्दबोधे तात्पर्यज्ञानस्य कारणत्वं सिद्ध्येत्, तदा मन्येत यद् ध्वनिस्थले द्वितीयार्थो व्यङ्ग्य इति। किन्त्वस्य साधने वादिनोऽसाफल्यमेव। अतः वाच्यार्थविषयक-शाब्दबोधे तात्पर्यज्ञान-कारणतावादिनो मतस्य शिथिलतया शब्दशक्तिमूलक-ध्वनिस्थले द्वितीयार्थस्य कृते व्यञ्जनास्वीकारोऽनुचितः। तत्र उभावप्यर्थौ वाच्यार्थाविव भवत इति।

यदि वादी द्वितीयपक्षं स्वीकृत्य कथयेद् यत् अनेकार्थकस्थले न सर्वत्र व्यञ्जनोल्लासः। केवलं तादृशे एव स्थले तदुल्लासो यत्र व्यङ्ग्यार्थे कवेस्तात्पर्यं भवेदिति। तदपि न समञ्जसम्; यतो हि व्यङ्ग्यार्थप्रतीतौ तात्पर्यज्ञानस्य कारणत्वं तु वादिनाऽपि न मन्यते। प्रथमकल्प-वित्तारावसरे वादिना यदुक्तम्, तेनैव एतत् स्फुटीभवति। काव्ये यत्र अश्लीलताप्रयुक्तो दोषस्तत्र अप्राकरणिकस्य अश्लीलार्थस्य प्रतीतिस्तु सर्वेषामेव जायते, तथापि कवेस्तत्र तात्पर्यं न भवति। अतः कवितात्पर्यमाधृत्य कुत्र-कुत्रचित् व्यञ्जनोल्लासकल्पनमपि अनुचितमेव। तथा स्वीकारे विनिगमकाभावात्।

'व्यङ्ग्यार्थविषयक-कवितात्पर्यज्ञानं यत्र तत्र व्यञ्जना, नान्यत्र' इत्यपि न वक्तुं शक्यम्; यतो हि व्यङ्ग्यार्थप्रतीतौ तात्पर्यज्ञानस्य कारणत्वं कैरपि नाद्रियते। काव्ये यत्राश्लीलताप्रयुक्तो दोषस्तत्र अश्लीलार्थरूपाप्राकरणिकार्थे कवेस्तात्पर्याभावेऽपि तत्प्रतीतेः। अनेकार्थकशब्दस्थले कुत्र कुत्रचन व्यञ्जनोल्लासं स्वीकुर्वतां सविधे काऽत्र उपपत्तिः?

यद्युच्येत—कवेस्तात्पर्यज्ञानाभावेऽपि श्रोतुरेव द्वितीयार्थशक्तिग्रहो व्यञ्जनोल्लासहेतुः स्यादिति। तदपि न मनोरमम्; चमत्कारजनकद्वितीयार्थप्रतीतये श्रोतुः शक्तिविशेषस्य व्यञ्जनोल्लासहेतुत्वकल्पनापेक्षया नियन्त्रिताभिधाशक्तेरेव हेतुत्वकल्पनं युक्ततरं भाति। शब्दशक्तिमूलकध्वनिस्थले प्राकरणिकाऽप्राकरणिकयोरर्थयोः उभयोः प्रतीतिस्तस्यैव जायते, यस्य शब्दस्य उभयार्थसंकेतग्रहो ज्ञातः स्यात्। यस्य न तादृशं ज्ञानम, ज्ञात्वा च विस्मृतम्, न तस्याप्राकरणिकार्थप्रतीतिः। एतत्तु अप्राकरणिकार्थस्य वाच्यार्थत्वमेव स्फुटीकरोति।

यद्युच्येत—व्यङ्ग्यार्थ-विषयक-शक्तिग्रह एव व्यञ्जनोल्लासे हेतुरिति। तदपि न; यतो हि 'निःशेषच्युतचन्दने०'त्यादिस्थलेषु 'रमणा'दिरूपार्थे 'अधमा'दिपदानां सङ्केताग्रहेऽपि 'अधमा'दिपदेन तद्व्यञ्जनस्य दर्शनात्। यदीदमुदाहरणम् आर्थी व्यञ्जनाया इति कृत्वा त्यज्येत, तथापि शाब्दीव्यञ्जनास्थले शब्दाः सङ्केतिताप्राकरणिकार्थं व्यञ्जनया उपस्थापयन्ति, इत्थं विचित्र कार्य-

(दोषांशः आवरणतृतीयपृष्ठे)
CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

Digitized by Arya Samaj Foundation Chennai and eGangotri

कारणभावकल्पनापेक्षया शब्दार्थयोर्वाच्यवाचकभावसम्बन्धकल्पनस्यैव प्रशस्यत्वात्।

विषयेऽत्र अन्यदप्येकं विचारणीयम्। कतिपये विद्वांस आहुर्यत् अप्राकरणिकार्थोऽस्तु नाम वाच्यार्थः, किन्तु तदैव स तथा यदि बाधितो न स्यात्। अप्राकरणिकार्थस्य बाधितत्वे तु व्यङ्ग्यार्थत्वमेव। यथा—'जैमनीयमलं धत्ते रसायनमयं द्विजः' इत्यत्र जुगुप्सितार्थस्य 'वह्निना सिञ्चति' इतिवत् बाधितत्वेन वाच्यार्थत्वाभावात्। सर्वतन्त्रसिद्धान्तोऽयं यद् बाधनिश्चयस्तद्वत्ताज्ञानप्रतिबन्धकः। व्यञ्जना पुनर्बाधितमप्यर्थं बोधयति। परं वादिन एते सर्वेऽपि तर्काः व्यर्थाः। 'गामवतीर्णा सत्यं सरस्वतीयं पतञ्जलिव्याजात्', 'सौधानां नगरस्यास्य मिलन्त्यर्केण मौलयः' इत्यादिष्वपि वाक्यार्थबाधः, तथापि एतेषां वाच्यार्थविषयकबोधो भवत्येव। तयैव प्रक्रियया 'जैमनीयमलम्' इत्यादावपि सम्भवात्। अन्यथा सर्वेष्वलङ्कारेषु वाच्यार्थोपपत्तये व्यञ्जनास्वीकारापातात्। अतो नानार्थकस्थले अप्राकरणिकार्थबोधाय व्यञ्जनास्वीकार इति रिक्तं वचः।

इत्थं पण्डितराजैः अनेकार्थकस्थले अप्राकरणिकार्थोपस्थित्यर्थं व्यञ्जनास्वीकारवादिनां मतानि खण्डितानि।[1] अग्रे प्राचीनालङ्कारिकाणां प्रतिष्ठारक्षणाय गौणरूपेण अप्राकरणिकार्थस्यापि व्यङ्ग्यार्थत्वकल्पनं तैरनुमतम्। किन्तु अनुमतिरपीयं तत्रैव यत्राप्राकरणिकार्थेन अलङ्कार एव व्यज्यते। यत्र वस्तुरूपाप्राकरणिकार्थोपस्थितिस्तत्र तस्य व्यङ्ग्यत्ववादो गौण एव। पण्डितराजैरिदं ध्वनिकृतां प्रतिष्ठारक्षणार्थमेव उक्तमिति प्रतिभाति। ध्वनिकृद्भिः शब्दशक्तिमूलक ध्वनिस्थले अप्राकरणिकार्थेन सह अलङ्कारव्यञ्जनाया अनिवार्यत्वं स्वीकृतमस्ति। मम्मटाचार्यैस्तु स्पष्टतः एतादृशे स्थले अलङ्काररहित-केवलवस्तुरूप-व्यङ्ग्यार्थस्य सत्त्वं स्वीकृतम्। अभिनवगुप्ताचार्यैरत्र पूर्वमेव सङ्केतितमासीत्। पण्डितराजाः मतमिदं शिथिलं मन्वते।

'रसगङ्गाधर'[1]-परिशीलनेन ज्ञायते यत् ते तत्रैवाप्राकरणिकार्थं व्यङ्ग्यार्थं न मन्वते यत्र रूढस्य यौगिकस्य वा शब्दस्य प्रयोगः। योगरूढ यौगिकरूढशब्देषु पुनस्तेऽपि अप्राकरणिकार्थं व्यङ्ग्यार्थं स्वीकुर्वन्ति। यथा—

योगरूढस्य शब्दस्य योगे रूढ्या नियन्त्रिते।
श्रियं योगस्पृशोऽर्थस्य या सूते व्यञ्जनैव सा॥

इति।

पण्डितराजानां मतमिदं नास्मभ्यमुचितं प्रतिभाति। एतादृशसिद्धान्तस्वीकारे योगरूढस्थले सर्वत्र अप्राकरणिकार्थोऽवयवलभ्य एव मन्तव्यो भवेत्। किन्तु नेदं सर्वत्र दृश्यते। कुत्र-कुत्रचन अवयवलभ्योऽर्थः प्राकरणिको रूढिलभ्यश्च अप्राकरणिको दृश्यते। एतादृशस्थलेषु पण्डितराजानां सर्वाऽपि व्यवस्था भज्येत। पण्डितराजसिद्धान्तानुसारम् एतादृशस्थलेषु प्राकरणिकार्थो व्यङ्ग्यार्थः, अप्राकरणिकश्च वाच्यार्थो भवेत्। परमेतादृशं तु कोऽपि न मनुते। प्रत्नमुदाहरणम् 'अत्रान्तरे कुसुमसमययुगम्···' इत्याद्यं व समादीयताम्। अत्र 'महाकाल'शब्दस्य देवताविशेषरूपो रूढ्यर्थोऽप्राकरणिकः, महर्तुरूपोऽवयवलभ्यः पुनः प्राकरणिकः। इदं तु वक्तुं न शक्यते यत् प्राकरणिकार्थो व्यङ्ग्यार्थः, अप्राकरणिकश्च वाच्यार्थः। अनयाऽनुपपत्त्या परिकल्प्यते अत्र विषये पण्डितराजमतमतादर्थमिवेति दिक्।

---

१. रसगङ्गाधरः पृ० ११८।

१. रसगङ्गाधरः पृ० ११८।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सूर्योदयस्य नियमाः

पत्र-संहिता

१. 'सूर्योदय'-मासिकपत्रस्य वार्षिकं शुल्कं रूप्यकपञ्चकं वर्तते। धनादेश (मनीआर्डर) द्वारा तत्प्रेषणीयम्। वी० पी० द्वारा प्रेषणे ५० पणाः पृथक् प्रदेयाः स्युः।

२. अ.वर्षं गम्भीरसाहित्यसमन्विताः १२ अङ्काः प्रकाश्यन्ते। नवीनग्राहकत्वं प्रथमाङ्कतः (जनवरी-अङ्कतः) एव स्वीक्रियते। माध्यमिकेन केनापि अङ्केन ग्राहकत्वं न स्वीक्रियेत।

३. आंग्लमासस्य २६ दिनाङ्के 'सूर्योदयः' प्रकाशितो भवति। वारद्वयं संशोध्य ग्राहकेभ्यः स प्रेष्यते। अतस्तदलाभे पूर्वं स्वकीय-पत्रालयतस्तदनागमनस्य निर्णयं कृत्वैव १० दिनाङ्कानन्तरं वयं सूचनीयाः।

४. लेख-कवितादीनां भाषा संयता, सरला, शुद्धा च भाव्या। प्रकाशनीय-लेखादीनां स्पष्टाक्षरैः कर्गजस्यैकपृष्ठे एव लेखनमावश्यकम्। अस्वीकृता लेखादयः पोस्टविभागीय-चिटिका-(टिकट) प्राप्त्यनन्तरं परावर्तयितुं शक्यन्ते।

५. सम्पादकीय-विषयसम्बद्धे पत्र-व्यवहारे 'सम्पादकः' इति, व्यवस्थाविभागीय-पत्रव्यवहारे च 'व्यवस्थापकः' इति च स्पष्टं लेखनीयम्। तेन उत्तरलाभे मुधा विलम्बो न भवेत्।

विज्ञापन-शुल्कम्

सूर्योदये सुरुचिपूर्णं विज्ञापनं प्रकाश्यते। एकवारं तस्य प्रकाशनस्य शुल्कक्रमश्च अधोलिखितोऽस्ति। सार्वकालिकस्य दीर्घकालिकस्य च विज्ञापनस्य कृते विशेष-सौविध्याय पत्र-व्यवहारः कार्यः।

साधारणस्य प्रतिपृष्ठस्य	१००) रु०	साधारणस्य प्रत्यर्धपृष्ठस्य	६०) रु०
साधारणस्य चतुर्थांशपृष्ठस्य	३५) रु०	आवरण-चतुर्थपृष्ठस्य	२००) रु०
आवरण-द्वितीय-तृतीयपृष्ठयोः	१५०) रु०	प्रथमावरणपृष्ठ विज्ञापनं न स्वीक्रियेत।	

—सङ्केतः—

'सूर्योदय'-कार्यालयः, भारतधर्म-महामण्डलम्, जगत्गंज, वाराणसी।

सम्पादकः, प्रकाशकः, मुद्रकश्च—गोविन्द नरहरि बैजापुरकरः,
श्रीभारतधर्ममहामण्डलम्, जगतगंज, वाराणसी कैण्ट।
मुद्रण-स्थानम्—आनन्दकानन प्रेस, सी० के० ३६/२, वाराणसी।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

112601

Digitized by Arya Samaj Foundation Chennai and eGangotri

Compiled
1999-2000

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri